श्री लक्ष्मीवल्लभगणि-विरचित-टीका-समेतम्

श्री उत्तराध्ययनसूत्रम्

(भाग-२)

: संपादको :

पंन्यास प्रवर श्री वज्रसेनविजयजी गणी

मुनि श्री भाग्येशविजयजी

: प्रकाशक :

भद्रंकर प्रकाशन

४९/१, महालक्ष्मी सोसायटी,

सुजाता फ्लेटनी पासे, शाहीबाग,

अमदावाद-३८० ००४. ✆ : २८६०७८५

॥ श्री आदिनाथाय नमः ॥

श्री लक्ष्मीवल्लभगणि-विरचित-टीका-समेतम्

श्री उत्तराध्ययनसूत्रम्

(भाग-२)

टीकाकार

श्री लक्ष्मीवल्लभ गणी



: संपादको :

पंन्यास प्रवर श्री वज्रसेनविजयजी गणी

मुनि श्री भाग्येशविजयजी

●

: प्रकाशक :

भद्रंकर प्रकाशन

४९/१, महालक्ष्मी सोसायटी,

सुजाता फ्लेटनी पासे, शाहीबाग,

अमदावाद-३८० ००४. ✆ : २८६०७८५

: સૌજન્ય :

આ પુસ્તકમાં નીચે મુજબ શ્રી સંઘોનો સહકાર મળેલ છે.

૧. શ્રી શાન્તિભુવન જૈન ઉપાશ્રય જામનગર તરફથી પ.પૂ. આચાર્ય શ્રી જયંતશેખરસૂરીશ્વરજી મ. ના શિષ્યરત્ન પ.પૂ. મુનિશ્રી દિવ્યાનંદ વિજયજી મ.ની ૧૦૦+૧૦૦ વર્ધમાન તપની ઓળી નિમિત્તે.

૨. વાગડવાળા પૂ. સાધ્વીજી કુમુદશ્રીજી મ. ની સ્મૃતિમાં શ્રી મનફરા જૈન સંઘ (કચ્છ વાગડ) તરફથી

પ્રથમ આવૃત્તિ : વિ. સં. ૨૦૪૧ ચૈત્ર સુદ - પ્રથમ ૬

દ્વિતીય આવૃત્તિ : વિ. સં. ૨૦૫૮ કારતક સુદ - ૫

: પ્રાપ્તિસ્થાન :

હાલાર તીર્થ-આરાધના ધામ
વાયા જામખંભાલીયા
જી. જામનગર
મુ. ભડાલીયા સીંહણ

સરસ્વતી પુસ્તક ભંડાર
રતનપોળ,
હાથીખાના,
અમદાવાદ-૧

કિંમત રૂ. ૧૫૦=૦૦

: મુદ્રક :
ભરત પ્રિન્ટરી
(કાન્તિલાલ ડી. શાહ)
ન્યૂ માર્કેટ, પાંજરાપોળ, રીલીફ રોડ,
અમદાવાદ-૧. ફોન : ૨૧૩૫૩૮૦

શ્રી ભીલડીપાર્શ્વનાથાય નમઃ
ઝીંઝુવાડામંડન શ્રી શાન્તિનાથાય નમઃ
ભદ્ર-વિલાસ-ૐકારસૂરીશ્વરેભ્યો નમઃ

સંપાદકીય

પવિત્ર ઉત્તરાધ્યયન સૂત્રનું પારાયણ કરીએ છીએ, તેમાં થોડે ઊંડે ઉતરીએ છીએ ને એક ઝરો આપણી ભીતર ફૂટી નીકળે છે. ઝરો - જે પૂરી ચેતનાને ઝબોળી દે.

ઝરો જ્યાંથી પ્રગટે છે એ પોઈન્ટ આત્મીયતાનું પોઈન્ટ છે. વાંચતાં વાંચતાં, ક્યારેક આપણે અટકી જઈએ છીએ. મારા ભગવાને મારા માટે કેટલી વત્સલતાપૂર્વક આ કહ્યું છે... એવું વિચારતાં જ આપણી આંખો ભીની ભીની બની જાય છે. બસ, આ જ છે પેલા ઝરાનું પ્રાગટ્ય.

ને ઉત્તરાધ્યયન સૂત્રમાં તો આવા કેટલા બધા ફાઈન ફાઈન પોઈન્ટ્સ છે !

ચોથા અધ્યયનનો ઉઘાડ કેટલો તો માર્મિક છે : **'असंखयं जीविय मा पमायए....'** કેવો સરળ ને સીધો ઉપદેશ ! 'જીવન ક્ષણભંગુર છે. એક ક્ષણનો પણ પ્રમાદ આવા અસ્થાયી જીવનમાં કેમ પાલવી શકે ? વૃદ્ધાવસ્થા-જે હર પળે સામે મંડરાઈ રહી છે, આવશે ત્યારે કોણ રક્ષણ કરશે ?' આ ઉપદેશધારાને જો આપણે આત્મીયતાનો મઝાનો પુટ આપી દઈએ તો આપણી ભીતર પેલો ઝરો કેમ ન પ્રગટે ?

છત્રીશ અધ્યયનોના વિષયોની આ સૂચિ જ તમને બતાવશે કે પવિત્ર ઉત્તરાધ્યયન સૂત્રમાં કેટલાં તો ગંગોત્રી પોઈન્ટ્સ છે; જ્યાંથી અનુપ્રેક્ષાની સ્વતંત્ર ગંગા વહી શકે...

(૧) **વિનય અધ્યયન** :- જેની ૪૮ ગાથામાં વિનયધર્મનું સુંદર વર્ણન કરવામાં આવેલ છે. સાથો સાથ વિનીત સાધુ કોને કહેવાય ? અવિનીત સાધુ કોને કહેવાય તેનાં લક્ષણો-દૃષ્ટાંતો બતાવેલ છે. ગુરુનાં કર્તવ્યોનો પણ ઉલ્લેખ છે. ગુરુ-શિષ્ય સંબંધ જાણવા માટે આ અધ્યયન ઘણું ઉપયોગી છે. દશવૈકાલિકનું ૯મું અધ્યયન પણ વિનયના વિષય પર સારો પ્રકાશ ફેંકે છે.

(૨) **પરીષહ** :- સાધુઓને સંયમ જીવનમાં આવનાર મુખ્ય ૨૨ ઉપસર્ગસ્થાનો પર કેમ વિજય પ્રાપ્ત કરવો અને કયા કયા મહાપુરુષોએ આ પરીષહો પર વિજય પ્રાપ્ત કરી સ્વ-પર કલ્યાણ સાધ્યું તેનું વર્ણન હૃદયદ્રાવક છે-સંયમીજીવનમાં સમાધિ રાખવા માટે આ અધ્યયન ઘણું માર્ગદર્શન પુરું પાડે છે...પ્રારંભમાં ભૂમિકા રૂપે થોડું ગદ્ય છે. પાછળ ૪૬ શ્લોકો છે.

(૩) **ચતુરંગીય** :- ૨૦ ગાથાના આ અધ્યયનમાં મોક્ષનાં સાધનભૂત ચાર દુર્લભ અંગોનું પ્રતિપાદન કરેલ છે.

(૪) **અસંસ્કૃત** :- ૧૩ ગાથાના આ અધ્યયનમાં સંસારની નશ્વરતાનું દર્શન કરાવીને

ભારંડપક્ષીની જેમ અપ્રમત્ત રહેવાનો ઉપદેશ ભારપૂર્વક જણાવેલ છે-સૌથી નાનું પણ આ અધ્યયન અર્થથી ગંભીર છે.

(૫) **અકામમરણ** :- ૩૨ શ્લોકાત્મક આ અધ્યયનમાં ધર્મમય મરણ અને અધર્મમય મરણની વાતનો ઉલ્લેખ છે. ધર્મવિહીન મનુષ્યનું અકામમરણ ને ધર્મયુક્ત માનવીનું સકામમરણ...પંડિતમરણ-સમાધિમરણ વિષે પણ ચર્ચા કરવામાં આવી છે.

(૬) **ક્ષુલ્લકનિર્ગ્રન્થીય** :- ૧૭ ગાથાનાં આ અધ્યયનમાં સમ્યગ્જ્ઞાન અને શુદ્ધ આચાર પાળવાનું હૃદયસ્પર્શી ઉદ્બોધન કરાયું છે. આમાં સાધુ સાધ્વી માટે પ્રેરણાનો સ્રોત છે. સમવાયાંગમાં આનું નામ પુરુષવિદ્યા મળે છે.

(૭) **ઔરભ્રીય** :- ઉરભ્ર એટલે બકરો.

૩૦ ગાથાનાં આ અધ્યયનમાં સંસારાસક્ત જીવોની દુર્દશાનું માર્મિક ચિત્રણ બતાવ્યું છે. મહેમાનના ભોજનને માટે ગૃહસ્વામી દ્વારા પળાયેલ બકરાનો વધ કરાય છે. તેના દૃષ્ટાંત દ્વારા તથા બીજા જુદા જુદા પાંચ દૃષ્ટાંત દ્વારા સંસારનાં સ્વાર્થિક સંબંધોનું જ્ઞાન કરાવવામાં આવેલ છે.

(૮) **કાપિલીય** :- કપિલ ઋષિના જીવન ચરિત્ર દ્વારા આ અધ્યયનની ૨૦ ગાથામાં દુર્ગતિથી બચવા માટે પાપના બાપ લોભનો ત્યાગ કરવાનો ઉપદેશ મુખ્યત્વે વર્ણવેલ છે.

(૯) **નમિપ્રવ્રજ્યા** :- ૬૨ શ્લોકની અંદર આ અધ્યયનમાં પ્રવ્રજ્યાને માટે અભિનિષ્ક્રમણ કરતાં નમિરાજર્ષિ સાથે બ્રાહ્મણવેશધારી ઈન્દ્રનો આધ્યાત્મિક સંવાદ સંગૃહીત છે.

ઈન્દ્ર મહારાજા પ્રશ્ન કરે છે અને નમિરાજર્ષિ ઉત્તર આપે છે. એકંદર આખું અધ્યયન સંવાદાત્મક છે.

(૧૦) **દ્રુમપત્રક** :- ૩૭ ગાથાનાં આ અધ્યયનમાં વૃક્ષનાં પીળાં પાંદડાનાં દૃષ્ટાંતથી જીવનની નશ્વરતા બતાવવામાં આવી છે. **'समयं गोयम मा पमायए'** પદને વારંવાર પુનરાવૃત્ત કરી ગૌતમ સ્વામીજીનાં ઉપલક્ષણથી સર્વેને ક્ષણ પણ પ્રમાદ ન કરવાનું સૂચિત કરેલ છે.

(૧૧) **બહુશ્રુતપૂજા** :- ૩૨ ગાથાનાં આ અધ્યયનમાં બહુશ્રુતની પ્રશંસા કરાઈ છે. પ્રારંભમાં વિનય અધ્યયનની જેમ વિનીત-અવિનીતનાં ગુણ-દોષોનું વર્ણન કરીને વિનીતને બહુશ્રુત અને અવિનીતને અબહુશ્રુત તરીકે ગણાવેલ છે.

(૧૨) **હરિકેશીય** :- ચંડાલજાતિમાં જન્મ લેવા છતાં ઉદાત્ત ચરિત્રના સ્વામી હરિકેશિ મુનિનું જીવન ૪૭ શ્લોકની અંદર ગૂંથેલું છે. સાથે સાથે તેમની અને બ્રાહ્મણોની વચ્ચેનો સંવાદ નિરૂપ્યો છે...કે જે સંવાદમાં જાતિવાદની સ્થાપના કાર્યથી કરી છે. તથા અહિંસા-યજ્ઞની શ્રેષ્ઠતા બતાવી છે.

(૧૩) **ચિત્રસંભૂતીય** :- ૩૫ ગાથાનું આ અધ્યયન ધર્મની માર્મિક સ્થિતિનું વર્ણન બતાવે છે. ચિત્ર અને સંભૂતમુનિનાં જીવનચરિત્રની પૂર્વભવોની છ છ ભવની સાંકળ સાથે કર્મની અકળલીલાનાં દર્શન કરાવ્યાં છે. ધર્મ પછી કરાતાં નિયાણા દ્વારા ઉત્તરોત્તર કેવી દુર્દશા-દુર્ગતિની પરંપરા ખડી થાય છે તેના પર પ્રકાશ પાડતું આ અધ્યયન અત્યંત મનનીય છે.

(૧૪) **ઈષુકારીય** :- ૫૩ ગાથાના આ અધ્યયનમાં ઈષુકાર નગરના ૬ જીવોનાં દીક્ષાનું વૈરાગ્ય ઉત્પન્ન કરે તેવું વર્ણન છે. દાર્શનિક વિષયો પર સંવાદ પણ છે.

(૧૫) **સભિક્ષુ** :- વેશ ધારણ કરવા માત્રથી સાધુ નથી થવાતું, માટે સાધુનું વ્યક્તિત્ત્વ કેવું હોવું જોઈએ તે - ૧૬ ગાથાના આ અધ્યયનમાં બતાવ્યું છે અને દરેક ગાથાના અંતમાં 'સભિક્ખુ' પદ મૂકેલ છે.

(૧૬) **બ્રહ્મચર્ય સમાધિ** :- ગદ્ય-પદ્યાત્મક આ અધ્યયનમાં જીવનની ઉન્નતિ માટે મહત્ત્વની વાત બતાવી છે બ્રહ્મચર્યની....! બ્રહ્મચર્યની મહત્તા-તેનાથી થતા અમૂલ્ય લાભો અને બ્રહ્મચર્યની રક્ષા માટે કરવામાં આવતી વાડોની વાતો જણાવી છે.

(૧૭) **પાપશ્રમણીય** :- સાધુત્વથી, સાધુનાં આચારોથી જે ભ્રષ્ટ થાય તે પાપશ્રમણ કહેવાય છે. કેટલી કેટલી રીતે પાપશ્રમણીયતા પ્રગટે તેનું વર્ણન આ અધ્યયનની ૨૧ ગાથામાં આપ્યું છે.

(૧૮) **સંજય** :- રાજર્ષિ સંજયનું જીવનચરિત્ર ૫૪ ગાથામાં આલેખ્યું છે. સાથે સાથે પ્રસંગવશ ઘણા રાજાઓએ દીક્ષા લીધી તેનું વર્ણન છે.

(૧૯) **મૃગાપુત્રીય** :- મૃગાપુત્રની વૈરાગ્યોત્પાદિકા કથા ૯૯ ગાથામાં કંડારવામાં આવી છે. પોતાનાં માતા-પિતા સાથે થયેલ સંવાદ પણ સુંદર છે. સાધુનાં આચારનું કથન કરી પ્રસંગોપાત નારકીય કષ્ટોનું વર્ણન આપવામાં આવ્યું છે. મૃગચર્યાનાં દૃષ્ટાંતથી ભિક્ષાચર્યાનું વર્ણન છે.

(૨૦) **મહાનિર્ગ્રન્થીય** :- અનાથી મુનિ અને રાજા શ્રેણિકની વચ્ચે સનાથ અને અનાથવિષયક સંવાદ રોચક છે. મહાનિર્ગ્રન્થનો અર્થ સર્વવિરત સાધુ કરેલ છે.

(૨૧) **સમુદ્રપાલીય** :- ૨૪ પદ્યાત્મક આ અધ્યયનમાં સમુદ્રપાલની કથાનું વર્ણન કરી સુંદર બોધ ફરમાવેલ છે.

(૨૨) **રથનેમીય** :- ૫૧ ગાથાનાં આ અધ્યયનમાં મહત્ત્વપૂર્ણ વાત બતાવી છે. શ્રી રથનેમિજીને ઉત્પથમાંથી પથ પર લાવવા શ્રી રાજીમતીએ કરેલ ઉદ્‌બોધન અત્યંત હૃદયસ્પર્શી છે-પ્રસંગોપાત પ્રભુ શ્રી અરિષ્ટનેમિ, કૃષ્ણ આદિનું જીવન ચરિત્ર છે.

(૨૩) **કેશિગૌતમીય** :- ૮૯ ગાથાનાં આ અધ્યયનમાં ભગવાન્ પાર્શ્વનાથના સંતાનીય કેશી સ્વામીજી અને પ્રભુવીરના શિષ્ય પ્રથમ ગણધર શ્રી ગૌતમ સ્વામીજી વચ્ચે થયેલ ધર્મવિષયક સંવાદ છે. સચેલ-અચેલ, ચાર મહાવ્રત-પાંચ મહાવ્રત આદિ વિષયો બાબત પ્રકાશ પાડ્યો છે.

(૨૪) **પ્રવચન માતા** :- ૨૭ ગાથામાં ચારિત્ર જીવનનો ઉછેર જે માતાઓના ખોળે થાય છે તે અષ્ટ પ્રવચન માતાનું વર્ણન છે.

(૨૫) **યજ્ઞીય** :- ૪૫ ગાથાના આ અધ્યયનમાં જયઘોષમુનિ મહારાજ યજ્ઞ મંડપમાં બ્રાહ્મણોની સાથે સંવાદ કરતાં સાચો બ્રાહ્મણ કોણ ? તેનું સ્વરૂપ શું ? આધ્યાત્મિક યજ્ઞ કોને કહેવાય ? વિગેરે વસ્તુ પર પ્રકાશ પાથરે છે.

(૨૬) સમાચારી :- ૫૩ ગાથાનાં આ અધ્યયનમાં સાધુ મહારાજની સામાન્ય દિનચર્યાનું અને રાત્રિચર્યાનું વર્ણન છે. સાધુની સમાચારીનું દિગ્દર્શન કરાવેલ છે.

(૨૭) ખલુંકીય :- ખલુંકનો અર્થ દુષ્ટ બળદ છે. ૧૭ ગાથાની અંદર દુષ્ટ બળદના દૃષ્ટાંત દ્વારા અવિનીત શિષ્યોની રહેણી-કરણી બતાવેલ છે. તેનું પરિણામ શું ? તેનું કથન કરેલ છે.

(૨૮) મોક્ષમાર્ગગતિ :- ૩૬ ગાથાના આ અધ્યયનમાં મોક્ષના માર્ગ સ્વરૂપ રત્નત્રયીનું વર્ણન છે.

(૨૯) સમ્યક્ત્વપરાક્રમ :- દર્શન, જ્ઞાન, ચારિત્રનાં વિભિન્ન તત્ત્વોને નજર સમક્ષ રાખી ૭૩ પ્રશ્નો અને ૭૩ ઉત્તરોમાં આધ્યાત્મિક વિકાસની સીડીઓ બતાવી છે. આખું અધ્યયન ગદ્યબદ્ધ છે-

(૩૦) તપોમાર્ગ :- ૩૭ ગાથાનાં અધ્યયનમાં મોક્ષ માટેના શોર્ટકટ જેવા સમ્યક્તપનું વર્ણન છે. બાહ્ય-અભ્યંતર ભેદ ભિન્ન તપથી શું શક્ય નથી ?

(૩૧) ચરણવિધિ :- ૨૧ ગાથાનાં આ અધ્યયનમાં ૧ થી લઈને ૩૩ સંખ્યા સુધી દર્શન-જ્ઞાન-ચારિત્રની આરાધનામાં લાગતી આશાતનાનું પ્રતિપાદન છે. સાથે ચારિત્રવિધિનું પ્રતિપાદન પણ છે. અને અંતમાં ૩૩ બાબતમાં જે હંમેશા ઉપયોગવંત છે. દરેક પ્રવૃત્તિ ઉપયોગપૂર્વક કરે છે તે સાધુ સંસારમાં પરિભ્રમણ નથી કરતા, એમ દર્શાવ્યું છે.

(૩૨) પ્રમાદસ્થાનીય :- ૧૧૧ ગાથાનાં આ અધ્યયનમાં મનોજ્ઞ અને અમનોજ્ઞ વિષયો તરફ રાગ-દ્વેષની પ્રવૃત્તિ-નિવૃત્તિ અનાદિકાળથી કરતા આવ્યા છીએ. તેને ફંગોળવાની વાત મુખ્ય છે. ઇન્દ્રિયોની રાગ-દ્વેષમય પ્રવૃત્તિ જ પ્રમાદનું સ્થાન છે. તેને મૂળથી ઉખેડી કાઢવા કેવા ઉપાયો કરવા જોઈએ તે વિસ્તારથી બતાવ્યું છે. અને બ્રહ્મચર્ય પાલન ઉપર પણ ભાર મૂકવામાં આવ્યો છે.

(૩૩) કર્મપ્રકૃતિ :- ૨૫ ગાથાનાં આ અધ્યયનમાં કર્મની મૂલ તથા ઉત્તરપ્રકૃતિનું વર્ણન છે. કર્મનાં સ્થિતિબંધ આદિ પણ નિરૂપેલ છે.

(૩૪) લેશ્યા :- છ લેશ્યા-જંબૂવૃક્ષનાં દૃષ્ટાંત દ્વારા બતાવેલ છે, લેશ્યાનો અર્થ શું ? ઇત્યાદિ પ્રતિપાદન આ અધ્યયનની ૬૧ ગાથામાં સુંદર રીતે કરાયેલ છે.

(૩૫) અનગાર :- ગૃહવાસનો ત્યાગ કરી, પ્રવ્રજ્યા ગ્રહણ કરનારા મુનિનું શ્રમણ જીવન કેવું હોવું જોઈએ, તથા મુનિએ આરંભ વિગેરેનો ત્યાગ કરવો જોઈએ તેનું વર્ણન આ અધ્યયનની ૨૧ ગાથામાં છે.

(૩૬) જીવાજીવવિભક્તિ :- જીવવિભાગ અને અજીવવિભાગનું ભેદ-પ્રભેદ સહિતનું વર્ણન ૨૭૨ ગાથામાં કરાયેલ છે. અંતમાં જીવનને સમાધિમય બનાવી સમાધિમરણ પ્રાપ્ત કરવાની વાત બતાવતાં સમાધિમરણનું વર્ણન છે અને ઉત્તરાધ્યયનને પ્રભુ મહાવીરનો અંતિમ ઉપદેશ કહેલ છે.

આ રીતે ૩૬ અધ્યયનમાં ધર્મકથાનુયોગ ક્યાંક છે તો ક્યાંક આચારનું પ્રતિપાદન હોવાથી ચરણકરણાનુયોગ પણ છે. તત્ત્વોની, પદાર્થોની, કર્મોની વાત પણ ક્યાંક હોવાથી દ્રવ્યાનુયોગ પણ છે...

ઉત્તરાધ્યયન પર યદ્યપિ ઘણી ઘણી સમર્થ અને વિદ્વદ્‌ભોગ્ય વૃત્તિઓ વિદ્યમાન છે. તથાપિ ખરતરગચ્છીય શ્રીમાન્ **લક્ષ્મીવલ્લભગણિજી** મ.એ આ દીપિકા ટીકા પ્રાથમિક કક્ષાનાં અભ્યાસીને લક્ષમાં લઈને કરી હોય તેમ જણાય છે.

ગ્રન્થકાર :-

શ્રી વૃત્તિકાર ભગવંત પ્રાયઃ ૧૮મી શતાબ્દિમાં થયેલ છે. અને તેઓશ્રીએ આ દીપિકા- વૃત્તિ પ્રાયઃ કરીને વિક્રમ સંવત્ ૧૭૨૫ થી ૧૭૫૦ વચ્ચે બનાવી હોય તેમ જણાય છે. આ સિવાય બીજા બીજા ગ્રંથો અને ટીકાઓ પણ તેમણે રચેલ છે.

'જૈન સાહિત્યનો સંક્ષિપ્ત ઈતિહાસ' માં **મોહનલાલ દલીચંદે** જણાવ્યું છે તે અનુસાર-

૧૭૨૭માં તેમને વિક્રમાદિત્ય પંચદંડ રાસ અને ૧૭૪૫માં ધર્મોપદેશ પર વૃત્તિ તથા કલ્પસૂત્ર પર કલ્પદ્રુમકલિકા વૃત્તિ પણ રચી છે.

ગ્રંથકારશ્રીએ પોતાની ગુરુપરંપરાનો ઉલ્લેખ ગ્રંથના અંતમાં આ પ્રમાણે કર્યો છે.

શ્રી જિન કુશલસૂરિજી મહારાજ

ઉપાધ્યાયશ્રી વિનયપ્રભગણિજી મહારાજ

ઉપાધ્યાયશ્રી વિજયતિલકગણિજી મહારાજ

ઉપાધ્યાયશ્રી ક્ષેમકીર્તિગણિજી મહારાજ

ઉપાધ્યાયશ્રી તેજોરાજગણિજી મહારાજ

ઉપાધ્યાયશ્રી હર્ષકુંજરગણિજી મહારાજ

ઉપાધ્યાયશ્રી લબ્ધિમંડનગણિજી મહારાજ

ઉપાધ્યાયશ્રી હેમકાન્તિગણિજી મહારાજ

ઉપાધ્યાયશ્રી શ્રી લક્ષ્મીકીર્તિગણિજી મહારાજ

ઉપા. શ્રી સોમહર્ષગણિજી મ. **ઉપા. શ્રી લક્ષ્મીવલ્લભગણિજી મ.**

જુઓ પ્રશસ્તિ - પૃષ્ઠ નંબર.....(૨૭૯)

અન્ય વૃત્તિઓ :

મહિમાવંતા આ આગમ ગ્રન્થ પર અન્ય કર્તૃક વૃત્તિઓ પણ છે-

(૧) **નિર્યુક્તિ** - પૂ. શ્રી ભદ્રબાહુસ્વામી મ. વિરચિત છે, જે સૌથી પ્રાચીન છે. ૫૫૯ શ્લોક છે.

(૨) **ચૂર્ણિ** - ઉત્તરાધ્યયન સૂત્ર અને નિર્યુક્તિ પર પૂ. જિનદાસગણિજી મહારાજ (ઈસ્વી. ૬ઠ્ઠી શતાબ્દિ)

(૩) **શિષ્યહિતા** - ટીકા અથવા બૃહદ્‌વૃત્તિ અથવા પાઈય ટીકા વાદિવેતાલ શાન્તિસૂરિ મ. (સન ૧૦૪૦ આસપાસ)

(૪) **સુખબોધા ટીકા** :- બૃહદ્‌ગચ્છીય નેમિચન્દ્રસૂરિ મ. (વિ.સં. ૧૧૨૯), જ્ઞાનસાગરસૂરિ મ. કૃત અવચૂરિ (વિ.સં. ૧૪૪૧), કીર્તિવલ્લભગણિ મ. ની ટીકા (૧૫૫૨), ઉપાધ્યાયશ્રી કમલસંયમ મ. (૧૫૫૪), ઉપા. શ્રી તપોરત્ન મ. ની લઘુવૃત્તિ (૧૫૫૦), વિનયહંસ મ. કૃતા વૃત્તિ-(વિ.સં. ૧૫૬૭ થી ૧૫૮૧), માણિક્યશેખરસૂરિ મ. ની દીપિકા ટીકા, અજિતદેવસૂરિ મ. કૃતા ટીકા (૧૬૨૯), ગુણશેખર મ. કૃતા ચૂર્ણિ; ભાવવિજયગણિ મ. કૃતા ટીકા (૧૬૮૯), શ્રી હર્ષનંદનગણિ મ. કૃતા ટીકા (૧૭૧૧), શ્રી ધર્મમંદિરગણિ મ. કૃતા મકરન્દ ટીકા (૧૭૫૦), શ્રી ઉદયસાગરજી મ. કૃતા દીપિકા ટીકા (૧૫૪૬), હર્ષકુલ મ. ની દીપિકા (૧૬૦૦), અમરદેવસૂરિ મ. કૃતા ટીકા, શાન્તિભદ્રાચાર્યની ટીકા, મુનિચન્દ્રસૂરિ મ. કૃતા ટીકા, જ્ઞાનશીલગણિ મ. કૃતા અવચૂરિ- આમાંથી ઘણી અપ્રકાશિત છે.

પ્રેરણા :

પ્રસ્તુત દીપિકા વૃત્તિ સહિત ઉત્તરાધ્યયન સૂત્રનું સૌથી પ્રથમ પ્રકાશન **રાય ધનપતસિંહજી** તરફથી થયેલ. ત્યારબાદ જામનગર નિવાસી **પંડિત હીરાલાલ હંસરાજે** પ્રકાશન કરેલ. હમણાં હમણાં આ ગ્રંથ અપ્રાપ્ય હતો. પુનર્મુદ્રણની આવશ્યકતા જોઈ પૂ. પં. **શ્રી પ્રદ્યુમ્નવિજયજી ગણિ** દ્વારા પ્રેરિત થઈને પ.પૂ. મુનિરાજશ્રી **વજ્રસેનવિજયજી** મહારાજે મને પ્રેરણા કરી અને આ કામ સંપન્ન થયું...

પ્રસ્તુત સંસ્કરણ :

પ્રસ્તુત ગ્રંથના સંપાદનમાં બે હસ્ત લિખિત પ્રતનો ઉપયોગ કર્યો છે.

(૧) L સંજ્ઞક પ્રત - લાલભાઈ દલપતભાઈ ઈન્સ્ટીટ્યૂટની (પોથી નં. ૨૦, પુસ્તક નં. ૯૦૨૦) છે. જેની લંબાઈ ૯૫" - પહોળાઈ - ૪" છે. પૃષ્ઠ સંખ્યા ૨૫૭.

ગ્રન્થાન્તે લેખન સંવત્ આદિ નીચે મુજબ...

ગ્રન્થાગ્રં-૧૫૩૦૦...

સંવત્ ૧૮૫૭ રા મિતિ કાર્તિક સુદિ ૬. **તિથૌ ભૌમવારે ભટ્ટારક શ્રી જિનહર્ષ સૂરીશ્વરાન્ વિજય રાજ્યે, ભટ્ટારક શ્રી જિનભદ્રસૂરિજી શાખ્યાયાં ઉપાધ્યાય શ્રી ક્ષમાપ્રમોદજી ગણિવરવરાન્ તત્ શિષ્ય ઉપાધ્યાયશ્રી ઉદયધર્મગણિ ગણિવરાન્ તત્ શિષ્ય પં પ્ર. શ્રી રત્નકલ્યાણગણિ ગણિવરાન્ તત્ શિષ્ય પં. પ્ર. લક્ષ્મીરંગમુનિ લિખતે પુસ્તક । શ્રી ફલવર્દ્ધિકાય । ચતુર્માસિકસ્થિતાયાં, શ્રી ઋષભસ્વામિપ્રાસાદાત્ ।**

(૨) D સંજ્ઞક પ્રત. અમદાવાદ દોશીવાડાની પોળમાં રહેલ ડહેલાનાં ઉપાશ્રયના ભંડારની છે - આ પ્રતનાં પૂર્વાર્ધનો આ સંપાદનમાં ઉપયોગ થઈ શક્યો છે.

(૩) મુ૦ ૧ સંજ્ઞક પ્રત. રાય ધનપતસિંહ પ્રકાશિત ઉત્તરાધ્યયન સૂત્ર છે.

વૃત્તિમાં આવતા સાક્ષીપાઠોને જુદા ટાઈપથી અલગ બતાવ્યાં છે. તથા તેની અકારાદિ સૂચિ પણ પરિશિષ્ટમાં આપી છે. ટીકામાં આવતા કથાનકોની અલગ સૂચિ અકારાદિકમથી

આપેલ છે. ગાથા અકારાદિ ક્રમ પણ આપેલ છે. ઘણી કાળજીથી પ્રૂફ જોવા છતાં કેટલીક અશુદ્ધિઓ રહી જતી હોય છે. કેટલીક અશુદ્ધિઓ મુદ્રણ દરમિયાન ટાઈપો તૂટવાથી પણ સર્જાય છે. જે અશુદ્ધિઓનો ખ્યાલ વાંચતા આવી જાય છે. તે શુદ્ધિપત્રકમાં આપી નથી. જ્યાં ગેરસમજ થવા સંભવ છે તેનું જ શુદ્ધિપત્રક આપ્યું છે. વાચકોને એનો ઉપયોગ કરવા પૂર્વક વાંચવા ભલામણ છે.

ઋણ સ્વીકાર :

પ્રસ્તુત કાર્ય પરમકૃપાળુ પરમાત્માની કૃપાથી તથા પ.પૂ. શાસનપ્રભાવક આચાર્યદેવ શ્રીમદ્ વિજય **ૐકારસૂરીશ્વરજી** મહારાજ તથા પ.પૂ. **ચન્દ્રયશ વિજયજી** મ.સા.નાં આશિર્વાદથી સંપન્ન થયું છે.

-પૂજ્યપાદ મુનિરાજશ્રી **અરવિંદવિજયજી** મહારાજે પ્રૂફ રીડિંગ તથા છપાયેલા ફર્માની નકલો જોઈ આપીને શુદ્ધિપત્રક આદિમાં મને ઘણી જ સહાયતા કરી છે.

પૂજ્યપાદ મુનિરાજશ્રી **યશોવિજયજી** મહારાજે ઘણે ઘણે સ્થળે માર્ગદર્શન આપી કામને ઘણું સરળ બનાવી આપ્યું છે.

પૂજ્યપાદ સંશોધક મુનિરાજશ્રી **મુનિચંદ્રવિજયજી** મહારાજે સંપાદનની પદ્ધતિઓ બતાવી કામ કેમ કરવું આદિ માહિતી આપી આ ક્ષેત્રમાં પગલાં પાડતાં શીખવ્યું છે.

આ બીજા ભાગનાં ઘણાખરાં પ્રૂફો મુનિરાજશ્રી **અનંતદર્શનવિજયજી** મ.એ જોઈ આપીને અપૂર્વ શ્રુતભક્તિ વ્યક્ત કરી છે. સંપાદન-પ્રેરણા, મુદ્રણ માર્ગદર્શન આદિ વિષયમાં અનેરી આત્મીયતા બતાવીને પૂજ્યપાદ મુનિરાજશ્રી **વજ્રસેનવિજયજી** મહારાજે મને ઉપકૃત કર્યો છે. મુદ્રણ સૌષ્ઠવ સંપૂર્ણપણે એમને આભારી છે.

ગુરુભ્રાતા મુનિરાજશ્રી **મહાયશવિજયજી** પણ પ્રૂફ રીડિંગમાં સહાયક બન્યા છે.

પૂજ્યપાદ ગુરુભગવંતોએ કરેલા એ ઉપકારોને પુનઃ પુનઃ કૃતજ્ઞભાવે સ્મરણ કરી ચરણે વંદન કરી કાંઈક સંતોષ મેળવું છું.

ધન્યવાદ !

હસ્તપ્રતો મેળવી આપવા માટે તે તે ગ્રંથાલયનાં સંચાલકો અને પં. **શ્રી બાબુલાલ સવચંદભાઈ**એ સારો સહયોગ આપી શ્રુતભક્તિનું ઉત્તમ કાર્ય કર્યું છે. તે બદલ તેઓ ધન્યવાદને પાત્ર છે. ગ્રંથપ્રકાશનમાં તે તે સંઘોએ ઉદારદિલે આર્થિક સહયોગ આપી શ્રુતભક્તિનો ઉત્તમ લાભ લીધો છે જે અનુમોદનીય છે. પ્રથમ ભાગમાં નામાવલિ આપી છે. આ બધાના સહકારથી આ કાર્ય ઘણું સરળ બન્યું છે.

લિ.

પૂજ્યપાદ શાસનપ્રભાવક આચાર્યદેવ શ્રીમદ્ વિજય
ૐકારસૂરીશ્વરજી મહારાજનાં શિષ્યરત્ન તપસ્વી
પ.પૂ. મુનિરાજશ્રી **ચન્દ્રયશવિજયજી**
મહારાજના પાદપદ્મરેણુ
મુનિ ભાગ્યેશવિજય

ચૈત્ર સુદ-પ્રથમ-૬, બુધવાર
૨૦૪૧ તા. ૨૭-૩-૮૫
ભીલડીયાજી તીર્થ

સંપાદકીય

(બીજી આવૃત્તિ વેળાએ)

શ્રી ઉત્તરાધ્યયન સૂત્ર ઉપર અનેક ટીકાઓમાં પૂ. **શ્રી લક્ષ્મીવલ્લભગણિએ** કરેલી ટીકા પ્રાથમિક અભ્યાસીને વાંચવી સરળ અને જલ્દી સમજાય તેવી છે.

આ ગ્રંથને સંવત ૨૦૪૦માં છપાવવાની ઈચ્છા થતાં પૂ. આચાર્ય **શ્રી ઓંકાર સૂરીશ્વરજી** મ. નાં પ્રશિષ્ય આચાર્ય **શ્રી મુનિચંદ્રસૂરિજી** મ. તથા મુનિ **શ્રી ભાગ્યેશ વિજયજી**ને વાત કરી અને મુનિશ્રી ભાગ્યેશ વિજયજીએ અતિ શ્રમપૂર્વક હસ્તલિખિત પ્રતોની સાથે મેળવીને સંશોધનપૂર્વક તૈયાર કરી અને અમે છપાવી હતી.

દરેક સમુદાયનાં વડીલો ઉત્તરાધ્યયનનાં જોગ પછી નાના સાધુ સાધ્વીજીને આ ગ્રંથ વાંચવાની પ્રેરણા કરતા હોવાથી આ ગ્રંથની પ્રથમ આવૃત્તિ પૂર્ણ થઈ.

આ ગ્રંથની ઉપયોગિતા સમજી ઘણાં મહાત્માઓએ બીજી આવૃત્તિ માટે પ્રેરણા કરતાં આચાર્ય **શ્રી મુનિચંદ્રસૂરિજી** આદિ અનેક શ્રમણ શ્રમણીના સહયોગથી અને ભરત પ્રિન્ટરીવાળા સુશ્રાવક **કાન્તિલાલ ડી. શાહ**ની ખંતથી આ ગ્રંથના બંને ભાગ અલ્પસમયમાં તૈયાર થયા તે દેવગુરૂની કૃપાનું પ્રત્યક્ષ ફળ છે.

મારી અસ્વસ્થ તબિયતમાં સતત્ મને સર્વ રીતે સહાયક મુનિરાજ **શ્રી હેમપ્રભ વિજયજી**નાં સહકારથી મારી આ જ્ઞાનયાત્રા સરળતાથી આગળ ધપી રહી છે.

એજ.

પં. વજ્રસેન વિજય

પ્રકાશકીય

પૂજ્ય સાધુ-સાધ્વીજી ભગવંતોના સંયમી જીવનને ઉપકાર કરતું થીયરીકલ આગમશાસ્ત્ર એટલે **ઉત્તરાધ્યયન.**

પૂજ્યોનાં પ્રવચનોમાં સાંભળ્યું છે કે પરમાત્મા મહાવીર સ્વામિ ભગવાનની અંતિમ ૧૬ પ્રહરની દેશના **૫૫** અધ્યયન પુન્ય ફળનાં - **૫૫** અધ્યયન પાપ ફળનાં અને **૩૬** અધ્યયન વગર પૂછાયેલા પ્રશ્નોની હતી.

તે ૩૬ અધ્યયન એ જ ઉત્તરાધ્યયન.

આ ઉત્તરાધ્યયની પ્રથમ આવૃત્તિ પૂર્ણ થઈ જતાં અને વારંવાર પૂજય સાધુ-સાધ્વીજી ભગવંતો તરફથી માંગણી થતાં પૂ. **પંન્યાસજી વજ્રસેન વિજયજી** મહારાજે આ ગ્રંથની પ્રથમ આવૃત્તિમાં રહી ગયેલી સામાન્ય અશુદ્ધિને શુદ્ધ કરાવીને પ્રકાશિત કરાવેલ છે. વિહારાદિમાં ગ્રંથ સાથે રાખવાની સુગમતા રહે તેથી બે ભાગ કરેલ છે. તેમાં પ્રથમ ભાગમાં ૧ થી ૧૯ અધ્યયન અને આ દ્વિતીય ભાગમાં ૨૦ થી ૩૬ અધ્યયન પ્રકાશિત કરાય છે.

પૂજ્ય પંન્યાસજી ભગવંતની નાદુરસ્ત તબિયતમાં પણ **મુનિરાજશ્રી હેમપ્રભ વિજયજી** મ. ની અપૂર્વ સહાયથી અમારી આ જ્ઞાન યાત્રાને આગળ ધપાવવા જે પ્રોત્સાહન મળે છે તે તેમની જ્ઞાનભક્તિનો અજોડ પુરાવો છે.

પ્રાંતે આ ગ્રંથના અધ્યયન દ્વારા આત્મ જાગૃતિ કેળવી કર્મનિર્જરા કરી પરમપદના ભોક્તા બનીએ એ જ.

विषयानुक्रम :

अध्ययनाङ्कः	अभिधा	पृष्ठः
२०	महानिर्ग्रन्थीय	१
२१	समुद्रपालीय	१६
२२	रथनेमीय	२२
२३	केशिगौतमीय	४०
२४	प्रवचनमातृ	६४
२५	यज्ञीय	७५
२६	सामाचारी	८५
२७	खलुङ्कीय	१००
२८	मोक्षमार्गीय	१०५
२९	सम्यक्त्वपराक्रम	११७
३०	तपोमार्ग	१४८
३१	चरणविधि	१५९
३२	प्रमादस्थानीय	१६४
३३	कर्मप्रकृति	१९२
३४	लेश्या	२००
३५	अनगारमार्ग	२१५
३६	जीवाजीवविभक्ति	२२०

कथानाम् अकारादिः

कथाङ्कः	कथानाम	पृष्ठाङ्कः
(१)	अनाथीमुनि-श्रेणिक संवाद	१
(२)	केशी-गौतमसंवाद	४५
(३)	गार्ग्यगणधर	१००
(४)	जम्बूवृक्ष (लेश्या)	२०८
(५)	जयघोष-विजयघोष	७५
(६)	नेमप्रभोः चरित्रम् सपूर्वभवम्	२२
(७)	पार्श्वनाथचरित्रम्	४०
(८)	रथनेमि-राजिमती	३५
(९)	समुद्रपालित	१६

॥ શિવમસ્તુ સર્વ જગતઃ ॥

ભદ્રંકર પ્રકાશનનાં વિવિધ વિષયોનાં વિશિષ્ટ પ્રકાશનો

C/o ૪૯/૧ મહાલક્ષ્મી સોસાયટી, સુજાતા ફલેટ પાછળ, શાહીબાગ,
અમદાવાદ-૩૮૦૦૦૪. ફોન : ૨૮૬૦૭૮૫

પૂ.પં. શ્રી વજસેન વિ.મ.સા. સંપાદિત અભ્યાસ માટેના ઉપયોગી શાસ્ત્રીય ગ્રંથો

૧.	લોકપ્રકાશ ભાગ ૧થી ૫	રૂા.૯૬૦=૦૦
૨.	સિદ્ધહેમ શબ્દાનુશાસનમ્ (ભાગ૧-૨-૩)	રૂા.૩૦૦=૦૦
૩.	વિશેષાવશ્યક ભાષ્ય ભાષાંતર (ભાગ-૧-૨)	રૂા.૪૦૦=૦૦
૪.	ઉત્તરાધ્યયન સૂત્રમ્ (ભાગ-૧-૨) (મૂળ, સંસ્કૃત છાયાનુવાદ, ગુર્જરભાષાનુવાદ, કથા સહિત)	રૂા.૨૨૦=૦૦
૫.	બૃહદ્‌ક્ષેત્ર સમાસ (ભાગ-૧-૨) (પૂ.નિત્યાનંદસૂરી મ. કૃત ગુજરાતી વિવેચન)	રૂા.૨૦૦=૦૦
૬.	ઉત્તરાધ્યયન સૂત્ર (ભાગ-૧-૨) (લક્ષ્મીવલ્લભગણી કૃત ટીકા)	રૂા.૩૦૦=૦૦
૭.	શ્રાદ્ધવિધિ પ્રકરણ (ગુજરાતી)	રૂા.૧૦૦=૦૦
૮.	સુલભ કાવ્ય પ્રવેશિકા	રૂા.૫૦=૦૦
૯.	સુલભ ચરિત્રાણિ	રૂા.૪૦=૦૦
૧૦.	પ્રાકૃત વ્યાકરણ (અષ્ટમ અધ્યાય)	રૂા.૬૦=૦૦
૧૧.	પ્રાકૃત શબ્દ રૂપાવલી	રૂા.૫૦=૦૦
૧૨.	પાઈઅ લચ્છી નામમાલા	રૂા.૮=૦૦
૧૩.	શ્રી પાર્શ્વનાથ ચરિત્ર (સંસ્કૃત) પ્રત	રૂા.૧૦૦=૦૦
૧૪.	પંચપ્રતિક્રમણ સૂત્ર (અર્થ સાથે)	રૂા.૫૦=૦૦
૧૫.	સંસ્કૃત ધાતુકોષ (અર્થ સાથે)	રૂા.૬૦=૦૦
૧૬.	વીરહુંડીનું સ્તવન	રૂા.૪૦=૦૦
૧૭.	શ્રી ગુણસ્થાન ક્રમારોહ (મૂળ તથા ગુજરાતી)	રૂા.૧૦=૦૦
૧૮.	યશોવિજયજી મ.કૃત ચોવીસી સાર્થ	રૂા.૨૪.૦૦
૧૯.	હેમ સંસ્કૃત પ્રવેશિકા (ભાગ-૧ પ્રથમા)	રૂા.૨૫.૦૦
૨૦.	હેમ સંસ્કૃત પ્રવેશિકા (ભાગ-૨ મધ્યમા)	રૂા.૩૦=૦૦
૨૧.	હેમ સંસ્કૃત પ્રવેશિકા (ભાગ-૩ ઉત્તમા)	રૂા.૨૦=૦૦
૨૨.	સિદ્ધહેમ-સારાંશ-સંસ્કૃત-વ્યાકરણ (ગુજરાતીમાં)	રૂા.૪૦=૦૦
૨૩.	પ્રમાણનય તત્ત્વાલોક	રૂા.૩૦=૦૦

પૂજ્ય પંન્યાસજી ભદ્રંકરવિજયજી ગણિવર્યશ્રીના મૌલિક ચિંતનો

૧.	નમસ્કાર ચિંતન	રૂા.૬=૦૦
૨.	ત્રૈલોક્ય-દીપક મહામંત્રાધિરાજ	રૂા.૧૫૦=૦૦
૩.	આત્મ ઉત્થાનનો પાયો	રૂા.૧૫૦=૦૦
૪.	પ્રાકૃતિક પરમતત્ત્વનું મિલન	રૂા.૨૦૦=૦૦
૫.	પૂ.પં.શ્રી મ.નાં પ્રવચનો	રૂા.૧૨૦=૦૦

પરમ પૂજ્ય પંન્યાસજી ભદ્રંકરવિજયજી ગણિવર્યશ્રીએ લખેલ પત્રોના સંગ્રહ

૧.	પ્રેરક પત્ર પરિમલ	રૂા.૨૦=૦૦
૨.	શાંતિદાયક પત્રવેલી	રૂા.૧૨=૦૦
૩.	કલ્યાણકારી પત્રમાલા	રૂા.૧૨=૦૦
૪.	પ્રેરણાપત્રોનો સોનેરી પ્રકાશ	રૂા.૧૫=૦૦
૫.	તાત્વિક પત્રવેલી	રૂા.૫૦=૦૦
૬.	ગુરૂદેવનો પ્રેરણા પ્રકાશ	રૂા.૨૦=૦૦
૭.	પ્રેરણાનું અમૃતપાન	રૂા.૨૦=૦૦
૮.	આધ્યાત્મિક પત્રમાળા	રૂા.૧૨=૦૦

પૂજ્ય આચાર્યશ્રી કુંદકુંદસૂરીશ્વરજી મ.સા. સંગૃહીત વાર્તાઓનો રસથાળ

૧.	પ્રસંગ જ્યોત	રૂા.૧૦=૦૦
૨.	પ્રેરણાના પુષ્પો	રૂા.૧૦=૦૦
૩.	જીવન સંધ્યાના રંગ અનેરા	રૂા.૧૨=૦૦
૪.	સુમનની સુવાસ	રૂા.૧૦=૦૦
૫.	નમસ્કારના ચમત્કાર	રૂા.૧૨=૦૦
૬.	બોધદાયક વાર્તાઓ	રૂા.૧૫=૦૦
૭.	કર્મ.... ? તારી બલિહારી	રૂા.૧૨=૦૦

નવકારનો જાપ-સામાયિક પૂજા તથા ગુરુવંદનની ગણના કરવા માટેના પુસ્તકો

૧.	નવ લાખ જપતાં નરક નિવારે	રૂા.૪=૦૦
૨.	વર્ધમાન સામાયિક	રૂા.૪=૦૦
૩.	વંદના પાપ નિકંદના	રૂા.૭=૦૦
૪.	નવપદ આરાધન વિધિ (વિસ્તાર સહિત)	રૂા.૬૦=૦૦
૫.	પ્રભુ સાથે પ્રીત (સ્તવનો)	રૂા.૫=૦૦
૬.	ભક્તિ-ભાવના (સ્તવનાવલી)	રૂા.૭૦=૦૦

उत्तराध्ययनसूत्र भाग-२

॥ २० महानिर्ग्रन्थीयमध्ययनम् ॥

पूर्वस्मिन्नध्ययने साधूनां निष्प्रतिकर्मतोक्ता, रोगादावुत्पन्ने सति चिकित्सा न कर्तव्या, न कारयित्वा, नानुमन्तव्येत्युक्तम् । अथ विंशत्यऽध्ययने सा निष्प्रतिकर्मता महानिर्ग्रन्थस्य हिता, अतोऽनाथत्वपरिभावनया सेत्युच्यते -

सिद्धाणं णमो किच्चा, संजयाणं च भावओ ।
अत्थधम्मगइं [1]तत्थं, अणुसिट्ठिं सुणेह मे ॥ १ ॥

भो शिष्याः ! 'मे' ममानुशिष्टि-शिक्षां यूयं श्रृणुत । किं कृत्वा ? सिद्धान् पञ्चदश-प्रकारान्नमस्कृत्य, च पुनर्भावतो - भक्तितः संयतान्-साधूनाचार्योपाध्यायादिसर्वसाधून्नमस्कृत्य । कीदृशीं मेऽनुशिष्टिं ? अर्थधर्मगतिम्, अर्थ्यते - प्रार्थ्यते धर्मात्मभिः पुरुषैरित्यर्थः, स चासौ धर्मश्चार्थधर्मस्तस्य गतिर्ज्ञानं यस्यां साऽर्थधर्मगतिस्ताम् । द्रव्यवद्यो दुष्प्राप्यो (पो) धर्मस्तस्य धर्मस्य प्राप्तिकारिकाम् । यया शिक्षया मम दुर्लभधर्मस्य प्राप्तिः स्यादिति भावः । पुनः कीदृशीं मेऽनुशिष्टिं ? तथ्यां-सत्याम्, अथवा तत्त्वं तत्वरूपां वा ॥ १ ॥

पभूयरयणो राया, सेणिओ मगहाहिवो ।
विहारजत्तं णिज्जाओ, मंडिकुच्छिंसि चेइए ॥ २ ॥

श्रेणिको नाम राजा, एकदा मण्डितकुक्षिनाम्नि चैत्ये-उद्याने विहारयात्रयोद्यानक्रीडया निर्यातः, नगरात्क्रीडार्थं मण्डितकुक्षिवने गत इत्यर्थः । कीदृशः श्रेणिको राजा ? मगधाधिपो, मगधानां देशानामधिपो मगधाधिपः । पुनः कीदृशः ? प्रभूतरत्नः प्रचुरप्रधानगजाश्वमणि-प्रमुखपदार्थधारी ॥ २ ॥

अथ मण्डितकुक्षिनामोद्यानं कीदृशं वर्तते ? तदाह —

नाणादुमलयाइन्नं, नाणापक्खिनिसेवियं ।
नाणाकुसुमसंछन्नं, उज्जाणं नंदणोवमं ॥ ३ ॥

कीदृशं तद्वनम् ? नानादुमलताकीर्ण-विविधवृक्षवल्लीभिर्व्याप्तम् । पुनः कीदृशं ? नानापक्षिनिषेवितम्, विविधविहङ्गैरतिशयेनाश्रितम् । पुनः कीदृशं ? नानाकुसुमसंछन्नं-बहुवर्णपुष्पैर्व्याप्तम् । पुनः कीदृशं तदुद्यानं ? नागरिकजनानां क्रीडास्थानम् । नगरसमीपस्थं वनमुद्यानमुच्यते । पुनः कीदृशं ? नन्दनोपमम्, नन्दनं - देववनं तदुपमम् ॥ ३ ॥

तत्थ सो पासई साहुं, संजयं सुसमाहियं ।
निसण्णं रुक्खमूलंमि, सुकुमालं सुहोइयं ॥ ४ ॥

---

१ तच्चं-अन्यसंस्करणे ॥

तत्र वने स श्रेणिको राजा साधुं पश्यति । कीदृशं साधुं ? संयतं सम्यक् प्रकारेण यतं - यत्नं कुर्वन्तम् । पुनः कीदृशं ? सुसमाधितम्, सुतरामतिशयेन समाधियुक्तम् । पुनः कीदृशं ? वृक्षमूले निषण्णं - स्थितम् । पुनः कीदृशं ? सुकुमालम् । पुनः कीदृशं ? सुखोचितं सुखयोग्यम् ॥ ४ ॥

तस्स रूवं तु पासित्ता, राइणो तंमि संजए ।
अच्चंतपरमो आसी, अउलो रूवविम्हओ ॥ ५ ॥

राज्ञः श्रेणिकस्य तस्मिन् संयते साधावत्यन्तपरमोऽधिकोत्कृष्टोऽतुलो निरुपमो रूपविस्मयो रूपाश्चर्यमासीत् । किं कृत्वा ? तस्य साधो रूपं दृष्ट्वा । तुशब्दोऽलङ्कारे ॥ ५ ॥

अहो वन्नो अहो रूवं, अहो अज्जस्स सोमया ।
अहो खंती अहो मुत्ती, अहो भोगे असंगया ॥ ६ ॥

तदा राजा मनसि चिन्तयति, अहो इत्याश्चर्ये, आश्चर्यकार्यस्य शरीरस्य वर्णो गौरत्वादिः । अहो आश्चर्यकृदस्य साधो रूपं लावण्यसहितम् । अहो आश्चर्यकारिण्यस्याऽऽर्यस्य सौम्यता, चन्द्रवन्नेत्रप्रियता । अहो ! आश्चर्यकारिणी अस्य क्षान्तिः- क्षमा । अहो ! आश्चर्यकारिणी चास्य मुक्तिर्निर्लोभता । अहो ! आश्चर्यकारिण्यस्य भोगेऽसङ्गता, विषये निःस्पृहता ॥ ६ ॥

तस्स पाए उ वंदित्ता, काऊण य पयाहिणं ।
नाइदूरमणासन्ने, पंजली पडिपुच्छई ॥ ७ ॥

तस्य साधोः पादौ वन्दित्वा, पुनः प्रदक्षिणां कृत्वा, राजा नातिदूरम्, नात्यासन्नः, नातिदूरवर्ती, नातिनिकटवर्ती सन्, प्राञ्जलिपुटो - बद्धाञ्जलिः पृच्छति-प्रश्नं करोति ॥ ७॥

तदा श्रेणिकः किं पृच्छति ?

तरुणो सि अज्जो पव्वइओ, भोगकालंभि संजया ! ।
उवट्ठिओसि सामन्ने, एयमट्ठं सुणामि ता ॥ ८ ॥

हे आर्य ! हे साधो ! त्वं तरुणोऽसि - युवाऽसि । हे संयत ! हे साधो ! तस्माद् भोगकाले - भोगसमये प्रव्रजितो - गृहीतदीक्षः, तारुण्यं हि भोगस्य समयोऽस्ति, न तु दीक्षायाः समयः । हे संयत ! तारुण्ये भोगयोग्यकाले त्वं श्रामण्ये दीक्षायामुपस्थितोऽसि, आदरसहितोऽसि । एतदर्थमेतन्निमित्तं त्वत्तः श्रृणोमि, किं दीक्षायाः कारणं ? कस्मान्निमित्ताद्दीक्षा त्वया गृहीता ? तत्कारणं त्वन्मुखात् श्रोतुमिच्छामीत्यर्थः ॥ ८ ॥

इदानीं स साधुर्वदति -

अणाहो मि महाराय, नाहो मज्ज न विज्जई ।
अणुकंपयं सुहियं वावि, कंचि णाभिसमेमहं ॥ ९ ॥

हे महाराज ! अहमनाथोऽस्मि, न विद्यते नाथो-योगक्षेमविधाता यस्य सोऽनाथः, निःस्वामिकोऽस्मि । मम नाथो न विद्यते इत्यर्थः । पुनरहं कञ्चित्कमप्यनुकम्पकं कृपाचिन्तकं सुहितं सुहृदं-मित्रं वा नाभिसमेमि-न सम्प्राप्नोमि, केनापि दयालुना मित्रेण वा सङ्गतोऽहं न, अनेनार्थेन तारुण्येऽपि प्रव्रजित इति भावः ॥ ९ ॥

तओ पहसिओ राया, सेणिओ मगहाहिवो ।
एवं ते इड्ढिमंतस्स, कहं नाहो न विज्जई ॥ १० ॥

ततस्तदनन्तरं श्रेणिको मगधाधिपो राजा प्रहसितः । हे महाभाग्यवान् ! 'ते' तव ऋद्धिमत-ऋद्धियुक्तस्य कथं नाथो न विद्यते ॥ १० ॥

होमि नाहो भयंताणं, भोगे भुंजाहि संजया ।
मित्तनाईहिं परिवुडो, माणुस्सं [1]खलु दुल्लहं ॥ ११ ॥

हे पूज्याः ! अहं 'भयंताणं' इति भदन्तानां पूज्यानां युष्माकं नाथो भवामि । यदा भवतां कोऽपि स्वामी नास्ति, तदाहं भवतां स्वामी भवामि । यदाऽनाथत्वाद्युष्माभिर्दीक्षा गृहीता, तदाहं नाथोऽस्मीति भावः । हे संयत ! हे साधो ! भोगान् भुङ्क्ष्व, कीदृशः सन् ? मित्रज्ञातिभिः परिवृतः सन् । हे साधो ! खलु - निश्चयेन मानुष्यं दुर्लभं वर्तते । तस्मान्मनुष्यत्वं दुर्लभं प्राप्य भोगान् भुक्त्वा सफलीकुरु ॥ ११ ॥

अथ मुनिर्वदति-

अप्पणा वि अणाहो सि, सेणिया मगहाहिवा ।
अप्पणा अणाहो संतो, कहं नाहो भविस्ससि ॥ १२ ॥

हे राजन् श्रेणिक ! मगधाधिप ! त्वमात्मनाप्यनाथोऽसि, आत्मनाऽनाथस्य सतस्तवाप्यनाथत्वम्, तदा त्वमपरस्य कथं नाथो भविष्यसि ? ॥ १२ ॥

एवं वुत्तो नरिंदो सो, सुसंभंतो सुविम्हिओ ।
वयणं अस्सुयं पुव्वं, साहुणा विम्हयं निओ ॥ १३ ॥

स नरेन्द्रः साधुनैवमुक्तः सन् विस्मयं नीतः, आश्चर्यं प्रापितः, कीदृशो नरेन्द्रः ? सुसम्भ्रान्तोऽत्यन्तं व्याकुलतां प्राप्तः । पुनः कीदृशः ? सुविस्मितः, पूर्वमेव तद्दर्शनात्सञ्जा-

---

१ खु सुदुल्लहं-अन्यसंस्करणे ॥

ताश्चर्यः, पुनरपि तद्वचनश्रवणाद्विस्मयवान् जातः । यतो हि तद्वचनमश्रुतपूर्वम्, श्रेणिकाय अनाथोऽसि त्वमिति वचनं पूर्वं केनापि नो श्रावितम् ॥ १३ ॥

अस्सा हत्थी मणुस्सा मे, पुरं अंतेउरं च मे ।
भुंजामि माणुसे भोए, आणाइस्सरियं च मे ॥ १४ ॥

एरिसे संपयग्गंमि, सव्वकामसमप्पिए ।
कहं अणाहो हवई, मा हु भंते मुसं वए ॥ १५ ॥ युग्मम् ॥

द्वाभ्यां गाथाभ्यां श्रेणिको वदति हे भदन्त ! पूज्य ! 'हु' इति निश्चयेन मृषां मा ब्रूहि, असत्यं मा वद । एतादृशे सम्पदग्रे सति-सम्पत्प्रकर्षे सत्यहं कथमनाथो भवामि ? कीदृशोऽहम् ? सर्वकामसमर्पितः, सर्वे च ते कामाश्च सर्वकामास्तेभ्यः सर्वकामेभ्यः समर्पितः शुभकर्मणा ढौकितः । अथ राजा स्वसम्पत्प्रकर्षं वर्णयति — अश्वा - घोटका बहवो मम सन्ति, पुनर्हस्तिनोऽपि प्रचुराः सन्ति, तथा पुनर्मनुष्याः सुभटाः सेवका बहवो विद्यन्ते । तथा मम पुरं - नगरमप्यस्ति । च पुनः 'मे' ममान्तःपुरं - राज्ञीवृन्दं वर्तते । पुनरहं मानुष्यान् भोगान्, मनुष्यसम्बन्धिनो विषयान् भुनज्मि । च पुनराज्ञैश्वर्यं वर्तते, आज्ञां अप्रतिहतशासनस्वरूपाम्, तयाज्ञयैश्वर्यं प्रभुत्वं वर्तते । यतो मम राज्ये मदीयामाज्ञां कोऽपि न खण्डयतीत्यर्थः ॥ १४ ॥

तदा मुनिराह-

न तुमं जाणे अणाहस्स, अत्थं पोत्थं च पत्थिवा ।
जहा अणाहो हवई, सणाहो वा नराहिव ॥ १६ ॥

हे पार्थिव ! हे राजन् ! त्वं अणाहस्स अनाथस्यार्थमभिधेयम्, च शब्दः पुनरर्थे, च पुनरनाथस्य प्रोत्थां न जानासि, प्रकर्षेणोत्थानं मूलोत्पत्तिः प्रोत्था, तां प्रोत्थाम्, केनाभिप्रायेणायमनाथशब्दः प्रोक्त इत्येवंरूपां न जानासि । हे राजन् ! यथाऽनाथोऽथवा सनाथो भवति, तथा न जानासि । कथमनाथो भवति ? कथं च सनाथो भवति ? ॥ १६ ॥

सुणेह मे महाराय, अव्वखित्तेण चेयसा ।
जहा अणाहो हवई, जहा मे य पवत्तियं ॥ १७ ॥

हे महाराज ! 'मे' मम कथयतः सतस्त्वमव्याक्षिप्तेन-स्थिरेण चेतसा शृणु । यथाऽनाथो नाथरहितो भवति, यथा 'मे' ममाऽनाथत्वं प्रवर्तितम्, अथवा [१]'मेय' इति एतदनाथत्वं प्रवर्तितम्, तथा त्वं शृणु । इत्यनेन स्वकथाया [२]उद्घट्टः कृतः ॥ १७ ॥

---

१ 'मेय' त्ति मया च प्रवर्त्तितमिति-प्ररूपितमनाथत्वमिति-बृहद्वृत्त्याम् ॥

२ महोर. छाप लगावी.

कोसंबीणाम णयरी, पुराणपुरभेयणी ।
तत्थ आसी पिया मज्झं, पभूयधणसंचओ ॥ १८ ॥

हे राजन् ! कौशाम्बीनाम्नी नगर्यासीत् । कीदृशी कौशाम्बी ? पुराणपुरभेदिनी, जीर्णनगरभेदिनी, यादृशानि जीर्णनगराणि भवन्ति, तेभ्योऽधिकशोभावती, कौशाम्बी हि जीर्णपुरी वर्तते । जीर्णपुरस्था हि लोकाः प्रायशश्चतुरा धनवन्तश्च बहुज्ञा विवेकवन्तश्च भवन्तीति हार्दम् । तत्र तस्यां कौशाम्ब्यां मम पिताऽऽसीत् । कीदृशो मम पिता ? प्रभूतधन-सञ्चयः, नाम्नापि धनसञ्चयः, गुणेनापि बहुलधनसञ्चय इति वृद्धसम्प्रदायः ॥ १८ ॥

पढमे वए महाराय, अउला अत्थिवेयणा ।
अहोत्था विउलो दाहो, सव्वगत्तेसु पत्थिवा ॥ १९ ॥

हे महाराज ! प्रथमे वयसि-यौवने एकदाऽतुलोत्कृष्टाऽस्थिवेदनाऽस्थिपीडा 'अहोत्था' इत्यभूत् । अथवा 'अत्थिवेयणा' इति पाठे अक्षिवेदना - नेत्रपीडाऽभूत् । ततश्च हे पार्थिव ! हे राजन् ! सर्वगात्रेषु विपुलो दाघोऽभूत् ॥ १९ ॥

सत्थं जहा परमतिक्खं, सरीरविवरंतरे ।
[१]पवीलिज्जइ अरी कुद्धे, एवं मे अत्थिवेयणा ॥ २० ॥

हे राजन् ! यथा कश्चिदरिः क्रुद्धः सन् शरीरविवरान्तरे नासाकर्णचक्षुःप्रमुखरन्ध्राणां मध्ये परमतीक्ष्णं शस्त्रं प्रपीडयेद्गाढमवगाहयेत्, एवं 'मे' ममास्थिवेदनाभूत् ॥ २० ॥

तियं मे अंतरिच्छं च, उत्तमंगं च पीडई ।
इंदासणिसमं घोरा, वेयणा परमदारुणा ॥ २१ ॥

हे राजन् ! सा परमदारुणा वेदना 'मे' मम त्रिकं कटिपृष्ठविभागम्, च पुनरन्तरिच्छाम्, अन्तर्मध्ये इच्छा अन्तरिच्छा तामन्तरिच्छां भोजनपानरमणाभिलाषरूपाम्, च पुनरुत्तमाङ्गं मस्तकं पीडयति । कीदृशी वेदना ? इन्द्राशनिसमा घोरा, इन्द्रस्याशनिर्वज्रं तत्समा, अतिदाहोत्पादकत्वात्तत्तुल्या घोरा-भयदा ॥ २१ ॥

उवट्ठिया मे आयरिया, विज्जामंततिगिच्छगा ।
अधीया सत्थकुसला, मंतमूलविसारया ॥ २२ ॥

हे राजन् ! तदेत्यध्याहारः, आचार्याः प्राणाचार्या वैद्यशास्त्राभ्यासकारका 'मे' ममोपस्थिताश्चिकित्सां कर्तुं लग्नाः । कीदृशा आचार्याः ? विद्यामन्त्रविचिकित्सकाः, विद्यया मन्त्रेण च चिकित्सन्ति - चिकित्सां कुर्वन्तीति विद्यामन्त्रचिकित्सकाः, प्रतिक्रियाकर्तारः ।

१ पविसिज्ज-अन्यसंस्करणे ॥

पुनः कीदृशा आचार्याः ? अधीताः- सम्यक् पठिताः । [१]'अबीया' इति पाठे न विद्यतेऽन्यो द्वितीयो येभ्यस्तेऽद्वितीयाः, असाधारणाः । पुनः कीदृशास्ते ? शास्त्रेकुशलाः- शास्त्रेषु विचक्षणाः । पुनः कीदृशास्ते ? मन्त्रमूलविशारदाः, मन्त्राणि देवाधिष्ठितानि, मूलानि [२]जटिकारूपाणि, तत्र विचक्षणाः, मन्त्रमूलिकानां गुणज्ञाः ॥ २२ ॥

ते मे तिगिच्छं कुव्वंति, चाउप्पायं जहा हियं ।
न य दुक्खा विमोयंति, एसा मज्ज अणाहया ॥ २३ ॥

ते वैद्याचार्या 'मे' मम चैकित्स्यं-रोगप्रतिक्रियां यथा हितं भवेत्तथा कुर्वन्ति । कीदृशं चैकित्स्यं ? चातुःपादम्, चत्वारः पदाः प्रकारा यस्य तच्चतुःपदम्, तस्य भावः चातुः-पादम्, चातुर्विध्यमित्यर्थः । वैद्य १ औषध २ रोगि ३ प्रतिचारक ४ रूपम् । अथवा वमन १ विरेचन २ मर्दन ३ स्वेदन ४ रूपम् । अथवा अञ्जन १ बन्धन २ लेपन ३ मर्दनरूपम् ४, शास्त्रोक्तं गुरुपारम्पर्यागतं चक्रुरिति स्थाने प्राकृतत्वात्कुर्वन्तीत्युक्तम् । ते वैद्या मां दुःखान्न विमोचयन्ति स्म । प्राकृतत्वाद् भूतार्थे वर्तमानार्थप्रत्ययः । एषा ममानाथता वर्तते ॥२३॥

पिया मे सव्वसारंपि, दिज्जाहि मम कारणा ।
न य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥ २४ ॥

हे राजन् ! मम पिता मम कारणेन सर्वमपि सारम्, गृहे यत्सारं सारं वस्तु, तत्सर्वमपि वैद्येभ्योऽदात् । तथापि वैद्या मां दुःखात्कष्टान्न विमोचयन्ति स्म । एषा ममाऽनाथता ज्ञेयेति शेषः ॥ २४ ॥

माया वि मे महाराय, पुत्तसोयदुहट्ठिया ।
न य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥ २५ ॥

हे महाराज ! 'मे' मम मातापि दुःखान्मां न विमोचयति स्म । कथंभूता माता ? पुत्रशोकदुःखस्थिता, पुत्रस्य यः शोकः पीडाप्रादुर्भावः साताऽभावः, स एव दुःखम्, तत्र स्थिता पुत्रशोकदुःखस्थिता । एषा ममाऽनाथता ज्ञेया ॥ २५ ॥

भायरा मे महाराय, सगा जिट्ठकणिट्ठगा ।
न य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥ २६ ॥

हे महाराज ! 'मे' मम भ्रातरोऽपि, स्वका आत्मीया ज्येष्ठकनिष्ठका - वृद्धा लघवश्च न मां दुःखाद्विमोचयन्ति स्म । एषा ममाऽनाथता ज्ञेया ॥ २६ ॥

---

१ अबीआ-अन्यसंस्करणे ॥
२ जडी-बुट्टी ।

भयणीओ मे महाराय, सगा जिट्ठकनिट्ठगा ।
न य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥ २७ ॥

हे महाराज ! 'मे' मम भगिन्योऽपि, स्वका एकमातृजाः ज्येष्ठाः कनिष्ठाश्च मां दुःखान्न विमोचयन्ति स्म । एषा ममाऽनाथता ज्ञेया ॥ २७ ॥

भारिया मे महाराज, अणुरत्ता अणुव्वया ।
अंसुपुण्णेहिं नयणेहिं, उरं मे परिसिंचई ॥ २८ ॥

अन्नं पाणं च न्हाणं च, गंधमल्लविलेवणं ।
मए नायमनायं वा, सा बाला नोवभुंजई ॥ २९ ॥

खणंपि मे महाराय, पासाओ न विफिट्टई ।
न य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥ ३० ॥

तिसृभिर्गाथाभिः कुलकम् ॥

हे महाराज ! 'मे' मम भार्या-कामिन्यपि दुःखान्मां न मोचयति स्म । कथंभूता भार्या ? अनुरक्ता-अनुरागवती, पुनः कथंभूता ? अनुव्रता, पतिव्रता पतिमनुलक्ष्यीकृत्य व्रतं यस्याः साऽनुव्रता । एतादृशी भार्या 'मे' मम उरो-हृदयमश्रुपूर्णाभ्यां लोचनाभ्यां सिञ्चति स्म ॥ २८ ॥ पुनः सा बाला मत्कामिनी अन्नमशनं मोदकादिकं भक्ष्यम्, पानं शर्करोदकादिकम्, पुनः स्नानं कुङ्कुमादिपानीयैः, गन्धैः सुरभितैलचोरकगोशीर्षचन्दनप्रमुखैः[1], माल्यैरनेकसुरभिपुष्पदामभिर्विलेपनं-गात्रार्चनम्, मया ज्ञातं वा अज्ञातम्, स्वभावेनैवैतत्सर्वं भोगाङ्गं नोपभुङ्क्ते, नानुभवति । मम दुःखार्त्तया सर्वाण्यपि भोगाङ्गानि त्यक्तानि ॥ २९ ॥ पुनर्हे महाराज ! सा बाला मम पार्श्वान्नैकट्यान्न '[2]विफिट्टइ' इति न विफिट्टति, नापयातीत्यर्थः । परं दुःखान्मां न विमोचयति, एषा ममाऽनाथता ज्ञेया ॥ ३० ॥

तओ हं एवमाहंसु, दुक्खमा हु पुणो पुणो ।
वेयणा अणुभवेउं जे, संसारंमि अणंतए ॥ ३१ ॥

ततोऽनन्तरं प्रतीकारेषु विफलेषु जातेष्वहमेवमादिषम् । एवमिति किं ? 'हु' इति निश्चयेन या वेदना अक्षिरोगप्रमुखा अनुभवितुं दुःक्षमाः, भोक्तुमसमर्थाः, ता वेदनाः संसारे पुनः पुनर्भुक्ता इति शेषः । वेद्यते दुःखमनयेति वेदना । ता वेदना दुःखेन क्षम्यन्ते सह्यन्ते इति दुःक्षमा दुःसहाः, कीदृशे संसारे ? अनन्तकेऽपारे ॥ ३१ ॥

---

१ सुगंधी द्रव्य. २ भ्रंश धातुनो प्राकृतमां फिट्ट आदेश थाय छे.

अहं किमवादिषं तदाह -

सइं च जइ मुच्चिज्जा, वेयणा [1]विउलाउ मे ।
खंतो दंतो निरारंभो, पव्वइओ अणगारियं ॥ ३२ ॥

यदि सकृदप्येकवारमप्यहं वेदनाया विमुच्ये, तदाहं क्षान्तो भूत्वा, पुनर्दान्तो जितेन्द्रियो भूत्वा निरारम्भः सन्ननगारत्वं - साधुत्वं प्रव्रजामि - दीक्षां गृह्णामीति भावः । कथंभूताया वेदनायाः ? विपुलाया - विस्तीर्णायाः ॥ ३२ ॥

एवं चिंतइत्ताणं, पसुत्तो मि नराहिवा ।
परिवत्तंतिए राईए, वेयणा मे खयं गया ॥ ३३ ॥

एवं पूर्वोक्तं चिन्तनं चिन्तयित्वा हे नराधिप ! यावदहं सुप्तोऽस्मि, तावत्तस्यामेव रात्रौ प्रवर्तमानायामतिक्रामत्यां 'मे' मम वेदनाः क्षयं गताः, वेदना उपशान्ता इत्यर्थः ॥ ३३ ॥

तओ कल्ले पभायंमि, आपुच्छित्ताण बंधवे ।
खंतो दंतो निरारंभो, पव्वईओ अणगारियं ॥ ३४ ॥

ततो वेदनोपशान्तेरनन्तरं कल्ये इति नीरोगे जाते सति प्रभातसमये बान्धवान् स्वज्ञातीनापृच्छ्याऽहमनगारत्वं - साधुत्वं प्रव्रजितः, साधुधर्ममङ्गीकृतवान् । कीदृशोऽहं ? क्षान्तः पुनर्दान्तः, पुनरहं निरारम्भः ॥ ३४ ॥

तओहं णाहो जाओ, अप्पणो य परस्स य ।
सव्वेसिं चेव भूयाणं, तसाणं थावराण य ॥ ३५ ॥

हे राजन् ! ततो दीक्षानन्तरमात्मनश्च पुनः परस्य नाथो-योगक्षेमकरत्वेन स्वामी जातः । आत्मनो हि नाथः शुद्धप्ररूपणत्वात्, अपरस्य च हितचिन्तनात् । एव निश्चयेन सर्वेषां भूतानां त्रसानां च पुनः स्थावराणां नाथो जातः ॥ ३५ ॥

अथ यश्चात्मनो नाथः, स च सर्वेषां नाथः तदेव दृढयति-

अप्पा नई वेयरणी, अप्पा मे कूडसामली ।
अप्पा कामदुधा धेणु, अप्पा मे नंदणं वणं ॥ ३६ ॥

हे राजन् ! दीक्षायां गृहीतायामहं नाथोऽभूवम्, पूर्वमनाथ आसम् । तत्कथं ? उच्यते- अयमात्मा जीवो वेतरणीनदी प्रवर्तते, पुनर्ममात्मैव कूटशाल्मलीवृक्षो नरकस्थो वर्तते पुनरयमात्मैव कामदुघा धेनुर्वर्तते, कामं दोग्धि पूरयतीति कामदुघा । जीवो यां शुभक्रियां करोति सा शुभक्रिया सुखदेत्यर्थः । 'मे' ममात्मा नन्दनं वनम्, देवानां सुखदायकं वनमस्ति ॥ ३६ ॥

---

१ विउला इओ - अन्यसंस्करणे ॥

अप्पा कत्ता विकत्ता य, सुहाण य दुहाण य ।
अप्पा मित्तममित्तं च, दुप्पइट्ठि य सुप्पइट्ठिओ ॥ ३७ ॥

हे राजन्नात्मा जीवः स एव कर्ता, च पुनरात्मैव विकिरिता-विक्षेपकः । केषां ? तदाह—सुखानां च पुनर्दुःखानाम्, अर्थात् सुखासुखयोः कर्ता विकिरिता विनाशकश्चात्मैव । च पुनरात्मा मित्रमुपकारकृत् सुहृद्वर्तते । तथात्मैवाऽमित्रं शत्रुरहितकारी वर्तते । हे राजन्नयमात्मा दुष्टाचारे प्रस्थितः- प्रवर्तितो वैतरण्यादिनरकभूमिदर्शको वर्तते, अयमेवात्मा सुष्ठु आचारे प्रस्थितः प्रवर्तितः कामधेन्वादिनन्दनवनादिवद्धर्षदो वर्तते ॥ ३७ ॥

इमा हु अण्णावि अणाहया निवा, तामेगचित्तो निहुओ सुणेहिं ।
नियंठधम्मं लहियाण वी जहा, सीयंति एगे बहु कायरा नरा ॥ ३८ ॥

हे नृप ! हे राजन् ! 'हु' इति निश्चये, इयमनाथता, अन्याप्यनाथता वर्तते, तामनाथतामेकचित्तः पुनर्निभृतोऽन्यकार्येभ्यो निवृत्तः सन्नर्थान्निश्चितः सन् शृणु । यथा निर्ग्रन्थधर्मं लब्ध्वाप्येके केचिज्जना बहुकातराः, बहु यथा स्यात्तथा हीनसत्वाः पुरुषाः सीदन्ति, साध्वाचारे शिथिला भवन्ति ॥ ३८ ॥

जो पव्वइत्ताण महव्वयाइं, सम्मं च नो फासयई पमाया ।
अणिग्गहप्पा य रसेसु गिद्धे, न मूलओ छिंदइ बंधणं से ॥ ३९ ॥

हे राजन् ! यो मनुष्यः प्रव्रज्य - दीक्षां गृहीत्वा महाव्रतानि प्रमादात् सम्यग्विधिना न स्पृशति, न सेवते, 'से' इति स प्रमादवशवर्ती, प्रमादादनिग्रहात्मा विषयाऽनियन्त्रितात्मा, अत एव रसेषु मधुरादिषु गृद्धो बन्धनं-कर्मबन्धनं रागद्वेषलक्षणं संसारकारणं मूलतो-मूलान्न छिनत्ति, मूलतो नोत्पाटयति, सर्वथा रागद्वेषौ न निवारयतीत्यर्थः ॥ ३९ ॥

आउत्तया जस्स य नत्थि काई, इरियाए भासाए तहेसणाए ।
आयाणनिक्खेवदुगंछणाए, न धीरजायं अणुजाइ मग्गं ॥ ४० ॥

हे राजन् ! स साधुर्धीरयातं मार्गं नानुयाति, धीरैर्महापुरुषैस्तीर्थकरैर्गणधरैश्च यातं-प्राप्तम्, अर्थान्मोक्षमार्गं न प्राप्नोति । स कः ? यस्य साधोरीर्यायां - गमनागमनसमितौ, तथा भाषायाम्, तथैषणायामाहारग्रहणसमितौ, पुनरादाननिक्षेपणसमितौ - वस्तूनां ग्रहणमोचनविधौ, तथा 'दुगंछणाए' इति उच्चारप्रश्रवण-श्लेष्म-जल्ल-सिङ्घाणादीनां परिष्ठापनसमितौ [1]आयुक्तता काचिन्नास्ति ॥ ४० ॥

---

१ सावधानता

चिरंपि से मुंडरुई भवित्ता, अथिरव्वए तवनियमेहिं भट्ठे ।
चिरंपि अप्पाण किलेसइत्ता, न पारए होइ हु संपराए ॥ ४१ ॥

स पूर्वोक्तः पञ्चसमितिरहितो मुन्याभासश्चिरं मुण्डरुचिर्भूत्वा, आत्मानमपि चिरं क्लेशयित्वा - क्लेशे पातयित्वा, 'हु' इति निश्चयेन 'संपराए' संसारे पारगो न भवति । कीदृशः सः ? अस्थिरव्रतोऽस्थिराणि व्रतानि यस्य सोऽस्थिरव्रतः । पुनः कीदृशः सः ? तपोनियमभ्रष्टः । यः कदापि तपो न करोति, तथा पुनर्नियममभिग्रहादिकं च न करोति, केवलं द्रव्यमुण्डो भवति, स संसारस्य पारं न प्राप्नोतीत्यर्थः ॥ ४१ ॥

पोल्ले च मुट्ठी जह से असारो, अयंतिए कूडकहावणे व ।
राढामणी वेरुलियप्पगासे, अमहग्घए होइ हु जाणएसु ॥ ४२ ॥

स पूर्वोक्तमुण्डरुचिरसारो भवति, अन्तःकरणे धर्माऽभावाद्रिक्तोऽकिञ्चित्करो भवति । स क इव ? पोल्लो मुष्टिरिव, यथा रिक्तो मुष्टिरसारो मध्ये शुषिर एव, तथा स मुण्डरुचिः कूटकार्षापण इवाऽसत्यनाणकमिवाऽयन्त्रितो भवति, न यन्त्रितोऽयन्त्रितोऽनादरणीयो निर्गुणत्वादुपेक्षणीयः स्यादित्यर्थः । उक्तमर्थमर्थान्तरन्यासेन दृढयति-'हु' यस्मात्कारणात् राढामणिः-काचमणिः 'जाणएसु' इति ज्ञातृकेषु-मणिपरीक्षकनरेषु वैडूर्यप्रकाशोऽमहर्घको भवति, बहुमूल्यो न भवति । वैडूर्यमणिवत् प्रकाशो यस्य स वैडूर्यमणिप्रकाशः, वैडूर्यमणिसदृग्तेजाः । महत्यर्घा यस्य स महर्घः, महर्घ एव महार्घकः, न महार्घकोऽमहार्घकोऽबहुमूल्य इत्यर्थः । यथा मणिज्ञेषु वैडूर्यमणिर्बहुमौल्यः स्यात्तथा काचमणिर्बहुमौल्यो न स्यात् । एवं धर्महीनो मुनिः साधुर्गुणज्ञेषु यथा सद्धर्माचारयुक्तः साधुर्वन्दनीयः स्यात्, तथा स मुण्डरुचिर्वन्दनीयो न स्यादिति भावः ॥ ४२ ॥

कुसीललिंगं इह धारयित्ता, इसिज्झयं जीविय बूहइत्ता ।
असंजए संजयलप्पमाणे, विणिघायमागच्छइ से चिरंपि ॥ ४३ ॥

'से' इति स साध्वाचाररहित इह संसारे चिरं-चिरकालं यावद्विनिघातमागच्छति-पीडां प्राप्नोति । किं कृत्वा ? कुशीललिङ्गं-पार्श्वस्थादीनां चिन्हं धारयित्वा, पुनर्जीविकायै-आजीविकार्थम् ऋषिध्वजं रजोहरणमुखपोतिकादिकं बृहयित्वा-वृद्धिं प्रापयित्वा, विशेषेण निघातं विनिघातं विविधपीडाम् स किं कुर्वाणः ? असंयतः सन्नहं संयत इति लालप्यमानः, असाधुरपि साधुरहमिति ब्रुवाणः ॥ ४३ ॥

विसं तु पीयं जह कालकूटं, हणाइ सत्थं जह कुग्गहीयं ।
एमेव धम्मो विसओववन्नो, हणाइ वेयाल इवाविवन्नो ॥ ४४ ॥

हे राजन् ! यथा कालकूटो-महाविषः पीतः सन् 'हणाइ' इति हन्ति, पुनर्यथा कुगृहीतं-

विपरीतवृत्त्या गृहीतं शस्त्रं हन्ति, एवमेवानेनैव दृष्टान्तेन, महाविषकुगृहीतशस्त्रदृष्टान्तेन विषयैरिन्द्रियसुखैरुपपन्नो विषयोपपन्नो विषयसुखाभिलाषयुक्तो धर्मोऽपि हन्ति । पुनः सविषयो धर्मोऽविपन्नवेताल इव हन्ति, मन्त्रादिभिरकीलितः स्फुरद्बलो मन्त्रयन्त्रैरनिवारितबलो वेतालो-महापिशाचो मारयति, तथा विषयसहितो धर्मोऽपि मारयतीत्यर्थः ॥ ४४ ॥

जे लक्खणं सुविणं पउंजमाणे, निमित्तकोऊहलसंपगाढे ।
कुहेडविज्जासवदारजीवी, न गच्छई सरणं तंमि काले ॥ ४५ ॥

यः साधुर्लक्षणं प्रयुञ्जानः-सामुद्रोक्तं स्त्रीपुरुषशरीरचिन्हं शुभाशुभसूचकं प्रयुङ्क्ते गृहस्थानां पुरतो वक्ति । पुनर्यः साधुः 'सुविण' स्वप्नविद्यां प्रयुञ्जानो भवति, स्वप्नानां फलाफलं वक्ति । पुनर्यः साधुर्निमित्तकौतूहलसम्प्रगाढो भवति, निमित्तं च कौतूहलं च निमित्तकौतूहले, तयोः सम्प्रगाढोऽत्यन्तासक्तः स्यात्, तत्र निमित्तं भूकम्पोल्कापातकेतूदयादि, कौतूहलं कौतुकं पुत्रादिप्राप्त्यर्थं स्नानभेषजौषधादिप्रकाशनम्, उभयत्र संरक्तो भवति । पुनर्यः साधुः कुहेटकविद्याश्रवद्वारजीवी भवति, कुहेटका विद्याः कुहेटकविद्याः अलीकाश्चर्यविधायिमन्त्रतन्त्रयन्त्रज्ञानात्मिकाः, ता एवाश्रवद्वाराणि, तैर्जीवितुमाजीविकां कर्तुं शीलं यस्य स कुहेटकविद्याश्रवद्वारजीवी, एतादृशो यो भवति । हे राजन् ! परं तस्मिन् काले-लक्षणस्वप्ननिमित्तकौतूहलकुहेटकविद्याश्रवद्वारोपार्जितपातकफलोपभोगकाले स साधुः शरणं-त्राणं दुष्कृतरक्षाक्षमं न गच्छति - न प्राप्नोति, तं साधुं कोऽपि दुःखान्नरकतिर्यग्योन्यादौ न त्रायते इत्यर्थः ॥ ४५ ॥

तमंतमेणेव उ से असीले, सया दुही विप्परियासुवेई ।
संधावई नरगतिरक्खजोणिं, मोणं विराहित्तु असाहुरूवे ॥ ४६ ॥

तु पुनः स द्रव्यमुण्डोऽसाधुरूपो मौनं विराध्य- साधुधर्मं दूषयित्वा नरकतिर्यग्योनिं सन्धावति-सततं गच्छति । पुनः सोऽशीलः कुशीलो विपर्यासमुपैति, तत्त्वेषु वैपरीत्यं प्राप्नोति, मिथ्यात्वमूढो भवतीति भावः । कीदृशः सः ? तमस्तमसैव सदा दुःखी, अतिशयेन तमस्तमस्तमः, तेन तमस्तमसैवाऽज्ञानमहान्धकारेणैव संयमविराधनाजनितदुःखसहितः ॥ ४६ ॥

उद्देसियं कीयगडं नियागं, न मुच्चई किंचि अणेसणिज्जं ।
अग्गीव वा सव्वभक्खी भवित्ता, इओ चुओ गच्छई कट्टु पावं ॥ ४७ ॥

पुनर्यः साधुवेश उद्देशिकं दर्शनिन उद्दिश्य कृतमुद्देशिकमाहारम्, नित्यकं नित्यपिण्डं गृहस्थस्य गृहे नियतपिण्डम्, एतादृशं सदोषमाहारमनेषणीयं साधुनाऽग्राह्यं न मुञ्चति, जिह्वालाम्पट्येन किमपि न त्यजति, सर्वमेव गृहणाति, सोऽग्निरिव सर्वभक्षीभूय हरितशुष्यप्रज्वालको वैश्वानर इव भूत्वा, प्रासुकाहारं भुक्त्वा, इतश्च्युतो मनुष्यभवाच्च्युतः कुगतिं व्रजति । किं कृत्वा ? पापं कृत्वा, संयमविराधनां विधाय ॥ ४७ ॥

न तं अरी कंठछित्ता करेइ, जं से करे अप्पणिया दुरप्पा ।
से णाहई मच्चुमुहं तु पत्ते, पच्छाणुतावेण दयाविहूणो ॥ ४८ ॥

हे राजन्नात्मीया दुरात्मता-स्वकीया दुष्टाचारप्रवृत्तिर्यमनर्थं करोति, तमनर्थं कण्ठे छेत्ता-कण्ठच्छेदकोऽरिरपि न करोति । प्राणापहारकाद्वैरिणोऽपि दुरात्मता दुष्टा । दुष्टाचारप्रवृत्त आत्मान एव घातकृदिति हार्दम् । स च दुष्टाचारप्रवृत्त आत्मा मृत्युमुखं प्राप्तः सन् 'णाहई' इति ज्ञास्यति, स्वयमेवेति शेषः । केन ? पश्चादनुतापेन, हा ! मया दुष्टं कर्म कृतमिति पश्चात्तापेन मरणसमये ज्ञास्यति । कीदृशः स दुरात्मा ? दयाविहीनः ॥ ४८ ॥

निरट्ठिया नग्गरुई उ तस्स, जे उत्तमट्ठे विवज्जासमेई ।
इमेवि से नत्थि परेवि लोए, दुहओ वि से झिज्झइ तत्थ लोए ॥ ४९ ॥

हे राजन् ! य उत्तमार्थे विपर्यासमेति, तस्य नाग्न्यरुचिर्नाग्न्ये - श्रामण्ये रुचिरिच्छा निरर्थिका । उत्तमः प्राधानोऽर्थो मोक्षो यस्मात्स उत्तमार्थः, तस्मिन्नुत्तमार्थे, अर्थात्पर्यन्त-समयाराधनरूपे जिनाज्ञाराधने वैपरीत्यं प्राप्नोति, दुरात्मत्वे सुन्दरात्मत्वज्ञानं प्राप्नोति, तस्य नग्नत्वादिरुचिर्निर्वस्त्रादिक्लेशवाञ्छा निष्फला । मिथ्यात्विनो हि कष्टं निष्फलम्, यतो ह्यन्यस्य पुरुषस्य तु किञ्चित्फलं स्यादेव, परं तु मिथ्यात्विनो नग्नत्वरुचेरर्थाद् द्रव्यलिङ्गि-नोऽयं लोको नास्ति, लोचादिनग्नत्वादिकष्टसेवनादिहलोकसुखमपि नास्ति, पुनस्तस्य द्रव्यलिङ्गिनः संयमविराधनातः परलोकः-परलोकसुखमपि नास्ति, कुगतिग-मनाद्दुःखं स्यात्, तत्रोभयलोकाऽभावे सति स धर्मभ्रष्टो द्विधाप्यैहिकपारलौकिकसुखाऽभावेनो-भयलोकसुखयुक्तान्नरानवलोक्योभयलोकसुखाद्भ्रष्टं मां धिगिति चिन्तया 'झिज्झइ' इति क्षीयते - जीर्णो भवति । मनसि दूयते इत्यर्थः ॥ ४९ ॥

एमेवऽहाछंदकुसीलरूवे, मग्गं विराहित्तु जिणुत्तमाणं ।
कुररी इवा भोगरसाणुगिद्धा, निरट्ठसोया परियावमेइ ॥ ५० ॥

एवमेवामुना प्रकारेण महाव्रतविराधनादिप्रकारेणैव यथाछन्दः कुशीलरूपः स्वकीयरुचिरचिताचारः कुत्सितशीलस्वभावः साधुर्जिनोत्तमानां-तीर्थङ्कराणां मार्गं विराध्य परितापं पश्चात्तापमेति-प्राप्नोति । क इव ? भोगरसानुगृद्धा [1]कुररी पक्षिणीव, भोगानां जिह्वास्वाददायकानां मांसानां रसेऽनुगृद्धा लोलुपा भोगरसानुगृद्धा । पुनः कीदृशा कुररी ? निरट्ठसोया, निरर्थकः शोको यस्याः सा निरर्थशोका । यथा हि मांसरसगृद्धा पक्षिणी अन्येभ्यो महाबलेभ्यो पक्षिभ्यो विपत्तिं प्राप्य शोचते, तद्विपत्तेः प्रतीकारमनवलो-कयन्ती पश्चात्तापं प्राप्नोति, तथा संयमविराधको विषयाभिलाषीन्द्रियसुखार्थी साधुर्लोकद्व-यानर्थं प्राप्नोति । ततोऽस्य स्वपरित्राणासमर्थत्वेनाऽनाथत्वमिति भावः ॥ ५० ॥

१ क्रौंच (मादा पक्षी)

अथ यत्कृत्यं तदाह -

सुच्चाण मेहावि सुभासियं इमं, अणुसासणं नाणगुणोववेयं ।
मग्गं कुसीलाण जहाय सव्वं, महानियंठाण वए पहेणं ॥ ५१ ॥

हे मेधाविन् ! हे पण्डित ! हे राजन् ! इदं सुष्ठु भाषितं सुभाषितमनुशासनमुपदेशं श्रुत्वा सर्वं कुशीलानां मार्गं 'जहाये' ति त्यक्त्वा महानिर्ग्रन्थानां - महासाधूनां पथि-मार्गे व्रजेस्त्वं चरेः । कीदृशमनुशासनम् ? ज्ञानगुणोपपेतम्, ज्ञानस्य गुणा ज्ञानगुणास्तैरुपपेतं ज्ञानगुणोपपेतम् ॥ ५१ ॥

चरित्तमायारगुणन्निए तओ, अणुत्तरं संजमपालियाणं ।
निरासवे संखवियाण कम्मं, उवेइ ठाणं विउलुत्तमं धुवं ॥ ५२ ॥

ततस्तस्मात्कारणान्महानिर्ग्रन्थमार्गगमनान्निराश्रवो मुनिर्महाव्रतपालकः साधुर्विपुल-मनन्तसिद्धानामवस्थानादसङ्कीर्णम्, उत्तमं सर्वोत्कृष्टम्, पुनर्ध्रुवं-निश्चलं शाश्वतमेतादृशं मोक्षस्थानमुपैति-प्राप्नोति । कीदृशः साधुः? चारित्राचारगुणान्वितः, चारित्रस्याचारश्चारित्रा-चारश्चारित्रसेवनम्, गुणा-ज्ञानशीलादयः, चारित्राचारश्च गुणाश्च चारित्राचारगुणास्तैरन्वित-श्चारित्राचारगुणान्वितः । अत्र मकारः प्राकृतत्वात् । किं कृत्वा साधुर्मोक्षं प्राप्नोति ? अनुत्तरं प्रधानं भगवदाज्ञाशुद्धं संयमं सप्तदशविधं पालयित्वा । पुनः किं कृत्वा ? कर्माण्यष्टावपि संक्षिपय्य-क्षयं नीत्वा । एतावता चारित्राचारज्ञानादिगुणयुक्तः, अत एव निरुद्धाश्रवः प्रधानं संयमं प्रपाल्य सर्वकर्माणि संक्षयं नीत्वा मोक्षं प्राप्नोतीत्यर्थः ॥ ५२ ॥

अथोपसंहारमाह-

एवुग्गदंतेवि महातवोहणे, महामुणी महापइन्ने महायसे ।
महानियंठिज्जमिणं महासुयं, से कहेइ महया वित्थरेण ॥ ५३ ॥

एवममुना प्रकारेण श्रेणिकेन राज्ञा पृष्टः सन् स महामुनिर्महासाधुर्महता विस्तरेण-बृहता व्याख्यानेन महानिर्ग्रन्थीयं महाश्रुतमकथयत् । महान्तश्च ते निर्ग्रन्थाश्च महानिर्ग्रन्थाः, तेभ्यो हितं महानिर्ग्रन्थीयम्, महामुनीनां हितमित्यर्थः । कीदृशः सः ? उग्रः कर्मशत्रुहनने बलिष्ठः, पुनः कीदृशः सः ? दान्तो-जितेन्द्रियः, पुनः कीदृशः ? महातपोधनो महच्च तत्तपश्च महातपः महातपो धनं यस्य स महातपोधनः, पुनः कीदृशः ? महाप्रतिज्ञो - व्रते दृढप्रतिज्ञा-धारकः, पुनः कीदृशः ? महायशा - महाकीर्त्तिः ॥ ५३ ॥

तुट्ठो हु सेणिओ राया, इणमुदाह कयंजली ।
अणाहत्तं जहाभूयं, सुट्ठु मे उवदंसियं ॥ ५४ ॥

श्रेणिको राजा तुष्टो 'हु' इति निश्चयेनेदमुदाहेदमवादीत्-कीदृशः श्रेणिकः ?

कृताञ्जलिर्बद्धाञ्जलिः । इदमिति किं ? हे मुने ! यथाभूतं यथावस्थितमनाथत्वं मे - मम सुष्ठूपदर्शितम्, त्वया 'मे' ममाऽनाथत्वं सम्यग्दर्शितमिति भावः ॥ ५४ ॥

तुम्हा सुलद्धं खु मणुस्सजम्मं, लाभा सुलद्धा य तुमे महेसी ।
तुज्झे सणाहा य सबंधवा य, जं भे ठिया मग्गे जिणुत्तमाणं ॥ ५५ ॥

किं श्रेणिक आह-हे महर्षे ! मानुष्यं जन्म 'खु' इति निश्चयेन सुलब्धम्' सफलं त्वदीयं मानुष्यं जन्म । हे महर्षे ! त्वयैव लाभा रूपवर्णविद्यादीनां लाभाः सुलब्धाः, रूपलावण्यादिप्राप्तयः सुप्राप्ताः । हे महर्षे ! यूयमेव सनाथाः, आत्मनो नाथत्वान्नाथसहिताः, च पुनर्यूयमेव सबान्धवा ज्ञातिकुटुम्बसहिताः, यद्यस्मात्कारणात् 'भे' भवन्तो जिनोत्तमानां-तीर्थङ्कराणां मार्गे स्थिताः ॥ ५५ ॥

तं सि णाहो अणाहाणं, सव्वभूयाण संजया ।
खामेमि ते महाभाग, इच्छामि अणुसासिउं ॥ ५६ ॥

हे संयत ! त्वमनाथानां सर्वभूतानां त्रसानां स्थावराणां जीवानां नाथोऽसि । हे महाभाग ! हे महाभाग्ययुक्त ! 'ते' इति त्वामहं क्षमामि । मया पूर्वं यस्तवापराधः कृतः स क्षन्तव्य इत्यर्थः । अथ भवतोऽनुशासयितुं - त्वत्तः शिक्षयितुमात्मानमिच्छामि, मदीय आत्मा तवाज्ञावर्ती भवत्वितीच्छामीत्यर्थः ॥ ५६ ॥

पुच्छिऊण मए तुज्झं, झाणविग्घो य जो कओ ।
निमंतिओ य भोगेहिं, तं सव्वं मरिसेहि मे ॥ ५७ ॥

हे महर्षे ! मया तुभ्यं पृष्ट्वा-प्रश्नं कृत्वा यस्तव ध्यानविघ्नः कृतः, च पुनर्भोगैः कृत्वा निमन्त्रितः, भो स्वामिन् ! भोगान् भुङ्क्ष्वेत्यादिप्रार्थना तव कृता, तं सर्वं मे ममापराधं क्षन्तुमर्हसि, सर्वं ममापराधं क्षमस्वेत्यर्थः ॥ ५७ ॥

एवं थुणित्ताण स रायसीहो, अणगारसीहं परमाइ भत्तीए ।
सओरोहो सपरियणो सबंधवो, धम्माणुरत्तो विमलेण चेयसा ॥ ५८ ॥

स राजसु सिंहो राजसिंहः- श्रेणिको राजा एवममुना प्रकारेण तमनगारसिंहं-मुनिसिंहं परमयोत्कृष्टया भक्त्या स्तुत्वा विमलेन-निर्मलेन चेतसा धर्मानुरक्तोऽभूदिति शेषः । कीदृशः श्रेणिकः ? सावरोधोऽन्तःपुरेण सहितः, पुन कीदृशः ? सपरिजनः सह परिजनैर्वर्तत इति सपरिजनो भृत्यादिवर्गसहितः पुनः कीदृशः ? सबान्धवः सह बान्धवैर्भ्रातृप्रमुखैर्वर्तत इति सबान्धवः । पुरापि वनवाटिकायां सर्वान्तः पुरपरिजनबान्धवकुटुम्बसहित एव क्रीडां कर्तुमागात्, ततो मुनेर्वाक्यश्रवणात् सर्वपरिकरयुक्तो धर्मानुरक्तोऽभूदित्यर्थः ॥ ५८ ॥

उस्ससियरोमकूवो, काऊण य पयाहिणं ।
अभिवंदिऊण सिरसा, अइयाओ नराहिवो ॥ ५९ ॥

नराधिपः श्रेणिकोऽतियातो - गृहं गतः । किं कृत्वा ? शिरसा मस्तकेनाभिवन्द्य-मुनिं नमस्कृत्य, पुनः किं कृत्वा ? प्रदक्षिणां कृत्वा-प्रदक्षिणां दत्त्वा । कथंभूतो नराधिपः ? 'उस्ससियरोमकूवो' उच्छ्वसितरोमकूपः, साधोर्दर्शनाद्वाक्यश्रवणादुल्लसितरोमकूपः ॥ ५९ ॥

इयरोवि गुणसमिद्धो, तिगुत्तिगुत्तो तिदंडविरओ य ।
विहंग इव विप्पमुक्को, विहरइ वसुहं विगयमोहो ॥ ६० ॥ त्तिबेमि

अथेतरोऽपि श्रेणिकापेक्षयाऽपरोऽपि-मुनिरपि वसुधां-पृथिवीं विहरति विहारं करोति । कीदृशः सन् ? विमोहः सन्-मोहरहितः सन्, अर्थात् केवली सन् । कीदृशो मुनिः ? गुणसमृद्धः सप्तविंशतिसाधुगुणसहितः, पुनः कीदृशः ? त्रिदण्डविरतस्त्रिदण्डेभ्यो मनोवक्कायानामशुभव्यापारेभ्यो विरतः, पुनः कीदृशः ? विहग इव विप्रमुक्तः, पक्षीव क्वचिदपि प्रतिबन्धरहितो निष्परिग्रह इत्यर्थः । इति सुधर्मास्वामी जम्बूस्वामिनं प्रति वदति, अहमिति ब्रवीमि ॥ ६० ॥

इति महानिर्ग्रन्थीयमध्ययनं विंशतितमं सम्पूर्णम् ॥ २० ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणि-विरचितायां महानिर्ग्रन्थीयाख्यं विंशतितममध्ययनं समाप्तं श्रीरस्तु ।

॥ २१ समुद्रपालीयमध्ययनम् ॥

पूर्वस्मिन्नध्ययनेऽनाथत्वमुक्तम्, तदनाथत्वं विविक्तचर्यया विचार्यते, अतोऽस्मिन्नध्ययने विवक्तचर्योच्यते-

चंपाए पालिए नाम, सावए आसि वाणिए ।
महावीरस्स भगवओ, सीसो सो उ महप्पणो ॥ १ ॥

'चंपाए' इति चम्पायां नगर्यां पालित इति नाम्ना श्रावको देशविरतिधारी वणिगासीत् । कीदृशः स वणिक् ? भगवतो महावीरस्य महात्मनो - महापुरुषस्य तीर्थकरस्य शिष्यः शिक्षाधारकः । 'सो उ' इति स पुनः पालितो नाम श्राद्धः कीदृशो वर्तते ? तदाह- ॥ १॥

निग्गंथे पावयणे, सावए से वि कोविए ।
पोएण ववहरंते, पिहुंडं नगरमागए ॥ २ ॥

स पालितनामा श्रावको महात्मा नैर्ग्रन्थे प्रावचने-श्रीवीतरागस्य सिद्धान्ते कोविदोऽभूत् । स पालित एकदा पोतेन व्यावहरन्-प्रवहणेन वाणिज्यं कुर्वन् पिहुण्डं नाम नगरमागतः । चम्पानगरीतः प्रवहणमारुह्य व्यापारार्थं पिहुण्डनगरं समायात इति ॥ २ ॥

पिहुंडे ववहरंतस्स, वाणिओ देइ धूयरं ।
तं ससत्तं पइगिज्झ, [1]सयं देसं पइट्ठिए ॥ ३ ॥

अथ तत्र पिहुण्डनगरे कश्चिद्वणिक् व्यवहरतस्तस्य पालितस्य गुणैः सन्तुष्टः सन् पालिताय 'धूयरमि' ति पुत्रीं ददाति । स च पालितस्तां परिणीय कतिचिद्दिनानि तत्र स्थित्वा तां वणिक्पुत्रीं ससत्त्वां-सगर्भां प्रतिगृह्य स्वकं देशं प्रति प्रस्थितः, पिहुण्डाच्चम्पां प्रति चलितः ॥ ३ ॥

अह पालियस्स घरणी, समुद्दंमि य पसवई ।
अह दारए तहिं जाए, समुद्दपालो त्ति नामए ॥ ४ ॥

अथानन्तरं पालितस्य गृहिणी समुद्रे दारकं प्रसूते स्म । अथ तस्मिन् दारके-पुत्रे जाते सति समुद्रपाल इति नामतः स बाल आसीदिति शेषः ॥ ४ ॥

खेमेण आगए चंपं, सावए वाणिए घरं ।
संवड्ढइ घरे तस्स, दारए से सुहोइए ॥ ५ ॥

तस्मिन् पालिते नाम्नि वणिजि चम्पायां नगर्यां क्षेमेण-सुखेन गृहमागते सति समुद्रपालो बालकः संवर्धते । कीदृशः स बालकः ? सुखोचितः- सुखयोग्यः ॥ ५ ॥

---

१ सदेसमह पत्थिओ - अन्य संस्करणे ॥

बावत्तरीकलाओ य, सिक्खिए नीइकोविए ।
जोवणेण य संपन्ने, सुरूवे पियदंसणे ॥ ६ ॥

च-पुनः स समुद्रपालो द्वासप्ततिकलाशिक्षितः सन्नीतिकोविदोऽभूत्, लोकनीतिधर्म-नीतिचतुरोभूत् । च - पुनर्यौवनेन सम्पन्नः-सञ्जात इति गम्यम् । कथंभूतः सः ? प्रियदर्शनः, पुनः कथम्भूतः समुद्रपालः ? सुरूपः- सुन्दररूपः ॥ ६ ॥

तस्स रूववइं भज्जं, पिया आणेइ रूविणिं ।
पासाए कीलिए रम्मे, देवो दोगुंदगो जहा ॥ ७ ॥

अथ तस्य समुद्रपालस्य पिता पालितो रूपवतीं भार्यां रूपिणीतिनाम्नीमानयति-परिणायति स्म । ततो रम्ये - रमणीके प्रासादे क्रीडां करोति । को यथा ? दोगुन्दको देवो यथा, यथेन्द्राणां पूज्यस्थानीयो देवः सुखानि भुङ्क्ते, तथा सुखं भुङ्क्ते इत्यर्थः ॥ ७ ॥

अह अन्नया कयाई, पासायालोयणे ठिओ ।
वज्झमंडणसोभागं, वज्झं [1]पस्सई बज्झगं ॥ ८ ॥

अथानन्तरं समुद्रपालोऽन्यदा कदाचित् प्रासादस्य - धवलगृहस्यालोकने प्रासादा-लोकने मन्दिरगवाक्षे स्थितो वध्यं - चौरं पश्यति, वधायार्हो वध्यस्तम् । कीदृशं वध्यम् ? वध्यमण्डनशोभाकं, वध्यस्य - चौरस्य यानि मण्डनानि रक्तचन्दननिम्बपत्रकरवीरपुष्पस्त्र-गादीनि वध्यमण्डनानि, तैः शोभा यस्यासौ वध्यमण्डनशोभाकस्तम् । पुनः कीदृशं ? बाह्यगं - बहिर्भवं बाह्यं बहिर्भूमण्डलम्, तद्गच्छति - प्राप्नोतीति बाह्यगस्तम्, राजपुरुषै-र्बहिर्निःसारयन्तम् । अथवा वध्यगम्, इह वध्यशब्देनोपचाराद्वध्यभूमिरुच्यते, तत्र वध्यभूमौ गच्छन्तम् ॥ ८ ॥

तं पासिऊण संविग्गो, समुद्दपालो इणमब्बवी ।
अहो असुहाण कम्माणं, निज्जाणं पावगं इमं ॥ ९ ॥

समुद्रपालः संवेगं प्राप्तः सन्निदमब्रवीत् । किं कृत्वा ? तं चौरं-वध्यं दृष्ट्वा, इदमिति किं ? अहो इत्याश्चर्येऽशुभानां कर्मणामिदं पापकं निर्याणमशुभं प्रान्तं दृश्यते ॥ ९ ॥

संबुद्धो सो तहिं भयवं, परमसंवेगमागओ ।
[2]आपुच्छऽम्मापियरं, [3]पव्वइए अणगारियं ॥ १० ॥

---

१ पासइ - अन्यसंस्करणे ॥

२ आपुच्छऽम्मापिअरो-अन्यसंस्करणे, तत्र तस्य वृत्तिरपि एवं-"आपृच्छय माता-पितरौ-" इति बृहद्वृत्त्याम्० ॥

३ पव्वए-अन्यसंस्करणे ।

स समुद्रपालो भगवान् - माहात्म्यवान् सम्बुद्धः- प्रतिबुद्धः सन् परमसंवेगमागतः, परमवैराग्यं प्राप्तः । मातापितरमापृच्छ्यानगारत्वं प्रव्रजितः, प्रकर्षेणाङ्गीकृतवान् ॥ १० ॥

जहित्तु संगं थ महाकिलेसं, महंतमोहं [1]किसणं भयावहं ।
परियायधम्मं चऽभिरोयइज्जा, वयाणि सीलाणि परिसहे य ॥ ११ ॥

समुद्रपालो भगवान् आत्मने 'परियायधम्मं' प्रव्रज्याधर्ममभिरोचयेत् । च पुनर्व्रतानि अहिंसानृतास्तेयब्रह्माकिञ्चनत्वलक्षणानिपञ्च, तथा शीलान्युत्तरगुणरूपाणि शुद्धाचार-गोचरीकरणसप्ततिरूपाणि, तान्यप्यात्मनेऽभिरोचयेत्, अर्थात्प्रव्रज्यां जग्राहेत्यर्थः । किं कृत्वा ? सङ्गं-स्वजनादिसम्बन्धं त्यक्त्वा, 'थ' पादपूरणे । कथंभूतं सङ्गम् ? 'महाकिलेसं' महान् क्लेशो यस्मात्स महाक्लेशस्तम् । पुनः कथंभूतं सङ्गं ? महान् मोहो यस्मिन् स महामोहस्तं महामोहं - प्रचुराज्ञानसहितम् । पुनः कथंभूतं ? 'किसणं' कृष्णलेश्याया हेतुम्, तस्मात्कृष्णम्, पुनः कथंभूतं ? भयानकं भयजनकमित्यर्थः ॥ ११ ॥

अहिंससच्चं च अतेणगं च, तत्तो य बंभं अपरिग्गहं च ।
पडिवज्जिया पंच महव्वयाइं, चरिज्ज धम्मं जिणदेसियं विऊ ॥ १२ ॥

तानि पञ्चव्रतानां नामान्याह-अहिंसा, जीवानां वधो हिंसा, न हिंसाऽहिंसा सर्वजीवेषु दया प्रथमम् १ । च पुनः सत्यम् २ । च पुनरस्तैन्यकम्, स्तेनस्य चौरस्येदं कर्म स्तैन्यम् न स्तैन्यमस्तैन्यम् अस्तैन्यमेवाऽस्तैन्यकम् ३ । ततोऽनन्तरं ब्रह्म-शीलम् ४ । च पुनरपरिग्रहं सर्वथा लोभत्यागः ५ । स समुद्रपालः पञ्च महाव्रतानीमानि प्रतिपद्य जिनदेशितं धर्मं चरेत्-सेवेत, महाव्रतानि गृहीत्वैकत्र न तिष्ठेदिति भावः । कथंभूतः सः ? 'विऊ' इति विद्वान्, वेत्ति हेयोपादेयविधीनिति विद्वान् ॥ १२ ॥

सव्वेहिं भूएहिं दयाणुकंपे, खंतिखमे संजय बंभयारी ।
सावज्जजोगं परिवज्जयंते, चरिज्ज भिक्खू सुसमाहिइंदिए ॥ १३ ॥

'भिक्खू' इति भिक्षुः समुद्रपालितसाधुः सुसमाहितेन्द्रियः सन् 'चरिज्ज' इति विचरति स्म । कथंभूतः सः ? सर्वेषु भूतेषु दयानुकम्पी, सर्वेषु प्राणिषु दयया हितोपदेशरूपयाऽनु-कम्पनशीलो दयापालनपरः स दयानुकम्पी, पुनः कथंभूतः ? क्षान्तिक्षमः, क्षान्त्या, तत्वलोचनया क्षमते दुष्टानां दुर्वचनताडनादिकमिति क्षान्तिक्षमः, पुनः कथंभूतः ? संयतः साध्वाचारपालकः, पुनः कथंभूतः ? ब्रह्मचारी, ब्रह्मणि-परमात्मस्वरूपे चरतीति ब्रह्मचारी ब्रह्मचर्यधारको वा । पुनः स किं कुर्वन् विचरते स्म ? सावद्ययोगं वर्जयन्, सपापयोगं परित्यजन् ॥ १३ ॥

---

१ कासिणं - अन्यसंस्करणे ।

कालेण कालं विहरेज्ज रट्ठे, बलाबलं जाणिय अप्पणो ऊ ।
सीहो व्व सद्देण न संतसिज्जा, वययोगं सुच्चा न असब्भमाहु ॥ १४ ॥

पुनः स साधुः कालेन प्रस्तावेन प्रथमपौरुष्यादिसमयेन कालमवसरयोग्यं कार्यं ध्यानानुष्ठानतपस्यादिकं कुर्वन् राष्ट्रे-मण्डले विचरेत् । किं कृत्वा ? आत्मनो बलाबलं ज्ञात्वा, परीषहादिसहनसामर्थ्यं विचार्य, यथा संयमयोगहानिर्न स्यात्तथेति भावः । पुनः स साधुः सिंह इव शब्देन भयोत्पादकेन न सन्त्रसेत् सत्वान्नात्रसत्, अत एव वाग्योगं श्रुत्वा-दुःखोत्पादकं वचनं श्रुत्वा, खलानामसभ्यं वचनं कर्णे विधायाऽसभ्यं वचनं न आह-न ब्रूयात् आर्षत्वादाहुरिति ॥ १४ ॥

उवेहमाणो उ परिव्वइज्जा, पियमप्पियं सव्व तितिक्खइज्जा ।
न सव्व सव्वत्थभिरोयइज्जा, न यावि पूयं गरहं च संजए ॥ १५ ॥

तु-पुनः स साधुरुपेक्ष्यमाणोऽसभ्यवचनमवगणयन् परिव्रजेत्, मनसि वचसि दुर्वचनमधारयन् ग्रामानुग्रामेष्वतिशयेन विचरेत्, प्रियं च पुनरप्रियं सर्वं तितिक्षेत् । लोकानां सम्यग्वचनं दुष्टं वचनं च सहेत । पुनः स समुद्रपालितसाधुः सर्वं वस्तु सर्वत्र न रोचयेत्, आत्मने नाभिलषयेत् । च पुनः स संयतः- स साधुः पूजामपि-स्तुतिरूपां वाणीमपि निश्चयेन गर्हां निन्दां परापवादरूपामपि न रोचयेत् । यतो हि स समुद्रपालितसाधुर्दृष्टादृष्ट-पदार्थेष्वभिलाषुको माभूदिति भावः ॥ १५ ॥

ननु किं भिक्षोरप्यन्यथाभावः स्यात्, येनेत्थमित्थमात्मनोऽनुशासनमसौ चक्रे, इत्याह-

अणेगछंदा इह माणवेहिं, जे भावओ संपगरेइ भिक्खू ।
भयभेखा तत्थ उवेंति भीमा, दिव्वा मणुस्सा अदुवा तिरिच्छा ॥ १६ ॥

इहास्मिन् जगति मानवेषु-मनुष्येष्वनेकानि छन्दासि बहवोऽभिप्राया वर्तन्ते, याननेकानभिप्रायान् भावतस्तत्त्ववृत्त्या भिक्षुरपि सम्प्रकरोति । अतस्तत्र दीक्षायां भयभेरवाः- प्रचुरभयोत्पादका भीमा - रौद्राः, दिव्या - देवसम्बन्धिनः, अथवा मानुष्या-मनुष्यसम्बन्धिनः, तिर्यञ्चास्तिर्यग्योनिसम्बन्धिन उत्पद्यन्ते ॥ १६ ॥

परीसहा दुव्विसहा अणेगे, सीयंति जत्थ बहुकायरा नरा ।
से तत्थ पत्ते न वहिज्ज भिक्खू, संगामसीसे इव नागराया ॥ १७ ॥

दुर्विषहा-दुःखेन सोढुं शक्याः परीषहा अनेके उत्पद्यन्ते इति सम्बन्धः । यत्र येषूपसर्गेषूत्पन्नेषु बहुकातरा नरा-अनेके कातराः सीदन्ति, संयमात् श्लथीभवन्ति । स साधुस्तत्र परीषहे प्राप्ते-उदयमागते सति न व्यथेत्र सत्वाच्चलेत् । क इव ? नागराज इव-गजराज इव, यथा गजराजः सङ्ग्रामशीर्षे-युद्धप्रकर्षे न विपरीतमुखो भवति ॥ १७ ॥

सीउसिणादंसमसगायफासा, आयंका देहं विविहा फुसंति ।
अकुक्कुओ तत्थहियासएज्जा, रयाइ खेविज्ज पुरा कडाइ ॥ १९ ॥

शीतोष्णदंशमशकतृणस्पर्शाः, एते परीषहाः साधोर्देहं विविधा आतङ्का - रोगपरीषहाः स्पृशन्ति, तदा साधुः 'अकुक्कुओ' इति कुत्सितं कूजति - पीडितः सन्नाक्रन्दतीति कुकूजः, न कुकूजोऽकुकूजः, आक्रन्दमकुर्वंस्तत्र तान् परीषहानधिसहेत । एवंविधः साधुः पुराकृतानि रजांसि-पापानि क्षपयेत्-क्षयं नयेत् ॥ १८ ॥

पहाय रागं च तहेव दोसं, मोहं च भिक्खू सततं वियक्खणो ।
मेरुव्व वाएण अकंपमाणो, परीसहे आयगुत्ते सहिज्जा ॥ १९ ॥

साधुः परीषहान् सहेत, किं कृत्वा ? रागं तथा द्वेषं च पुनर्मोहं प्रहाय-त्यक्त्वा, कीदृशः साधुः ? सततं विचक्षणो-निरन्तरं तत्त्वविचाररतः, क इव ? मेरुरिव वातैरकम्पमानः, पुनः कीदृशः साधुः ? आत्मगुप्तः कूर्म इव गुप्तशरीरः ॥ १९ ॥

अणुन्नए नावणए महेसी, नयावि पूयं गरहं च संजए ।
से उज्जुभावं पडिवज्ज संजया, निव्वाणमग्गं विरए उवेइ ॥ २० ॥

महर्षिः पूजां-स्तुतिं, च पुनर्गर्हां निन्दामपि न सङ्गयेत्-सङ्गं न कुर्यात्, स्तुतिनिन्दयोः प्रसङ्गं न कुर्यात् । स्तुतिं श्रुत्वा हर्षं न कुर्यात्, निन्दां च श्रुत्वा दुःखं न कुर्यादिति भावः । कीदृशो महर्षिः ? अनुन्नतः, न उन्नतोऽभिमानरहितः, पुनः कीदृशः ? नावनतो, न अवनतो-दीनभावेन रहितः, स एतादृशः समुद्रपालितः संयत ऋजुभावं-सरलत्वं प्रतिपद्य विरतः-पापान्निवृत्तः सन् निर्वाणमार्गं मोक्षमार्गमुपैति-प्राप्नोति ॥ २० ॥

अरइरइसहे पहीणसंथवे, विरए आयहिए पहाणवं ।
परमट्ठपएहि चिट्ठई, छिन्नसोए अममे अकिंचणे ॥ २१ ॥

पुनः स साधुररतिरतिसहः, अरतिश्च रतिश्चाऽरतिरती, ते सहते इत्यरतिरतिसहः, पुनः कीदृशः ? प्रहीणसंस्तवः प्रकर्षेण हीनो गतः संस्तवो-गृहस्थैः सह परिचयो यस्य स प्रहीणसंस्तवस्त्यक्तसङ्गः । पुनः कीदृशः ? विरतः-पापक्रियातो निवृत्तः, पुनः कीदृशः ? आत्महित, आत्मनां-सर्वजीवानां हितो-हितवाञ्छकः । पुनः कीदृशः ? प्रधानवान्, प्रधानः संयमः स विद्यते यस्य स प्रधानवान् संयमयुक्तः, पुनः स साधुः किं करोति ? परमार्थपदेषु तिष्ठति, परमार्थस्य-मोक्षस्य पदानि-स्थानानि मोक्षदायकत्वात्कारणानि परमार्थपदानि ज्ञानदर्शनचारित्राणि, तेषु तिष्ठति, प्राकृतत्वात् सप्तमीस्थाने तृतीया । पुनः कीदृशः सः ? छिन्नशोकः, अथवा छिन्नानि श्रोतांसि-मिथ्यादर्शनादीनि यस्यासौ छिन्नश्रोतः । इह संयमप-दानामानन्त्यात्तदभिधायिपदानां पुनः पुनर्वचनेऽपि न पौनरुक्त्यम् । पुनः कीदृशः सः ? अममो ममत्वरहितः, पुनः कीदृशः ? अकिञ्चनो द्रव्यादिपरिग्रहरहितः ॥ २१ ॥

विवित्तलयणाइं भएज्ज ताई, निरोवलेवाइ असंथडाइ ।
इसीहि चिन्नाइ महाजसेहिं, काएण फासिज्ज परीसहाइं ॥ २२ ॥

पुनः समुद्रपालितः साधुः कीदृशः ? 'तायी' त्रायते-रक्षति कायषट्कमिति त्रायी, षट्कायरक्षाकारको मुनिरित्यर्थः । स विविक्तलयनानि स्त्रीपशुपण्डकरहितानि धर्मस्थानानि भजेत् । कीदृशानि विविक्तलयनानि ? निरुपलेपानि द्रव्य-भावतश्च लेपरहितानि, द्रव्यतो हि साधुनिमित्तेन न लिप्तानि, गृहस्थेन स्वार्थं लिप्तानीत्यर्थः । भावतस्तु रागादिलेपरहितानि, मदीयानीमानि स्थानानीति रागबुद्धया रहितानि । पुनः कीदृशानि ? 'असंथडाइ' असंस्तृतानि शाल्यादिबीजैरव्याप्तानि, सचित्तबीजसघट्टरहितानि । पुनः कीदृशानि ? महायशोभिः ऋषिभिश्चीर्णान्यङ्गीकृतानि सेवितानीत्यर्थः । पुनः समुद्रपालितः साधुः कायेन परीषहान् 'फासिज्ज' इति स्पृशेत्, द्वाविंशतिपरीषहान् सहेत ॥ २२ ॥

स नाणनाणोवगए महेसी, अणुत्तरं चरिउं धम्मसंचयं ।
अणुत्तरे नाणधरे जसंसी, उभासइ सूरिएवंतलिक्खे ॥ २३ ॥

स समुद्रपालो महर्षिरनुत्तरं-प्रधानं धर्मसञ्चयं दशविधधर्मं चरित्वाऽराध्याऽवभासते-शोभते । कीदृशः सः ? ज्ञानज्ञानोपगतः, ज्ञानेन-श्रुतज्ञानेन यद् ज्ञानं-सम्यक्क्रियाकलाप-वेदनं ज्ञानज्ञानम्, तेनोपगतः सम्यग्ज्ञान-क्रियासहितः, पुनः कीदृशः ? यशस्वी, स क इव ? अन्तरिक्षे - आकाशे सूर्य इव, यथाकाशे सूर्यो विराजते, तथा स तपस्तेजसा विराजते इत्यर्थः ॥ २३ ॥

दुविहं खविऊण य पुण्णपावं, निरंगणे सव्वओ विप्पमुक्के ।
तरित्ता समुद्दं च महाभवोहं, समुद्दपाले अपुणागमं गइं गइ ॥ २४ ॥
त्तिबेमि

समुद्रपालः साधुरपुनरागमगतिं गतः, न विद्यते पुनरागमो यस्याः साऽपुनरागमा, अपुनरागमा चासौ गतिश्चाऽपुनरागमगतिस्तां गतिम्, यत्र गतौ गतानां जीवानां पुनः संसारे आगमो न भवति, मोक्षं गत्र इत्यर्थः । किं कृत्वा मोक्षं गतः ? द्विविधं घातिकं भवोपग्राहिकं पुण्यपापं शुभाशुभप्रकृतिरूपं क्षपयित्वा सम्पूर्णं भुक्त्वा, पुनः किं कृत्वा ? महाभवौधं समुद्रं तरित्वोल्लङ्घ्य, महान्तश्च ते भवाश्च महाभवाः, तेषामोघः समूहो यत्र स महाभवौघः, तमेतादृशं समुद्रमर्थात्संसारसमुद्रं विलङ्घ्य सिद्धो बभूवेत्यर्थः । परं कीदृशः स समुद्रपालितः साधुः ? सर्वतो बाह्या-ऽभ्यन्तरपरिग्रहाद्विप्रमुक्तः, अथवा शरीरसङ्गादपि विप्रमुक्तः । पुनः कीदृशः सः ? निरङ्गनो निर्गतमङ्गनं-चलनं यस्मात्स निरङ्गनः, संयमे निश्चलः, अङ्गेर्गत्यर्थत्वात्, साधुमार्गे निश्चलचित्त इत्यर्थः । इत्यहं ब्रवीमि, हे जम्बू ! श्रीवीरवाक्यात्तवाग्रे इत्यमुना प्रकारेणाहं समुद्रपालितसाधुसम्बन्धं ब्रवीमि ॥ २४ ॥

इति समुद्रपालीयमेकविंशमध्ययनं सम्पूर्णम् ॥ २१ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणि-विरचितायामेकविंशाध्ययनस्यार्थः सम्पूर्णः ॥

॥ २२ रथनेमीयमध्ययनम् ॥

पूर्वस्मिन्नध्ययने विविक्तचर्या धृतिमता कार्या, तत्र च कदाचिन्मनःपरिणामाद्धर्माद्-भ्रष्टा भवन्ति, तदा रथनेमिवच्चरणे धृतिराधेया, तद्दृष्टान्तमाह-तत्र श्रीनेमिनाथेन कस्मिन् भवे तीर्थङ्करनामकर्म निबद्धमिति शिष्यकौतुकापनोदाय श्रीनेमिचरितं लेशतो लिख्यते-

एकस्मिन् सन्निवेशे ग्रामाधिपतिसुतो धननामा कुलपुत्र आसीत्, तन्मातुलदुहिता धनवतीनाम्नी तस्य भार्या । अन्यदा भार्यासहितः कुलपुत्रो ग्रीष्मकाले मध्याह्नसमये प्रयोजनवशेन गतोऽरण्यम् । तत्रैकं पथः परिभ्रष्टं क्षुधातृषापरिश्रमातीरेकनिमिलितलोचनं भूमितलमतिंगतं कृशशरीरं मुनिवरं ददर्श । तं च दृष्ट्वा स कुलपुत्र एवं चिन्तितवान्-अहो ! एष महातपस्वीदृशीं विषमावस्थामापन्नः, ततस्तं जलेन सिक्तवान्, चेलाञ्चलेन वीजितवांश्च, स्वास्थ्यमापन्नो नीतः स्वग्रामम्, प्रतिजागरितश्चौषधपथ्याहारादिभिः । मुनिनापि दत्त उपदेशः, यथेह दुःखप्रचुरे संसारे परलोकहितमवश्यं जनेन कर्तव्यम् । ततो भवद्भ्यामपि परमांस-मद्या-ऽऽखेटकादिनियमं कर्तव्यं यदि पालयितुं शक्तौ, यतो बहुदोषाण्येतानि, यदुक्तम्-

[3]पंचिंदियवहभूयं मंसं दुग्गंधमसुइबीभच्छं ।
रक्खपरितुलिय भक्खग, भीईजणयं कुगईमूलं ॥ १ ॥

तथा [4]गुरुमोहकलहनिद्दा, परिहर उवहासरोगभयहेऊ ।
मज्जं दुग्गइमूलं, हिरिसिरिमइधम्मनासकरं ॥ २ ॥

अपि च - [5]मज्जे महुंमि मंसंमि, नवणीयंमि चउत्थए ।
उप्पज्जंति असंखा, तव्वण्णा जत्थ जंतुणो ॥ ३ ॥

तथा [6]सपरोवघायजणणी, इहेव तह नरयतिरियगइमूलं ।
देहमारणस्स य हेऊ, पावद्धी वेरवुड्ढिकरा ॥ ४ ॥

इदं श्रुत्वा संविग्नाभ्यां ताभ्यां भणितम्, भगवन् ! देह्यस्माकं गृहस्थावस्थोचितं धर्मम् । यतिना तु सम्यक्त्वमूलद्वादशव्रतरूपो धर्मस्तयोर्दत्तः, उक्तं च —

---

१ पतितं । २ संभाळ लीधी

३ पञ्चेन्द्रियवधभूतं, मांसं दुर्गन्धमशुचिबीभत्सम् ।
रक्षःपरितुलितो भक्षकः, भीतिजनकं कुगतिमूलम् ॥ १ ॥

४ गुरुमोहकलहनिदं, परिहर उपहासरोगभयहेतुम् । मद्यं दुर्गतिमूलं, ह्री-श्री-मति-धर्मनाशकरम् ॥ २ ॥

५ मद्ये च मांसे नवनीते चतुष्टये । उत्पद्यन्ते असङ्ख्येयास्तद्वर्णा यत्र जन्तवः ॥ ३ ॥

६ स्वपरोपघातजननी, इहैव तथा नरक-तिर्यग्गतिमूलम् । देहमारणस्य च हेतु,पापर्द्धिवैरवृद्धिकरा ॥४॥

"[१]सो धम्मो जत्थ दया, दसट्ठदोसा न जस्स सो देवो ।
सो हु गुरू जो णाणी, आरंभपरिग्गहा विरओ ॥ १ ॥"

श्रावकधर्मं प्रपद्य तौ दम्पती तुष्टौ । यतिना तयोः पुनरेवं शिक्षा प्रदत्ता, यथा-

"[२]जत्थ वसेज्जा सड्ढो, जईहिं सह जत्थ होई संजोगो ।
जत्थ चेइयभवणं, अन्नोवि जत्थ साहम्मी ॥ १ ॥
[३]देवगुरूण तिसंझं, करेज्ज तह परमवंदणं विहिणा ।
तह पुप्फवत्थमाइहिं, पूयणं सव्वकालंपि ॥ २ ॥

अन्यच्च - [४]अपुव्वनाणगहणं, पच्चक्खाणं सुधम्मसवणं च ।
कुज्जा सइ जह सत्ति, तवसज्झायाइजोगं वा ॥ १ ॥

अन्यच्च - "[५]भोअणसमए सयणे, विबोहणे पवेसणे भए वसणे ।
पंचनमोक्कारं खलु, समरेज्जा सव्वकज्जेसु ॥ १ ॥"

एवं तयोः शिक्षां दत्वा साधुरन्यत्र विजहार । तौ दम्पती स्वगृहे गतौ साधूपदीष्टं धर्मानुष्ठानं कुरुतः । कालक्रमेण ताभ्यां यतिधर्मः प्रतिपन्नः । कालं कृत्वा धनः सौधर्मदेवलोके देवत्वेनोत्पन्नः । सा स्त्री तु तस्यैव मित्रदेवत्वेनोत्पन्ना । तत्र सुरसुखमनुभूय धनदेवजीवो वैताढये सूरतेजोराज्ञः पुत्रश्चित्रगतिनामा विद्याधरराजो जातः, धनवत्यपि कस्यचिद्राज्ञः कन्या जाता, परिणीता च चित्रगतिनैव । तत्र मुनिधर्मं कृत्वा '[६]माहिंदे धणो समाणिओ इयरो य तन्मित्तो जाओ, ततो चइऊण धणो अवराजिओ नाम राया जाओ, सा च पिईमई तस्स पत्ती, काउं समणधम्मं गयाइं' द्वावपीमावारण्यकल्पे मित्रदेवौ जातौ, ततश्च्युतो धनदेवजीवः शङ्खराजा जातः, धनवतीजीवश्च तस्यैव कान्ता जाता । तत्र शङ्खराजा प्रतिपन्नमुनिधर्मो विंशतिस्थानकैर्निबद्धतीर्थङ्करनामगोत्रः कालं कृत्वाऽपराजितविमाने समुत्पन्नः । तत्कान्तापि धर्मप्रभावेण तत्रैवोत्पन्ना ।

---

१ स धर्मो यत्र दया, दशाष्टदोषा न यस्य स देवः ।
स हु गुरु यो ज्ञानी, आरंभ-परिग्रहाभ्यां विरतः ॥ १ ॥
२ यत्र वसेत् श्राद्धः, यैः सह यत्र भवति संयोगः । यत्र चैत्यभवनमन्येऽपि यत्र साधर्मिणः ॥ १ ॥
३ देवगुरुणां त्रिसन्ध्यं, कुर्यात् तथा परमवन्दनं विधिना ।
तथा पुष्पवस्त्रमादिभिः, पूजनं सर्वकालेऽपि ॥ २ ॥
४ अपूर्वज्ञानग्रहणं, प्रत्याख्यानं सुधर्मसेवनं च ।
कुर्यात् सदा यथाशक्तिस्तपःस्वाध्यायादियोगान् वा ॥ १ ॥
५ भोजन समये शयने, विबोधने प्रवेशने भये व्यसने । पञ्चनमस्कारं खलु, स्मरेत् सर्वकार्येषु ॥ १ ॥
६ माहेन्द्रे धनः सामानिकः, इतरश्च तन्मित्र जातः, ततः च्युत्वा धनोऽपराजितो नामा राजा जातः, सा च प्रीतिमति तस्य पत्नी, कृत्वा श्रमणधर्मं गतौ ।

धनजीवस्ततश्च्युत्वा सौर्यपुरे नगरे दशदशाराणां मध्ये ज्येष्ठस्य समुद्रविजयस्य राज्ञो भार्यायाः शिवादेव्याः कुक्षौ चतुर्दशमहास्वप्नसूचितः कार्तिककृष्णद्वादश्यां पुत्रत्वेनोत्पन्नः । उचितसमये श्रावणशुद्धपञ्चम्यां प्रसूता शिवादेवी, जातो दारकः, दिक्कुमारिकाविहित-जातकर्मानन्तरं सुरासुरैर्मेरुमस्तके जन्माभिषेके कृते सति राज्ञापि वर्धापनं कारितम् । अस्मिंश्च गर्भगते कदाचित् स्वप्ने शिवादेव्याऽरिष्टरत्नमयो नेमिर्दृष्टः, अतोऽरिष्टनेमिरित्यस्य नाम कृतम् । अयं कुमारोऽष्टवार्षिको जातः ।

अत्रान्तरे कृष्णेन कंसे निपातिते जीवयशावचनेन यादवानामुपरि क्रुद्धो जरासिन्धु-राजा, तच्छङ्कया सर्वेऽपि यादवाः पश्चिमसमुद्रं यावद्गताः । तत्र केशवाराधितवैश्रमणेन कृता सर्वकाञ्चनमयी द्वादशयोजनायामा नवयोजनविस्तारा द्वारिकानाम्नी नगरी । तत्र सुखेन यादवास्तिष्ठन्ति । क्रमेण निहते जरासिन्धो रामकेशवौ भरतार्धस्वामिनौ जातौ । अरिष्टनेमि-र्भगवान् यौवनमनुप्राप्तः । विषयसुखपराङ्मुखोऽपि मित्रैः प्रेर्यमाणोऽसौ नानाविधक्रीडां करोति । अन्यदा समानवयस्कैरनेकराजकुमारैः सह क्रीडन् स गतो नारायणस्यायुध-शालायाम् । तत्र दृष्टान्यनेकानि देवाधिष्ठितान्यायुधानि । तत्र दिव्यं कालावर्त्तं धनुः कौतुकेन गृह्णन् नेमिरायुधपालेन भणितः, कुमार ! किमनेनाशक्यानुष्ठानेन ? न हि नारायणमन्तरेणान्यः कोऽपि नर इदं धनुरारोपयितुं शक्तः । तदा ईषद्धसित्वा नेमिना तद्धनुर्लीलयैवारोपितम्, आस्फालिता जीवा, तस्याः शब्देन मेदिनी कम्पिता, विस्मिताः सर्वेऽप्यायुधशालिका नराः । ततस्तद्धनुर्मुक्त्वा नेमिना शङ्खो गृहीतः पूरितश्च । तच्छब्देन सर्वं जगद्बधिरितम्, कम्पिता भूमिः, गिरिशिखराणि तुत्रुटुः, सा नगरी तु विशेषाच्चकम्पे । ततः कृष्णश्चिन्तयति-किमेष प्रलयकालकलनामापन्नोऽयं शङ्खनादः श्रूयते ? तावताऽऽयुधपालेन कृष्णस्य यथार्थो व्यतिकरः कथितः । ततो नेमिकुमारपराक्रमेण विस्मितो हरिर्बलदेवं प्रत्येवं बभाण । यस्य नेमिकुमारस्यैतादृशं सामर्थ्यमस्ति, स वर्धमानो मद्राज्यं सुखेन लास्यति । ततोऽस्य बलं परीक्ष्य राज्यरक्षणोपायं चिन्तयामः । बलदेवेन भणितमलमनयाऽलीकशङ्कया, येनायं पूर्वं केवलिभिर्निर्दिष्टो द्वाविंशतितमो जिनः, त्वं पुनर्भरतार्धस्वामी नवमवासुदेवः । अयं च भगवानकृतराज्य एव परित्यक्तसकलसावद्ययोगः प्रव्रज्यां ग्रहीष्यति ।

एवं निरन्तरं बलदेवेन राज्यहरणशङ्क्या वार्यमाणोऽपि कृष्णः कदाचिदुद्याने गत्वा नेमिनं प्रत्येवमाह-कुमार ! निजनिजबलपरीक्षार्थमावां बाहुयुद्धेन युध्यावः । नेमिना भणितं किमनेन बुधजननिन्दनीयेन बाहुयुद्धेन ? वाग्युद्धेनैवावां युध्यावः । बाहुयुद्धेन हारितस्य तव महानयशःप्राग्भारो भविष्यति । कृष्णेनोक्तं क्रीडया युध्यतोरावयोः कीदृशोऽय-मयशःसमूहः ? ततो भगवता नेमिना स्वबाहुः प्रसारितः, कथितं चायं मदीयो बाहुर्यदि भवता नामितस्तदा त्वया जितम्, मया च हारितमिति । ततः कृष्णेन सर्वशक्त्यान्दोलितोऽपि भगवद्बाहुर्न मनाक् चलितः । यथास्य भगवतो मनो निश्चलं तथा बाहुरपि निश्चल एवेति जनैः प्रशंसा कृता । ततः परमचमत्कारं गतस्य स्वराज्यहरणशङ्काकुलित चेतसो नारायणस्य कियान् कालोऽतिक्रान्तः ।

अन्यदा नेमिर्यौवनं प्राप्तो विषयसुखनिःपिपासोऽपि समुद्रविजयादिना विवाहार्थं भृशमुक्तोऽपि न विवाहमङ्गीकुरुते । ततः समुद्रविजयादिभिः केशवस्यैवमुक्तम्-केशव ! तथा कुरु, यथा नेमिर्विवाहमङ्गीकुरुते । कृष्णेनापि रुक्मिणीप्रमुखाः स्वभार्याः प्रेरिताः, ताभिर्जलकेलिकरणपूर्वकमेवं श्रीनेमिनाथस्योक्तम् स्वामिन् ! लोकोत्तरं तव रूपम्, निरुपमाः सौभाग्यादयोऽनन्तास्त्वयि गुणाः, निरामयस्तव देहः, सुरसुन्दरीणामप्युन्मादजनकं तव तारुण्यम् । ततोऽनुरूपदारसङ्ग्रहेण सफलं कुरु दुर्लभं मनुष्यत्वम् । ततो हसित्वा नेमिनाथेन भणितं मुग्धानामशुचिस्वरूपाणां बहुदोषालयानां तुच्छसुखनिबन्धनानामस्थिरसङ्गमानां रमणीनां सङ्गमेन न भवति नरत्वं सफलम् । अपि चैकान्तशुद्धाया निष्कलङ्काया निरुपमसुखायाः शाश्वतसङ्गमायाः सिद्धिवध्वा एव सङ्गमेन नरत्वं सफलं भवति । यतः-

"[१]माणुसत्ताइसामग्गी, तुच्छभोगाण कारणा रयणं च कोडिआइच्च, हारिंति अबुहा जणा ॥ १ ॥"

अहं सिद्धिवधूनिमित्तमेव यतिष्ये ।

नेमेरयमभिप्रायस्ताभिः कृष्णाय निवेदितः । कृष्णेन च नेमिः स्वयं भणितः-ऋषभादयस्तीर्थङ्करा दारसङ्ग्रहं कृत्वा सन्तानपरम्परां वर्धयित्वा स्वेष्टलोकमनोरथान् पूरयित्वा पश्चिमवयसि निष्क्रान्ताः शिवं प्राप्ताश्च । त्वमपि तत्तुल्यस्तत्रैव मोक्षे यास्यसीति, दशारचक्र-सन्तोषाय किं न पाणिग्रहणं करोषि ? इति कृष्णः प्रकामं विवाहाग्रहं कृतवान् । नेमिस्तु मौनमालम्ब्य स्थितः । कृष्णेन चिन्तितमनिषिद्धमनुमतमिति न्यायादङ्गीकृत एव नेमिना विवाह इति दशारचक्रायोक्तवान् । सञ्जातहर्षेण दशारचक्रेण भणितः कृष्णस्त्वमेव नेम्यनुरूपां कन्यां गवेषय ।

ततः कृष्णेन गवेषयतोग्रसेनपुत्री राजीमती कन्या नेमितुल्यरूपाप्ता । सा पुनर्धनवतीजीवोऽपराजितविमानाच्च्युत्वा तत्रोत्पन्नास्तीति । इयमेव नेम्यनुरूपेति तदर्थं कृष्णेनोग्रसेनः प्रार्थितः । तेनापि मनोरथातीतोऽयमनुग्रह इति भणित्वा कन्या दत्ता । ततः कारितं कुलद्वयेऽपि वर्धापनम्, गृहीतं विवाहलग्नम्, कारितः समस्तजातिवर्गस्य भोजनाच्छादनादिसत्कारः, प्राप्ते च लग्नदिवसे दिव्यरमणीभिः स्नापितोऽलङ्कृतो विभूषितो मत्तवारणमारूढः, समन्तान्मिलितदशारचक्रबलदेववासुदेवादियादवपरिकरितः, पृष्ठौ वादितानेककोटिप्रमाणवादित्रः, शिरोधृतातपत्रश्चामरैर्वीज्यमानः, पृष्ठौ गायमानमङ्गलः, सर्वतो मागधैः कृतजयजयारवः, सुरनरसङ्घेन सर्वतो वीक्ष्यमाणः, सुरीभिर्नारीभिश्च प्रार्थ्यमानो नेमिकुमारः प्राप्तो महता विस्तरेणोग्रसेननृपद्वारपुरोरचितविवाहमण्डपासन्नदेशम् ।

राजीमत्यपि सर्वालङ्कारविभूषिता गवाक्षस्था नेमिं दृष्ट्वाऽऽनन्दपरवशा जाता । एतदपि तदानीं न वेत्ति, काऽहं ? किमत्रास्ति ? कोऽयं कालः ? कीदृशी चेष्टेति । अत्रान्तरे करुणारवं

---

१ मानुष्यत्वादिसामग्रीं, तुच्छभोगानां कारणात् । रत्नं च कर्पदिकाहेतोः, हारयन्ति अबुधा जनाः ॥ १ ॥

श्रुत्वा जानतापि नेमिना पृष्टः सारथिः कोऽयं मरणभीरूणां प्राणिनामेष करुणारवः ? तेन कथितं स्वामिंस्तव विवाहगौरवायानेकजनभोजनाय मेलिता अमी हरिणादयो जीवा व्यापादयिष्यन्ति, ते च साम्प्रतमाक्रन्दं कुर्वन्तीति । नेमिराह-सारथे ! रथमिमं निवर्तय, नाहं विवाहं करिष्ये । यत्रैतावतां प्राणिनां वधस्तेन विवाहेन मे समाप्तम्, संसारपरिभ्रमण-हेतुरेवायं विवाहः । नेमिवचनात्ते सर्वेऽपि प्राणिनो मुक्ता गताः स्वस्थानं सुखेन ।

विरक्तचित्तं पश्चाद्वलमानं नेमिनमालोक्याऽकाण्डवज्रप्रहारताडितेव विह्वला राजीमती धरणीतले निपतिता मूर्च्छिता, सम्भ्रमेण सखीजनेन शीतलजलसिक्ता, तालवृन्तेन वीजिता लब्धचेतनैवं विललाप । अहो ! मयात्यन्तदुर्लभे भुवननाथेऽनुरागं कुर्वन्त्याऽऽत्मा लघूकृतः । धिग् मम सुकुलोत्पत्तिं, धिग् मम रूपयौवनम्, च धिग् मम कलाकुशलताम्, येनाहं नेमिना प्रतिपद्यापि मुक्ता । हे नाथ ! मे जीवितं निर्गच्छति, अङ्गानि मे त्रुटन्ति, हृदयं मे स्फुटति, विरहाग्निज्वालाकुलितोऽयं ममात्मा, आहारो मे क्षारसदृशः, जलचन्दनचन्द्रिका-दयः पदार्थाश्रिताग्निसदृशाः स्वामिंस्तव विरहे मम जायन्ते, स्वामिन् ! मां त्वं किं त्यजसि ? किं त्यजसि ? किं मम विरुद्धं त्वया श्रुतं दृष्टं वा ? जन्मान्तरकृतं ममाशुभकर्मैवोदितम्, स्वामिन्नेकवारं ममाभिमुखं दृष्टिं देहि, प्रेमपरायां मयि त्वं सर्वथा निरपेक्षो मा भूः । अथवा सिद्धिवधूत्कण्ठितस्य तव हृदयं सुरसुन्दर्योऽपि न हरन्ति, मनुष्यस्त्रीणां तद्धरणे का गणना ? एवं महाशोकभरार्दिता विलपन्ती राजीमती सखीजनेन भणिता, अलङ्घनीयो भवितव्यता-परिणामः, ततो धीरत्वावलम्बनं कुरु ! अलमत्र विलपितेन, सत्त्वप्रधाना राजपुत्र्यो भवन्तीति भणित्वा संस्थापिता ।

द्वितीयदिनेऽनया सखीनां पुर एवमुक्तम्, अद्य मयेदृशः स्वप्नो दृष्टः । यथा मद्द्वारदेशे एको दिव्यपुरुषो देवदानवपरिवृतः सिंहासनमारूढः, तस्याभ्यर्णेऽनेकजन्तवः समायाताः, अहमपि तत्रैव गता । स चतुरः शारीरमानसदुःखप्रणाशकानि पादपफलानि तेभ्यो ददन्मया प्रार्थितो-'भगवन् ! ममाप्येतानि फलानि देहि,' तेन तानि दत्तानि । तदनन्तरं प्रतिबुद्धाऽहम् । सखीभिर्भणितं, हे प्रियसखि ! [१]मुखकटुकोऽपि स्वप्नोऽयं शीघ्रं परिणामसुन्दरो भविष्यति ।

इतश्च नेमिनाथः समुद्रविजयशिवादेव्यादिभिर्विविधैरुपायैः पाणिग्रहणार्थं प्रार्थ्य-मानोऽपि नैव तमर्थमङ्गीचकार । अस्मिन्नवसरे लोकान्तिकास्तत्रागत्यैवमूचिरे । भगवन् ! सर्वजगज्जीवहितं त्वं तीर्थं प्रवर्तयेति भणित्वा जननीजनकादीनामन्तिके गत्वैवमूचुः । भवत्कुलोत्पन्नः श्रीनेमिः प्रव्रजिष्यतीति को भवतां विषादः ? नेमिरपि मातृपित्रोः पुरः कृताञ्जलिरेवमुवाच-'इच्छामि युष्मदनुज्ञातः प्रव्रजितुम् ।' इदं च श्रुत्वा शोकसङ्घट्टनिरुद्ध-हृदया धरणीतले निपतिता चूर्णितभुजवलया शिवादेवी, मिलितं तत्र दशारचक्रम्, जला-भिषेकादिना लब्धसंज्ञा सा भणितुमारब्धा-वत्स ! कथमस्माकं मनोरथं मूलादुच्छिन्दसि ? कथं वा त्वं सत्पुरुषोऽपि प्रार्थनाभङ्गं करोषि ? दशारचक्रस्यापि मनःसन्तापं किं करोषि ?

१ शरूआतमां असुंदर

कथं च वयमुग्रसेनराज्ञो मुखं दर्शयिष्यामः ? कथं च त्वदेकचित्ता सा वराकी राजीमती भविष्यति ? ततोऽस्मदुपरोधेन तस्याः पाणिग्रहणं कुरु, ततः पश्चात्प्रव्रज्यां गृह्णीयाः । भणितं च भगवता मातर्मनःसन्तापं मा कुर्याः, सर्वभावानामनित्यत्वं भावय, विषयाणां विपाकदारुणत्वमतृप्तिजनकत्वं चास्ति । यौवनधनादीनां चञ्चलत्वम्, सन्ध्यासमयाभ्रतुल्यतां च विलासानामवेहि, अकाण्डप्रहारत्वं मृत्योः, जन्मजरामरणरोगादिप्रचुरत्वं च संसारस्यालोचय । ततो मातर्मामनुजानीहि भवप्रदीपान्निर्गच्छन्तम् ।

अत्रान्तरे दशारचक्रेण नेमिर्भणितः- कुमार ! सम्प्रति त्वया परित्यक्तस्य यादवलोकस्य न कश्चित् त्राणमिति, ततः कञ्चित्कालं प्रतीक्षस्व, तदुपरोधशीलया वाण्या भगवता संवत्सरमेकं यावत् स्थितिरङ्गीकृता, दत्तं च तस्मिन्नेव सांवत्सरिकं दानम् । प्रतिपूर्णे च संवत्सरे मातृपित्रादीनामापृच्छ्य श्रावणशुद्धषष्ठ्यां स देवमनुष्यपर्षदा परिवृतो नगर्या निर्गत्य सहस्राम्रवनोद्याने, त्रीणि वर्षशतानि गृहस्थावासे स्थित्वा षष्टभक्तेन पुरुषसहस्रेण समं निष्क्रान्तस्तपःसंयमरतो विहरति ।

इतश्च भगवतो भ्राता रथनेमिः प्रीतिपर एकान्ते राजीमतीमेवमाह-सुभ्रु ! मा कुरु विषादं, सौभाग्यनिधिं कः को न प्रार्थयति ? भगवान् पुनर्नेमिनाथो वीतरागत्वान्न करोति विषयानुबन्धं, ततः प्रतिपद्यस्व मां, सर्वकालमहं त्वदाज्ञाकारी भविष्यामि । तया भणितं- यद्यहं नेमिनाथेन परित्यक्ता, तथाप्यहं तं न परित्यजामि । यतोऽहं भगवत एव शिष्यिणी भविष्यामि । ततस्त्वमेनं प्रार्थनानुबन्धं त्यज । ततः स कतिचिद्दिनानि यावन्मौनेन स्थितः । अन्यस्मिन् दिने पुनरपि तेन सा प्रार्थिता । ततस्तया तत्प्रतिबोधार्थं तत्प्रत्यक्षमेव क्षीरं पीत्वा मदनफलपानेन वान्त्वा, तच्च सौवर्णिककच्चोलके क्षिप्त्वा समुपनीतं रथनेमेर्भणितं चेदं पिब । तेनोक्तं कथं वान्तं पिबामि ? तया भणितं त्वं किमेतज्जानासि ? स आह— बालोऽप्येतज्जानाति । साध्वयुक्तर्हि नेमिनाथवान्तां मां कथं त्वं पातुमिच्छसि ? इदं राजीमत्या वचः श्रुत्वा स उपरतः । राजीमत्यपि दीक्षाभिमुखी तपोविधानैः शरीरं शोषयन्ती तिष्ठति ।

अत्रान्तरे चतुष्पञ्चाशद्दिनपर्यन्ते भगवतः श्रीनेमिनाथस्य रैवतगिरिसहस्राम्रवणे केवलज्ञानमुत्पन्नम् । देवैः कृतं समवसरणम्, तत्र समायातासु द्वादशपर्षत्सु देशना कृता । तां च श्रुत्वा बहवः प्राणिनः प्रव्रजिताः, केचिद्गणधरा जाताः, स्थापितं भगवता तीर्थं, राजीमत्यपि विविधकन्याभिः सह प्रव्रजिता । रथनेमिरपि संविग्नस्तदानीमेव प्रव्रजितः । राजीमती तदानीमेवमचिन्तयत्, यो मया तदानीं दिव्यपुरुषस्वप्नो दृष्टः सोऽद्य सफलो जातः ।

अन्यदा राजीमती साध्वीभिः समं भगवतो वन्दनार्थं रैवतगिरिं गच्छन्त्यकस्मान्मेघवृष्ट्याऽभ्याहता । सर्वा अपि साध्व्योऽन्यगुहासु निलीनाः । राजीमत्यप्येकस्यां गुहायां प्रविष्टा । तत्र च पूर्वं रथनेमिसाधुः प्रविष्टोऽस्ति, परमन्धकारप्रदेशे स्थितोऽयं न दृष्टस्तया । ततस्तया चीवराणि सर्वाण्यप्युत्तारितानि, एवं सा निरावरणा जाता । तस्याः शरीरशोभां

१ अग्नेः ।

दृष्ट्वा, इन्द्रियाणां च दुर्दान्ततयाऽनादिभवाभ्यस्ततया च विषयाभिप्रायेण स परवशो जातः, तादृशो रथनेमिश्च तया दृष्टः । ततो भयभ्रान्ता सा सद्य आत्मानं प्रावृत्य बाहुभ्यां सङ्गोप्य च स्थिता । तेन भणिता हे सुतनु ! तवानुरागवशेनाहमिदं शरीरमरतिपरिगतं धर्तुं न शक्नोमि । ततः कृत्वानुग्रहं प्रतिपद्यस्व मया समं विषयसेवनं, पश्चात् सञ्जातमनःसमाधी आवां निर्मलं तपःसंयमं चरिष्यावः । तयापि साहसमवलम्ब्य प्रगल्भवचनैः स भणितः, महाकुलप्रसूतस्य तव किमिदं युक्तं स्वयं प्रतिपन्नस्य व्रतस्य भञ्जनम् ? जीवितमपि सत्पुरुषास्त्यजन्ति, न पुनर्व्रतलोपं कुर्वन्ति । ततो महाभाग ! मनःसमाधिं कृत्वा चिन्तय विषयविपाकदारुणत्वं शीलखण्डनस्य नरकादिकं च फलं, न च विषयसेवनेन मनः-समाधिः, किन्तु भूरितराऽरतिर्भविष्यति । विषयसेवनेन लब्धप्रसरस्य मनसः प्रकाममिच्छा वर्धते, उक्तं च-

"[१]भुत्ता दिव्वा भोगा, सुरेसुं तह य मणुएसुं ।
न य संजाया तत्ति, अतत्तिरंकस्सवि जीअस्स ॥ १ ॥"

इत्यादिवाक्यैस्तयाऽनुशासितः स सम्बुद्धः, सम्यगहं प्रतिबोधितस्त्वयेति भणान्नात्मानं निन्दयित्वा, राजीमतीं च भृशं स्तुत्वा स गतः साधुसभामध्ये, साऽपि च साध्वीसभामध्ये गतेति । अरिष्टनेमिर्भगवान् मरकतसमवर्णो दशधनुरुच्छ्रितदेहः शङ्खलाञ्छ-नस्त्रीणि वर्षशतानि गृहवासे स्थितः, चतुष्पञ्चाशद्दिनानि छाद्मस्थ्ये स्थितः, चतुष्पञ्चाशद्दि-नोनानि सप्तशतवर्षाणि केवलपर्यायेण विहृत्यानेकभव्यान् प्रतिबोध्य च सर्वं वर्षसहस्रायुः परिपाल्य रैवतगिरावाषाढशुद्धाष्टम्यां सिद्धिं गतः । क्रमेण रथनेमिराजीमत्यावपि सिद्धिं जग्मतुः । इत्यरिष्टनेमिचरित्रम् ।

सूत्रमग्रे लिख्यते -

सोरियपुरंमि नयरे, आसि राया महड्ढिए ।
वसुदेवत्ति नामेणं, रायलक्खणसंजुए ॥ १ ॥

सौर्यपुरे नाम्नि नगरे वसुदेव इति नाम्ना राजासीत् । यद्यपि सौर्यपुरे समुद्रविजयप्रमुखा दश दशार्हा भ्रातरो विद्यन्ते, तेषु दशसु लघुर्भ्राता वसुदेवोऽस्ति, वसुदेवपुत्रो विष्णुरभूत्, तेन वसुदेवस्यैव वर्णनं कृतम् । कीदृशो वसुदेवः ? महर्द्धिकः, छत्रचामरादिविभूतियुक्तः, पुनः कीदृशः ? राजलक्षणसंयुतः, हस्तपादयोस्तलेषु राज्ञो लक्षणानि चक्र-स्वस्तिकाङ्-कुश-वज्र-ध्वज-च्छत्र-चामरादिभिः सहितः, अथवौदार्यधैर्यगाम्भीर्यादिसहितः ॥ १ ॥

तस्स भज्जा दुवे आसि, रोहिणी देवई तहा ।
ताय दोण्हंपि दो पुत्ता, अइट्ठा रामकेसवा ॥ २ ॥

---

१ भुक्ता दिव्या भोगाः, सुरेषु तथा च मनुष्येषु ।
न च सञ्जाता तृप्ति-रतृप्ती रङ्कस्याऽपि जीवस्य ॥ १ ॥

तस्स वसुदेवस्य द्वे भार्ये आस्ताम्, रोहिणी तथा देवकी । यद्यपि वसुदेवस्य द्वासप्ततिसहस्त्रं दारा आसन्, तथाप्यत्रोभयोरेव कार्याद्रोहिणीदेवक्योरेव ग्रहणं कृतम् । तयो रोहिणीदेवक्योर्द्वयोर्द्वौ पुत्रावभूताम् । तौ पुत्रौ कौ ? राम-केशवौ, कीदृशौ तौ ? अभिष्टौ मातापित्रोरधिकवल्लभौ ॥ २ ॥

सोरियपुरंमि नयरे, आसि राया महड्ढिए ।
समुद्दविजए नामं, रायलक्खणसंजुए ॥ ३ ॥

सौर्यपुरे नगरे समुद्रविजयो राजा महर्द्धिक आसीत् । कीदृशः समुद्रविजयः ? राजलक्षणसंयुक्तः, अत्र पुनः सौर्यपुराभिधानं समुद्रविजयवसुदेवयोरेकत्रावस्थितिदर्शनार्थम् ॥ ३ ॥

तस्स भज्जा सिवानाम, तीय पुत्ते महायसे ।
भयवं अरिट्ठनेमित्ति, लोगनाहे दमीसरे ॥ ४ ॥

तस्य समुद्रविजयस्य राज्ञः शिवानाम्नी भार्यासीत् । तस्याः शिवादेव्याः पुत्रो भगवानैश्वर्यधारी अरिष्टनेमिरासीत् । चतुर्दशस्वप्नदर्शनानन्तरमेकमरिष्टरत्नमयं रथचक्रं सा ददर्श, तेनारिष्ठनेमिरिति नाम प्रदत्तम् । कथंभूतोऽरिष्टनेमिः ? महायशा-महाकीर्तिः, पुनः कीदृशोऽरिष्टनेमिः ? लोकनाथश्चतुर्दशरज्जुप्रमाणलोकप्रभुः । पुनः कीदृशोऽरिष्टनेमिः ? दमीश्वरः, कुमारत्वेऽपि येन कन्दर्पो जितः । तस्माद्दमिनां जितेन्द्रियाणामीश्वरो दमीश्वरः ॥ ४ ॥

सोरिट्ठनेमिनामो उ, लक्खणस्सरसंजुओ ।
अट्ठसहस्सलक्खणधरो, गोयमो कालगच्छवी ॥ ५ ॥

अथारिष्टनेमेर्वर्णनमाह-सोऽरिष्टनेमिर्नामा भगवानष्टसहस्त्रलक्षणधरो वर्तते, अष्टभिरधिकं सहस्त्रमष्टसहस्त्रम्, लक्षणानामष्टसहस्त्रं लक्षणाष्टसहस्त्रम्, तद्धरतीति लक्षणाष्टसहस्त्रधरः, अष्टसहस्त्रलक्षणानि धरतीति वाऽष्टसहस्त्रलक्षणधरः । पुनः कीदृशः ? लक्षणस्वरसंयुतः, लक्षणैः सहितः स्वरो लक्षणस्वरस्तेन संयुतः, स्वरस्य लक्षणानि माधुर्यलावण्याऽव्याहतगाम्भीर्यादीनि, तैः संयुतः, तीर्थङ्करस्य हि अष्टाधिकसहस्त्रलक्षणानि शरीरे भवन्ति । स्वस्तिक-वृषभ-सिंह-श्रीवत्स-शङ्खचक्रगजाश्वच्छत्राब्धिप्रमुखाणि लक्षणानि हस्तपादादौ भवन्ति । पुनः कीदृशोऽरिष्टनेमिः ? गौतमो गौतमगोत्रीयः, पुनः कीदृशः ? कालकच्छविः श्यामकान्तिः ॥ ५ ॥

वज्जरिसहसंघयणो, समचउरंसो झसोयरो ।
तस्स राइमईकण्णं, भज्जं जायइ केसवो ॥ ६ ॥

पुनः कीदृशः सः ? वज्रं-कीलिका, ऋषभः-पट्टः, नाराच-उभयपार्श्वयोर्मर्कटबन्धः एभिः संहननं-शरीररचना यस्य स वज्रर्षभनाराचसंहननः । पुनः कीदृशः ? समचतुरस्त्रः

प्रथमसंस्थानवान्, यः पद्मासने स्थितः सन् चतुष्षु पार्श्वेषु सदृशशरीरप्रमाणो भवति, स समचतुरस्रसंस्थानवानुच्यते पुनः कीदृशः ? झषोदरः-झसस्य इव उदरं यस्य स झसोदरो । अथ तस्यारिष्टनेमिकुमारस्य केशवः-कृष्णो राजीमतीं कन्यां भार्यायै याचते । कृष्णदेवो राजीमत्या जनकपार्श्वे राजीमतीं कन्यां नेमिनाथस्य भार्यार्थं याचते इति भावः ॥ ६ ॥

अह सा रायवरकन्ना, सुसीला चारुपेहिणी ।
सव्वलक्खणसंपन्ना, विज्जुसोयामणिप्पभा ॥ ७ ॥

अथानन्तरं सा राजवरकन्या राजीमती कीदृशी वर्तते ? तद्वर्णनमाह-राजसु वरो राजवरः, षोडशसहस्रमुकुटबद्धभूपेषु श्रेष्ठ उग्रसेनो राजा, तस्य कन्या पुत्री राजवरकन्या । सा कीदृशी ? सुशीला-शोभनाचारा, पुनः कीदृशी ? चारुप्रेक्षणी, चारु प्रेक्षणमवलोकनं यस्याः सा चारुप्रेक्षणी सुन्दरावलोकना, सुन्दरनयना वा । पुनः कीदृशी ? सर्वलक्षणसम्पन्ना, चतुःषष्टिकामिनीकलाकोविदा, पुनः कीदृशी ? विद्युत्सौदामिनीप्रभा, विशेषेण द्योतते इति विद्युत्, सा चासौ सौदामिनी च विद्युत्सौदामिनी, तद्वत्प्रभा यस्याः सा विद्युत्सौदामिनी-प्रभा, स्फुरद्विद्युत्कान्तिः ॥ ७ ॥

अहाह जणओ तीसे, वासुदेवं महड्ढियं ।
इहागच्छउ कुमारो, जा से कन्नं दलामहं ॥ ८ ॥

अथ कृष्णेन नेमिकुमारार्थं कन्याया याचनानन्तरं तस्या राजीमत्या जनको महर्द्धिकं वासुदेवं कृष्णमाह-हे वासुदेव ! कुमारोऽरिष्टनेमिरिहास्मद्गृहे आगच्छतु, 'जा' इति येन कारणेन 'से' इति तस्मै अरिष्टनेमिकुमाराय तां राजीमतीं कन्यामहं ददामि । आसन्नक्रोष्टुकि-नैमित्तिकादिष्टे लग्ने विवाहविधिनोपढौकयामि ॥ ८ ॥

सव्वोसहीहिं ण्हविओ, कयकोउअमंगलो ।
दिव्वजुअलं परिहिओ, आहरणेहिं विभूसिओ ॥ ९ ॥

अथारिष्टनेमिकुमारः क्रोष्टुक्यर्पितलग्ने सर्वाभिरौषधीभिः-जयाविजयाशल्यविशल्य-र्द्धिवृद्ध्यादिभिः स्नपितः, पुनः कृतकौतुकमङ्गलः, पुनः कीदृशः ? परिधृतदिव्ययुगलः, परिहितं दिव्यं विवाहप्रस्तावाद्देवदूष्ययुगलं येन स परिहितदिव्ययुगलः, प्राकृतत्वाच्छाब्दवि-पर्ययः । पुनः कीदृशः ? आभरणैः कुण्डलमुकुटहारादिभिर्विभूषितोऽलङ्कृतः ॥ ९ ॥

मत्तं च गंधहत्थिं च, वासुदेवस्स जिट्ठगं ।
आरूढो सोहई अहियं, सिरे चूडामणि जहा ॥ १० ॥

च पुनरिष्टनेमिकुमारो वासुदेवस्य ज्येष्ठकं मत्तं गन्धहस्तिनमारूढोऽधिकं शोभते । क इव ? शिरसि-मस्तके चूडामणिरिव, यथा मस्तके मुकुटः शोभते, तथा नेमिः सर्वेषां यादवानां मध्ये चूडामणिसदृशो विराजते ॥ १० ॥

अह उस्सिएण छत्तेण, चामराहि य सोहिओ ।
दसारचक्केण य सो, सव्वओ परिवारिओ ॥ ११ ॥

चउरिंगिणीए सेणाए, रइयाए जहक्कमं ।
तुंडियाण सन्निनाएण, दिव्वेणं गयणं फुसा ॥ १२ ॥

एयारिसीए इड्ढीए, जुईए उत्तिमाइ य ।
नियगाओ भवणाओ, णिज्जाओ वण्हिपुङ्गवो ॥ १३ ॥

तिसृभिः कुलकम् ॥

अथानन्तरं वृष्णिपुङ्गवो-नेमिकुमारो निजकाद् भवनात्स्वकीयगृहादेतादृश्या समीपतरवर्तिन्या ऋद्ध्या, पुनरुत्तमया प्रधानया द्युत्या-दीप्त्या पाणिग्रहणाय निर्गतः, उग्रसेनगृह प्रति स्वमन्दिरान्निःसृत इत्यर्थः । कीदृश्या ऋद्ध्या ? तां ऋद्धिपद्धतिमाह-स नेमिकुमार उच्छ्रितेनोच्चैः कृतेन छत्रेण मेघाडम्बरछत्रेण, च पुनश्चामराभ्यामुभयपार्श्वयोर्वीज्यमानः शोभितः, पुनः स नेमिकुमारो दशार्हचक्रेण-यादवसमूहेन सर्वतः परिवृतः । पुनः कीदृशः ? चतुरङ्गिण्या सेनया परिवृतः, पुनः कीदृशः ? त्रुटितानां तूर्याणां भेरिमृदङ्गपटहकरतालतालादीनां दिव्येन-देवयोग्येन सन्निनादेन-सम्यक्शब्देन सहितः, कीदृशेन तूर्याणां निनादेन ? गगनस्पृशा, गगनं स्पृशतीति गगनस्पृक्, तेनाकाशव्यापिना ॥ ११-१२-१३ ॥

अह सो तत्थ निज्जंते, दिस्स पाणे भयद्दुए ।
वाडेहिं पंजरेहिं च, संनिरुद्धे सुदुक्खिए ॥ १४ ॥

जीवियंतं तु संपत्ते, मंसट्ठा भक्खियव्वए ।
पासित्ता से महापन्ने, सारहिं इणमब्बवी ॥ १५ ॥ युग्मम् ॥

अथानन्तरं स नेमिकुमारः सारथिमिदमब्रवीत्-किं कृत्वा ? तत्र विवाहमण्डपासन्ने निर्यन्नधिगच्छन् भयद्रुतान्-भयव्याकुलान् प्राणान्-जीवान् स्थलचरान् मृग-शशक-शूकर-तित्तिरलावकादीन् मांसार्थं भक्षितव्यान् 'पासित्ता' इति विचार्य दृष्ट्वा, तादृशान् हृदि निधाय, कथंभूतान् प्राणान् ? वाटकैर्भित्तिभिः कण्टकवाटिकादिभिर्वा निरुद्धानतिशयेन यन्त्रितान्, पुनः पञ्जरैर्लोहवंशशलाकादिविनिर्मितैः पक्षिनियन्त्रणस्थानैः सन्निरुद्धान्, अत एव सुदुःखितान् । पुनः कीदृशान् ? जीवितान्तं सम्प्राप्तान्, ते प्राणिन एवं जानन्त्यस्माकं मरणमागतम्, कुतोऽस्माकं जीवितमिति मरणदशां सम्प्राप्तान्, कीदृशो नेमिकुमारः ? महाप्राज्ञो महाबुद्धिसहितः, अर्थाद् ज्ञानत्रयेण विस्तीर्णबुद्धिरित्यर्थः ॥ १४-१५॥

सारथिं किमब्रवीदित्याह-

कस्स अट्ठा इमे पाणा, एते सव्वे सुहेसिणो ।
वाडेहिं पंजरेहिं च, संनिरुद्धा य अच्छहि ॥ १६ ॥

हे सारथे ! इमे प्रत्यक्षं दृश्यमानाः सर्वे प्राणा वाटकैश्च पुनः पञ्जरैः सन्निरुद्धा-अत्यन्तं नियन्त्रिताः कस्यार्थं-कस्य हेतोः ? अच्छहि' इति तिष्ठन्ति । कीदृशा इमे प्राणाः ? सुखार्थिनः, सर्वे संसारिणो जीवाः सुखार्थिनः सन्ति, किमर्थं दुःखिनः क्रियन्ते ? भगवान् जानन्नपि जीवदयाप्रकटीकरणार्थं सारथिं पप्रच्छेति भावः ॥ १६ ॥

अह सारही तओ भणइ, एए भद्दा उ पाणिणो ।
तुज्जं विवाहकज्जंमि, भोयावेउं बहुं जणं ॥ १७ ॥

अथ नेमिकुमारवाक्यश्रवणानन्तरं - ततः सारथिर्भणति, हे स्वामिन्नेते भद्राः प्राणिनो युष्माकं विवाहकार्ये बहुजनान् यादवलोकान् भोजयितुमेकत्र मेलिताः सन्ति ॥ १७ ॥

सोऊण तस्स वयणं, बहुपाणिविणासणं ।
चिंतेइ से महापन्ने, साणुक्कोसे जिए हिओ ॥ १८ ॥

'स' इति स नेमिकुमारस्तस्य सारथेर्वचनं श्रुत्वा चिन्तयति । कीदृशः स ? महाप्राज्ञो-महाबुद्धिमान्, पुनः कीदृशः सः ? जीवे हितो-जीवविषये हितेप्सुः, पुनः कीदृशः ? सानुक्रोशः, सह अनुक्रोशेन वर्तते इति सानुक्रोशः- सदयः, अथवा जीवे हि निश्चयेन सानुक्रोशः-सकरुणः, तु शब्दः पादपूरणे, कीदृशं सारथेर्वचनं ? बहुप्राणिविनाशनं-बहुजीवानां विघातकारकम् ॥ १८ ॥

तदा नेमिकुमारः किं चिन्तयतीत्याह -

जइ मज्झ कारणा एए, हन्नंते सुबहु जिया ।
न मे एयं तु निस्सेयं, परलोए भविस्सई ॥ १९ ॥

यदि मम विवाहादिकारणेनैते सुबहवः-प्रचुरा जीवा हनिष्यन्ते-मारयिष्यन्ते, तदैतद्धिंसाख्यं कर्म परलोके-परभवे निःश्रेयसं कल्याणकारि न भविष्यति । परलोकभीरुत्वस्यात्यन्तमभ्यस्ततयैवमभिधानम्, अन्यथा भगवतश्चरमदेहत्वादतिशयज्ञानत्वाच्च कुत एवंविधा चिन्तेति भावः ॥ १९ ॥

सो कुंडलाण जुअलं, सुत्तगं च महाजसो ।
आभरणाणि य सव्वाणि, सारहिस्स पणामए ॥ २० ॥

स नेमिकुमारो महायशाः, नेमिनाथस्याभिप्रायात् सर्वेषु जीवेषु बन्धनेभ्यो मुक्तेषु सत्सु सर्वाण्याभरणानि सारथये प्रणामयति-ददाति । कानि तान्याभरणानि ? कुण्डलानां

युगलम्, पुनः सूत्रकं कटीदवरकम्, चकारादाभरणशब्देन हारादीनि सर्वाङ्गोपाङ्गभूषणानि सारथेर्ददौ ॥ २० ॥

मणपरिणामे य कए, देवा य जहोइयं समोइन्ना ।
सव्वड्ढीए सपरिसा, निक्खमणं तस्स काउं जे ॥ २१ ॥

तस्मिन्नेमिकुमारे मनःपरिणामे चित्ताभिप्राये दीक्षां प्रति कृते सति, लोकान्तिक-देववचनात्सांवत्सरिकदाने दत्ते सति, देवाश्चतुर्विधा यथोचितं-यथायोग्यं सर्वद्धर्या समवतीर्णास्तत्रागताः । किं कर्तुं ? तस्य भगवतो नेमिकुमारस्य निष्क्रमणमहोत्सवं-दीक्षामहिमानं कर्तुं । 'जे' शब्दः पादपूरणे, कीदृशा देवाः ? सपरिषदः, सह तिसृभिः परिषद्भिर्वर्तन्ते इति सपरिषदः परीषत्सहिता इत्यर्थः ॥ २१ ॥

देवमणुस्सपरिवुडो, सिबियारयणं तओ समारूढो ।
निक्खिमिय बारगाओ, रेवयंमि ठिओ भयवं ॥ २२ ॥

ततोऽनन्तरं नेमिकुमारो भगवान् ज्ञानवान् दीक्षावसरज्ञो देवैर्मनुष्यैः परिवृतो - देवमनुष्यपरिवृतः शिबिकारत्नमुत्तरकुरुनामकं समारूढो द्वारिकापुरितो निष्क्रम्य-निःसृत्य रेवते-रैवताचले स्थितः ॥ २२ ॥

उज्जाणे संपत्तो, उइन्नो उत्तमाओ सीयाओ ।
साहस्सीए परिवुडो, अह निक्खमई उ चित्ताहिं ॥ २३ ॥

तत्र रैवताचले उद्याने सहस्राम्रनाम्नि वने सम्प्राप्तः । पुनरुत्तमायाः-प्रधानायाः शिबिकाया उत्तीर्णः सहस्रेण परिवृत्तः- प्रधानपुरुषसहस्रेण संयुतः सन्, अथ चित्रायां-चित्रा-नक्षत्रे निष्क्रामति-दीक्षां गृह्णाति, पञ्चमहाव्रतोच्चारणं करोति ॥ २३ ॥

अह सो सुगंधगंधिए, तुरियं मउयकुंचिए ।
सयमेव लुंचई केसे, पंचमुट्ठीहिं समाहिए ॥ २४ ॥

अथ पञ्चमहाव्रतोच्चारणानन्तरं स नेमिनाथः स्वयमेवात्मनैव त्वरितं केशान् पञ्चमुष्टिभिः कृत्वा लुञ्चते । कीदृशः सन् ? समाहितो ज्ञानदर्शनचारित्ररूपसमाधियुक्तः सन्; कीदृशान् केशान् ? सुगन्धगन्धिकान् स्वभावतः सुरभिगन्धान्, पुनः कीदृशान् ? मृदुक-कुञ्चितान्, मृदुकाश्च ते कुञ्चिताश्च मृदुककुञ्चितास्तान् सुकुमालान्, कुटिलान् ॥ २४ ॥

वासुदेवो य तं भणइ, लुत्तकेसं जिइंदियं ।
इच्छियमणोरहं तुरियं, पावेसू तं दमीसर ॥ २५ ॥

तदा वासुदेवः कृष्णः, चकारात् समुद्रविजयादिनृपगणोऽपि तं नेमिनाथं जितेन्द्रियम्, पुनर्लुप्तकेशं-कृतलोचमिति वचनं भणति-इत्याशीर्वादवाक्यं ददति—भो दमीश्वर ! दमिनां

जितेन्द्रियाणामीश्वरो दमीश्वरः, तत्सम्बोधनं हे दमीश्वर ! यतीश्वर ! ईप्सितं-वाञ्छितं मनोरथं त्वरितं-शीघ्रम्, 'तमि' ति त्वं प्राप्नुहि ॥ २५ ॥

पुनराशीर्वचनमाह-

नाणेण दंसणेणं, चरित्तेणं तहेव य ।
खंतीए मुत्तीए, वड्ढमाणो भवाहि य ॥ २६ ॥

पुनर्हे स्वामिंस्त्वं ज्ञानेन दर्शनेन तथैव चारित्रेण, च पुनः क्षान्त्या-क्षमया, च पुनर्मुक्त्या-निर्लोभत्वेन वर्धमानो 'भवाहि' इति भव ॥ २६ ॥

एवं ते रामकेसवा, दसारा य बहूजणा ।
अरिट्ठनेमिं वंदित्ता, अइगया बारगापुरिं ॥ २७ ॥

एवममुना प्रकारेण रामकेशवौ, च पुनर्दशापि दशार्हाः, च पुनर्बहवोऽन्ये जनाश्चत्वारो वर्णा अरिष्टनेमिं स्वामिनं वन्दित्वा स्तुत्वा नत्वा च द्वारिकापुरीमतिगता-प्रविष्टाः ॥ २७ ॥

सोऊण रायवरकन्ना, पवज्जं सा जिणस्स उ ।
नीहासा य निराणंदा, सोगेण य समुच्छया ॥ २८ ॥

सा राजवरकन्योग्रसेननृपपुत्री राजीमती शोकेन समुच्छ्या-समवसृताऽवष्टब्धा व्यासा-भूदित्यर्थः । किं कृत्वा ? जिनस्य नेमिनाथस्य प्रव्रज्यां-दीक्षां श्रुत्वा, कथंभूता सा ? निर्हासा निर्गतो हासो यस्याः सा निर्हासा हास्यरहिता, पुनः कीदृशा सा ? निरानन्दा-आनन्दरहिता ॥ २८ ॥

राईमई विचिंतेइ, धीरत्थु मम जीवियं ।
जाहं तेणं परिचत्ता, सेयं पव्वइउं मम ॥ २९ ॥

सा राजीमती मनसि विचिन्तयति, मम जीवितं धिगस्तु, याहं तेन नेमिनाथेन परित्यक्ता, अतो मम प्रव्रजितुं-दीक्षां गृहीतुं श्रेयः, न तु गृहे स्थातुं श्रेय इति भावः ॥२९॥

अह सा भमरसन्निभे, कुच्चफणगपसाहिए ।
सयमेव लुंचई केसे, धिइमंता ववस्सिया ॥ ३० ॥

अथानन्तरं सा राजीमती स्वयमेव केशान् लुञ्चति । कथंभूता सा ? धृतिमती धैर्ययुक्ता, पुनः कथंभूता ? व्यवसिता-निश्चला, धर्मं कर्तुं स्थिरा, कीदृशान् केशान् ? 'कुच्चफणग-पसाहिए' कूर्चफनकप्रसाधितान् कूर्चो गूढकेशोन्मोचको वंशशलाकारचितः केशसंस्करणोपकरणविशेषः, फनको गजदन्तकाष्ठमयः [१]कङ्कतकः कूर्चश्च फनकश्च कूर्चफनकौ, ताभ्यां प्रसाधिताः-संस्कृताः कूर्चफनकप्रसाधितास्तान्, पुनः कीदृशान् ? भ्रमरसन्निभान् भ्रमरवच्छ्यामान् ॥ ३० ॥

---

१ कांसको ।

वासुदेवो य [1]तं भणई, लुत्तकेसं जिइंदियं ।
संसारसागरं घोरं, तर कन्ने लहुं लहुं ॥ ३१ ॥

च पुनस्तदा वासुदेवः श्रीकृष्णस्तां राजीमतीं कन्यां भणति, आशीर्वादं पठति । हे कन्ये ! हे राजीमति ! घोरं-रौद्रं संसारसमुद्रं लघुंलघु-त्वरितं त्वरितं तर, संसारसमुद्रस्य पारं कुरु । [2]लघुंलघु इति सम्भ्रमे-आदरे द्विर्वचनम् । कीदृशीं राजीमतीं लुतकेशां-कृतलोचां, पुनः कीदृशी ? जितेन्द्रियां साध्वीमित्यर्थः ॥ ३१ ॥

सा पव्वइया संती, पव्वावेसी तहिं बहुं ।
सयणं परियणं चेव, सीलवंता बहुस्सुया ॥ ३२ ॥

सा राजीमती प्रव्रजिता सती-गृहीतदीक्षा सती, तत्र द्वारिकायां बहून् स्वजनान्-स्वज्ञातीन् स्त्रीजनान्, च पुनः परिजनान् दास्यादिस्त्रीजनान् प्राव्राजयत्, स्वसार्थेऽपरानपि दारान् प्रव्राजयामासेत्यर्थः । कीदृशी सा ? शीलवती, पुनः कीदृशी ? बहुश्रुता-प्रचुरकृत-ज्ञानाभ्यासा ॥ ३२ ॥

गिरिं रेवइयं जंती, वासेणुल्ला उ अंतरा ।
वासंते अंधयारंमि, अंतो लयणस्स सा ठिया ॥ ३३ ॥

सा राजीमत्येकदा स्वामिवन्दनार्थं रैवतकं गिरिं-गिरनारपर्वतं यान्ती [3]लयनस्य-गिरिगुहागृहस्यान्तर्मध्ये स्थिता । क्व सति ? वर्षति मेघेऽन्धकारे सति, मेघान्धकारेण दृक्प्रचारे निरुद्धे सति, कीदृशी सा ? अन्तरा अर्धमार्गे 'वासेणेति' वर्षाभिरुल्लाऽऽर्द्रा क्लीन्नसर्वचीवरा ॥ ३३ ॥

चीवराणि विसारंती, जहाजाइ त्ति पासिया ।
रहनेमी भग्गचित्तो, पच्छा दिट्ठो अ तीइ वि ॥ ३४ ॥

रथनेमिर्भग्नचित्तोऽभूत्, संयमाच्चलितमना अभूत् । किं कृत्वा ? चीवराणि सार्द्राणि शरीरादुत्तार्य विस्तारयन्तीं यथाजातामित्येवंरूपां निर्वस्त्रां तां राजीमतीं दृष्ट्वा, तथा राजीमत्यापि स रथनेमिश्चलचित्तः पश्चाद् दृष्टः, पूर्वमन्धकारे सति न दृष्टः । अन्यथा यदि पूर्वं दृष्टोऽभविष्यत्, तदैकाकिनी तत्र न प्राविक्षदिति भावः ॥ ३४ ॥

भीया य सा तहिं दट्ठुं, एगंते संजयं तयं ।
बाहाहिं काउं संगोफं, वेवमाणी निसीयई ॥ ३५ ॥

---

१ णं - अन्यसंस्करणे ॥ २ असकृत् सम्भ्रमे - ७/४/७२ सिद्धहैमसूत्र । आ सूत्रथी द्वित्व कर्युं छे.
३ विश्रामगृहस्य ।

सा राजीमती तदैकान्ते गुहायां रथनेमिं संयतं-साधुं दृष्ट्वा भीता, कदाचिदयं मम शीलभङ्गं कुर्यादिति विचार्य शीलभङ्गभयाद्वेपमाना-कम्पमाना सती निषीदति, तदाश्लेष-परिहारार्थं भूमावुपविशति। किं कृत्वा ? बाहुभ्यां द्वाभ्यां-भुजाभ्यां सङ्गोफं-परस्परबाहुसङ्गु-फनं स्तनोपरि मर्कटबन्धं कृत्वा ॥ ३५ ॥

अह सोवि रायपुत्तो, समुद्दविजयंगओ ।
भीयं पवेइयं दट्ठुं, इमं वक्कमुदाहरे ॥ ३६ ॥

अथानन्तरं सोऽपि राजपुत्रः समुद्रविजयाङ्गजो रथनेमिर्भीतां प्रवेपितां - कम्पमानां राजीमतीं साध्वीं दृष्ट्वा इदं वाक्यमुदाहरत् ॥ ३६ ॥

रहनेमी अहं भद्दे, सुरूवे चारुभासिणि ।
ममं भयाहि सुतणू, न ते पीला भविस्सइ ॥ ३७ ॥

किं वाक्यमुवाचेत्याह-हे भद्रे ! हे कल्याणि ! अहं रथनेमिरस्मि, मामन्यं कमपि मा जानीहि। हे सुरूपे ! सुन्दराकारे ! हे चारुभाषिणि ! हे मधुरवचने ! हे सुतनु-शोभनशरीरे ! कोमलगात्रि ! त्वं मां भजस्व, भर्तृत्वेनाङ्गीकुरु। 'ते' तव पीडा दुःखं न भविष्यति, मया सह विषयसुखं भुङ्क्ष्व ॥ ३७ ॥

एहि ता भुंजिमो भोए, माणुस्सं खु सुदुल्लहं ।
भुत्तभोए तओ पच्छा, जिणमग्गं चरिस्सामो ॥ ३८ ॥

हे राजीमति ! एहि-मम समीपे आगच्छ। तावदावां विषयं भुञ्जीवहि। हे प्रिये ! 'खु' इति निश्चयेन मानुष्यं-मनुष्यस्य जन्म सुदुर्लभं वर्तते। ततोऽनन्तरमावां भुक्तभोगौ भूत्वा पश्चाज्जिनमार्गं-जिनोक्तधर्मं चारित्रधर्मं मोक्षमार्गं चरिष्यावः। पूर्वं हि यदा भोगसुखं भुज्यते, ततश्च दीक्षा गृह्यते, तदा भुक्तभोगत्वेन पुनर्भोगसुखेषु मनो न स्यात्। तस्मात्पूर्व-मधुना यथेच्छं भोगसुखं भोक्तव्यमिति भावः ॥ ३८ ॥

दट्ठूण रहनेमिं तं, भग्गजोयं पराइयं ।
राइमई असंभंता, अप्पाणं संवरे तहिं ॥ ३९ ॥

तदा राजीमत्यसम्भ्रान्ता सती-निर्भया सती, तया ज्ञातमहं बलात्कारेणापि शीलं रक्षयिष्यामीति निश्चित्याऽत्रस्ता सत्यात्मानं शरीरं वस्त्रैः संवृणोत्याच्छादयति, गुहामध्यमेव स्थिता सतीति शेषः। किं कृत्वा ? रथनेमिं भग्नयोगं दृष्ट्वा, भग्नो-नष्टो योगः-संयमोत्साहो यस्य स भग्नयोगस्तं पराजितं-स्त्रीपरीषहेण पराभूतं रथनेमिं ज्ञात्वा ॥ २९ ॥

अह सा रायवरकन्ना, सुट्ठिया नियमव्वए ।
जाई कुलं च सीलं च, रक्खमाणी तयं वए ॥ ४० ॥

अथानन्तरं-भग्नयोगस्य रथनेमेर्दर्शनानन्तरं सा राजवरकन्या राजीमती साध्वी तदा वदति, कीदृशी सा ? नियमव्रते सुस्थिता, नियमे शौचसन्तोषस्वाध्यायतपोलक्षणे स्थिरा, तथा व्रते-पञ्चमहाव्रतलक्षणे स्थिरा, पुनः सा किं कुर्वाणा ? जातिकुले च शीलं प्रति संरक्षमाणा, तत्र मातुर्वंशो जातिः, पितुर्वंशः कुलमुच्यते, तयोरुभयोरपि नैर्मल्यं विदधतीत्यर्थः ॥ ४० ॥

जइसि रूवेण वेसमणो, ललिएणं नलकूबरो ।
तहावि ते न इच्छामि, जइ सि सक्खं पुरंदरो ॥ ४१ ॥

भो रथनेमे ! यदि त्वं रूपेण वैश्रमणो-धनदोऽसि, यदि पुनर्ललितेन मनोहरलावण्य-विलासेन नलकूबरो देवविशेषोऽसि, पुनर्यदि हे रथनेमे ! त्वं साक्षात्प्रत्यक्षं पुरन्दरोऽसि, इन्द्रावतारोऽसि, तथाप्यहं त्वां नेच्छामि, भोगार्थं नाभिलषामि ॥ ४१ ॥

पक्खंदे जलियं जोइं, धूमकेउं दुरासयं ।
न इच्छंति वंतयं भोत्तुं, कुले जाया अगंधणे ॥ ४२ ॥

हे रथनेमे ! अगन्धने कुले जाता उत्पन्नाः, अर्थादगन्धकुलोत्पन्नाः सर्पा वान्तं विषं भोक्तुं, पुनः पश्चाद् गृहीतुं नेच्छन्ति-न वाञ्छन्ति । ज्वलद्धूमकेतोरग्नेर्ज्योतिर्ज्वालां प्रस्कन्देदिति प्रस्कन्देयुः, प्राकृतत्वाद्बहुवचने एकवचनम् । अगन्धनजातीयाः सर्पा ज्वलदग्निज्वालां प्रविशेयुः, न तूद्गीर्णं विषं पश्चाद्गृह्णन्ति । कीदृशं धूमकेतोर्ज्योतिः ? दुरासदं दुस्सहमित्यर्थः ॥ ४२ ॥

धिरत्थु तेजसोकामी, जो तं जीवियकारणा ।
वंतं इच्छसि आवेउं, सेयं ते मरणं भवे ॥ ४३ ॥

हे अयशःकामिन् ! हे अकीर्तिवाञ्छक ! अथवा हे अयशः ! अकीर्ते ! हे कामिन् ! त्वां धिगस्तु, तव जीवितव्यं धिगित्यर्थः । यस्त्वमसंयमजीवितव्यकारणाद्वान्तं-वदनान्निः सृतमाहारं पुनरापातुं-भोक्तुमिच्छसि, दीक्षां गृहीत्वा भोगांस्त्यक्त्वा पुनर्भोगान् भोक्तु-मिच्छसि । अतः कारणात्ते तवाऽस्मादसंयमजीवितव्यात् पण्डितमरणेन मरणं श्रेयः कल्याणकारकं भवेत्, न पुनस्तव भोगाभिलाषः श्रेयस्कर इति भावः ॥ ४३ ॥

अहं च भोगरायस्स, तं चसि अंधगवण्हिणो ।
मा कुले गंधणा होमो, संजमे निहुओ चर ॥ ४४ ॥

राजीमती वदति-हे रथनेमे ! अहं भोगराजस्योग्रसेनभूपस्य पुत्र्यस्मि, च पुनस्त्वमन्धक-वृष्णेः समुद्रविजयस्य पुत्रोऽसि, तस्मादावां गन्धनौ गन्धनकुलोत्पन्नौ सर्पौ माऽभूवमभवाव ।

यतो हि गन्धनकुलोत्पन्नः सर्पो वान्तं विषं पश्चाद् गृह्णाति, तद्वदावाभ्यां वान्ता भोगाः पुनर्न वाञ्छनीयाः, यतो हि सर्पा द्विविधाः, अगन्धनकुलोद्भवा गन्धनकुलोद्भवाश्च । यदा हि कस्यचित्पुरुषस्य सर्पो लगति, तदा मन्त्रवादिनोऽग्निं ज्वालयित्वा मन्त्रेण सर्पानाकर्षन्ति, तत्र च गन्धनकुलोद्भवाः स्वविषं पश्चाद्गृह्णन्ति, अगन्धनकुलोद्भवास्त्वग्नौ ज्वलन्ति, न पुनर्वान्तं विषं पश्चाद् गृह्णन्ति, तस्मादावामगन्धनकुलोत्पन्नसर्पतुल्यौ भवाव इति भावः । तस्मात्त्वमिदानीं संयमे-चारित्रे निभृतो-निश्चलः सन् चर, साधुमार्गे विचरेत्यर्थः ॥ ४४ ॥

जइ तं काहिसि भावं, जा जा दिच्छसि नारीओ ।
वायाविद्धोव्व हढो, अट्ठिअप्पा भविस्ससि ॥ ४५ ॥

हे मुने ! यदि त्वं भावं भोगाभिलाषं करिष्यसि, यां यां नारीं द्रक्ष्यसि । अर्थाद्यां सुरूपां नारीं दृष्ट्वा भोगाभिलाषं करिष्यसि, तदा त्वमस्थिरात्माऽस्थिरचित्तो भविष्यसि । क इव ? वाताविद्धो हठ इव, हठो वनस्पतिविशेषः शेवालः, यथा पानीयोपरि शेवालो वातेन प्रेरितोऽस्थिरो भवति, तथा त्वमप्यतिरूपवतीं कामिनीं दृष्ट्वा कामाभिलाषी सन्नस्थिरचित्तो भविष्यसि ॥ ४५ ॥

गोवालो भंडपालो वा, जहा तद्दव्वणिस्सरो ।
एवं अणिस्सरो तंपि, सामण्णस्स भविस्ससि ॥ ४६ ॥

हे मुने ! तथा त्वमपि श्रामण्यस्य साधुधर्मस्यानीश्वरो भविष्यसि, भोगाभिलाषकरणेन संयमफलस्याऽभोक्ता भविष्यसि । क इव ? गोपाल इव, वाऽथवा भण्डपाल इव, गाः पालयतीति गोपाल-गोरक्षकः, उदरपूरणार्थं परकीयगोचारकः, पुनर्भाण्डानि परकीयक्रयाणकवस्तूनि भाटकादिना पालयतीति भाण्डपालकः, गोपालो गवां स्वामी न भवति, तद्रक्षणादुदरपूर्तिमात्रफलभाक् स्यात्, न तु गवां स्वामित्वफलभाक् । तथा पुनर्भाण्डपालः क्रयाणकाधिपेन क्रयाणकरक्षार्थं रक्षितः पुरुषः क्रयाणकानामीश्वरत्वफलभाग् न भवति, उदरपूर्तिमात्रफलभागेव भवति, ईश्वरत्वफलभाक् त्वपर एव । तथा त्वमपि श्रामण्यवेषधारकत्वेन द्रव्यधर्मपालकत्वादुदरपूर्तिफलभाग् वर्तसे, न तु भावधर्मफलस्य मोक्षस्येश्वरो भविष्यसीति भावः ॥ ४६ ॥

[१]कोहं माणं निगिण्हित्ता, मायं लोभं च सव्वसो ।
इंदियाइं वसे काउं, अप्पाणं उवसंहरे ॥ ४७ ॥

तीसे सो वयणं सुच्चा, संजयाए सुभासियं ।
अंकुसेण जहा नागो, धम्मे संपडिवाइओ ॥ ४८ ॥युग्मम्

---

१ इयं गाथा अन्यसंस्करणे नास्ति ।

स रथनेमिरिन्द्रियाणि वशीकृत्यात्मानमुपसंहरति स्थिरं करोति, विषयेभ्यो निवारयति । किं कृत्वा ? क्रोधं मानं मायां च पुनः सर्वथा लोभं निगृह्याऽत्यन्तं जित्वा, एवं रथनेमिरात्मानं धर्मे दृढं चकार । एतदेवोक्तं दृष्टान्तेन दृढयति—तस्या-राजीमत्याः संयत्याः-साध्व्याः सुभाषितेन स रथनेमिः पूर्वं धर्माद्भ्रष्टो धर्मे सम्प्रतिपातितो-धर्म्ये मार्गे स्थापितः । केन क इव ? अङ्कुशेन नाग इव, यथाङ्कुशेन नागो-हस्ती मार्गाद्भ्रष्टो मार्गे स्थाप्यते, तथा रथनेमिरपि ॥ ४७ ॥ ४८ ॥

मणगुत्तो वयगुत्तो, कायगुत्तो जिइंदिओ ।
सामण्णं निच्चलं फासे, जावज्जीवं दढव्वओ ॥ ४९ ॥

यदा स साधुमार्गे स्थिरोऽभूत्तदा कीदृशोऽभूदित्याह-मनसा गुप्तो मनोगुप्तः, तथा वचसा गुप्तो वचोगुप्तो गुप्तवाक्, तथा पुनः कायेन गुप्तः कायगुप्तो गुप्तकायः, इति गुप्तित्रयसहितः । पुनः कीदृशः ? जितेन्द्रियो वशीकृतेन्द्रियः, एतादृशो रथनेमिर्यावज्जीवं दृढव्रतः सन् श्रामण्यं-चारित्रधर्मं निश्चलं यथास्यात्तथा स्पृशति, सम्यक् क्रियानुष्ठानेन पालयति ॥ ४९ ॥

उग्गं तवं चरित्ताणं, जाया दुन्निवि केवली ।
सव्वं कम्मं खवित्ताणं, सिद्धिं पत्ता अणुत्तरं ॥ ५० ॥

अनुक्रमेण तौ द्वावपि राजीमतीरथनेमी केवलिनौ जातौ । किं कृत्वा ? उग्रमन्यैः कर्तुमशक्यं तपश्चरित्वा तपः कृत्वा, अनुक्रमेण च सर्वाणि कर्माणि क्षपयित्वा, पुनस्तावनुत्तरां-सर्वोत्कृष्टां सिद्धिं-मोक्षगतिं प्राप्तौ ॥ ५० ॥

एवं करंति संबुद्धा, पंडिया पवियक्खणा ।
विणियट्टंति भोगेसु, जहा से पुरिसुत्तमु ॥ ५१ ॥त्तिबेमि

पण्डितास्तत्त्वमतियुक्ताः, प्रकर्षेण विचक्षणा विवेकिनः पुरुषा भोगेभ्यो विशेषेण निवर्तन्ते, कथञ्चिच्चेतसि विकारे समुत्पन्नेऽपि पुनः कस्यचिद्धर्मात्मनः पुरुषस्य धर्मोपदेशधारणेन चित्तं निरून्ध्य भोगेभ्यो निवर्तन्ते । क इव ? यथा स रथनेमिः पुरुषोत्तमः पूर्वं चञ्चलचित्तो भूत्वा पुनर्धर्मोपदेशाद्धर्मे स्थिरचित्तो बभूव । तथान्यैरपि निश्चलचित्तैर्भवितव्यमिति, न तु चञ्चलचित्तेन भाव्यमित्यहं ब्रवीमीति श्रीसुधर्मास्वामी जम्बूस्वामिनमाह-हे जम्बू ! अहं भगवद्वचसेति ब्रवीमि ॥ ५१ ॥

इति रथनेमीयं द्वाविंशतितमध्ययनं सम्पूर्णम् ॥ २२ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां द्वाविंशतितमस्याध्ययनस्यार्थः सम्पूर्णः ॥ २२ ॥

॥ २३ केशिगौतमीयाख्यमध्ययनम् ॥

द्वाविंशतितमेऽध्ययने उत्पन्नविश्रोतसि केनापि रथनेमिवदतिश्चरणे विधेयेति कथितम्। अथ त्रयोविंशतितमेऽध्ययने ज्ञानिना परेषामपि चित्ते संशयं ज्ञात्वा संशयो दूरीकर्तव्यः केशिगौतमवदित्याह-'जिणे पासित्ति नामेणं' इत्यस्यां गाथायां कथितोऽयं पार्श्वनामा तीर्थङ्करः, कस्मिन् भवे चानेन तीर्थङ्करनामकर्म निबद्धमिति सकौतुकश्रोतृ-वैराग्योत्पादनार्थं पार्श्वनाथचरित्रमुच्यते-

इहैव जम्बूद्वीपे भरते क्षेत्रे पोतनपुरे नगरेऽरविन्दो नाम राजा, तस्य विश्वभूतिर्नामा पुरोहितः, स श्रावकोऽस्ति, तस्य द्वौ पुत्रौ, कमठो मरुभूतिश्च। तयोः क्रमेण भार्या वरुणा वसुन्धरा च। तयोः कमठमरुभूत्योः शिरसि गृहकार्यभारं विन्यस्य स्वयं धर्मं कुर्वाणः क्रमेण कालं कृत्वा विश्वभूतिर्देवलोकं गतः। तद्भार्याऽनुद्धरी विशेषतपःकरणेन शोषितशरीरा मृता। कमठोऽपि कृतमातृपितृप्रेतकार्यः पुरोहितो जातः। मरुभूतिरपि प्रायो ब्रह्मचारिकृत्योद्यतः सम्पन्नः। तस्य भार्या मनोहरा, तस्याश्च यौवनोद्भेदं दृष्ट्वा कमठस्य चित्तं चलितम्, तां सविकारलोचनाभ्यां स पश्यति। सापि कामविरहमसहन्ती तं सविकारं पश्यति। उभयोभृशं रङ्गोल्लासेऽनाचारप्रवृत्तिर्जाता, मरुभूतिनापि सामान्यतो ज्ञाता। विशेषज्ञानाय तस्याः कमठस्य च पुरोऽहं ग्रामान्तरं यास्यामीत्युक्त्वा निजमन्दिराद्ब-हिर्गत्वा सन्ध्यासमये कार्पटिकरूपं कृत्वा स्वरभेदेन कमठं प्रत्येवं बभाण। हे महानुभाव! निराहारस्य मम शीतत्राणाय किञ्चिन्निवासस्थानं देहि? अविज्ञातपरमार्थेन कमठेन भणितमहो कार्पटिक! अत्र चतुर्हस्तमध्ये स्वच्छन्द निवस। ततस्तत्र रात्रौ स्थितो मरुभूति-स्तयोः सर्वमनाचारस्वरूपमालोक्येर्ष्यापरवशो जातः। परं लोकापवादभीरुत्वान्न तयोः प्रतीकारं चकार।

प्रभाते च राजान्तिके गत्वा सर्वं तयोः स्वरूपं यथास्थितमाख्यातवान्। राज्ञा च कुपितेन समादिष्टाः स्वपुरुषाः, तैर्डिण्डिमास्फालनपूर्वं गलारोपितशरावमालः खरारूढः कमठः सर्वतो नगरे भ्रामितः, भ्रातृजायाभोगकार्ययमिति जनानां पुरो निर्घोषं कृत्वा स नगरान्निष्कासितः। ततः सञ्जातामर्षः कमठोऽपि समुत्पन्नवैराग्यो गृहीतपरिव्राजकलिङ्गो दुष्करं तपः कर्तुं लग्नः। तं च वृत्तान्तं ज्ञात्वा मरुभूतिः सञ्जातपश्चात्तापः स्वापराधक्षामणाय तस्यान्तिके गत्वा पादयोः पपात। कमठोऽपि तदानीं समुत्पन्नपूर्ववैरोल्लासेन मरुभूतेर्मूर्ध्नं उपरि महाशिलां पातितवान्। ततो मरुभूतिस्तस्याः प्रहारेणारटन् कालं कृत्वा विन्ध्याचले बहुयूथाधिपतिः करी समुत्पन्नः।

इतश्चारविन्दराजा कदाचिच्छरत्काले सान्तःपुरः प्रासादोपरि स्थितः क्रीडन् शरदभ्रं सुस्निग्धं प्रच्छादितनभःस्थलं मनोहरं ददर्श। पुनस्तत्क्षणादेव वायुना विलीनं तदभ्रं पश्यन् दृष्टान्तावष्टम्भेन सर्वेषां भावानां क्षणभङ्गुरतां भावयन् समुत्पन्नावधिज्ञानः परिजनेन ध्रियमाणोऽपि दत्तनिजपुत्रराज्यः स प्रव्रजितः। अन्यदा स राजर्षिर्विहरन् सागरदत्तसार्थवाहेन

समं सम्मेतशिखरे चैत्यवन्दनार्थं प्रस्थितः । सागरदत्तसार्थवाहेन पृष्टम्, भगवन् ! क्व गमिष्यसि ? यतिनोक्तं तीर्थयात्रायाम् । सार्थवाहेनोक्तं-कीदृशो भवतां धर्मः ? मुनिना कथितो दयादानविनयमूलः सविस्तरस्तस्य धर्मः, तं श्रुत्वा स सार्थवाहः श्रावको जातः, क्रमेण महाटवीं प्राप्तः । यत्र स मरुभूतिजीवः करी जातोऽस्ति, तत्र महासरोवरं दृष्ट्वा तत्तीरे सार्थ उत्तीर्णः ।

अत्रान्तरे तस्मिन्नैव सरसि बहुहस्तिनीपरिवृतः स करी जलपानार्थमागतो जलं सविलासं पीत्वा पालमारूढः सर्वत्र चक्षुर्विक्षिपन् सार्थं दृष्ट्वा तद्विनाशनार्थं त्वरितं धावितः । तं च तथागच्छन्तं दृष्ट्वा सार्थजना इतस्ततः प्रणष्टाः, मुनिस्त्ववधिना ज्ञात्वा स्वस्थाने स्थितः कायोत्सर्गेण, तेन करिणा सर्वं सार्थप्रदेशं भ्रमता दृष्टः स महामुनिः, तदभिमुखं स धावितः । आसन्नप्रदेशे गत्वा तं पश्यन्नुपशान्तकोपोऽसौ निश्चलः स्थितः । तथारूपं तं दृष्ट्वा तत्प्रतिबोधार्थं पारितकायोत्सर्गो मुनिरेवमूचे । भो मरुभूते ! किं न त्वं स्मरसि मामरविन्दनरपतिमात्मनः पूर्वभवं वा ? एतन्मुनिवचः श्रुत्वा स करी सञ्जातजातिस्मरणः पतितो मुनिचरणयोः । मुनिनापि सविशेषदेशनाकरणपूर्वं स श्रावकः कृतः । ततः प्रणम्य स करी स्वस्थानं गतः ।

अत्रान्तरे उपशान्तं तं करिणं दृष्ट्वा साश्चर्यः सार्थजनः पुनस्तत्र मिलितः, प्रणम्य च मुनिचरणयुगलं प्रतिपन्नवान् दयामूलं श्रावकधर्मम् । ततः कृतकृत्यः सर्वोऽपि सार्थो मुनिश्च स्वस्वाचारनिरतो विजहार । इतश्च स कमठपरिव्राजको मरुभूतिविनाशनेनाप्यनिवृत्तवैरानुबन्धो निजायुःक्षये मृत्वा समुत्पन्नः कुर्कुटसर्पः, विन्ध्यावनौ परिभ्रमता तेन दृष्टः स हस्ती पङ्कनिमग्नः, पूर्ववैरोल्लासेन कुम्भस्थले दष्टः, तद्विषवेदनामनुभवन्नपि श्रावकत्वात् क्षमावान् मृत्वा समुत्पन्नः सहस्रारकल्पे देवः । कुर्कुटसर्पोऽपि समये मृत्वा सप्तदशसागरोपमायुः पञ्चमनरकपृथिव्यां नारकः सञ्जातः ।

इतश्च स हस्तिदेवश्च्युत इहैव जम्बूद्वीपे पूर्वविदेहे कच्छविजये वैताढ्यपर्वते तिलकानगर्यां विद्युद्गतिविद्याधरस्य भार्यायाः कनकतिलकायाः किरणवेगो नाम पुत्रो जातः । स च तत्र क्रमागतराज्यमनुपाल्य सुगुरुसमीपे प्रव्रजितः, एकत्वविहारी चारणश्रमणो जातः । अन्यदाऽऽकाशविहारेण स गतः पुष्करद्वीपे, तत्र कनकगिरिसन्निवेशे कायोत्सर्गेण स्थितः किञ्चित्तपः कर्तुमारब्धः ।

इतश्च स कुर्कुटसर्पजीवो नरकादुद्धृत्य तस्यैव कनकगिरेः समीपे सञ्जातो महोरगः, तेन स मुनिर्दृष्टो दष्टश्च । विधिना कालं कृत्वाऽच्युतकल्पे जम्बूद्रुमावर्त्तविमाने देवो जातः । सोऽपि महोरगः क्रमेण कालं कृत्वा पुनरपि सप्तदशसागरोपमायुः पञ्चमपृथिवीनारको जातः, किरणवेगदेवोऽपि ततश्च्युत्वैहैव जम्बूद्वीपेऽपरविदेहे सुगन्धविजये शुभङ्करानगर्यां वज्रवीर्यराज्ञोऽक्षिमताया भार्यायाः वज्रनाभनामा पुत्रः समुत्पन्नः । सोऽपि तत्र क्रमागतं राज्यमनुपाल्य दत्तचक्रायुधनामस्वपुत्रराज्यः क्षेमङ्करजिनसमीपे प्रव्रजितः । तत्र विधिना

तपोविधानेन बहुलब्धिसम्पन्नोऽसौ गतः सुकच्छविजयम् । तत्राऽप्रतिबद्धविहारेण विहरन् स सम्प्राप्तो ज्वलनगिरिसमीपम् । दिने चास्तमिते तत्रैव कायोत्सर्गेण स्थितः, प्रभाते ततश्चलितोऽटव्यां प्रविष्टः ।

इतश्च स महोरगनारकः पञ्चमपृथिवीत उद्धृत्य कियन्तं संसारं भ्रान्त्वा तस्यैव ज्वलनगिरेः समीपे भीमाटव्यां जातो वनेचरश्चाण्डालः । तेनाखेटकनिमित्तं निर्गच्छता दृष्टः प्रथमं स साधुः, ततः पूर्वभववैरवशतोऽपशकुनोऽयमिति कृत्वा बाणेन विद्धः, तेन विधुरीकृतवेदनो विधिना मृत्वा स वज्रनाभो मुनिर्मध्यग्रैवेयके ललिताङ्गो नाम देवो जातः । सोऽपि चाण्डालवनेचरस्तं विपन्नं महामुनिं दृष्ट्वाऽहो ! अहं महाधनुर्धर इति मन्यमानो निकाचितक्रूरकर्मा कालेन मृत्वा सप्तमे नरके नारकत्वेन समुत्पन्नः ।

वज्रनाभदेवस्ततश्च्युत इहैव जम्बूद्वीपे पूर्वविदेहे पुराणपुरे कुशलबाहुराज्ञः सुदर्शनादेव्याः कनकप्रभो नाम पुत्रो जातः, स च क्रमेण चक्रवर्ती जातः । अन्यदा प्रासादोपरि संस्थितेन तेनाकाशे निर्गच्छन् देवसङ्घातो दृष्टः । तद्दर्शनादेव विज्ञातजगन्नाथ-तीर्थकरागमः स्वयं निर्गतस्तद्वन्दनार्थम् । वन्दित्वा च तत्रोपविष्टस्य तस्य पुरतो भगवता देशना कृता । तां च श्रुत्वा हृष्टश्चक्रवर्ती वन्दित्वा स्वनगर्यां प्रविष्टः । अन्यदा स कनकप्रभ-नामा चक्रवर्ती तां तीर्थङ्करदेशनां भावयन् जातजातिस्मरणः पूर्वभवान् दृष्ट्वा भवविरक्तचित्तः प्रव्रजितः । स क्रमेण विहरन् क्षीरवनाटव्यां क्षीरपर्वते सूर्याभिमुखं कायोत्सर्गेण स्थितः ।

इतश्च स चाण्डालवनेचरजीवस्ततो नरकादुद्धृत्य तस्यामेवाटव्यां क्षीरपर्वतगुहायां सिंहो जातः । स च भ्रमन् कथमपि सम्प्राप्तस्तस्य मुनेः समीपे, ततः समुच्छलितपूर्ववैरेण तेन विनाशितः स मुनिः समाधिना कालं कृत्वा निबद्धतीर्थङ्करनामकर्मा प्राणतकल्पे महाप्रभे विमाने उत्पन्नो विंशतिसागरोपमायुर्देवः । सोऽपि सिंहो बहुलसंसारं भ्रान्त्वा कर्मवशाद् ब्राह्मणो जातः । तत्रापि पापोदयवशेन जातमात्रस्य तस्य पितृमातृभ्रातृप्रमुखः सकलोऽपि स्वजनवर्गः क्षयं गतः, स च दयापरेण लोकेन जीवितः । सम्प्राप्तयौवनोऽपि कुरूपो दुर्भगो दुःखेन वृत्तिं कुर्वन् वैराग्यमुपगतो वने कन्दमूलफलाहारस्तापसो जातः, करोति च बहुप्रकारमज्ञानतपोविशेषम् ।

इतश्च स कनकप्रभचक्रवर्तिदेवः प्राणतकल्पाच्चैत्रकृष्णचतुर्थ्यां च्युत्वा इहैव जम्बूद्वीपे भरते क्षेत्रे काशीदेशे वाराणस्यां नगर्यामश्वसेनस्य राज्ञा वामादेव्याः कुक्षौ मध्य-रात्रिसमये विशाखानक्षत्रे त्रयोविंशतितमतीर्थङ्करत्वेन समुत्पन्नः । तस्यामेव रात्रौ सा वामादेवी चतुर्दशस्वप्नान् ददर्श, निवेदयामास च राज्ञः । तेनापि राज्ञातीवानन्दमुद्वहता भणितम्—प्रिये ! सर्वलक्षणसम्पूर्णः सर्वकलाकुशलस्तव पुत्रो भविष्यति । तद्वचः श्रुत्वा सुष्ठुतरं परितुष्टा सा । प्रभाते च राज्ञा स्वप्नपाठकानाहूय तान् यथार्थानाचख्यौ । तेऽपि पूर्णं स्वप्नाध्यायं सविस्तरमाख्याय चतुर्दशस्वप्नानां फलमेवमाहुः- तीर्थङ्करमाता चक्रवर्ति-

माता वा एतांश्चतुर्दश स्वप्नान् पश्यति । ततोऽस्याः कुक्षौ तीर्थकरश्चक्री वा समुत्पन्नोऽस्तीति स्वप्नानुसारेण इदं च तेषां वचः श्रुत्वाऽऽनन्दातिरेकेण पुलकिततनुर्भूपतिस्तानतीवसत्कारपूर्वं विसर्जितवान्, वामादेवी सुखंसुखेन गर्भमुद्वहति । क्रमेण पूर्णेषु मासेषु शुभवेलायां भगवान् जातः । षट्पञ्चाशद्दिक्कुमारीभिर्जन्ममहोत्सवः पूर्व कृतः । ततः स्वासनकम्पाद्विज्ञातभगवज्जन्मभिः शक्रैर्मेरुशिरसि जन्माभिषेकः कृतः ।

प्रभाते चाश्वसेनोऽपि नगरान्तर्दशाहिकोत्सवं कृतवान् । अस्मिन् गर्भे स्थिते भगवति जनन्या पार्श्वे गच्छन् सर्पो रात्रौ दृष्टः, ततोऽस्य पार्श्व इति नाम कृतम् । ततः कल्पतरुवज्जनानन्दकः स भगवान् वृद्धिं प्राप, अष्टवार्षिकश्च भगवान् सर्वकलाकुशलो बभूव । अथ भगवान् सर्वमनोहरं यौवनं प्राप । पित्रा च तदानीं प्रभावतीं कन्यां परिणायितः, भगवान् तया समं विषयसुखं बुभुजे । अन्यदा भगवता प्रासादोपरि गवाक्षजालस्थेन दिगवलोकनं कुर्वता दृष्टो नगरलोकः प्रवरकुसुमहस्तो बहिर्गच्छन् । पृष्टं च भगवता कस्यचित्पार्श्ववर्तिनः, भो किमद्य कश्चित्पर्वोत्सवोऽस्ति ? येनैवं जनः पुष्पहस्तो बहिर्गच्छन्नस्ति । तेन पुरुषेणोक्तमद्य कोऽपि पर्वोत्सवो नास्ति, किन्तु कमठो नाम महातपस्वी पुरीबहिः समागतोऽस्ति, तद्वन्दनार्थं प्रस्थितोऽयं जनः ।

ततस्तद्वचनमाकर्ण्य जातकौतुकविशेषो भगवांस्तत्र गतः पञ्चाग्नितपः कुर्वाणं कमठं दृष्टवान् । त्रिज्ञानवता भगवता ज्ञात एकस्मिन्नग्निकुण्डे प्रक्षिप्तातीवमहत्काष्ठमध्ये प्रज्वलन् सर्पः । उत्पन्नपरमकरुणेन भगवता भणितमहो कष्टमज्ञानम्, यदीदृशेऽपि तपसि क्रियमाणे दया न ज्ञायते । ततः कमठेन भणितम्—राजपुत्रास्तु कुञ्जरतुरगखेलनमेव जानन्ति, धर्मं तु मुनय एव विदन्तीति । ततो भगवतैकस्य स्वपुरुषस्यैवमादिष्टम्, अरे ! इदमग्निमध्ये प्रक्षिप्तं काष्ठं कुठारेण द्विधा कुरु । तेन पुरुषेण तत्काष्ठं द्विधा कृतं, तत्र दृष्टो दह्यमानः सर्पः, तस्य भगवता स्वपुरुषवदनेन पञ्चपरमेष्ठिनमस्काराः प्रदापिताः । नागोऽपि तत्प्रभावान्मृत्वा समुत्पन्नो नागलोके धरणेन्द्रो नागराजा । लोकैश्चाहो ! भगवतो ज्ञानशक्तिरिति भणद्भिर्महान् सत्कारः कृतः । ततो विलक्षीभूतः कमठपरिव्राजको गाढमज्ञानतपः कृत्वा मेघकुमारनिकायमध्ये समुत्पन्नो मेघमालीनामभवनवासी देवः ।

अन्यदा सुखेन तिष्ठतो भगवतो वसन्तसमयः समागतः । तत् ज्ञापनार्थमुद्यानपालेन सहकारमञ्जरी भगवतः समर्पिता । भगवता भणितम्—भो ! किमेतत् ? स आह भगवान् ! बहुविक्रीडानिवासो वसन्तसमयः प्राप्तः । ततो मित्रप्रेरितः श्रीपार्श्वकुमारो वसन्तक्रीडानिमित्तं बहुजनपरिवारसमन्वितो यानारूढो गतो नन्दनं वनम्, तत्र यानात्समुत्तीर्य स निषण्णो नन्दनवनप्रासादमध्यस्थितकनकमयसिंहासने, अतिरमणीयं नन्दनवनं सर्वतः पश्यन्, भित्तिस्थं परमरम्यं चित्रं दृष्ट्वा अहो ! किमत्र लिखितं ज्ञातमिति सम्यग् निरूपयता भगवता दृष्टमरिष्टनेमिचरित्रम् ।

---

१ दशानां अह्नाम् समाहारः इति दशाहः
दशाहे भव इति दशाहिकः ।

ततः स चिन्तितुं प्रवृत्तो धन्यः सोऽरिष्टनेमिर्यो विरसावसानं विषयसुखमाकलय्य निर्भरानुरागां निरुपमरूपलावण्यां जनकवितीर्णां राजकन्यां च त्यक्त्वा भग्नमदनमण्डलप्रचारः कुमार एव निष्क्रान्तः । ततोऽहमपि करोमि सर्वसङ्गपरित्यागम् । अत्रान्तरे लोकान्तिका देवास्तत्रागत्य भगवन्तं प्रतिबोधयन्ति स्म । त्रिंशद्वर्षाणि गृहस्थवासेऽसौ स्थितः, ततो मार्गणगणस्य यथोचितं सांवत्सरिकदानं दत्वा भगवान् मातृपितृाद्यनुज्ञया महामहःपूर्वमाश्रमपदोद्याने ऽशोकपादपस्याधः [1]पौषकृष्णैकादशीदिने पूर्वाह्नसमये पञ्चमौष्टिकं लोचं कृत्वा अपानकेनाष्टमभक्तेनैकं देवदूष्यमादाय त्रिभिः पुरुषशतैः समं निष्क्रान्तः । अथ श्रीपार्श्वो भगवान् विहरन्नेकदा वटपादपाधः कायोत्सर्गेण स्थितः । इतश्च स कमठजीवो मेघमाली असुरोऽवधिना ज्ञात्वाऽऽत्मनो व्यतिकरं, स्मृत्वा च पूर्वभववैरकारणं समुत्पन्नतीव्रामर्षः समागतस्तत्र । प्रारब्धास्तेनानेकसिंहादिरूपैरनेके उपसर्गाः, तथापि भगवान् श्रीपार्श्वोऽक्षुब्धो धर्मध्यानान्न चलितः । तादृशं तं ज्ञात्वा कमठ एवं चिन्तयामास, अहमेनं जलेन प्लावयित्वा मारयामीति ध्यात्वा भगवदुपरिष्टान्महामेघवृष्टिं चकार । जलेन भगवदङ्गं नाशिकां यावद्व्याप्तम् ।

अत्रान्तरे कम्पितासनेन धरणेन्द्रेणावधिना ज्ञातभगवद्व्यतिकरेण समागत्य स्वामिशीर्षोपरिफणाटोपं कृत्वा फणिशरीरेण भगवच्छरीरमावृत्य जलोपसर्गं च निवार्य भगवत्पुरो वेणुवीणागीतनिनादैः प्रवरं प्रेक्षणं कर्तुमारब्धवान् । कमठासुरस्तादृशमक्षोभ्यं भगवन्तं धरणेन्द्रकृतमहिमानं च दृष्ट्वा समुपशान्तदर्पो भगवच्चरणौ प्रणम्य गतो निजस्थाने । धरणेन्द्रोऽपि भगवन्तं निरुपसर्गं ज्ञात्वा स्तुत्वा च स्वस्थानं गतवान् । पार्श्वस्वामिनो निष्क्रमणदिवसाच्चतुरशीतितमे दिवसे चैत्रकृष्णाष्टम्यामष्टमभक्तेन पूर्वाह्नसमयेऽशोकतरोरधः शिलापट्टे सुखनिषण्णस्य शुभध्यानेन क्षीणघातिकर्मचतुष्कस्य सकललोकावभासि केवलज्ञानं समुत्पन्नम् । चलितासनैः शक्रैस्तत्रागत्य केवलज्ञानोत्सवो महान् कृतः । पार्श्वोऽर्हन् सप्तफणानां लाञ्छनो वामदक्षिणपार्श्वयोर्वैरोट्याधरणेन्द्राभ्यां पर्युपास्यमानः प्रियङ्गुवर्णदेहो नवहस्तशरीरो भव्यसत्त्वान् प्रतिबोधयन् चतुस्त्रिंशदतिशयसमेतः पृथिवीमण्डले विहरति ।

पार्श्वभगवतो दश गणधरा अभवन् । आर्यदिन्नप्रमुखाः षोडशसहस्रसाधवोऽभवन् । पुष्पचूलाप्रमुखा अष्टत्रिंशत्सहस्रार्यिका अभवन् । सुव्रतप्रमुखाः श्रमणोपासका एकं लक्षं चतुष्षष्टिसहस्राश्चाभवन् । सुनन्दाप्रमुखाः श्रमणोपासिका लक्षत्रयं सप्तविंशतिसहस्राश्चाभवन् । सार्धत्रीणि शतानि चतुर्दशपूर्विणामभवन् । अवधिज्ञानिनां चतुर्दशशतानि, केवलज्ञानिनां दशशतानि, वैक्रियलब्धिमतामेकादशशतानि, विपुलमतीनां सार्धत्रीणि शतानि, वादिनां षट्शतानि, अन्तेवासिनां दशशतानि सिद्धिं गतानि, आर्यिकाणां विंशतिशतानि सिद्धानि, अनुत्तरोपपातिकानां द्वादशशतान्यभवन् । श्रीपार्श्वनाथस्यैषा परिवारसम्पदभूत् ।

१ पौषशुद्धैकादशीदिने इति मु० ॥

ततः पार्श्वो भगवान् देशोनानि सप्ततिवर्षाणि केवलपर्यायेण विहृत्यैकं वर्षशतं सर्वायुः परिपाल्य सम्मेतशिखरे ऊर्द्ध्वस्थित एवाधःकृतपाणिर्निर्वाणमगमत् । तत्कलेवर संस्कारोत्सवः शक्रादिभिस्तत्रैव विहितः । इति श्रीपार्श्वनाथचरित्रम् ।

अथाग्रे सूत्रं लिख्यते-

जिणे पासित्ति नामेणं, अरहा लोगपूईए ।
संबुद्धप्पा य सव्वन्नू, धम्मतित्थयरे जिणे ॥ १ ॥

पार्श्व इति नामाऽर्हन्नभूत्तीर्थङ्करोऽभूत् । कीदृशः सः ? जिनः परीषहोपसर्गजेता रागद्वेषजेता वा, पुनः कीदृशः स पार्श्वजिनः ? लोकपूजितो लोकेन-त्रिजगताऽर्चितः, पुनः कथंभूतः सः ? 'संबुद्धप्पा' सम्बुद्धात्मा तत्त्वावबोधयुक्तात्मा, पुनः कीदृशः सः ? सर्वज्ञः, पुनः कीदृशः स पार्श्वः ? धर्मतीर्थकरः, धर्म एव भवाम्बुधितरणहेतुत्वात्तीर्थं, धर्मतीर्थं करोतीति धर्मतीर्थकरः, पुनः कीदृशः ? जयति स्म सर्वकर्माणीति जिनः, द्वितीय-जिनविशेषणेन श्रीपार्श्वनाथस्य मुक्तिगमनं सूचितम्, तदा हि श्रीमहावीरः प्रत्यक्षं तीर्थकरो विहरति, श्रीपार्श्वनाथस्तु मुक्तिं जगामेति भावः ॥ १ ॥

तस्स लोगपईवस्स, आसि सीसे महाजसे ।
केसीकुमारसमणे, विज्जाचरणपारगे ॥ २ ॥

तस्य लोकप्रदीपस्य श्रीपार्श्वनाथतीर्थङ्करस्य केशीकुमारः शिष्य आसीत् । कुमारो ह्यपरिणीततया, कुमारत्वेनैव श्रमणः सङ्गृहीतचारित्रः कुमारश्रमणः । कथंभूतः सः ? महायशा-महाकीर्तिः, पुनः कीदृशः ? विद्याचरणपारगो-ज्ञानचारित्रयोः पारगामी इति ॥२॥

ओहिनाणसुए बुद्धे, सीसंघसमाउले ।
गामाणुगामं रीयंते, [१]सावत्थिं नगरिमागए ॥ ३ ॥

स केशीकुमारश्रमणः श्रावस्त्यां नगर्यामागतः, किं कुर्वन् ? ग्रामानुग्रामं 'रीयंते' इति ग्रामानुग्रामं विचरन् । कीदृशः सः ? 'ओहिनाणसुएबुद्धे' इत्यवधिज्ञानश्रुताभ्यां बुद्धोऽवगततत्त्वो मतिश्रुतावधिज्ञानसहितः, पुनः कीदृशः ? शिष्यसङ्घसमाकुलः-शिष्यवर्गसहितः ॥ ३ ॥

तिंदुयं णाम उज्जाणं, तम्मी नयरमंडले ।
[२]पासुए सिज्जासंथारे, तत्थ वासमुवागए ॥ ४ ॥

---

१ सेऽवि सावत्थिमागए-अन्यसंस्करणे ॥
२ फासुए-अन्यसंस्करणे ॥

स केशीकुमारश्रमणस्तत्र श्रावस्त्यां नगर्याम्, तस्याः श्रावस्त्या नगरमण्डले पुरपरिसरे तिन्दुकं नामोद्यानं वर्तते, तत्रोद्याने प्रासुके प्रदेशे-जीवरहिते शय्यासंस्तारे वासमुपागतः । शय्या-वसतिस्तस्यां संस्तारः शिलाफलकादिः शय्यासंस्तारस्तस्मिन् समवसृत इत्यर्थः ॥४॥

अह तेणेव कालेणं, धम्मतित्थयरे जिणे ।
भगवं वद्धमाणुत्ति, सव्वलोगंमि विस्सुए ॥ ५ ॥

अथशब्दो वक्तव्यान्तरोपन्यासे । तस्मिन्नेव काले धर्मतीर्थकरो जिनो भगवान् श्रीवर्धमान इति सर्वलोके विश्रुतोऽभूत् ॥ ५ ॥

तस्स लोगपईवस्स, आसि सीसे महाजसे ।
भयवं गोयमं नामे, विज्जाचरणपारगे ॥ ६ ॥

तस्य श्रीवर्धमानस्वामिनो लोकप्रदीपस्य तीर्थकरस्य गौतमनामा शिष्योऽभूत् । कथंभूतो गौतमः ? महायशा-महाकीर्त्तिः, पुनः कीदृशो गौतमः ? विद्याचरणपारगो-ज्ञानचारित्रधारी, पुनः कीदृशो गौतमः ? भगवांश्चतुर्ज्ञानी मति-श्रुता-ऽवधि-मनःपर्यायज्ञानयुक् ॥ ६ ॥

बारसंगविऊ बुद्धे, सीससंघसमाउले ।
गामाणुगामं रीयंते, सेऽवि सावत्थीमागए ॥ ७ ॥

स गौतमोऽपि ग्रामानुग्रामं विहरन् श्रावस्त्यां नगर्यामागतः । कीदृशो गौतमः ? द्वादशाङ्गवित्, एकादशाङ्गानि दृष्टिवादसहितानि येन गौतमेन सम्पूर्णानि ज्ञातानीत्यर्थः । पुनः कीदृशो गौतमः ? बुद्धो-ज्ञाततत्त्वः, पुनः कीदृशः ? शिष्यसङ्घसमाकुलः ॥ ७ ॥

कोट्ठगं णाम उज्जाणं, तम्मि नगरमंडले ।
फासुए सिज्जसंथारे, तत्थ वासमुवागए ॥ ८ ॥

तस्याः श्रावस्त्या नगर्या मण्डले-परिसरे क्रोष्टुकं नामोद्यानं वर्तते । तत्र प्रासुके शय्यासंस्तारे वासमवस्थानमुपागतः-प्राप्तः ॥ ८ ॥

केसीकुमारसमणे, गोयमे य महाजसे ।
उभओवि तत्थ विहरिंसु, अल्लीणा सुसमाहिया ॥ ९ ॥

केशीकुमारश्रमणश्च पुनर्गौतम एतावुभावपि व्यवाहार्ष्टाम्-आगाताम् । कीदृशौ तावुभौ ? महायशसौ, पुनः कीदृशौ ? अलीनौ मनोवाक्कायगुप्तिष्वाश्रितौ, पुनः कीदृशौ ? सुसमाहितौ -सम्यक्समाधियुक्तौ ॥ ९ ॥

उभओ सीससंघाणं, संजयाणं तवस्सिणं ।
तत्थ चिंता समुप्पन्ना, गुणवंताण ताइणं ॥ १० ॥

तत्र तस्यां श्रावस्त्यामुभयोः केशीगौतमयोः शिष्यसङ्घानां संयतानां तपस्विनां साधूनां गुणवतां-ज्ञानदर्शनचारित्रवतां त्रायिणां-षड्जीवरक्षाकारिणां परस्परावलोकनाच्चिन्ता समुत्पन्ना, विचारः समुत्पन्नः ॥ १० ॥

केरिसो वा इमो धम्मो, इमो धम्मो व केरिसो ।
आयारधम्मपणिही, इमा वा सा व केरिसी ॥ ११ ॥

अयमस्मत्सम्बन्धी धर्मः कीदृशः ? वा इति विकल्पे, वशब्दोऽपि वाऽर्थे, वाऽथवाऽयं धर्मो दृश्यमानगणभृच्छिष्यसम्बन्धी कीदृशः ? पुनरयमाचारधर्मप्रणिधिरस्माकं कीदृशः ? पुनरेतेषां आचारधर्मप्रणिधिः कीदृशः ? प्राकृतत्वाल्लिङ्गव्यत्ययः आचारो वेषधारणादिको बाह्यः क्रियाकलापः, स एव धर्मस्तस्य प्रणिधिर्व्यवस्थापनमाचारधर्मप्रणिधिः, पृथक् पृथक् कथं ? सर्वज्ञोक्तस्य धर्मस्य तत्साधनानां च भेदे हेतुं ज्ञातुमिच्छाम इति भावः ॥ ११ ॥

चाउज्जामो य जो धम्मो, जो इमो पंचसिक्खिओ ।
देसिओ वद्धमाणेणं, पासेण य महामुणी ॥ १२ ॥

अचेलगो य जो धम्मो, जो इमो संतरुत्तरो ।
एककज्जपवन्नाणं, विसेसो किं नु कारणं ॥ १३ ॥ युग्मम् ॥

यश्चायं चातुर्यामो धर्मः पार्श्वेन महामुनिना तीर्थकरेण दर्शितः, चत्वारश्च ते यामाश्च चतुर्यामस्तत्र भवश्चातुर्यामश्चातुर्व्रतिकोऽहिंसा १, सत्य २, चौर्यत्याग ३, परिग्रहत्याग ४, लक्षणो धर्मः प्रकाशितः, यश्च पुनरयं धर्मो वर्धमानेन पञ्चशिक्षिकः पञ्चशिक्षितो वा, पञ्चभिर्महाव्रतैः शिक्षितः पञ्चशिक्षितः प्रकाशितः । पञ्चसु शिक्षासु भवः पञ्चशिक्षिकः पञ्चमहाव्रतात्मा, अहिंसा १, सत्य २, चौर्यत्याग ३, मैथुनपरिहार ४, परिग्रहत्याग ५, लक्षणो धर्मः प्रकाशितः ॥ १२ ॥ पुनर्वर्धमानेनाऽचेलको धर्मः प्रकाशितः, अचेलं मानोपेतं धवलं जीर्णप्रायमल्पमूल्यं वस्त्रं धारणीयमिति वर्धमानस्वामिना प्रोक्तम्, असदिव चेलं यत्र सोऽचेलः, अचेल एवाऽचेलकः, यद्वस्त्रं सदप्यसदिव तद्धार्यमित्यर्थः । पुनर्यो धर्मः पार्श्वेन स्वामिना सान्तरोत्तरः, सह अन्तरेणोत्तरेण प्रधानबहुमूल्येन नानावर्णेन प्रलम्बेन वस्त्रेण च वर्तते यः स सान्तरोत्तरः सचेलको धर्मः प्रकाशितः । एककार्ये मुक्तिरूपे कार्ये प्रवृत्तयोः श्री वीरपार्श्वयोर्धर्माचारप्रणिधिविषयो विशेषस्तत्र किं नु कारणम् ? को हेतुः ? कारणभेदे हि कार्यभेदसम्भवः, कार्यं तूभयोरेकमेव, कारणं च पृथक् पृथक् कथमिति भावः, 'किमि' ति प्रश्ने, 'नु' इति वितर्के ॥ १३ ॥

अह ते तत्थ सीसाणं, विन्नाय पवियक्खियं ।
समागमे कयमई, उभओ केसिगोयमा ॥ १४ ॥

अथानन्तरं तयोरुभयोस्तत्र श्रावस्त्यामागमनानन्तरं केशिगौतमौ तावुभौ समागमे [१]कृतमती अभूताम् । किं कृत्वा ? शिष्याणां-क्षुल्लकानां प्रविवर्तितं विज्ञाय, विकल्पं ज्ञात्वा ॥ १४ ॥

गोयमे पडिरूवन्नू, सिस्ससंघसमाउले ।
जिट्ठं कुलमविक्खंतो, तिंदुयं वणमागओ ॥ १५ ॥

गौतमस्तिन्दुकं वनमागतः, केशीकुमाराधिष्ठिते वने आगतः । कीदृशो गौतमः ? प्रतिरूपज्ञः प्रतिरूपो यथोचितविनयस्तं जानातीति प्रतिरूपज्ञः, पुनः कीदृशः ? शिष्यसङ्घसमाकुलः शिष्यवृन्दसहितः, गौतमः किं कुर्वाणः ? ज्येष्ठं कुलमपेक्षमाणो ज्येष्ठं-वृद्धं प्रथमभवनात् पार्श्वनाथस्य कुलं - सन्तानं विचारयन्नित्यर्थः ॥ १५ ॥

केसीकुमारसमणे, गोयमं दिस्समागयं ।
पडिरूवं पडिवत्तिं, सम्मं च पडिवज्जई ॥ १६ ॥

केशीकुमारश्रमणो गौतममागतं दृष्ट्वा सम्यक् प्रतिरूपामागतानां योग्यां प्रतिपत्तिसेवां सम्प्रतिपद्यते सम्यक्करोतीत्यर्थः ॥ १६ ॥

पलालं फासुयं तत्थ, पंचमं कुसतणाणि य ।
गोयमस्स निसिज्जाए, खिप्पं संपणामए ॥ १७ ॥

तत्र तिन्दुकोद्याने एव केशीकुमारश्रमणो गौतमस्य निषद्यायै-गौतमस्योपवेशनार्थं प्रासुकं-निर्बीजं चतुर्विधं पलालम्, पञ्चमानि कुशतृणानि, चकारादन्यान्यपि साधुयोग्यानि तृणानि 'संपणामए' समर्पयति । पञ्चमत्वं हि कुशतृणानां पलालभेदेन, चतुर्विधं पलालं यथा ।

[२]तणपणगं पन्नत्तं, जिणेहिं कम्मट्ठगंठिमहणेहिं ।
साली १ वीही २ कोद्दव ३, रालग ४ रन्ने तणा ५ पंच ॥ १ ॥

इति वचनात् । चत्वारि पलालानि साधुप्रस्तरणयोग्यानि, पञ्चमं हि दर्भादि प्रासुकं तृणं वर्तते । तत् केशीकुमारश्रमणेन गौतमस्य प्रस्तरणार्थं प्रदत्तमिति भावः ॥ १७ ॥

---

१ बुद्धिवाळा

२ तृणपञ्चकं प्रज्ञप्तं, जिनैः कर्माष्टकग्रन्थिमथनैः ।
शाली व्रीहिः कोद्रवो रालकोऽरण्यतृणानि पञ्च ॥ १ ॥

केसीकुमारसमणे, गोयमे य महाजसे ।
उभओ निसन्ना सोहंति, चंदसूरसमप्पभा ॥ १८ ॥

तदा केशीकुमारश्रमणश्च पुनर्गौतमो महायशाः, एतावुभौ तत्र तिन्दुकोद्याने निषण्णावुपविष्टौ शोभेते - विराजेते । कथंभूतौ तौ ? चन्द्रादित्यसमप्रभौ ॥ १८ ॥

समागया बहु तत्थ, पासंडा कोउगा मिया ।
गिहत्थाणं अणेगाओ, सहस्सीओ समागया ॥ १९ ॥

तत्र तस्मिंस्तिन्दुकोद्याने बहवः पाखण्डा अन्यदर्शनिनः, परिव्राजकादयः समागताः, कीदृशास्ते पाखण्डाः ? कौतुकान्मृगा - आश्चर्यान्मृगा इवाऽज्ञानिनः । तु पुनर्गृहस्थानामनेकलोकानां सहस्रं समागतम्, अनेका-प्रचुरा लोकानां सहस्रीति आर्षत्वात्, समागता तत्र सम्प्राप्ता ॥ १९ ॥

देवदाणवगंधव्वा, जक्खरक्खसकिन्नरा ।
अदिस्साणं च भूयाणं, आसी तत्थ समागमो ॥ २० ॥

तत्र - तस्मिन् प्रदेशे देव-दानव-गान्धर्वा, यक्ष-राक्षस-किन्नराः समागता इति शेषः । च पुनस्तत्राऽदृश्यानां भूतानां - केलीकिलव्यन्तरविशेषाणां समागमः-सङ्गम आसीत् ॥ २० ॥

पुच्छामि ते महाभाग, केसी गोयममब्बवी ।
तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ २१ ॥

तयोर्जल्पमाह-तदा केशी गौतममब्रवीत्, किमब्रवीदित्याह- हे महाभाग ! 'ते' त्वामहं पृच्छामि, यदा केशीकुमारेणेत्युक्तं तदा केशीकुमारश्रमणं ब्रुवन्तमिदमब्रवीत् ॥ २१ ॥

पुच्छ भंते जहिच्छं ते, केसिं गोयममब्बवी ।
तओ केसी अणुन्नाए, गोयमं इणमब्बवी ॥ २२ ॥

गौतमो वदति-हे भदन्त ! हे पूज्य ! ते तव यथेच्छं यत्तव चेतस्यवभासते तत्त्वं पृच्छ, मम प्रश्नं कुरु, इति केशीकुमारं प्रति गौतमोऽब्रवीत् । 'गौतमं' इति प्राकृतत्वात्प्रथमास्थाने द्वितीया । ततो गौतमवाक्यादनन्तरं केशीकुमारो गौतमेनानुज्ञातः सन्-गौतमेन दत्ताज्ञः सन् गौतमं प्रतीदं वक्ष्यमाणं वचनमब्रवीत् ॥ २२ ॥

चाउज्जामो य जो धम्मो, जो इमो पंचसिक्खिओ ।
देसिओ वद्धमाणेण, पासेण य महामुणी ॥ २३ ॥

एगकज्जपवन्नाणं, विसेसे किं नु कारणं ।
धम्मे दुविहे मेहावी, कहं विपच्चओ न ते ॥ २४ ॥ युग्मम् ॥

हे गौतम ! पार्श्वेन महामुनिना तीर्थकरेण यश्चातुर्यामश्चातुर्व्रतिकोऽयमस्माकं धर्म उद्दिष्टः, पुनर्योऽयं धर्मो वर्धमानेन पञ्चशिक्षिकः पञ्चमहाव्रतात्मको दिष्टः-कथितः ॥ २३ ॥ एककार्ये मोक्षसाधनरूपे कार्ये प्रपन्नयोः श्रीपार्श्वमहावीरयोर्विशेषे - भेदे किं कारणं ? हे मेधाविन् ! द्विविधे धर्मे तव कथं विप्रत्ययः- संशयो न भवति, यतो द्वावपि तीर्थङ्करौ, द्वावपि मोक्षकार्यसाधने प्रवृत्तौ, कथमनयोर्भेद इति हेतोस्तव मनसि कथं विप्रत्ययो न भवति ? सन्देहो न भवति ? ॥ २४ ॥

तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ।
पण्णा समिक्खए धम्मं, तत्तं तत्थ विणिच्छयं ॥ २५ ॥

ततोऽनन्तरं केशीकुमारश्रमणं ब्रुवन्तं-कथयन्तं गौतम इदमब्रवीत्-हे केशीकुमार-श्रमण ! प्रज्ञा-बुद्धिर्धर्मतत्त्वं-धर्मस्य परमार्थं पश्यति, धर्मतत्त्वं बुद्ध्यैव विलोक्यते, न तु चर्मचक्षुषा धर्मतत्त्वं विलोक्यते । सूक्ष्मं धर्मं सुधीर्वेत्तीति वचनात् । कीदृशं धर्मतत्त्वं ? तत्त्वविनिश्चयम्, तत्त्वानां जीवादीनां विशेषेण निश्चयो यस्मिंस्तत्तत्त्वविनिश्चयम् । केवलं धर्मतत्त्वस्य श्रवणमात्रेण निश्चयो न भवति, किन्तु प्रज्ञावशादेव धर्मतत्त्वस्य निश्चयः स्यादिति भावः ॥ २५ ॥

पुरिमा उज्जुजडा उ, वक्कजडा य पच्छिमा ।
मज्झिमा उज्जुपन्ना उ, तेण धम्मो दुहा कओ ॥ २६ ॥

हे केशीकुमारश्रमण ! पूरिमाः-पूर्वे प्रथमतीर्थकृत्साधव आदीश्वरस्य मुनय ऋजुजडाः, ऋजवश्च ते जडाश्च ऋजुजडा बभूवुरिति शेषः । शिक्षाग्रहणतत्परा ऋजवः, दुष्प्रतिपाद्यतया जडा मूर्खाः, तुशब्दो यस्मादर्थे । पश्चिमाः पश्चिमतीर्थकृत्साधवो महावीरस्य मुनयो वक्रजडाः, वक्राश्च ते जडाश्च वक्रजडाः, वक्राः प्रतिबोधसमये वक्रज्ञानाः, जडाः कदाग्रहपराः, तादृशा बभूवुः । तु पुनर्मध्यमा मध्यमतीर्थङ्कराणां मुनयो द्वार्विंशतितीर्थ-कृत्साधव ऋजुप्राज्ञा बभूवुः, ऋजवश्च ते प्राज्ञाश्च ऋजुप्राज्ञाः, ऋजवः-शिक्षाग्रहणतत्पराः, प्राज्ञाः-प्रकृष्टबुद्धयः, तेन कारणेन हे मुने ! धर्मो द्विधा कृतः ॥ २६ ॥

पुरिमाण दुव्विसोज्झो, [१]चरिमाणं दुरणुपालओ चेव ।
कप्पो मज्झिमगाणं तु, सुविसोज्झो सुपालओ ॥ २७ ॥

'पुरिमाणं' इति प्रथमतीर्थकृत्साधूनां कल्पः-साध्वाचारो दुर्विशोध्यो-दुःखेन निर्मलीकरणीयः, आदीश्वरस्य साधव ऋजुजडाः, ऋजुजडत्वात्कल्पनीयाकल्पनीय-ज्ञानविकलाः । पुनश्चरमाणां-चरमतीर्थकृत्साधूनां दुरनुपालको दुःखेनानुपाल्यते इति दुरनुपालकः, महावीरस्य साधवो वक्रजडाः, वक्रत्वाद्विकल्पबहुलत्वात्साध्वाचारं जानन्तोऽपि

१ चेव-अन्यसंस्करणे नास्ति ॥

कर्तुमशक्ताः। तु पुनर्मध्यमगानां द्वाविंशतितीर्थकृत्साधूनामजितनाथादारभ्य पार्श्वनाथ-पर्यन्ततीर्थङ्करमुनीनां कल्पः-साध्वाचारः सुविशोध्यः सुपालकश्च साध्वाचारः सुखेन निर्मलीकर्तव्यः, पुनः सुखेन पाल्यः। द्वाविंशतितीर्थकृत्साधवो हि ऋजुप्राज्ञाः, स्तोकेनोक्तेन बहुज्ञाः, तस्माच्चातुर्व्रतिको धर्म उद्दिष्टः, मैथुनं हि परिग्रहे एव गण्यते।

आदीश्वरस्य साधूनां यदि पञ्चमहाव्रतानि-प्राणातिपातविरति-मृषावादविरति-स्तेयविरति-मैथुनविरति-परिग्रहविरतिरूपाणि पृथक् पृथक् कथ्यन्ते, तदा ते ऋजुजडाः पञ्चमहाव्रतानि पालयन्ति, नो चेते व्रतभङ्गं कुर्वन्ति, ते तु यावन्मात्रमाचारं शृण्वन्ति तावन्मात्रमेव कुर्वन्ति, अधिकं स्वबुद्ध्या किमपि न विदन्ति। महावीरस्य साधवस्तु चेत्पञ्चमहाव्रतानि शृण्वन्ति तदैव पालयन्ति, तेऽपि वक्रा जडाश्च चेच्चत्वारि व्रतानि शृण्वन्ति तदा चत्वार्येव पालयन्ति, न तु पञ्चमं पालयन्ति। वक्रजडा हि कदाग्रहग्रस्ता अतीवहठ-धारिणः। द्वाविंशतितीर्थकृत्साधव ऋजवः प्राज्ञाश्च चत्वारि व्रतानि श्रुत्वा सुबुद्धित्वात् पञ्चापि व्रतानि पालयन्ति। तस्माच्चत्वारि व्रतानि प्रोक्तानि, तस्माद्धर्मो द्विविधः कृतः, चातुर्व्रतकः पञ्चव्रतात्मकश्च। स्वस्ववारकपुरुषाणामभिप्रायं विज्ञाय तीर्थकरैर्धर्म उपदिष्ट इति भावः॥ २७॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा॥ २८॥

इति श्रुत्वा केशीकुमारः श्रमणो वदति-हे गौतम! 'ते' तव साधुप्रज्ञास्ति, सम्यग्बुद्धिरस्ति, 'मे' ममायं संशयस्त्वया छिन्नो-दूरीकृतः। अन्योऽपि मम संशयोऽस्ति, 'तमि' ति तस्योत्तरं हे गौतम! त्वं कथयस्व? इदं वचनं हि शिष्यापेक्षम्, न तु तस्य केशिमुनेर्ज्ञानत्रयवत एवंविधसंशयसम्भवः॥ २८॥

अचेलगो य जो धम्मो, जो इमो संतरुत्तरो।
देसिओ वद्धमाणेण, पासेण य महाजसा॥ २९॥

एगकज्जपवन्नाणं, विसेसे किं नु कारणं।
लिंगे दुविहे मेहावी, कहं विपच्चओ न ते॥ ३०॥ युग्मम्॥

वर्धमानेन चतुर्विंशतितमतीर्थङ्करेण यो धर्मोऽचेलकः प्रमाणोपेतजीर्णप्रायधवल-वस्त्रधारणात्मकः साध्वाचारो दिष्टः, च पुनः पार्श्वेन महायशसा त्रयोविंशतितमतीर्थकरेण योऽयं धर्मः सान्तरुत्तरः पञ्चवर्णबहुमूल्यप्रमाणरहितवस्त्रधारणात्मकः साध्वाचारः प्रदर्शितः। हे मेधाविन्! एककार्यप्रतिपन्नयोः श्रीवीरपार्श्वयोर्विशेषे-भेदे किं कारणं? को हेतुः? हे गौतम! द्विविधे लिङ्गे-द्विप्रकारके साधुवेषे 'ते' तव कथं विप्रत्ययो नोत्पद्यते? कथं सन्देहो न जायते? उभावपि तीर्थकरौ मोक्षकार्यसाधकौ, कथं ताभ्यां वेषभेदः प्रकाशितः? इति कथं तवायं संशयो न भवति?॥ ३०॥

केसिं एवं बुवंताणं, गोयमो इणमब्बवी ।
विन्नाणेण समागम्म, धम्मसाहणमिच्छियं ॥ ३१ ॥

तु पुनर्गौतम एवं ब्रुवाणं केशीकुमारं मुनिमिदमब्रवीत्-हे केशीमुने ! तीर्थकरैर्-विज्ञानेन-विशिष्टज्ञानेन केवलज्ञानेन समागम्य यद्यद्यस्योचितं तत्तथैव ज्ञात्वा धर्मसाधनं-धर्मोपकरणं वर्षाकल्पादि, इदमृजुप्राज्ञयोग्यं, इदं च वक्रजडयोग्यमितीप्सितमनुमतमिष्टं कथितमिति यावत् । यतो हि वीरशिष्याणां रक्तवर्णादिवस्त्रानुज्ञाते वक्रजडत्वेन रज्जनादिषु प्रवृत्तिर्दुर्निवारैव स्यात् । पार्श्वनाथशिष्यास्तु ऋजुप्राज्ञत्वेन शरीराच्छादनमात्रेण प्रयोजनं जानन्ति, न च ते किञ्चित्कदाग्रहं कुर्वन्ति ॥ ३१ ॥

पच्चयत्थं च लोगस्स, नाणाविहविगप्पणं ।
जत्तत्थं गहणत्थं च, लोगे लिंगप्पओयणं ॥ ३२ ॥

हे केशीमुने ! नानाविधविकल्पनं नानाप्रकारोपकरणपरिकल्पनमनेकप्रकारोपकरण-चतुर्दशोपकरणधारणं वर्षाकल्पादिकं च यत्पुनर्लोके लिङ्गस्य प्रयोजनम्, साधुवेषस्य प्रवर्तनं यत्तीर्थकरैरुक्तं तल्लोकस्य प्रत्यायार्थम्, लोकस्य-गृहस्थस्य प्रत्ययाय, यतो हि साधुवेषं लुञ्चनाद्याचारं च दृष्ट्वाऽमी व्रतिन इति प्रतीतिरुत्पद्यते । अन्यथा विडम्बकाः पाखण्डिनोऽपि पूजाद्यर्थं वयं व्रतिन इति ब्रुवीरन्, ततश्च व्रतिष्वप्रतीतिः स्यात्, अतो नानाविधविकल्पनं लिङ्गप्रयोजनं च पुनर्यात्रार्थं-संयमस्य निर्वाहार्थम् । यतो हि वर्षाकल्पादिकं विना वृष्ट्यादिना संयमनिर्वाहो न स्यात्, तेन वर्षाकल्पादिकं वर्षर्तुयोग्याचारोपकरणधारणं च दर्शितम् । पुनर्ग्रहणं-ज्ञानम्, तदर्थमिति ग्रहणार्थं ज्ञानायेत्यर्थः । यदि कदाचिच्चित्तविप्लवोत्पत्तिः स्यात्, परीषहोत्पत्तौ संयमेऽरतिरुत्पद्यते, तदा साधुवेषधारी मनस्येतादृशं ज्ञानं कुर्यात्-यतोऽहं साधोर्वेषधार्यस्मि, यतो 'धम्मं रक्खइ वेसो' इत्युक्तत्वात् । इत्यादिहेतोर्लिङ्गधारणं ज्ञेयम् ॥ ३२ ॥

पुनर्गौतमो वदति ।

अह भवे पइन्नाओ, मोक्खसब्भूयसाहणा ।
नाणं च दंसणं चेव, चरित्तं चेव निच्छए ॥ ३३ ॥

हे केशीकुमारश्रमण ! निश्चयनये मोक्षसद्भूतसाधनानि ज्ञानदर्शनचारित्राणि सन्ति । मोक्षरूपस्य कार्यस्य ज्ञानदर्शनचारित्राणि सत्यानि साधनानि निश्चयनये वर्तन्ते । अथ प्रतिज्ञा भवेत्, श्रीपार्श्वनाथमहावीरयोरियमेकैव प्रतिज्ञा भवेत् । श्रीपार्श्वनाथस्यापि मोक्षस्य साधनानि ज्ञानदर्शनचारित्राण्येव, श्रीवीरस्यापि मोक्षस्य साधनानि ज्ञानदर्शनचारित्राण्येव, श्रीपार्श्ववीरयोरेषा प्रतिज्ञा भिन्ना नास्तीत्यर्थः । वेषस्यान्तरं ऋजुजडवक्रजडाद्यर्थम्, मोक्षस्य

साधने वेषो व्यवहारनये ज्ञेयः, न तु निश्चये नये वेषः, निश्चये नये तु ज्ञानदर्शनचारित्राण्येव । तत्र ज्ञानं मतिज्ञानादिकम्, दर्शनं तत्त्वरुचिः, चारित्रं सर्वसावद्यविरतिरूपम्, तस्मान्निश्चय-व्यवहारनयौ ज्ञातव्यावित्यर्थः ॥ ३३ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा ॥ ३४ ॥

अस्या अर्थस्तु पूर्ववत् ॥ ३४ ॥

नवरं प्रसङ्गतः शिष्याणां व्युत्पत्त्यर्थं जानन्नप्यपरमपि वस्तुतत्त्वं गौतमस्य स्तुतिद्वारेण पृच्छन्नन्योऽपि संशय इत्याद्याह-

अणेगाण सहस्साणं, मज्झे चिट्ठसि गोयमा ।
ते य ते अभिगच्छंति, कहं ते निज्जिया तुमे ॥ ३५ ॥

केशी वदति-हे गौतम ! अनेकेषां शत्रुसम्बन्धिनां सहस्राणां मध्ये त्वं तिष्ठसि, ते चानेकसहस्रसङ्ख्याः शत्रवस्ते इति त्वामभिलक्षीकृत्य गच्छन्ति सन्मुखं धावन्ति, ते शत्रवस्त्वया कथं निर्जिताः ॥ ३५ ॥

अथ गौतम उत्तरं वदति-

एगे जिए जिया पंच, पंचे जिए जिया दस ।
दसहा उ जिणित्ताणं, सव्वसत्तू जिणामिहं ॥ ३६ ॥

हे केशीमुने ! एकस्मिन् शत्रौ जिते पञ्च शत्रवो जिताः, पञ्चसु जितेषु दश शत्रवो जिताः, दशैव वैरिणो वशीकृताः, दशप्रकारान् शत्रून् जित्वा सर्वशत्रून् जयामि । यद्यपि चतुर्णां कषायाणामवान्तरभेदेन षोडशसङ्ख्या भवति, नोकषायाणां नवानां मीलनात् पञ्चविंशतिभेदा भवन्ति, तथापि सहस्रसङ्ख्या न भवति परन्तु तेषां दुर्जयत्वात् सहस्रसङ्ख्या प्रोक्ता ॥ ३६ ॥

अथ केशी पृच्छति -

सत्तू य इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसी बुवंतं तु, गोयमो इणमब्बवी ॥ ३७ ॥

एगप्पा अजिए सत्तू, कसाया इंदियाणि य ।
ते जिणित्तु जहा नायं, विहरामि अहं मुणी ॥ ३८ ॥

हे मुने ! एक आत्मा चित्तं, तस्याऽभेदोपचारादात्ममनसोरेकीभावे मनसः प्रवृत्तिः स्यात्, तस्मादेक आत्मा अजितः शत्रुर्दुर्जयो रिपुरनेकदुःखहेतुत्वात् । एवं सर्वेऽप्येते

उत्तरोत्तरभेदादेकस्मिन्नात्मनि जिते चत्वारः कषायाः, तेषां मीलनात्पञ्च, पञ्चस्वात्मकषायेषु जितेष्विन्द्रियाणि पञ्च जितानि, तदा दश शत्रवो जिताः । आत्मा १ कषायाश्चत्वारः, एवं पञ्च, पुनः पञ्चेन्द्रियाणि, एवं दशैव । आत्मा, कषायाः, नोकषायाः, इन्द्रियाणि च, एते सर्वे शत्रवोऽजिताः सन्ति । तान् सर्वान् शत्रून् यथान्यायं वीतरागोक्तवचसा जित्वाऽहं विहरामि । तेषां मध्ये तिष्ठन्नप्यप्रतिबद्धविहारेण विचरामि । अत्र पूर्वं हि प्रश्नकालेऽनेकेषां सहस्राणामरीणां मध्ये तिष्ठसीत्युक्तम्, उत्तरसमये तु कषायाणामवान्तरभेदेन षोडशसङ्ख्या भवन्ति, नोकषायाणां नवानां मीलनाच्च पञ्चविंशतिभेदा भवन्ति । तथात्मेन्द्रियाणामपि सहस्रसङ्ख्या न भवति, परन्त्वेतेषां दुर्जयत्वात् सहस्रसङ्ख्योक्तेति भावः ॥ ३८ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा ॥ ३९ ॥

अस्या अर्थः पूर्ववत् ॥ ३९ ॥

दिसंति बहवे लोए, पासबद्धा सरीरिणो ।
मुक्कपासो लहुब्भूओ, कहं तं विहरसी मुणी ॥ ४० ॥

पुनः केशी वदति-हे गौतममुने ! लोके-संसारे बहवः शरीरिणः पाशबद्धा दृश्यन्ते, त्वं मुक्तपाशः सन् लघूभूतो वायुरिव कथं विहरसि ? ॥ ४० ॥

अथ गौतमः प्राह-

ते पासे सव्वसो छित्ता, निहंतूणं उवायओ ।
मुक्कपासो लहुब्भूओ, विहरामि अहं मुणी ॥ ४१ ॥

हे केशीमुने ! तान् पाशान् सर्वशः सर्वान् छित्वा, पुनस्तान् पाशानुपायतो निस्सङ्गादित्वाभ्यासान्निहत्य पश्चान्मुक्तपाशो-बन्धनरहितः सन् लघूभूतोऽहं विहरामि ॥ ४१ ॥

पासा य इइ के वुत्ते, केसी गोयममब्बवी ।
[१]तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ ४२ ॥

इति गौतमवाक्यादनन्तरं केशीश्रमणो गौतममब्रवीत्-हे गौतम ! पाशाः के उक्ताः ? बन्धनानि कान्युक्तानि ? तत इति पृच्छन्तं केशिकुमारमुनिं गौतम इदमुत्तरमब्रवीत् ॥४२॥

रागद्दोसाइओ तिव्वा, नेहपासा भयंकरा ।
ते छिंदित्तु जहानायं, विहरामि जहक्कमं ॥ ४३ ॥

---

१ केसिं एवं बुवंतं तु-अन्यसंस्करणे ॥

हे केशीमुने ! जीवानां रागद्वेषादयस्तीव्राः कठोराश्छेत्तुमशक्याः स्नेहपाशा मोहपाशा उक्ताः, कीदृशास्ते स्नेहपाशाः ? भयङ्करा भयं कुर्वन्तीति भयङ्कराः, रागद्वेषावादौ येषां ते रागद्वेषादयः, रागद्वेषमोहा इव जीवानां भयदाः, तान् स्नेहपाशान् यथान्यायं वीतरागोक्तोपदेशेन छित्वा यथाक्रमं साध्वाचारानुक्रमेणाहं विहरामि, साधुमार्गे विचरामि ॥ ४३ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा ॥ ४४ ॥

अस्या अर्थस्तु पूर्ववत् ॥ ४४ ॥

अंतोहिययसभूया, लया चिट्ठइ गोयमा ।
फलेइ विसभक्खीणि, सा उ उद्धरिया कहं ॥ ४५ ॥

हे गौतम ! सा लता-सा वल्ली त्वया कथं-केन प्रकारेणोद्धृतोत्पाटिता ? सा का ? या लता अन्तःहृदयसम्भूता सती तिष्ठति । अन्तःहृदयं मन उच्यते, एतावता मनस्युद्गता, पुनर्या वल्ली विषभक्ष्याणि फलानि फलति । विषवद्भक्ष्याणि विषभक्ष्याणि विषफलानि निष्पादयति, पर्यन्तदारुणतया विषोपमानि फलानि यस्या लताया भवन्ति ॥ ४५ ॥

तं लयं सव्वसो छित्ता, उद्धरित्ता समूलियं ।
विहरामि जहानायं, मुक्कोमि [१]विसभक्खणा ॥ ४६ ॥

गौतमो वदति-हे मुने ! तां लतां सर्वतः सर्वप्रकारेण छित्वा-खण्डीकृत्य, पुनः समूलिकां मूलसहितामुद्धृत्योत्पाट्य यथान्यायं साधुमार्गे विहरामि । ततोऽहं विषभक्षणाद्विषोपमफलाहारान्मुक्तोऽस्मि ॥ ४६ ॥

लया य इइ का वुत्ता, केसी गोयममब्बवी ।
[२]तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ ४७ ॥

हे गौतम ! लता इति का उक्ता ? इति पृष्टे सति, ब्रुवन्तं केशीमुनिं गौतम इदमब्रवीत् ॥ ४७ ॥

भवतण्हा लया वुत्ता, भीमा भीमफलोदया ।
[३]तमुद्धित्तु जहानायं, विहरामि महामुणी ॥ ४८ ॥

---

१ विसभक्खणं-अन्यसंस्करणे ॥ २ केसिं एव बुवंतं-अन्यसंस्करणे ॥ ३ तमुच्छित्तु-अन्यसंस्करणे । तमुद्धरितु अपि ॥

हे केशीमुने ! भवे-संसारे तृष्णा-लोभप्रकृतिर्लता-वल्ल्युक्ता, कीदृशी सा ? भीमा भयदायिनी, पुनः कीदृशी ? भीमफलोदया, भीमो दुःखकारणानां फलानां दुष्टकर्मणामुदयो विपाको यस्याः सा भीमफलोदया, दुःखदायककर्मफलहेतुभूता, लोभमूलानि पापानीत्युक्तत्वात्, तां तृष्णावल्लीं यथान्यायमुद्धृत्याहं विहारं करोमि ॥ ४८ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा ॥ ४९ ॥

अर्थस्तु पूर्ववत् ॥ ४९ ॥

संपज्जलिया घोरा, अग्गी चिट्ठइ गोयमा ।
जे डहंति सरीरत्था, कहं विज्झाविया तुमे ॥ ५० ॥

हे गौतम ! संप्रज्वलिता-जाज्वल्यमाना घोरा-भीषणा अग्नयः संसारे तिष्ठन्ति, येऽग्नयः शरीरस्थान् प्राणिनो-जीवान् दहन्ति-ज्वालयन्ति । तेऽग्नयस्त्वया कथं विध्यापिताः ? कथं शमिता इत्यर्थः ॥ ५० ॥

[१]महामेहप्पभूयाओ, गिज्झा वारिजलुत्तमं ।
सिंचामि सययं ते उ, सित्ता नेव डहंति मे ॥ ५१ ॥

हे केशी मुने ! महामेघप्रभूतान्महामेघसमुत्पन्नादर्थान्महानदीप्रवाहाद्वारि-पानीयं गृहीत्वा तानग्नीन् सततं-निरन्तरं सिञ्चामि । तेऽग्नयो जलेन सिक्ताः मां नैव दहन्ति । कथंभूतं तद्वारि ? 'जलुत्तमं' जलोत्तमम्, सर्वेषु जलेषु मेघोदकस्यैवोत्तमत्वात् ॥ ५१ ॥

अग्गी अ इइ के वुत्ते, केसी गोयममब्बवी ।
[२]तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ ५२ ॥

तदा केशीश्रमणो गौतममिदमब्रवीत्-हे गौतम ! तेऽग्नय इति के उक्ताः ? इत्युक्तवन्तं केशीकुमारमुनिं गौतम इदमब्रवीत् ॥ ५२ ॥

कसाया अग्गिणो वुत्ता, सुयसीलतवो जलं ।
सुयधाराभिहया संता, भिन्ना हु न डहंति मे ॥ ५३ ॥

हे केशीमुने ! कषाया अग्नय उक्ताः, श्रुतं शीलं तपश्च जलं वर्तते, तत्र श्रुतं च श्रुतमध्योपदेशः, महामेघस्तीर्थङ्करः, महाश्रोतश्च तदुत्पन्न आगमः, ते कषायाग्नयः श्रुतधाराभिहताः, श्रुतस्यागमवाक्यस्य, उपलक्षणत्वाच्छीलतपसोरपि, धारा इव धाराः,

१ महामेहप्पसूयाओ-अन्यसंस्करणे, तत्र वृत्तिरपि एवं-"महामेघात् प्रसूतम्-उत्पन्नं महामेघप्रसूतं तस्मात् ॥"
२ केसिं एवं बुवंतं तु-अन्यसंस्करणे ॥ एवमग्रेऽपि ॥

ताभिरभिहता विध्यापिताः श्रुतधाराभिहताः सन्तो भिन्ना विध्यापिता 'हु' निश्चयेन 'मे' इति मां न दहन्ति, मां न ज्वालयन्ति ॥ ५३ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा ॥ ५४ ॥

अर्थस्तु पूर्ववत् ॥ ५४ ॥

[1]अइसाहसिओ भीमो, दुट्ठस्सो परिधावई ।
जंसि गोयममारूढो, कहं तेण न हिरसि ॥ ५५ ॥

हे गौतम ! अतिसाहसिको दुष्टाश्वः परिधावति, यस्मिन् दुष्टाश्वे हे गौतम ! त्वमारूढोऽसि, तेन दुष्टाश्वेन कथं न ह्रियसे ? कथमुन्मार्गं न नीयसे ? कथंभूतः स दुष्टाश्वः ? सहसाऽविचार्य प्रवर्तते इति साहसिकोऽविचारिताध्वगामी, पुनः कीदृशो दुष्टाश्वः ? भीमो-भयानकः ॥ ५५ ॥

पहावंतं निगिह्णामि, सुयरस्सीसमाहियं ।
न मे गच्छई उम्मग्गं, मग्गं च पडिवज्जई ॥ ५६ ॥

अथ गौतमो वदति-हे केशीमुने ! तं दुष्टाश्वं प्रधावन्तमुन्मार्गं व्रजन्तमहं निगृह्णामि-वशीकरोमि । कीदृशं तं दुष्टाश्वं ? श्रुतरश्मिसमाहितं सिद्धान्तवल्गया बद्धम्, यतः स 'मे' मम दुष्टाश्व उन्मार्गं न गच्छति, स दुष्टाश्वो मार्गं च प्रतिपद्यतेऽङ्गीकरोति ॥ ५६ ॥

अस्से इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ ५७ ॥

केशी पृच्छति, हे गौतम ! अश्व इति क उक्तः ? तत इति ब्रुवन्तं केशीमुनिं गौतम इदमब्रवीत् ॥ ५७ ॥

मणो साहसिओ भीमो, दुट्ठस्सो परिधावई ।
तं सम्मं निगिह्णामि, धम्मसिक्खाय कंथगं ॥ ५८ ॥

हे केशीमुने ! मनो दुष्टाश्वः साहसिकः परिधावति, इतस्ततः परिभ्रमति । तं मनोदुष्टाश्वं धर्मशिक्षायै-धर्माभ्यासनिमित्तं कन्थकमिव-जात्याश्वमिव निगृह्णामि-वशीकरोमि, यथा जात्याश्वो वशीक्रियते, तथा मनोदुष्टाश्वं वशीकरोमि ॥ ५८ ॥

---

१ अयं साहसिओ-अन्यसंस्करणे, तत्र वृत्ति-"अयं प्रत्यक्षः, सहसा-असमीक्ष्य प्रवर्त्तत इति साहसिको भीमः,"-बृहद्वृत्त्याम् प. ५०७ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा ॥ ५९ ॥

अस्या अर्थस्तु पूर्ववत् ॥ ५९ ॥

कुप्पहा बहवो लोए, जेहिं नासंति जंतवो ।
अद्धाणे कह वट्टंतो, तं न नाससि गोयमा ॥ ६० ॥

हे गौतम ! लोके बहवः कुपथाः - कुमार्गाः सन्ति, यैः कुमार्गैर्जन्तवो नश्यन्ति, दुर्गतिवने व्रजन्तो विलीयन्ते सन्मार्गाच्च्यवन्ते इत्यर्थः । हे गौतम ! त्वमध्वनि वर्तमानः सन् कथं न नश्यसि ? नाशं न प्राप्नोषि ? सत्पथात्त्वं न च्यवसे ? ॥ ६० ॥

जे य मग्गेण गच्छंति, जे य उम्मग्गपट्ठिया ।
ते सव्वे विइया मज्झं, तो न णस्सामिहं मुणी ॥ ६१ ॥

हे केशीमुने ! ये भव्यजना मार्गेण वीतरागोपदेशेन गच्छन्ति, च पुनर्येऽभव्या उन्मार्ग-प्रस्थिता भगवदुपदेशाद्विपरीतं प्रचलितास्ते सर्वे मया विदिताः । भव्याभव्ययोः सन्मार्गा-ऽसन्मार्गयोर्ज्ञानं मम जातमिति भावः । 'तो' तस्मात्कारणादहं न नश्यामि, अपथपरि-ज्ञानान्नाशं न प्राप्नोमि ॥ ६१ ॥

मग्गे अ इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ ६२ ॥

अस्या अर्थः पूर्ववत् ॥ ६२ ॥

कुप्पवयणपासंडी, सव्वे उम्मग्गपट्ठिया ।
समग्गं तु जिणक्खायं, एस मग्गे हि उत्तमे ॥ ६३ ॥

हे केशीमुने ! कुत्सितानि प्रवचनानि कुप्रवचनानि-कुदर्शनानि, तेषु पाखण्डिनः कुप्रवचनपाखण्डिन एकान्तवादिनः, ते सर्वे उन्मार्गे प्रस्थिताः-उन्मार्गगामिनः सन्ति । सन्मार्गं तु पुनर्जिनाख्यातं विद्यते, एष जिनोक्तो मार्गः सर्वमार्गेषूत्तमः, सर्वमार्गेभ्यः प्रधानो विनयमूलत्वादित्यर्थः ॥ ६३ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा ॥ ६४ ॥

अस्या अर्थस्तु पूर्ववत् ॥ ६४ ॥

महाउदगवेगेणं, बुड्डुमाणाण पाणिणं ।
सरणं गईपइट्ठा य, दीवं कं मन्नसी मुणी ॥ ६५ ॥

केशी गौतमं प्रति पृच्छति, हे गौतममुने ! महोदकवेगेन-महाजलप्रवाहेण बुड्यमानानां-प्लवतां प्राणिनां त्वं द्वीपं कं मन्यसे ? इति प्रश्नः । कीदृशं द्वीपं ? शरणं-रक्षणक्षमम्, पुनः कीदृशं ? गतिमाधारभूमिम्, पुनः कीदृशं ? प्रतिष्ठां-स्थिरावस्थानहेतुम्, द्वीपं-निवासस्थानं जलमध्यवर्ति ॥ ६५ ॥

अत्थि एगो महादीवो, वारिमज्झे महालओ ।
महाउदगवेगस्स, गई तत्थ न विज्जई ॥ ६६ ॥

हे केशीमुने ! वारिमध्ये-पानीयान्तराले यो 'महालओ' ति महानुच्चैस्त्वेन विस्तीर्णतया वाऽऽलयः-स्थानं यस्य स महालयो विस्तीर्ण एको द्वीपोऽस्ति, द्विर्गता आपो यस्मिन् स द्वीपः, तत्र तस्मिन् द्वीपे महोदकवेगस्य गतिर्न विद्यते, पातालकलशवातैः क्षुभितस्य जलवेगस्य गमनं नास्ति । अपरत्र द्वीपे प्रलयकाले समुद्रजलस्य गतिरस्ति, परं तत्र द्वीपे नास्ति ॥ ६६ ॥

दीवे अ इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ ६७ ॥

केशी गौतमं पृच्छति-हे गौतम ! द्वीपमिति किमुक्तं ? इत्युक्तवन्तं केशीश्रमणं प्रति गौतम इदमब्रवीत् ॥ ६७ ॥

जरामरणवेगेणं, बुड्डुमाणाण पाणिणं ।
धम्मो दीवो पइट्ठा य, गई सरणमुत्तमं ॥ ६८ ॥

हे केशीमुने ! जरामरणजलप्रवाहेण बुडतां-वहतां प्राणिनां संसारसमुद्रे श्रुतधर्म-श्चारित्रधर्मरूपो द्वीपो वर्तते, मुक्तिसुखहेतुधर्मोऽस्तीति भावः । कीदृशः स धर्मः ? प्रतिष्ठा-निश्चलं स्थानम्, पुनः कीदृशो धर्मः ? गतिर्विवेकिनामाश्रयणीयः, स धर्म उत्तमं-प्रधानं स्थानं शरणमस्तीति भावः ॥ ६८ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा ॥ ६९ ॥

अस्या अर्थस्तु पूर्ववत् ॥ ६९ ॥

अण्णवंसि महोहंसि, नावा विपरिधावई ।
जंसि गोयममारूढो, कहं पारं गमिस्ससि ॥ ७० ॥

हे गौतम ! महौघेऽर्णवे-महाप्रभावे समुद्रे नावा इति नौर्विपरिधावति, इतस्ततः परिभ्रमति, यस्यां नौकायां त्वमारूढः सन् कथं पारं गमिष्यसि ? कथं पारं प्राप्स्यसि ॥७०॥

अथ केशीमुनिना प्रश्ने कृते सति गौतमो वदति-

जा उ आस्सावि‌णी नावा, न सा पारस्स गामिणी ।
जा निस्सावि‌णी नावा, सा उ पारस्स गामिणी ॥ ७१ ॥

हे केशीमुने ! या नौः आश्रावि‌णी-छिद्रसहितास्ति, आश्रवत्यागच्छति पानीयं यस्यां साऽऽश्रावि‌णी, सा नौः पारस्य गामिनी नास्ति, या निःश्रावि‌णी-निश्छिद्रा नौः, सा तु पारस्य गामिनी ॥ ७१ ॥

अथ केशी पृच्छति-

नावा अ इइ का वुत्ता, केसी गोयममब्बवी ।
तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ ७२ ॥

ततः केशीमुनिं प्रति गौतमोऽब्रवीत् ॥ ७२ ॥

सरीरमाहुनावत्ति, जीवो वुच्चइ नाविओ ।
संसारो अण्णवो वुत्तो, जं तरंति महेसिणो ॥ ७३ ॥

हे केशीमुने ! शरीरं नौर्वर्तते, जीवो नाविको-नौखेटक उच्यते । संसारोऽर्णवः-समुद्र उक्तः, यं संसारसमुद्रं महर्षयस्तरन्ति । एतावता महर्षयः स्वजीवं तपोऽनुष्ठानक्रियावन्तं नौवाहकं-नाविकं कृत्वा चतुर्गतिभ्रमणरूपे भवार्णवे स्वशरीरं धर्माधारकत्वेन नावं कृत्वा पारं प्राप्नुवन्ति, मोक्षं व्रजन्तीति भावः ॥ ७३ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं, तं मे कहसु गोयमा ॥ ७४ ॥

अस्या अर्थस्तु पूर्ववत् ॥ ७४ ॥

अंधयारे तमे घोरे, चिट्ठंति पाणिणो बहू ।
को करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥ ७५ ॥

अथ पुनः केशीश्रमणो गौतमं पृच्छति-हे गौतम ! अन्धकारे तमसि प्रकाशाभावे बहवः प्राणिनस्तिष्ठन्ति । अन्धकार-तमःशब्दयोर्यद्यप्येक एवार्थस्तथाप्यत्रान्धकारशब्दस्तमसो विशेषणत्वेन प्रतिपादितः । कीदृशे तमसि ? अन्धकारे, अन्धं करोति लोकमित्यन्धकारम्, तस्मिन्नन्धकारे, पुनः कीदृशे तमसि ? घोरे-रौद्रे भयोत्पादके । हे गौतम ! एतादृशे

सर्वस्मिन् लोके सर्वेषां प्राणिनां-सर्वजीवानां कः पदार्थ उद्योतं करिष्यति ? प्रकाशं करिष्यति ? न किञ्चित्तादृशं पश्याम इति भावः ॥ ७५ ॥

उग्गओ विमलो भाणू, सव्वलोगप्पभंकरो ।
सो करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥ ७६ ॥

गौतमः प्राह-हे केशीमुने ! सर्वलोकप्रभाकरो विमलो भानुरुद्गतः, स भानुः सर्वस्मिन् लोके सर्वेषां प्राणिनामुद्योतं करिष्यति । सर्वस्मिन् लोके प्रभां करोतीति सर्वलोकप्रभाकरः, सर्वलोकालोकप्रकाशको निर्मलो वार्दलादिनाऽनाच्छादितो भानुरेव सर्वेषां प्राणिनां सर्वत्रोद्योतं करोति, नान्यः कोऽपि तेजस्वी पदार्थ इति भावः ॥ ७६ ॥

भाणू य इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ ७७ ॥

तदा केशीमुनिर्गौतमं पृच्छति-हे गौतम ! भानुरिति क उक्तः ? केशीमुनिर्गौतममित्यब्रवीत् । ततः केशीमुनिमिति ब्रुवन्तं गौतम इदमब्रवीत् ॥ ७७ ॥

उग्गओ खीणसंसारो, सव्वन्नू जिणभक्खरो ।
सो करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥ ७८ ॥

हे केशीमुने ! क्षीणः संसारो-भवभ्रमणं यस्य स क्षीणसंसारः- क्षयीकृतसंसारः, सर्वज्ञः-सर्वपदार्थवेत्ता, जिनो-रागद्वेषयोर्विजेता, स भास्करः-सूर्यः सर्वस्मिन् लोके-चतुर्दशरज्ज्वात्मके लोके सर्वेषां प्राणिनामुद्योतं करिष्यति, प्रकाशं करिष्यति ॥ ७८ ॥

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोवि संसओ मज्झं तं मे कहसु गोयमा ॥ ७९ ॥

अस्या अर्थस्तु पूर्ववत् ॥ ७९ ॥

अथ पुनः केशीश्रमणो गौतमं पृच्छति-

सारीरमाणसे दुक्खे, वज्झमाणाण पाणिणं ।
खेमं सिवं अणाबाहं, ठाणं किं मन्नसि मुणी ॥ ८० ॥

हे गौतममुने ! शारीरिकैः शरीरादुत्पनैः, तथा मानसैर्मनस उत्पन्नैर्दुःखैर्वध्यमानानां-पीड्यमानानां प्राणिनां त्वं क्षेमं-व्याध्याधिर-हितम्, शिवं-जरोपद्रवरहितम्, अनाबाधं-शत्रुजनाऽभावात्स्वभावेन पीडारहितम्, एतादृशं स्थानं किं मन्यसे ? मां वदेरिति शेषः ॥ ८० ॥

अत्थि एगं धुवं ठाणं, लोगग्गंमि दुरारुहं ।
जत्थ नत्थि जरा मच्चू, वाहिणो वेयणा तहा ॥ ८१ ॥

हे केशीमुने ! लोकाग्रे लोकस्य चतुर्दशरज्ज्वात्मकस्याग्रं लोकाग्रम्, तस्मिन् लोकाग्रे एकं ध्रुवं-निश्चलं स्थानमस्ति । कथंभूतं तत्स्थानं ? दुरारुहं, दुःखेनारुह्यते यस्मिंस्तद् दुरारुहं दुष्प्रापमित्यर्थः, पुनर्यत्र-यस्मिन् स्थाने जरामृत्यू न स्तः, जरामरणे न विद्येते, पुनर्यस्मिन् व्याधयस्तथा वेदना वा वात-पित्त-कफ-श्लेष्मादयो न विद्यन्ते ॥ ८१ ॥

ठाणे य इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥ ८२ ॥

हे गौतम ! स्थानमिति किमुक्तं ? केशीश्रमणो गौतममित्यब्रवीत् । ततः केशीकुमारमिति ब्रुवन्तं गौतम इदमब्रवीत् ॥ ८२ ॥

निव्वाणंति अबाहं ति, सिद्धी लोगग्गमेव य ।
खेमं सिवमणाबाहं, जं चरंति महेसिणो ॥ ८३ ॥

तं ठाणं सासयं वासं, लोयग्गंमि दुरारुहं ।
जं संपत्ता न सोयंति, भवोहंतकरा मुणी ॥ ८४ ॥ युग्मम् ॥

हे केशीमुने ! तत् शाश्वतं-सदातनं वासं स्थानं लोकाग्रे वर्तते, यत्स्थानं सम्प्राप्ताः सन्तो भवौघान्तकराः-संसारप्रवाहविनाशका मुनयो न शोचन्ते, शोकं न कुर्वन्ति । कीदृशं तत्स्थानं ? दुरारुहम्, दुःखेन तपःसंयमयोगेनारुह्यते-आसाद्यते इति दुरारोहं दुष्प्राप्यमिति द्वितीयगाथया सम्बन्धः । अथ प्रथमगाथाया अर्थः-पुनः कीदृशं तत्स्थानं ? यत्स्थानमेभिर्नामभिरुच्यते-कानि तानि नामानि ? निर्वाणमिति, अबाधमिति, सिद्धिरिति, लोकाग्रमेव, च पुनः शिवमिति नामानि, एतादृशैः सार्थकैरभिधानैर्यत्स्थानमुच्यते, तेषां नाम्नामर्थो यथा-निर्वान्ति, सन्तापस्याऽभावात् शीतीभवन्ति जीवा यस्मिन्निति निर्वाणम् । न विद्यते बाधा यस्मिंस्तदबाधं-निर्भयम् । सिद्ध्यन्ति समस्तकार्याणि भ्रमणाऽभावाद्यस्यामिति सिद्धिः । लोकस्याग्रमग्रभूमिर्लोकाग्रमेव । क्षेमं क्षेमस्य-शाश्वतसुखस्य कारकत्वात्क्षेमम् । शिवमुपद्रवाऽभावात् । पुनर्यत्स्थानं प्रति महर्षयोऽनाबाधं यथा स्यात्तथा चरन्ति व्रजन्ति सुखेन मुनयः प्राप्नुवन्ति, मुनयो हि चक्रवर्त्यधिकसुखभाजः सन्तो मोक्षं लभन्ते इति भावः ॥ ८३ ॥ ८४ ॥

अथ केशीकुमारो मुनिर्गौतमं स्तौति-

साहु गोयम पन्ना ते, छिन्नो मे संसओ इमो ।
नमो ते संसयातीत, सव्वसुत्तमहोयही ॥ ८५ ॥

हे गौतम ! 'ते' तव प्रज्ञा साध्वी वर्तते, 'मे' ममायं संशयश्छिन्नः, सन्देहो दूरीकृतः । हे संशयातीत ! हे सन्देहरहित ! हे सर्वसूत्रमहोदधे ! सकलसिद्धान्तसमुद्र ! तुभ्यं नमो-नमस्कारोऽस्तु ॥ ८५ ॥

एवं तु संसए छिन्ने, केसी घोरपरक्कमे ।
अभिवंदित्ता सिरसा, गोयमं तु महाजसं ॥ ८६ ॥

पंचमहव्वयं धम्मं, पडिवज्जइ भावओ ।
पुरिमस्स पच्छिमंमि, मग्गे तत्थ सुहावए ॥ ८७ ॥ युग्मम् ॥

केशीकुमारश्रमणो भावतः श्रद्धातः 'पुरिमस्स' इति प्रथमतीर्थकृतो मार्गे, पश्चिमे पश्चिमतीर्थकरस्य मार्गे, अर्थादादीश्वरमहावीरयोर्मार्गे, तत्र तिन्दुकोद्याने पञ्चमहाव्रतरूपं धर्मं प्रतिपद्यतेऽङ्गीकरोति । किं कृत्वा ? गौतमं शिरसा मस्तकेनाभिवन्द्य नमस्कृत्य, क्व सति ? एवममुना प्रकारेण गौतमेन संशये छिन्ने सति, कीदृशं गौतमं ? महायशसम् । कीदृशः केशीमुनिः ? घोरपराक्रमो रौद्रपुरुषाकारयुक्तः पूर्वं केशीकुमारश्रमणेन चत्वारि व्रतानि गृहीतान्यासन्, तदा गौतमवाक्यात्पञ्चमहाव्रतान्यङ्गीकृतानीति भावः ॥ ८७ ॥

केसीगोयमओ निच्चं, तम्मि आसि समागमो ।
सुयसीलसमुक्करिसो, महत्थऽत्थविणिच्छओ ॥ ८८ ॥

तत्र तस्यां नगर्यां केशीगौतमयोर्नित्यं समागम आसीत् । तयोः पुनः श्रुतशील-समुत्कर्षः - श्रुतज्ञानचारित्रयोः समुत्कर्षोऽतिशयोऽभूत् । पुनस्तयोरुभयोर्महानर्थविनिश्चयोऽभूत्, शिक्षाव्रततत्त्वादीनां निर्णयोऽभूत् ॥ ८८ ॥

तोसिया परिसा सव्वा, सम्मग्गं समुवट्ठिया ।
संथुया ते पसीयंतु, भगवं केसिगोयम ॥ ८९ ॥ त्तिबेमि ॥

तदा सर्वा परिषत् सदेवमनुजासुरसभा तोषिता-प्रीणिता, सम्यग्मार्गे समुपस्थिता-सावधाना जाता । तौ भगवन्तौ-ज्ञानवन्तौ केशीगौतमौ परिषदा संस्तुतौ प्रसीदतां-प्रसन्नौ भवतां सतामिति शेषः, इत्यहं ब्रवीमि । इति सुधर्मास्वामी जम्बूस्वामिनं प्राह ॥ ८९ ॥

इति केशिगौतमीयाध्ययनं सम्पूर्णम् ॥ २३ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां केशीगौतमीयमध्ययनं त्रयोविंशतितमं सम्पूर्णम् ॥ २३ ॥

॥ २४ प्रवचनमात्राख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययने परेषां चित्तविप्लुतिः केशिगौतमवद् दुरीकर्तव्या, तद्दूरीकरणं सम्यग्वाग्योगेन स्यात्, वाग्योगो हि अष्टप्रवचनमातृस्वरूपः, अतोऽष्टप्रवचनमातृस्वरूपं चतुर्विंशतितमेऽध्ययने कथ्यते-सूत्रम्—

अट्ठ पवयणमायाओ, समिई गुत्ती तहेव य ।
पंचेव य समिईओ, तओ गुत्ती उ आहिया ॥ १ ॥

एता अष्टौ प्रवचनमातर आहिता-आख्याताः प्रवचने-सिद्धान्ते मातरश्चारित्रस्य जनन्यः प्रवचनमातरः, साध्वाचारजननात्परिपालनाज्जनन्यस्तीर्थकरैः कथिताः । ता अष्ट प्रवचनमातरः काः ? समितयः कति ? गुप्तयश्च कति ? तयोः समितिगुप्त्योः सङ्ख्या वदति - पञ्चैव, एव-निश्चये पादपूरणे वा, पञ्च समितयस्तिस्रो गुप्तयः, उभयोर्मीलनेऽष्ट-प्रवचनमातर उक्ताः ॥ १ ॥

इरिया भासेसणादाणे, उच्चारे समिई इय ।
मणगुत्ती वयगुत्ती, कायगुत्ती य अट्ठमा ॥ २ ॥

एता पञ्च समितयः, प्रथमेर्यासमितिः, ईरणमीर्या, समितिशब्दस्य प्रत्येकमभि-सम्बन्धः ईर्यायां-गमनागमने सं-सम्यक् प्रकारेण इतिरात्मचेष्टा ईर्यासमितिः, सार्धहस्तत्रया-वलोकनं वा चक्षुषा कृत्वा यत्नेन चङ्क्रमणमीर्यासमितिः १, द्वितीया भाषासमितिः, विचार्य भाषणं भाषासमितिः २, तृतीया एषणासमितिः, शुद्धस्याहारस्य ग्रहणमेषणा-समितिः ३, चतुर्थी आदानसमितिर्वस्त्र-पात्रप्रमुखोपकरणानामादानं-ग्रहणम्, उपलक्षण-त्वान्निक्षेपो मुञ्चनमादाननिक्षेपसमितिः ४ । पञ्चम्युच्चारादीनां व्युत्सर्जनमुच्चार-प्रश्रवण-श्लेष्म-सिङ्घाण-जल्ल-पारिष्ठापनिकासमितिः ५ । तत्रोच्चारं-विष्टा, प्रश्रवणं-मूत्रं, श्लेष्म-मुखजं मलं, सिङ्घाणो-नासिकामलं, जल्लो-देहमलं, एताः पञ्च समितयः । तिस्रो गुप्तयः, प्रथमा मनोगुप्तिः गोपनं गुप्तिर्मनसोऽशुभव्यापारान्निवर्तनं मनोगुप्तिः १ । अथ द्वितीया वचनगुप्तिः, वचनस्याऽशुभव्यापाराद् गोपनं वचनगुप्तिः २ । तृतीया कायगुप्तिः, कायस्याऽशुभकर्मणो गोपनं-निवर्तनं कायगुप्तिः ३ । एवं पञ्चसमितीनां तिसृणां गुप्तीनां च मीलनादष्टौ प्रवचनमातरो ज्ञेयाः ॥ २ ॥

एया उ अट्ठ समिईओ, समासेण वियाहिया ।
दुवालसंगं जिणक्खायं, मायं जत्थ उ पवयणं ॥ ३ ॥

एतास्तु समासेन-सङ्क्षेपेणाष्टौ समितयो व्याख्याताः, विस्तरत्वेन चेद्वर्ण्यते तर्हि पञ्च समितय उच्यन्ते, तिस्रो गुप्तयश्चोच्यन्ते । समासेन-सङ्क्षेपेण चेदुच्यते, तर्ह्यष्टावपि समितय

उच्यन्ते । तस्मादेतासामष्टानामपि समितिसंज्ञोच्यते । यत्तु पूर्वं पञ्चानां समितिसंज्ञा, तिसृणां च गुप्तिसंज्ञा, तत्कथञ्चिद्भेदख्यापनार्थम् । यत्र यास्वष्टासु मातृषु द्वादशाङ्गं जिनाख्यातं प्रवचनं श्रुतं चारित्रं वा 'मायं' इति मातम्, सम्पूर्णत्वेन संस्थितम् । यतो हि सर्वा एता अष्टावपि चारित्ररूपाः, चारित्रं हि ज्ञानदर्शनं विना न भवति, ज्ञानदर्शनचारित्रेभ्योऽतिरिक्तं द्वादशाङ्गं न भवति । तस्माद् द्वादशाङ्गयष्टासु मातृषु स्थिता, तेनैतासां प्रवचनजननी संज्ञा ॥ ३ ॥

प्रथममीर्यासमितिस्वरूपमाह-

आलंबणेण १ कालेण २, मग्गेण ३ जयणाइ ४ य ।
चउकारणपरिसुद्धं, संजए इरियं रिए ॥ ४ ॥

संयतः साधुरेभिश्चतुर्भिः कारणैः परिशुद्ध्या निर्दोषया ईर्याया - निर्दोषया गत्या रीयेत-गच्छेत्, प्राकृतत्वात् तृतीयास्थाने प्रथमा । तानि चत्वारि कारणानि कानि ? आलम्ब्यते निश्चलः क्रियते मनो येनेत्यालम्बनं, तेनालम्बनेन १, पुनर्द्वितीयं कारणं काल ईर्यायाः समयस्तेन कालेन २, पुनस्तृतीयं कारणं मार्गः पन्था, तेन विहारयोग्यमार्गेण ३, पुनश्चतुर्थं कारणं यतना यतनं, यतना-जीवदया, तया यतनया ४, एवं चतुर्भिः कारणैः शुद्ध्या गत्या साधुना गन्तव्यमिति भावः ॥ ४ ॥

पूर्वं चतुर्णां कारणानां नामान्युक्त्वाथ विस्तरेण वर्णयति-

तत्थ आलंबणं नाणं, दंसणं चरण तहा ।
काले य दिवसे वुत्ते, मग्गे उप्पहवज्जिए ॥ ५ ॥

तत्र चतुष्षु कारणेष्वालम्बनं, यदालम्बनं गमनमनुज्ञायते तदालम्बनम् । यतो ह्यालम्बनं विना निरर्थकं गुरुभिर्गमनमनुज्ञातं नास्ति, तदालम्बनं ज्ञानं सूत्रं अर्थं तदुभयं सूत्रार्थज्ञानं सिद्धान्तपठनपाठनम् । ततो दर्शनं-सम्यक्त्वं तत्त्वरुचिरूपम्, तस्य ग्रहणं ग्राहणं वा, तदपि कारणम्, पश्चाच्चरणं-चारित्रं, अत्र चारित्रशब्देन सामायिकादिकम् ।

[1]सामाइयं समईयं, सम्मावाओ समास संखेवो ।
अणवज्जं च परिण्णा, पच्चक्खाणे य ते अट्ठ ॥ १ ॥

[आवश्यक निर्युक्तिः ८६४] इत्याद्यपि कारणम् । यतो हि ज्ञानार्थं दर्शनार्थं चारित्रार्थम्, एवं द्वयोरर्थम्, एवं पृथक् पृथक्, एवं त्रयाणामप्यर्थम्, एवमष्टादश भेदा भवन्ति । च पुनः काल ईर्यायाः समयो दिवस एवोक्तः, न तु रात्रिरीर्यायाः समयोऽस्ति । रात्रौ हि विहारं कुर्वतः साधोरीर्याशुद्धिर्न स्यादित्यर्थः । मार्गस्तूत्पथवर्जनमुन्मार्गस्य त्यागः, उन्मार्गे चलमानस्यात्मनः संयमस्य विराधना स्यात् ॥ ५ ॥

---

१ सामायिकं समयिकं, सम्यग्वादः समासः संक्षेपः । अनवद्यं च प्रतिज्ञा, प्रत्याख्यानश्च ते अष्टौ ॥ १ ॥

दव्वओ खित्तओ चेव, कालओ भावओ तहा ।
जयणा चउव्विहा वुत्ता, तं मे कित्तयओ सुण ॥ ६ ॥

तीर्थङ्करैरित्यध्याहारः, तीर्थङ्करैर्गणधरैश्चतुर्विधा यतनोक्ता, तां चतुर्विधां यतनां 'मे' मम कथयतस्त्वं शृणु-भो शिष्य ! तदेव चतुर्विधत्वमाह-द्रव्यतो यतना, च पुनः क्षेत्रतो यतना, कालतो यतना, तथा भावतो यतना ॥ ६ ॥

अथ द्रव्यतः कथं यतना ? तमाह-

दव्वओ चक्खुसा पेहे, जुगमित्तं च खित्तओ ।
कालओ जाव रीएज्जा, उवउत्ते य भावओ ॥ ७ ॥

द्रव्यतो द्रव्यमाश्रित्यैवं यतना, यच्चक्षुषा जीवादिद्रव्यं विलोकयेत् । क्षेत्रतः खेत्रमाश्रित्य युगमात्रं चतुर्हस्तप्रमाणं क्षेत्रं मार्गं प्रेक्षेत-विलोकयेत्, इयं क्षेत्रतो यतना । कालतः - कालमाश्रित्येयं यतना यावत्कालं-यावत्कालप्रमाणेन रीयते-गमनं विधीयते, सा च कालयतना । यः साधुरुपयुक्तस्तत्रेर्यायां सावधानः स्यात् सा भावतो यतना ज्ञेया ॥७॥

अथोपयुक्तत्वमेव विस्तरेण वर्णयति-

इंदियत्थे विवज्जित्ता, सज्झायं चेव पंचहा ।
तम्मुत्ती तप्पुरक्कारे, उवउत्ते इरियं रिये ॥ ८ ॥

साधुरुपयुक्तः सन् ईर्यायां साधुयोग्यायां गतौ रीयेद्-व्रजेत् । किं कृत्वा ? पञ्चेन्द्रियार्थान् पञ्चानामिन्द्रियाणामर्थान्-विषयान् विवर्ज्य, च पुनर्वाचनादिभेदतः पञ्चप्रकारं स्वाध्यायं विवर्ज्य, पुनः साधुः कीदृशः सन्नीर्यायां रीयेत् ? तन्मूर्त्तिः सन्, तस्यामीर्यासमितौ मूर्त्तिः - शरीरं यस्य स तन्मूर्त्तिः, न तु यतस्ततः शरीरं धूनयन् गच्छेत्, कायचापल्यरहित इति भावः । पुनः कीदृशः साधुः ? तत्पुरस्कारः, तामेव पुरस्करोतीति तत्पुरस्कारः, तामीर्यासमितिं प्राधान्येनाङ्गीकुरुते इत्यर्थः । अनेन कायमनसोस्तत्परतोक्ता, एवमुपयुक्तः-सावधानो विचरेदित्यर्थः ॥ ८ ॥

अथ द्वाभ्यां गाथाभ्यां भाषासमितिमाह-

कोहे माणे य माया य, लोभे य उवउत्तया ।
हासे भये मोहरिए, विगहासु तहेव य ॥ ९ ॥

एयाइं अट्ठठाणाइं, परिवज्जित्तु संजए ।
असावज्जं मिअं काले, भासं भासिज्ज पन्नवं ॥ १० ॥

'पन्नवं' इति प्रज्ञावान् संयतः काले-प्रस्तावे भाषायाः समयेऽसावद्यां-निष्पापां,

तथा मितां-स्वल्पां भाषां भाषेत । किं कृत्वा ? एतान्यष्टौ स्थानान्युपयुक्ततयेकाग्रत्वेन परित्यज्य-त्यक्त्वा । एतान्यष्ट स्थानानि कानि ? क्रोधो १, मानो २, माया ३, लोभश्च ४, हास्य ५, भयं ६, मौखरिका ७, विद्चेष्टा असम्बद्धवचनभाषणं वा, विकथां ८ च राज्यादि-चतुर्विधाम् । एतान्यष्टावसत्यवाक्यस्थानानि । तस्मात्प्रत्येकं क्रोधे माने मायायां लोभे च हास्ये भये मौखरिकायां तथैव विकथासु च मृषादिरूपमसद्वाग्योगं परिहृत्याऽसावद्यां - निर्दोषां, परिमितां प्रस्तावे भाषां वदेदित्यर्थः ॥ ९ ॥ १० ॥

अथैषणासमितिमाह -

गवेसणा य गहणे य, परिभोगेसणा य जा ।
आहारोवहिसिज्झाए, एए तिन्नि विसोहिए ॥ ११ ॥

गवेषणायामेषणा गवेषणैषणा, गौरिवैषणा गवैषणा, विशुद्धाहारदर्शन विचारणा प्रथमैषणा १, द्वितीया ग्रहणैषणा, विशुद्धाहारस्य ग्रहणं ग्रहणैषणा २, तृतीया परिभोगैषणा, परि-समन्ताद् भुज्यते आहारादिकमस्मिन्निति परिभोगो मण्डलीभोजनसमयः, तत्रैषणा विचारणा परिभोगैषणा ३, एतास्तिस्रोऽप्येषणा आहारोपधिशय्यासु विशोधयेत्, केवल-माहारे एवैता एषणा न भवेयुः, किन्तु आहारे, उपधौ-वस्त्रपात्रादौ, शय्या-उपाश्रयः संस्तार-कादिश्च, तत्र सर्वत्रैषणा विधेयेत्यर्थः ॥ ११ ॥

उग्गमुप्पायणं पढमे, बिइए सोहिज्ज एसणं ।
परिभोगंमि चउक्कं च, विसोहिज्ज जयं जइ ॥ १२ ॥

'जयं' इति यत्नावान् 'जइ' इति यतिः-साधुः प्रथमे इति प्रथमायां गवैषणैषणाया-मुद्गमोत्पादनान् दोषान् विशोधयेद्विशेषेण विचारयेत् । पुनः साधुर्द्वितीयायां ग्रहणैषणायां शङ्कितादिदोषान् विचारयेत् । पुनस्तृतीयायां परिभोगैषणायां चतुष्कं दोषचतुष्टयं विशोधयेत् ॥ १२ ॥ इति गाथार्थः ।

अत्र प्रथमायां गवैषणैषणायां द्वात्रिंशद्दोषा भवन्ति । तद्यथा-प्रथमं षोडशोद्गम-दोषाः, उद्गमशब्देनाधाकर्मकादिषोडशदोषाः, एते दोषा गृहस्थादेवोत्पद्यन्ते । तथा गवैषणै-षणायामेव षोडशोत्पादनादिदोषा भवन्ति । उत्पाद्यन्ते साधुना ये ते उत्पादनाः, साधोः सकाशादेव षोडश दोषा उत्पद्यन्ते, ते च धात्रीप्रमुखाः, एवं द्वात्रिंशद्दोषाः । द्वितीयाया-मेषणायां ग्रहणैषणायां शङ्कितादिदशदोषा उभयतो दायकाद् ग्राहकाच्च भवन्ति, एवं द्विचत्वारिंशद्दोषा भवन्ति । तत्र प्रथम आधकर्मिकः, अर्धकर्मणि भव आर्धकर्मिकः, यदाहारं गृहस्थेन सर्वान् दर्शिनः, सर्वान् लिङ्गिन उद्दिश्य कृतमार्धकर्मिकमुच्यते १ । साधुयोगे सति यदुद्दिश्य कृत्वा दीयते तदुद्देशिकमुच्यते अयं द्वितीयो दोषः २ । बहुतरे विशुद्धे आहारे आर्धकर्मिकाहारकरणैर्युक्तं भवति, तदा पूतिकर्मदोषः, यथा शुचिः पयोधरोऽप्येकेन

मद्यबिन्दुजाऽशुचिः स्यात्, तथा पूतिकर्मणा विशुद्धाहारमप्यार्धकर्मिकयोगात्पूतिकं स्यात् अयं तृतीयो दोषः ३ । अथ चतुर्थो मिश्रकर्मदोषः, किञ्चित्साधुनिमित्तम्, किञ्चिदात्मार्थं गृहस्थो यदाहारं कारयति तदा मिश्रितदोष उत्पद्यते ४ । अथ पञ्चमं स्थापनाकर्म, स्थाप्यते साधुनिमित्तमिति स्थापना, यदा साधुरायास्यति तदा साधवे दास्यामीति विचार्य यदाहारं रक्षितं, तदाहारं स्थापनाकर्मदोषयुक्तं स्यात् ५ । अथ षष्ठो दोषः प्राभृतिकः, गृहस्थः स्वगृहे उत्सवं ज्ञात्वा सङ्खडिकस्य परावृत्तिं करोति स प्राभृतिको दोषः ६ । अन्धकारे उद्योतं कृत्वा मुनये आहारं यदा दीयते तदा प्रादुष्करणदोषः सप्तमः ७ । यदा गृहस्थो मौल्येनानीय साधवे ददाति तदा क्रीताख्यो दोषश्चाष्टमो ज्ञेयः ८ । यदा गृहस्थः साधुनिमित्तमुद्धारकमानीयाहारादिकं ददाति, तदा नवमः प्रामित्यदोषः ९ । यदाहारादिकं परावृत्य सरसनीरसयोः परावर्तनं कृत्वा साधवे ददाति तदा दशमः परावर्तदोषो भवति १० । यदा स्वगृहाद्बहिर्ग्रामाऽहारादिकं मुनिसन्मुखमानीय मुनये दीयते, तदाऽभ्याहृतो दोष एकादशः स्यात् ११ । यदा कोष्टकादौ-गर्भगृहादौ मुद्रितमुद्घाट्याहारादिकं निष्कास्य दीयते तदोद्भिन्नदोषो द्वादशः स्यात् १२ । यदोच्चस्थानादुत्तार्यानीयाहारादि ददाति तदा मालापहृतस्त्रयोदशो दोषः स्यात्, एवं नीचैरपि दुःखीभूय ददाति, तदापि स एव मालापहृतो दोषः स्यात् १३ । यदा कस्माच्चिन्निर्बलादुद्दाल्याहारादिकं ददाति, तदाच्छेद्यश्चतुर्दशो दोषः १४ । यदा द्वित्राणां पुरुषाणां साधारणे आहारे एकोऽन्याननापृच्छ्य साधवे ददाति, तदा पञ्चदशोऽनिसृष्टो दोषः १५ । यदा स्वनिमित्तमाहारे राध्यमाने साधुनिमित्तमपि तस्मिन्नाहारेऽधिकं हण्डिकायां पूर्यते तदाऽध्यवपूरो दोषः षोडशः १६ । एते षोडशोद्गमदोषाः, एते दायकाद्दोषा उत्पद्यन्ते ।

अथाऽनगारात् षोडश दोषा उत्पद्यन्ते ते चोत्पादनदोषा अमी—प्रथमो धात्रीदोषः, यदा साधुर्गृहस्थस्य बालकान् चिपिटिकादिभिः क्रीडयित्वा धात्रीवत्प्रमोदमुत्पाद्याहारं गृह्णाति, तदा प्रथमो धात्रीदोषः १ । यदा गृहस्थगृहे गुप्तप्रकटसमाचारान् स्वजनादीनां कथयित्वाऽऽहारं गृह्णाति तदा दूतकर्माख्यो द्वितीयो दोषः २ । यदा लाभालाभजीवितमृत्युसुखदुःखादिनिमित्तं त्रिकालस्थं गृहस्थाग्रे उक्त्वाऽहारं गृह्णाति तदा निमित्तदोषस्तृतीयः ३ । यदा गृहस्थस्य ज्ञातिं कुलं ज्ञात्वाऽऽत्मीयमपि साधुस्तमेव ज्ञातिं, तदेव कुलं च प्रकाश्याहारं गृह्णाति तदाऽऽजीविकादोषश्चतुर्थः ४ । यदा स्वकीयं दीनत्वं दयालुत्वं गृहस्थाग्रे प्रकटीकृत्याहारादिकं गृह्णाति तदा वनीपको दोषः पञ्चमः ५ । यदा वैद्यवन्नाडिकां दृष्ट्वा वमनविरेचनाजीर्णज्वरादीनां भेषजमुपदिश्य वैद्यकं कृत्वाऽऽहारं गृह्णाति तदा चिकित्सादोषः ६ । यदा गृहस्थं भापयित्वा, शापं दत्वाऽऽहारं गृह्णाति तदा क्रोधपिण्डः सप्तमो दोषः ७ । यदा साधुनां समक्षं पणं कृत्वा, तदाहं लब्धिमान् यदा भवतां सरसमाहारममुकगृहादानीय ददामि, इत्युक्त्वा गृहस्थं विडम्ब्य गृह्णाति तदाऽष्टमो मानपिण्डदोषः ८ । यदा मायां कृत्वा लोभाद्वेषं परावृत्याहारं गृह्णाति तदा मायापिण्डो नवमो दोषः ९ । यदा लोभेन सरसाहारलौल्येन भ्रान्त्वा भ्रान्त्वाऽऽहारं गृह्णाति तदा लोभपिण्डो दशमो दोषः १० । यदा पूर्वं पश्चाद्वा

गृहस्थस्य स्तुतिं विधत्ते, आहारं च गृह्णाति तदा संस्तवदोष एकादशः ११ । यदा विद्यया सुरं साधयित्वा भोजनं साधयति, तदा विद्यापिण्डो द्वादशो दोषः, अथवा विद्यां पाठयित्वा ग्रन्थमध्याप्य भोजनादिकं गृहस्थाद् गृह्णाति, तदा विद्यापिण्डो द्वादशो दोषः १२ । यदा कार्मणं-मोहनं यन्त्रमन्त्रं साधयित्वा कृत्वा दत्वाऽऽहारादिकं गृह्णाति तदा मन्त्रदोषस्त्रयोदशः १३ । यदा अदृश्यीकरणाद्यं जनमोहनचूर्णयोगेनाहारं गृह्णाति तदा चतुर्दशश्चूर्णयोगो दोषः १४ । यदा मुग्धलोकान् सौभाग्यादिविलेपनराजवशीकरणादितिलकेन जलस्थलमार्गोल्लङ्घन-सुभगदुर्भगविधिमुपदिश्याहारं गृह्णाति, तदा योगपिण्डदोषः पञ्चदशः १५ । यदा पुत्रादि-जन्मदूषणनिवारणार्थं मघाज्येष्ठाश्लेषामूलादिनक्षत्रशान्त्यर्थं मूलैः स्नानमुपदिश्याहारादिकं गृह्णाति, तदा षोडशो मूलकर्मदोषः १६ । एवमुद्गमोत्पादनादिदोषाः, सर्वेऽपि गवैषणायां द्वात्रिंशद्दोषा भवन्ति, ३२ ।

अथ द्वितीयायां ग्रहणैषणायां दश दोषाः कथ्यन्ते-यदा दायकः शङ्कां कुर्वन् ददाति, साधुरपि जानात्यसौ दायकः शङ्कां करोति, एवं सत्याहारं गृह्णाति, तदा प्रथमं शङ्कितो दोषः १ । द्वितीयो म्रक्षितो दोषः, स द्विविधः, सचित्तेन खरण्टित आहारःअचित्तेन खरण्टि-तश्चाहारो भवति, तदा म्रक्षितदोष उच्यते २ । यदा पृथिव्यां जलेऽग्नौ वनस्पतिमध्ये त्रसजीवानां मध्ये निक्षिप्तमाहारं ददाति, निक्षिप्तस्तृतीयो दोषः ३ । यदाऽचित्तमाहारमपि सचित्तेनाच्छादितं स्यात्तदा पिहितदोषश्चतुर्थः । पिहितदोषस्य चतुर्भङ्गी यथा—सचित्तमाहारं सचित्तेन पिहितं १ । अचित्तमाहारमचित्तेन पिहितं २ । अचित्तमाहारं सचित्तेन पिहितं ३ । सचित्तमाहारमचित्तेन पिहितं ४ । एवं चतुर्भङ्ग्यामचित्ताहारमचित्तेन पिहितमत्र कोऽपि न दोषः ४ । यदा बृहद्भाजने स्थितमाहारं तत्रस्थभाजनेन दातुमशक्यत्वेन तद्भाजने स्थितमपर-त्रोत्तार्य, अथवा तस्माद्भाजनादपरस्मिन् भाजने उत्तार्याहारं ददाति स संहृतदोषः पञ्चमः ५ । यदा असमर्थः पण्डकः शिशुः स्थविरोऽन्ध उन्मत्तो मत्तो ज्वरपीडितः कम्पमानशरीरो निगडबद्धो हडे क्षिप्तो गलितहस्तश्छिन्नपादः, एतादृशो वा दाता ददाति तदा दायकदोषः, पुनर्यदा कश्चिद्दायिका दायको वाऽग्निं प्रज्वालयन्, अरहट्टकं भ्रामयन्, घरट्टके चान्नपीषणं कुर्वन्, मुशलेन खण्डयन्, शिलायां लोष्टकेन वर्तयन्, चरख्यां कार्पासादिकं लोढयन्, रुतं वा पिञ्जयन्, सूर्पकेण धान्यामाच्छोटयन्, फलादिकं विदारयन्, प्रमार्जनेन रजः प्रमार्जयन्, इत्याद्यारम्भं कुर्वन्, तथा भोजनं, स्त्री च या सम्पूर्णगर्भा स्थिता भवति, पुनर्या च स्त्री बालं प्रति स्तन्यं पाययन्ती, पुनस्तं बालं रुदन्तं मुक्त्वाऽऽहारदानायोत्तिष्ठति, पुनर्यः षट्कायसम्मर्दनं सङ्घट्टनं वा कुर्वन् साधुं दृष्ट्वा हण्डिकोपरिस्थमग्रपिण्डमुत्तारयति, इत्यादयो बहवो दायकदोषाः इति षष्ठो दायकदोषो ६ । यदाऽनाभोगेनाऽविचार्यैव शुद्धा-शुद्धमाहारं सम्मील्य ददाति, तदा सप्तम उन्मिश्रितदोषः ७ । यदा द्रव्येणाऽपरिणतमाहारं, भावेनोभयोः पुरुषयोराहारं वर्तते, तन्मध्ये एकस्य साधवे दातुं मनोऽस्ति, एकस्य च नास्ति, तदाहारमपरिणतदोषयुक्तं स्यात्, इत्यपरिणतदोषश्चाष्टमः ८ । सदा दधिदुग्धक्षैरेय्यादिद्रव्यं,

येन द्रव्येण दर्वी करो वा लिप्तः स्यात्तदा पश्चात्कर्मत्वे लिप्तपिण्डो नवमो दोषः स्यात् ९ । यदा सिक्थानि घृतदधिदुग्धादिबिन्दून् पातयन्नाहारं ददाति, तथा छर्दितो दशमो दोषः स्यात् १० । इति ग्रहणैषणायां दायकग्राहकयोरन्योन्यं दोषसम्भवः । एवं सर्वमीलने द्विचत्वारिंशद्दोषा भवन्ति ।

अथ परिभोगैषणायां-ग्रासैषणायां पञ्च दोषाः सम्भवन्ति । तद्यथा-क्षीरखण्डघृतादि-द्रव्यं सम्मील्य रसलौल्येन भुङ्क्ते तदा संयोजनादोषः प्रथमः १ । यावत्प्रमाणः सिद्धान्ते पुरुषस्याहार उक्तोऽस्ति तस्मादाहारप्रमाणात्स्वादलोभेनाधिकमाहारं यदा करोति, तदाऽ-प्रमाणो द्वितीयो दोषः २ । यदा सरसाहारं कुर्वन् धनवन्तं दातारं वर्णयति तदेङ्गालदोषस्तृतीयः ३ । विरसमाहारं कुर्वन् दरिद्रं कृपणं वा निन्दति, तदा चतुर्थो धूमदोषः ४ । यदा तपः-स्वाध्यायवैयावृत्त्यादिकारणषट्कं विना बलवीर्यार्थाद्यर्थं सरसाहारं करोति तदा पञ्चमोऽकारण दोषः ५ एते पञ्च दोषाः परिभोगैषणाया ज्ञेयाः । एवं सर्वे सप्तचत्वारिंशद्दोषा भवन्ति । परिभौगेषणायां चतुष्कं दोषचतुष्टयं सूत्रे उक्तम्, तत्त्विंगालधूमयोर्मोहनीयकर्मोदयादेव दायकस्य प्रशंसातो निन्दातश्च प्रादुर्भावादेकत्वमेवाङ्गीकृतं, तस्माच्चत्वार एव दोषा गृहीताः । एवं षट्चत्वारिंशद्दोषा भवन्ति । अथवा परिभोगैषणायां परिभोगसमये आसेवनासमये पिण्ड १, शय्या २, वस्त्र ३, पात्रं ४, चैतच्चतुष्कं विशोधयेत्, अयमप्यर्थो विद्यते, इत्यनेन 'उग्गमुप्पायणं पढमे' इति गाथाया अर्थः ॥ १२ ॥ इत्येषणासमितिः ।

अथ चतुर्थीं समितिं प्राह -

ओहोवहोवग्गहियं, भंडगं दुविहं मुणी ।
गिण्हंतो निक्खिवंतो य, पउंजिज्ज इमं विहिं ॥ १३ ॥

ओघोपधिकं सामुदायिकम्, उपग्राहिकौपधिकं, उपगृह्यते वारंवारं यत्नार्थमित्युप-ग्राहिकं रजोहरणपोतिकादिकम् । अत्रोपधिशब्दस्य प्रत्येकं प्रयोगः । एवं भाण्डमुपकरणं द्विविधं भवति, रजोहरणदण्डकादिकं द्विप्रकारं वर्तते, मुनिस्तं द्विविधमपि भाण्डं गृह्णन्, च पुनर्निक्षिपन् मुञ्चन्निमं विधिं प्रयुञ्जीत ॥ १३ ॥

तं विधिं प्राह-

चक्खुसा पडिलेहित्ता, पमज्जिज्ज जयं जयी ।
आइए निक्खिविज्जा वा, दुहओ विसमिओ सया ॥ १४ ॥

यत्नावान् यतिर्यत्नया चक्षुषा प्रतिलेख्य प्रमार्जयित्वा सदा समितः सन्नादाननिक्षे-पणासमितियुक्तः सन् अथवा द्रव्यभावभेदेन समितः - समितियुक्तः सन् द्विविधमप्युपधि-मोघिकमथोपग्राहिकं गृह्णीताऽऽददीत, वाऽथवा मुञ्चन्निक्षिपेत् ॥ १४ ॥

अथ पञ्चमीं समितिं प्राह-

उच्चारं पासवणं, खेलं सिंघाणजल्लियं ।
आहारं उवहिं देहं, अन्नं वावि तहाविहं ॥ १५ ॥

अणावायमसंलोए, अणावाए चेव होइ संलोए ।
आवायमसंलोए, आवाए चेव संलोए ॥ १६ ॥

अणावायमसंलोए, परस्सऽणुवघाइए ।
समे अज्झूसिरे यावि, अचिरकालकयंमि य ॥ १७ ॥

विच्छिन्ने दूरमोगाढे, नासन्ने बिलवज्जिए ।
तसपाणबीयरहिए, उच्चाराईणि वोसिरे ॥ १८ ॥

चतसृभिः कलापकम् ॥

साधुरुच्चारादीन्येतादृशे स्थण्डिले व्युत्सृजेत्-परिष्ठापयेदिति चतुर्थ्या गाथया सम्बन्धः । तानि कानि ? उच्चारादीनि, उच्चारं पुरीषम्, प्रश्रवणं मूत्रं, खेलं कफः, सिङ्घाणं श्लेष्म, जल्लकं शरीरमलं, आहारमन्नादिकं, उपधिं जीर्णवस्त्रादिकं, देहं शरीरं, अन्यत्तथाविधपरिष्ठापनायोग्यं, भेषजाद्यर्थमानीतं गोमूत्रादिकं, एतत्प्रासुके स्थण्डिले परिष्ठापयेत् ॥ १५ ॥ पूर्वं स्थण्डिलस्य चतुर्भङ्गीमाह–अनापातेऽसंलोके, न विद्यते आपातः स्वपक्षीयपरपक्षीयाणामापातो गमनागमनं यत्र तदनापातम्, पुनर्यदसंलोकं भवति, न विद्यते लोकानां संलोको-दूराद् दृष्टिप्रचारो यत्र तदसंलोकम् । कोऽर्थः ? यत्र स्थण्डिले प्रायो गृहस्थः कोऽपि नायाति, यत्र च स्थण्डिले प्रायो दूराद् गृहस्थानां दृष्टिप्रचारो न स्यात्, तत्र स्थण्डिले इत्यर्थः, इति प्रथमो भङ्गः १ । पुनर्यत्स्थण्डिलमनापातं भवति, परं संलोकं भवति, लोकानामुपागमनरहितं भवति, अथ च लोकानां दूरात्संलोकसहितं-दृष्टिप्रचारसहितं भवतीति द्वितीयो भङ्गः २ । पुनर्यत्स्थण्डिलं लोकानामापातसहितमुपागमनसहितं भवति, अथ च दूराल्लोकानां संलोकरहितं [1]दृक्प्रचाररहितं भवति, अयं तृतीयो भङ्गः ३ । पुनर्यत्स्थण्डिलमापातं लोकानामुपागमनसहितं भवति, अथ च संलोकं दूराल्लोकानां दृष्टिप्रचारसहितमपि भवति, अयं चतुर्थो भङ्गः ४ ॥ १६ ॥

'अणावायेति' तत्र चतुष्षु भेदेष्वनापातेऽसंलोके स्थण्डिले उच्चारादीनि व्युत्सृजेत् । कथंभूते स्थण्डिले ? दशविधविशेषणविशिष्टे, तानि दशविशेषणान्याह—कथंभूते स्थण्डिले ? परस्याऽनुपघातके, यत्रान्यस्योपघातो न स्यात्, संयमस्यात्मनः प्रवचनस्य बाधारहिते - हीलारहिते १ । पुनः कीदृशे ? समे निम्नोन्नतत्वादिरहिते २ । पुनः कीदृशे ? 'अज्झूसिरे अपि' अज्जूसिरे इति घासवृक्षपत्रकाष्ठादिभिरव्याप्ते, तत्र हि परिष्ठापिते

१ दृष्टिप्रचारं-L. ॥

जन्तूनामुत्पत्तिः स्यात् ३ । पुनः कीदृशे ? अचिरकालकृते, अग्न्यादिना स्तोकेन कालेनाचित्तीकृते ४ ॥ १७ ॥ पुनः कीदृशे ? विच्छिन्ने विस्तीर्णे (जघन्यतोऽपि हस्तप्रमाणे) ५ । पुनः कीदृशे ? दूरं ओगाढे, अधस्ताद्दूरं सचित्ते, उपरिष्टादङ्गुलपञ्चकं यावदचित्ते ६ । पुनः कीदृशे ? न आसन्नेऽनासन्ने, ग्रामाद् दूरवर्तिनि ७ । पुनः कीदृशे ? बिलवर्जिते मूषकसर्पकीटकादिरन्ध्रवर्जिते ८ । पुनः कीदृशे ? त्रसप्राणैर्द्वीन्द्रियादिभी रहिते ९ । पुनः [1]कीदृशे ? बीजैः शालिगोधूमादि-सचित्तधान्यै रहिते १० । एतादृशे दशविधविशेषणैर्विशिष्टे स्थण्डिले पूर्वोक्तानुच्चारादीन् व्युत्सृजेत् सन्त्यजेदिति भावः ॥ १८ ॥

एयाओ पंचसमिईओ, समासेण वियाहिया ।
इत्तो य तिओ गुत्तीओ, वुच्छामि अणुपुव्वसो ॥ १९ ॥

एताः पञ्च समितयः समासेन-सङ्क्षेपेण व्याख्याताः । इतोऽनन्तरं तिस्रो गुप्तीर्मनो-गुप्तिवाग्गुप्तिकायगुप्तीरानुपूर्वीतोऽनुक्रमतो वक्ष्यामि ॥ १९ ॥

सच्चा तहेव मोसा य, सच्चामोसा तहेव य ।
चउत्थी असच्चमोसा य, मणगुत्ती चउव्विहा ॥ २० ॥

मनोगुप्तिश्चतुर्विधा, प्रथमा सत्या मनोगुप्तिः १, तथा द्वितीयाऽसत्या मनोगुप्तिः २, तथैव तृतीया सत्यामृषा मनोगुप्तिः ३, तथा चतुर्थी असत्याऽमृषा मनोगुप्तिः ४ । यत्सत्यं वस्तु मनसि चिन्त्यते, जगति जीवतत्त्वं विद्यते, इत्यादिचिन्तनस्य योगस्तद्रूपा गुप्तिः सत्या मनोगुप्तिः प्रथमा १ । यदसत्यं वस्तु मनसि चिन्त्यते, जीवो नास्तीत्यादीचिन्तनस्य योगस्तद्रूपा गुप्तिरसत्या मनोगुप्तिर्द्वितीया २ । बहूनां नानाजातीयानामाम्रादिवृक्षाणां वनं दृष्ट्वाऽऽम्राणामेव वनमेतद्वर्तते, तत्सत्यं पुनर्मृषायुक्तमेवेत्यादिचिन्तनयोगस्तद्रूपा गुप्तिः सत्यामृषा मनोगुप्तिस्तृतीया, यतोऽत्र काचित्सत्या चिन्तना, काचिन्मृषा चिन्तना, केचित्तत्र वने आम्राः सन्ति तेन सत्या, केचित्तत्र वने धवखदिरपलाशादयो वृक्षा अपि सन्ति तेन मृषाप्यस्ति ३ । चतुर्थी असत्यामृषा या चिन्तना, सत्यापि नास्ति, मृषापि नास्ति, यदादेशनिर्देशादिचिन्तनं, मनसि चिन्त्येत हे देवदत्त ! घटमानय अमुकं वस्तु मह्यमानीय दीयतां, इत्यादिचिन्तना-व्यवहाररूपा, तद्रूपा गुप्तिरसत्यामृषा मनोगुप्तिश्चतुर्थी, यत एषा चिन्तना सत्यापि नास्ति, मृषापि नास्ति, व्यवहारचिन्तनेत्यर्थः ४ ॥ २० ॥

संरंभसमारंभे, आरंभे य तहेव य ।
मणं पवत्तमाणं तु, नियत्तिज्ज जयं जई ॥ २१ ॥

यतिः साधुर्यतनावान् सन् संरम्भसमारम्भे, तथैव चारम्भे प्रवर्तमानं मनो निवर्तयेत् । संरम्भश्च समारम्भश्चानयोः समाहारः संरम्भसमारम्भं तस्मिन् संरम्भसमारम्भे । संरम्भः

१ कथंभूते-L. ॥

सङ्कल्पः, अहं तथा ध्यानं करिष्यामि करोमि वा, यथासौ म्रियते मरिष्यतीत्यादिसङ्कल्पः संरम्भः, तत्र सङ्कल्पे प्रवर्तमानं मनो निवर्तयेत्। तथा समारम्भः परपीडाकरोच्चाटनकीलनादीनिबन्धनं ध्यानम्, तत्रापि प्रवर्तमानं मनो निवारयेत्। तथैव च पुनरारम्भः परप्राणापहारक्षमोऽशुभपरिणामः, तस्मिन् परिणामे प्रवर्तमानं मनो निवर्तयेत् ॥ २१ ॥

अथ वचनयोगं वदति -

[1]संकप्पो संरंभो, परितावकरो भवे समारंभो ।
आरंभो उद्दवओ, सुद्धवयाईण सव्वेसिं ॥ २२ ॥

सर्वेषामशुद्धवचसामेते भेदा भवन्ति । कीदृशास्ते भेदाः ? परितापकराः, के ते भेदाः ? संरम्भः सङ्कल्प इत्याद्यर्थः पूर्ववदेव ॥ २२ ॥

सच्चा तहेव मोसा य, सच्चामोसा तहेव य ।
चउत्थी असच्चमोसा उ, वयगुत्ती चउव्विहा ॥ २३ ॥

वचनगुप्तिश्चतुर्विधा भवति । सत्या सत्यवाक्, तस्या योगः सत्यवाग्योगः, तद्रूपा गुप्तिः सत्या वाग्गुप्तिः १ । एवमसत्याऽसत्यवाक्, तस्या योगोऽसत्यवाग्योगः, तद्रूपा गुप्तिरसत्यवाग्गुप्तिः २ । तथा या सत्या वाग् सती, असत्यया वाचा सह मिलति सा सत्यामृषा वाग्गुप्तिस्तृतीया ३ । पुनश्चतुर्थी असत्यामृषा वाग्गुप्तिः, या सत्यापि नास्ति, मृषापि नास्ति, अर्थाद्व्यवहारवाक् सा चतुर्थीत्यर्थः ४ ॥ २३ ॥

संरंभसमारंभे, आरंभे य तहेव य ।
वयं पवट्टमाणं तु, नियत्तिज्ज जयं जई ॥ २४ ॥

यतिः-साधुः 'जय' इति यतनावान् सन् संरम्भे समारम्भे तथैव चारम्भे प्रवर्तमानं वचो-वचनं निवर्तयेत्। संरम्भः परजीवस्य विनाशनसमर्थं दुष्टविद्यानां गुणनं, समारम्भः परेषां परितापकारकुमन्त्रादीनां मुहुर्मुहुः परावर्तनम्, तथैव चारम्भः परेषां क्लेशोच्चाटनमारणादिमन्त्रजापकरणम्, तत्रापि प्रवर्तमानं वचो निवारयेत् ॥ २४ ॥

इत्यनेन वाग्गुप्तिरेवोक्ता, अथ कायगुप्तिमाह-

ठाणे निसीयणे चेव, तहेव य तुयट्टणे ।
उल्लंघणपल्लंघणे, इंदियाण य जुंजणे ॥ २५ ॥

संरंभे समारंभे, आरंभंमि तहेव य ।
कायं पवत्तमाणं तु, नियत्तिज्ज जयं जई ॥ २६ ॥ युग्मम् ॥

---

१ इयं गाथा अन्यसंस्करणे नास्ति ॥

स्थाने ऊर्द्ध्वस्थितौ, च पुनरेव निश्चयेन निषीदने-उपविशने, तथैव 'तुयट्टणे' त्वग्वर्तने अर्थाच्छयने, तथोल्लङ्घनप्रलङ्घने, उल्लङ्घनं-तथाविधनिमित्तादूर्तादेरुत्क्रमणं तत्र, पुनः प्रलङ्घनं सामान्येन गमनम् तत्र, च पुनरिन्द्रियाणां प्रयुञ्जने श्रोत्र-नेत्र-रसना-नासा-त्वगादीनामिन्द्रियाणां शब्दरूपरसगन्धस्पर्शादिविषयेषु व्यापारणे । तथा संरम्भे मुष्ट्यादिना ताडने, तथा समारम्भे परितापकारिणि लताद्यभिघाते । तथैव च पुनरारम्भे प्राणिवधकरे यष्ट्यादिप्रयोगे कायं प्रवर्तमानं यतिः साधुर्यतनावान् सन् कायं निवर्तयेत्, सर्वत्र शरीरगुप्तिर्विधेयेत्यर्थः ॥ २५ ॥ २६ ॥

एयाओ पंचसमिईओ, चरणस्स य पवत्तणे ।
गुत्ती निअत्तणे वुत्ता, असुभत्थेसु सव्वसो ॥ २७ ॥

एताः पञ्च समितयश्चरणस्य-चारित्रस्य प्रवर्तने उक्ताः, सर्वशः-सर्वप्रकारेणाऽशुभार्थेभ्यो व्यापारेभ्यो निवर्त्तने तिस्रो गुप्तय उक्ताः ॥ २७ ॥

एया पवयणमाया, जे सम्मं आयरे मुणी ।
सो खिप्पं सव्वसंसारा, विप्पमुच्चइ पंडिए ॥ २८ ॥ त्तिबेमि ॥

यो मुनिरेताः प्रवचनमातृः सम्यक् जिनाज्ञयाऽऽचरेत्, स मुनिः क्षिप्रं-शीघ्रं सर्वसंसाराच्चतुर्गतिभ्रमणाद्विशेषेण प्रमुच्यते-प्रकर्षेण मुक्तो भवति । कीदृशो मुनिः ? पण्डितस्तत्त्वज्ञः, स एवाष्टप्रवचनमातृप्रपालकः स्यादिति भावः । इति सुधर्मास्वामी जम्बूस्वामिनं प्राह- हे जम्बू ! तीर्थङ्करवचसा तवाग्रे ब्रवीमि ॥ २८ ॥

इति प्रवचनमातृकं समित्यध्ययनं चतुर्विंशतितमं सम्पूर्णम् ॥ २४ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां समित्यध्ययनं चतुर्विंशतितमं सम्पूर्णम् ॥ २४ ॥

॥ २५ यज्ञीयाख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययने प्रवचनमातर उक्ताः, तास्तु ब्रह्मगुणयुक्तस्य स्युः, तस्माद्ब्रह्मगुण-ज्ञानाय यज्ञीयाध्ययनं कथ्यते-

माहणकुलसंभूओ, आसि विप्पो महाजसो ।
जायाई जमजण्णंमि, जयघोसि त्ति नामओ ॥ १ ॥

वाराणस्यां द्विजौ यमलौ भ्रातरौ जयघोष-विजयघोषावभूताम् । तयोरेको जयघोष-नामा गङ्गायां स्नातुं गतः । क्रूरसर्पमण्डुकग्रासं दृष्ट्वा प्रव्रजितः, तद्वार्तामाह-

'माहणकुलम्मित्ति' ब्राह्मणकुले सम्भूतो-विप्रकुले समुत्पन्नो जयघोष इति नामतो विप्र आसीत् । अत्र हि यद् ब्राह्मणकुलसम्भूतो विप्र आसीदित्युक्तम्, तद् ब्राह्मणजनकादु-त्पन्नोऽपि जननीजातिहीनत्वेऽब्राह्मणः स्यात् अतो विप्र इत्युक्तम् । कीदृशो जयघोषः ? 'जमजन्नंमि' यमयज्ञे यायाजी, यायजीत्येवंशीलो यायाजी, यमा अहिंसासत्याऽस्तेयब्रह्म-निर्लोभाः पञ्च ते एव यज्ञो यमयज्ञस्तस्मिन् यमयज्ञेऽतिशयेन यज्ञकरणशीलः, अर्थात् पञ्चमहाव्रतरूपे यज्ञे याज्ञिको जातो यतिर्जात इत्यर्थः ॥ १ ॥

इंदियग्गामनिग्गाही, मग्गगामी महामुणी ।
गामाणुगामं रीयंतो, पत्तो वाणारसीं पुरीं ॥ २ ॥

स महामुनिरेकाकी साधुर्ग्रामानुग्रामं 'रीयंतो' इति विचरन् वाराणसीं पुरीं प्राप्तः । कीदृशः स महामुनिः ? इन्द्रियग्रामनिग्राही, इन्द्रियाणां ग्रामं-समूहमिन्द्रियपञ्चकं निगृह्णाति मनोजयेन वशीकरोतीतीन्द्रियग्रामनिग्राही, पुनः कीदृशः सः ? मार्गगामी, मार्गं-मोक्षं गच्छति स्वयमन्यांश्च गमयतीति मार्गगामी ॥ २ ॥

वाणारसीए बहिया, उज्जाणंमि मणोरमे ।
फासुए सिज्जसंथारे, तत्थ वासमुवागए ॥ ३ ॥

स साधुर्वाणारस्यां बाह्ये मनोरमे-मनोहरे उद्याने प्रासुके-जीवरहिते शय्यासंस्तारके-दर्भतृणादिरचिते शयनोपवेशनस्थितौ, तत्र 'वासं' इति वसतिं कर्तुमुपागतः ॥ ३ ॥

अह तेणेव कालेणं, पुरीए तत्थ माहणे ।
विजयघोसि त्ति नामेणं, जण्णं जयइ वेयवी ॥ ४ ॥

अथानन्तरं तस्मिन्नेव काले यस्मिन् काले साधुर्वने समागतस्तस्मिन्नेव काले तस्यां वाराणस्यां पुर्यां विजयघोष इति नामा ब्राह्मणो यज्ञं यजति, यज्ञं करोति, कीदृशो विजयघोषः ? वेदविद्वेदज्ञः ॥ ४ ॥

---

१ વારંવાર યજ્ઞ કરવાના સ્વભાવવાળો.

अह से तत्थ अणगारे, मासक्खमणपारणे ।
विजयघोसस्स जन्नंमि, [1]भिक्खस्सट्ठा उवट्ठिए ॥ ५ ॥

अथानन्तरं तस्य विजयघोषस्य यज्ञे स पूर्वोक्तो जयघोषोऽनगारो मासक्षमणस्य पारणे भिक्षाया अर्थं-भिक्षायै उपस्थितः ॥ ५ ॥

समुवट्ठियं तहिं संतं, जायगो पडिसेहई ।
न हु दाहामि ते भिक्खं, भिक्खू जायाहि अण्णओ ॥ ६ ॥

तदा याजको-यजमानो विजयघोषो ब्राह्मणस्तत्र भिक्षार्थं समुपस्थितं सन्तं तं साधुं प्रतिषेधयति-निवारयति । कथं निवारयतीत्याह-हे भिक्षो ! त्वमन्यतोऽन्यत्र याहि, 'ते' तुभ्यं भिक्षां न ददामि ॥ ६ ॥

जे य वेयविउ विप्पा, जण्णट्ठा य जे दिया ।
जोइसंगविऊ जे य, जे य धम्माण पारगा ॥ ७ ॥

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
तेसिं अन्नमिणं देयं, भो भिक्खू सव्वकामियं ॥ ८ ॥ युग्मम् ॥

विजयघोषो वदति-हे भिक्षो ! अस्मिन् यज्ञे इदं प्रत्यक्षं दृश्यमाणमन्नं सर्वकामिकं षड्रससिद्धं तेषां पात्राणां देयं वर्तते, तेभ्यो देयमस्ति, न तु तुभ्यं देयं वर्तते । तेषां केषां ? ये आत्मानं स्वकीयमात्मानं, च पुनः परं परस्यात्मानं समुद्धर्तुं समर्थाः, ये संसारसमुद्रादात्मानं तारयितुं समर्थाः, परमपि तारयितुं समर्थास्तेषां प्रदेयमस्तीति भावः । पुनः केषां प्रदेयमन्नं वर्तते ? ये विप्रा वेदविदो वेदज्ञास्तेषां, पुनर्ये यज्ञार्थाः, यज्ञ एवार्थः-प्रयोजनं येषां ते यज्ञार्थास्तेषाम्, पुनर्ये जितेन्द्रिया-इन्द्रियाणां जेतारस्तेषां, पुनर्ये ज्योतिषामङ्गविदः, ज्योतिःशास्त्रस्याङ्गवेत्तारः, यद्यपि ज्योतिःशास्त्रं वेदस्याङ्गमेवास्ति, वेदविद इत्युक्ते आगतम्, तथाप्यत्र ज्योतिःशास्त्रस्य पृथगुपादानं प्राधान्यख्यापनार्थम् । तस्मादेतद्गुण-विशिष्टा ये ब्राह्मणास्तेषां देयमस्ति । पुनर्ये धर्मशास्त्राणां पारगास्तेषां देयमत्रान्नं वर्तते इत्यर्थः ॥ ७-८ ॥

सो तत्थ एवं पडिसिद्धो, जायगेण महामुणी ।
नवि रुट्ठो नवि तुट्ठो, उत्तमट्ठगवेसओ ॥ ९ ॥

स महामुनिर्जयघोषस्तत्र यज्ञे एवममुना प्रकारेण विजयघोषेण याजकेन-यज्ञकारकेण प्रतिषिद्धः सन्-निवारितः सन् नापि रुष्टो नापि तुष्टः समभावयुक्तोऽभूत् । कीदृशः स महामुनिः ? उत्तमार्थगवेषको-मोक्षाभिलाषी ॥ ९ ॥

---

१ भिक्खमट्ठा-अन्यसंस्करणे ॥

नऽन्नट्ठं पाणहेउं वा, नवि निव्वाहणाय वा ।
तेसिं विमोक्खणट्ठाए, इमं वयणमब्बवी ॥ १० ॥

स महामुनिस्तेषां विजयघोषादिब्राह्मणानां विमोक्षणार्थं-कर्मबन्धनान्मुक्तिकरणार्थ-मिदं वचनमब्रवीत्, परमन्नपानलाभार्थं नाब्रवीत् । एवं ज्ञात्वा नाब्रवीद्येनाहमेभ्य उपदेशं ददामि, एते च प्रसन्नीभूय मह्यं सम्यगन्नपानं ददतीति बुद्ध्या नाब्रवीत्, किन्तु तेषां संसारनिस्तारार्थमवदत् । वाऽथवा निर्वाहणायापि न, वस्त्रपात्रादिकानां निर्वाह एभ्यो मम भविष्यतीति नाब्रवीदिति भावः ॥ १० ॥

किं ब्रवीदित्याह -

[1]ण विजाणसि वेयमुहं, णवि जन्नाण जं मुहं ।
नक्खत्ताण मुहं जं च, जं च धम्माण वा मुहं ॥ ११ ॥

भो ब्राह्मण विजयघोष ! त्वं वेदमुखं न विजानासि, पुनर्यद् यज्ञानां मुखं वर्तते तदपि त्वं न जानासि । पुनर्यन्नक्षत्राणां मुखं तदपि त्वं न जानासि । पुनर्यद्धर्माणां मुखं वर्तते तदपि त्वं न जानासि ॥ ११ ॥

पुनः साधुर्विजयघोषं ब्राह्मणं पृच्छति-

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
ण ते तुमं वियाणासि, अह जाणासि तो भण ॥ १२ ॥

हे विजयघोष ! ये परं च पुनरात्मानमेव समुद्धर्तुं-संसारान्निस्तारयितुं समर्थास्तान् स्वपरनिस्तारकांस्त्वं न जानासि, अथ चेत्त्वं जानासि तदा भण - कथय ॥ १२ ॥

तस्सऽक्खेवपमोक्खं च, अवयंतो तहिं दिओ ।
सपरिसो पंजलिउडो, पुच्छई तं महामुणिं ॥ १३ ॥

'तहिं' इति तत्र यज्ञे द्विजो विजयघोषः प्राञ्जलिपुटो-बद्धाञ्जलिः सन् तं महामुनिं पृच्छति, कीदृशो द्विजः ? सपरिषद्बहुभिर्मनुष्यैः सहितः, पुनः स द्विजः कीदृशः सन् ? तस्य साधोराक्षेपं - प्रश्नस्तस्य प्रमोक्षं-प्रतिवचनमुत्तरम्, 'अवयंतो' इति दातुमशक्नुवन्, प्रश्नस्योत्तरं दातुमसमर्थः सन्, दातुमित्यध्याहारः ॥ १३ ॥

वेयाणं च मुहं बूहि, बूहि जन्नाण जं मुहं ।
नक्खत्ताण मुहं बूहि, बूहि धम्माण जं मुहं ॥ १४ ॥

---

१ नवि जाणासि-अन्यसंस्करणे, तत्र वृत्तिः-'नवि' त्ति नैव जानासि । बृहद्वृत्त्यां-पं. ५२४A ।

हे महामुने ! त्वमेव वेदानां मुखं ब्रूहि, पुनर्यद् यज्ञानां मुखं तन्मे ब्रूहि, पुनर्नक्षत्राणां मुखं ब्रूहि, पुनर्धर्माणां यन्मुखं तन्मे ब्रूहि, ॥ १४ ॥

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
एयं मे संसयं सव्वं, साहू कहसु पुच्छिओ ॥ १५ ॥

पुनर्ये पुरुषाः परं च पुनरात्मानमपि संसारादुद्धर्तुं समर्थाः सन्ति, एतद् 'मे' मम संशयविषयं वेदमुखादिकमस्ति, हे साधो ! त्वं मया पृष्टः सन् सर्वं कथयस्व ॥ १५ ॥

इत्युक्ते मुनिराह-

अग्गिहोत्तमुहा वेया, जन्नट्ठी वेयसां मुहं ।
नक्खत्ताण मुहं चंदो, धम्माणं कासवो मुहं ॥ १६ ॥

हे विजयघोष ! वेदा अग्निहोत्रमुखाः, अग्निहोत्रं मुखं येषां तेऽग्निहोत्रमुखाः, वेदानां मुखमग्निहोत्रम्, अग्निहोत्रं ह्यग्निकारिका, सा चेयं ।

"कर्मेन्धनं समाश्रित्य, दृढा सद्भावनाहुतिः ।
धर्मध्यानाग्निना कार्या, दीक्षितेनाग्निकारिका ॥ १ ॥

इत्यादियज्ञविधिविधायिका कारिका गृह्यते । वेदानां यज्ञानामेषैव कारिका मुखं प्रधानम्, अस्याः कारिकाया अर्थः ।

कर्माणीन्धानानि कृत्वा उत्तमभावना आहुतिर्विधेया, धर्मध्यानाग्नौ दीक्षितेनेयमग्निकारिका विधेया । पुनर्हे ब्राह्मण विजयघोष ! यज्ञार्थी पुरुषो वेदसां-यज्ञानां मुखं वर्तते । यज्ञो दशप्रकारधर्मः-

"सत्यं १ तपश्च २ सन्तोषः ३, क्षमा ४ चारित्र ५ मार्जवम् ६ ।
श्रद्धा ७ धृति ८ रहिंसा ९ च, संवरश्च १० तथापरः ॥ १ ॥ [ ]

इतिदशप्रकारः । स चात्र प्रस्तावाद्भावयज्ञः, तं यज्ञमर्थयत्यभिलषतीति यज्ञार्थी, स एव यज्ञानां मुखं वर्तते । नक्षत्राणामष्टाविंशतीनां मुखं चन्द्रो वर्तते । धर्माणां श्रुतधर्माणां चारित्रधर्माणां काश्यप आदीश्वरो मुखं वर्तते, धर्माः सर्वेऽपि तेनैव प्रकाशिता इत्यर्थः ॥ १६ ॥

जहा चंदं गहाईया, चिट्ठंते पंजलिउडा ।
वंदमाणा [१]नमंसंति, उत्तमं महहारिणो ॥ १७ ॥

यथा ग्रहादिका अष्टाशीतिग्रहाः, नक्षत्राण्यष्टाविंशतिप्रमितानि, एवं सर्वे ज्योतिष्का देवाश्चन्द्रं प्राञ्जलिपुटा-बद्धाञ्जलयस्तिष्ठन्ति-सेवन्ते, एवं श्रीऋषभदेवमुत्तमं प्रधानं यथा-

---

१ नमंसंता-अन्यसंस्करणे, तत्र तस्य व्याख्या-'नमस्कुर्वन्तः' इति ॥

स्यात्तथा मनोहारिणस्त्रिभुवनवर्तिनो भव्या वन्दमानाः-स्तवनां कुर्वन्तो नमस्कुर्वन्ति विनये प्रवर्तन्ते इति भावः ॥ १७ ॥

अजाणगा जन्नवाई, विज्जामाहणसंपया ।
मूढा सज्झायतवसा, भासच्छन्ना इवग्गिणो ॥ १८ ॥

हे विजयघोष ! विद्याब्राह्मणसम्पदामजानानाः, पुनर्यज्ञवादिनः, ते च त्वया पात्रत्वेन मन्यन्ते । विद्या आरण्यकब्रह्माण्डपुराणात्मिकाः, ता एव ब्राह्मणसम्पदो विद्याब्राह्मणसम्पदस्तासामज्ञाः सन्तो यज्ञवादिनो वर्तन्ते । चेद् [1]बृहदारण्यकाद्युक्तं यज्ञमेते जानन्ते, तदा कथमेतादृशं यज्ञं कुर्युः ? तस्माद् वृथैव वयं याज्ञिका इत्यभिमानं पुनः कुर्वन्ति, कथंभूताः ? स्वाध्यायतपसा वेदाध्ययनोपवासादिना मूढाः, बहिः संवृतिमन्त आच्छादिततत्वज्ञानाः । एते के इव ? भस्मच्छन्ना अग्नय इव - रक्षाच्छादिता वह्नय इव । इत्यनेन बाह्ये शीतत्वं प्राप्ताः, परं कषायाग्निना मध्ये सन्तप्ता एवेति भावः ॥ १८ ॥

पुनः साधुर्वदति-

जो लोए बंभणो वुत्तो, अग्गीव महिओ जहा ।
सया कुसलसंदिट्ठं, तं वयं बूम माहणं ॥ १९ ॥

हे विजयघोष ! वयं तं ब्राह्मणं बूमः, तं कं ? यो मुनिभिर्ब्राह्मण उक्तः, यत्कैश्चिदन्यैरब्राह्मणोऽपि ब्राह्मणोऽयमित्युक्तस्तं ब्राह्मणं न ब्रूम इति भावः । कथंभूतः सः ? लोके महितः- पूजितः सन् दीप्यते, क इव ? अग्निरिव, यथाग्निः पूजितो घृतादिसिक्तो दीप्यते । कीदृशं तं ब्राह्मणं ? सदा कुशलसंदिष्टं, सदा कुशलैस्तत्त्वाभिज्ञैः संदिष्टं-कथितम् ॥१९॥

अथ कुशलसन्दिष्टस्वरूपं ब्राह्मणमाह-

जो न सज्जइ आगंतुं, पव्वयंतो न सोयई ।
रमइ अज्जवयणंमि, तं वयं बूम माहणं ॥ २० ॥

हे विजयघोष ! तं वयं ब्राह्मणं बूमः । तमिति कं ? य आगन्तुमिति बहुभ्यो दिनेभ्यः प्राप्तं स्वजनादिकं वल्लभं जनं न स्वजति नालिङ्गति । अथवा आगन्तुमिति स्वजनादिस्थानमागत्य स्वजनादिकं न स्वजति । नाभिष्वङ्गं करोति । पुनर्यः प्रव्रजन् स्थानादन्यत्स्थानं-स्थानान्तरं गच्छन्, अर्थाद्विच्छुटन् न शोचते, न शोकं कुरुते । पुनर्य आर्यवचने तीर्थङ्करवाक्ये रमते तं वयं ब्राह्मणं वदामः ॥ २० ॥

---

१ बृहदारण्यकपुराणे तु सत्यादिदशप्रकारधर्ममयो भावयज्ञः प्रोक्तोऽस्ति, पुनः सकलपुराणमुख्ये ब्रह्माण्डपुराणेऽप्युक्तम्, इह हि ईक्ष्वाकुकुलवंशोद्भवेन नाभिसुतेन मरुदेव्या नन्दनेन महादेवेन ऋषभेण दशप्रकारो धर्मः स्वयमेव चीर्णः, केवलज्ञानलम्भाच्च निर्ग्रन्थादि महर्षीणां प्रणीतस्त्रेतायामादावित्यादि । प्रणीतस्त्रेतायामादावित्यादि ।

जायरूवं जहामट्ठं, निद्धंत्तमलपावगं ।
रागदोषभयातीतं, तं वयं बूम माहणं ॥ २१ ॥

हे विजयघोष ! वयं तं ब्राह्मणं ब्रूमः । कीदृशं ? जातरूपं-स्वर्णमिवामृष्टं तेजोवृद्धये मनःशिलादिना परामृष्टं, कृतवर्णिकावर्धनं, अनेन बाह्यगुण उक्तः । यथाशब्द इवार्थे । पुनः कीदृशं तं ? 'निद्धंत्तमलपावगं' नितरामतिशयेन ध्मातं मलं-किट्टं तद्रूपं पातकं यस्य स निर्ध्मातमलपातकस्तम्, अनेन चान्तरो गुण उक्तः । पुनः कथंभूतं ? रागद्वेषभयातीतं, रागः प्रेमरूपः, द्वेषोऽप्रीतिरूपः ताभ्यामतीतो-दूरीभूतस्तं विप्रं वदामः ॥ २१ ॥

तवस्सियं किसं दंतं, अवचियमंससोणियं ।
सुव्वयं पत्तनिव्वाणं, त वयं बूम माहणं ॥ २२ ॥

हे विजयघोष ! वयं तं ब्राह्मणं ब्रूमः । तं कं ? तपस्विनमत एव कृशं दुर्बलम्, पुनः कीदृशं ? दान्तं जितेन्द्रियम्, पुनः कीदृशं ? अपचितमांसशोणितं शोषितमांसरुधिरम्, पुनः कीदृशं ? सुव्रतं-सम्यग्व्रतानां धर्तारम् । पुनः कीदृशं ? प्राप्तनिर्वाणं प्राप्तं कषायाग्निशमनेन निर्वाणं शीतीभावं येन स प्राप्तनिर्वाणस्तं ॥ २२ ॥

तसपाणे वियाणित्ता, संगहेण य थावरे ।
जो न हिंसइ तिविहेणं, तं वयं बूम माहणं ॥ २३ ॥

हे ब्राह्मण ! तं वयं ब्राह्मणं ब्रूमः । तमिति कं ? यस्त्रसान्, प्राणान् पुनः स्थावरान् सङ्ग्रहेण-समासेन सङ्क्षेपेण विज्ञाय त्रिविधेन मनोवाक्कायेन करणकारणानुमतिभेदेन नवविधेन न हन्ति, तं ब्राह्मणं वच्म इति भावः[1] ॥ २३ ॥

कोहा वा जइ वा हासा, लोहा वा जइ वा भया ।
मुसं न वयई जो उ, तं वयं बूम माहणं ॥ २४ ॥

हे विजयघोष ! यः क्रोधात्, यदि वाऽथवा हासात्, वाऽथवा लोभात्, अथवा भयात् मृषामसत्यवाणीं न वदति, तं वयं ब्राह्मणं ब्रूमः[2] ॥ २४ ॥

चित्तमंतमचित्तं वा, अप्पं वा यदिवा बहुं ।
न गिण्हइ अदत्तं जो, तं वयं बूम माहणं ॥ २५ ॥

हे ब्राह्मण ! यश्चित्तमन्तं-सचित्तं, वाऽथवाऽचित्तं-प्रासुकम्, अल्पकं-स्तोकं, यदि वाऽथवा बहुं-प्रचुरं, अदत्तं-दायकेनाऽनर्पितं स्वयमेव न गृह्णाति, तं वयं ब्राह्मणं ब्रूमः[3] ॥ २५ ॥

---

१ यदा न कुरुते पापं, सर्वभूतेषु दारुणं । कर्मणा मनसा वाचा, ब्रह्म सम्पद्यते तदा ॥ १ ॥ आरण्यके ॥
२ यदा सर्वानृतं त्यक्तं, मिथ्या भाषा विवर्जिता । अनवद्यं च भाषेत, ब्रह्म सम्पद्यते तदा ॥ १ ॥ आरण्यके ॥
३ परद्रव्यं यदा दृष्ट्वा आकुले ह्यथवा रहे । धर्मकामो न गृह्णाति, ब्रह्म सम्पद्यते तदा ॥ १ ॥ आरण्यके ॥

दिव्वमाणुस्सतेरिच्छं, जो न सेवइ मेहुणं ।
मणसा कायवक्केणं, तं वयं बूम माहणं ॥ २६ ॥

पुनर्यो दिव्यमानुष्यतिरश्चीनं मैथुनं मनसा कायेन वचसा च कृत्वा न सेवेत, वयं तं ब्राह्मणं [१]ब्रूमः ॥ २६ ॥

जहा पोमं जले जायं, नोवलिप्पइ वारिणा ।
एवं अलित्तं कामेहिं, तं वयं बूम माहणं ॥ २७ ॥

हे ब्राह्मण ! पुनस्तं वयं ब्राह्मणं ब्रूमः । तं कीदृशं ? एवममुना प्रकारेणानेन दृष्टान्तेन कामैरलिप्तम्, भोगैरसंलग्नम् । केन दृष्टान्तेन ? यथा पद्मं जले जातं, परं तत्पद्म वारिणा नोपलिप्यते, जलं त्यक्त्वोपरि तिष्ठति तथा भोगैरुत्पन्नोऽपि भोगैरलिप्तो यस्तिष्ठति स ब्राह्मणो ज्ञेयः ॥ २७ ॥

मुलगुणमुक्त्वोत्तरगुणमाह-

अलोलुयं मुहाजीवी, अणगारं अकिंचणं ।
असंसत्तं गिहत्थेसु, तं वयं बूम माहणं ॥ २८ ॥

पुनर्वयं तं ब्राह्मणं ब्रूमः । कीदृशं तं ? अलोलुपमाहारादिषु लाम्पट्यरहितम्, पुनः कीदृशं ? मुधाजीविनम्, अज्ञातगृहेष्वाहारादिगृहीत्वाऽजीविकां कुर्वाणं, संयमजीवितव्यधारकमित्यर्थः । पुनः कीदृशं ? गृहस्थेष्वसंसक्तं-गृहस्थेषु प्रतिबन्धरहितम् ॥ २८ ॥

जहित्ता पुव्वसंजोगं, नाइसंगे य बंधवे ।
जो न सज्जइ एएसु, तं वयं बूम माहणं ॥ २९ ॥

पुनस्तं वयं ब्राह्मणं ब्रूमः । तमिति कं ? यो ज्ञातौ स्वकीयगोत्रे, च पुनः सङ्गे स्वसुरादिसम्बन्धे, पुनर्बान्धवे पूर्वसंयोगं मातापित्रादिस्नेहं त्यक्त्वा पुनरेतेषु पूर्वोक्तेषु न स्वजति, रागासक्तो न भवति, तं वयं ब्राह्मणं [२]ब्रूमः ॥ २९ ॥

पसुबंधा सव्ववेया, जट्ठं च पावकम्मुणा ।
न तं तायइ दुस्सीलं, कम्माणि बलवंतिह ॥ ३० ॥

भो विजयघोष ! सर्ववेदाः पशुबन्धा वर्तन्ते, पशूनां बन्धो विनाशाय नियन्त्रणं यैर्हेतुभिस्ते पशुबन्धाः, केवलं वेदाः पशुहननहेतवो वर्तन्ते, न तु मोक्षहेतवः, हिंसायाः प्ररूपकत्वात् । यतो हि वेदवाक्यमिदं श्रूयतां भूतिकामो वायव्यां दिशि श्वेतं छागमालभेत' इत्यादिपशुबन्धे हेतुभूतं वेदवाक्यम् । च पुनः 'जट्ठं' इति इष्टं-यजनं यक्षः पापकर्मणोत्पद्यते,

---

१ देवमानुषतिर्यक्षु, मैथुनं वर्जयेद्यदा । कामरागविरक्तश्च, ब्रह्म सम्पद्यते तदा ॥ १ ॥
२ यदा सर्वं परित्यज्य, निसङ्गो निष्परिग्रहः । निश्चिंतश्च चरेद् धर्मं, ब्रह्म सम्पद्यते तदा ॥ १ ॥ आरण्यके ।

तदिष्टं पापकर्मणा पापकारणपशुबन्धाद्यनुष्ठानेन तं वेदानामध्येतारं यज्ञकर्तारं वा न त्रायते । कथंभूतं तं ? दुःशीलं दुराचारं, पापशास्त्राणां पठनेन पापकर्मकरणेन च दुष्टाचारम् । इह कर्माणि बलवन्ति वर्तन्ते, दुष्टकर्माणि बलेन पापकर्मकर्तारं नरकं नयन्ति । अतः कारणादे-तस्माद्यागाद् ब्राह्मणः पात्रभूतो नास्ति । किन्त्वनन्तरोक्तगुणवानेव ब्राह्मण इति भावः ॥३०॥

नवि मुंडिएण समणो, न उँकारेण बंभणो ।
न मुणी रण्णवासेण, कुसचीरेण न तावसो ॥ ३१ ॥

हे विजयघोष ! मुण्डितेन-स्वकेशापनयनेन श्रमणो-निर्ग्रन्थो न स्यात्, उँकारेण उपलक्षणत्वाद् 'उँ भूर्भुवः स्वरि' त्यादिना ब्राह्मणो न स्यात् । तथाऽरण्यवासेन मुनिर्नोच्यते । कुशो-दर्भस्तन्मयं चीरमुपलक्षणत्वाद्वल्कलं - कुशचीरं, तेन कुशचीरेण कुशोपलक्षित-वल्कलवस्त्रेण तापसो न भवेत् ॥ ३१ ॥

समयाए समणो होइ, बंभचेरेण बंभणो ।
नाणेण य मुणो होइ, तवेण होइ ताावसो ॥ ३२ ॥

'समयाए' समत्वेन शत्रुमित्रयोरुपरि समानभावेन श्रमणो भवति, ब्रह्मचर्येण ब्राह्मणो भवति । ब्रह्म पूर्वोक्तमहिंसासत्यचौर्याभावामैथुननिर्लोभरूपम्, तस्य ब्रह्मणश्चरण-मङ्गीकरणं ब्रह्मचर्यं, तेन ब्राह्मण उच्यते, ब्रह्मचर्येण युक्तो ब्राह्मण इत्यर्थः । ज्ञानेन मुनिर्भवति, मन्यते जानाति हेयोपादेयविधी इति मुनिः, स च ज्ञाननैव स्यात्, तथा तपसा द्वादशविधेन तापसो भवति ॥ ३२ ॥

कम्मुणा बंभणो होई, कम्मुणा होइ खत्तिओ ।
वइस्सो कम्मुणा होइ, सुद्दो होइ कम्मुणा ॥ ३३ ॥

कर्मणा - क्रियया ब्राह्मणो भवति,

क्षमा दानं दमो ध्यानं, सत्यं शौचं धृतिर्घृणा ।
ज्ञानविज्ञानमास्तिक्य-मेतद् ब्राह्मणलक्षणं ॥ १ ॥

अनया क्रियया लक्षणभूतया ब्राह्मणः स्यात् । क्षत्रियः शरणागतत्राणलक्षणक्रियया क्षत्रिय उच्यते, न तु केवलं क्षत्रियकुले जातिसमुत्पन्ने सति, शस्त्रबन्धनत्वेनैव क्षत्रिय उच्यते । एवं वैश्योऽपि कर्मणा क्रिययैव स्यात्, कृषिपशुपाल्यादिक्रियया वैश्य उच्यते । कर्मणैव शूद्रो भवति, शोचनादिहेतुप्रेषणभारोद्वहनजलाद्याहरणचरणमर्दनादिक्रियया शूद्र उच्यते । अत्र ब्राह्मणलक्षणावसरेऽन्येषां वर्णत्रयाणां लक्षणविधानं व्याप्तिदर्शनार्थम् ॥ ३३ ॥

एए पाउकरे बुद्धे, जेहिं होइ सिणायओ ।
सव्वकम्मविणिमुक्कं, तं वयं बूम माहणं ॥ ३४ ॥

बुद्धो-ज्ञाततत्त्वः श्रीमहावीरः, एतानहिंसाद्यर्थान् प्रादुरकार्षीत्-प्रकटीचकार । यैर्गुणैः

कृत्वा सर्वकर्मविनिर्मुक्तो भूत्वा स्नातको भवति, केवली भवति । प्राकृतत्वात्प्रथमास्थाने द्वितीया । तमेतादृशगुणयुक्तं स्नातकं वा वयं ब्राह्मणं ब्रूमः ॥ ३४ ॥

एवं गुणसमाउत्ता, जे भवंति दिउत्तमा ।
ते समत्था उ उद्धत्तुं, परं अप्पाणमेव य ॥ ३५ ॥

एवं गुणसमायुक्ता ये द्विजोत्तमा-ब्राह्मणश्रेष्ठा भवन्ति, ते ब्राह्मणोत्तमाः परमात्मानमप्युद्धर्त्तुं समर्था भवन्ति ॥ ३५ ॥

एवं तु संसए छिन्ने, विजयघोसो य माहणो ।
समादाय तओ तं तु, जयघोसं महामुणिं ॥ ३६ ॥

ततस्तदनन्तरं विजयघोषो ब्राह्मणो जयघोषं महामुनिं वाचेदं वचनमुदाह-कथयतीति सम्बन्धः । किं कृत्वा ? तं मुनिं जयघोषं समादाय-सम्यगुपलक्ष्य ज्ञात्वा, क्व सति ? एवं पूर्वोक्तप्रकारेण विजयघोषस्य संशये छिन्ने सति ॥ ३६ ॥

तुट्ठो य विजयघोसो, इणमुदाहु कयंजली ।
माहणत्तं जहाभूयं, सुट्ठु मे उवदंसियं ॥ ३७ ॥

विजयघोषस्त्विदं वचनं जयघोषमुनये आह—कीदृशो विजयघोषः ? कृताञ्जलिः । हे मुने ! 'मे' मम ब्राह्मणत्वं यथाभूतं-यथास्वरूपं सुष्ठु-सम्यगुपदर्शितम् ॥ ३७ ॥

तुब्भे जइया जन्नाणं, तुब्भे वेयविऊ विऊ ।
जोइसंगविउ तुब्भे, तुब्भे धम्माण पारगा ॥ ३८ ॥

किं वचनमाह—हे महामुने ! 'तुब्भे' इति यूयं यज्ञानां यष्टारो, यूयं वेदविदः, वेदवित्सु विदो-ज्ञातारो, वेदविदां वरा यूयमेव, पुनर्यूयमेव ज्योतिषाङ्गविदः, यूयमेव धर्माणां पारगा-धर्माचारपारगाः ॥ ३८ ॥

तुब्भे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
तमणुग्गहं करे अम्हं, भिक्खेणं भिक्खुउत्तमा ॥ ३९ ॥

पुनर्हे महामुने ! यूयं परम्, पुनरात्मानं समुद्धर्तुं संसारान्निस्तारयितुं समर्थाः । 'तमि' ति तस्मात्कारणाद् भो भिक्षूत्तमाः-साधुश्रेष्ठाः ! भिक्षया भिक्षाग्रहणेनास्माकमनुग्रहं यूयं कुरुथ ॥ ३९ ॥

ण कज्जं मज्झ भिक्खेणं, खिप्पं निक्खमसू दिया ।
मा भमिहसि भयावट्टे, घोरे संसारसागरे ॥ ४० ॥

तदा जयघोषमुनिराह—हे द्विज ! मम भिक्षया कार्यं नास्ति, त्वं क्षिप्रं-शीघ्रं निष्क्रमणस्व-दीक्षां गृहाण । द्विज ! घोरे-भीषणे संसारसागरे मा भ्रमसि । मिथ्यात्वेन त्वं

संसारसमुद्रे भ्रमिष्यसि, तस्मान्मिथ्यात्वं त्यज, जैनीं दीक्षां गृहाणेति भावः । कथंभूते संसारसमुद्रे ? भयावर्त्ते सप्तभयजलभ्रमयुक्ते ॥ ४० ॥

उवलेवो होइ भोगेसु, अभोगी नोवलिप्पई ।
भोगी भमइ संसारे, अभोगी विप्पमुच्चई ॥ ४१ ॥

हे विजयघोष ! भोगेषु भुज्यमानेषु सत्सूपलेपः-कर्मोपचयरूपो बन्धः स्यात् । अभोगी-भोगानामभोक्ता कर्मणा नोपलिप्यते । पुनर्भोगी-भोगानां भोक्ता संसारे भ्रमति, अभोगी-भोगानामभोक्ता कर्मलेपाद्विमुच्यते ॥ ४१ ॥

कर्मलेपे दृष्टान्तमाह-

उल्लो सुक्को य दो छूढा, गोलया मट्टियामया ।
दो वि आवडिआ कुड्डे, जो उल्लो सोऽत्थ लग्गई ॥ ४२ ॥

उल्ल-आर्द्रश्च पुनः शुष्कः एतौ द्वौ मृत्तिकामयौ गोलकौ कुड्ये-भित्तौ 'उच्छूढो' आक्षिप्तौ, तत्रापतितौ भित्तावास्फालितौ सन्तौ, द्वयोर्मृत्तिकामयगोलकयोर्मध्ये य उल्ल-आर्द्रो मृद्गोलकः स अत्र कुड्ये लगति ॥ ४२ ॥

एवं लग्गंति दुम्मेहा, जे नरा कामलालसा ।
विरत्ता उ न लग्गंति, जहा सुक्के उ गोलए ॥ ४३ ॥

एवममुना प्रकारेणार्द्रमृत्तिकागोलकदृष्टान्तेन दुर्मेधसो दुष्टबुद्धयो ये नराः कामलालसा भोगेषु लम्पटास्ते लग्नन्ति-संसारे आसक्ता भवन्ति । तु पुनर्विरक्ताः कामभोगेभ्यो विमुखा नरास्ते न लग्नन्ति-संसारासक्ता न भवन्ति । यथा शुष्को मृद्गोलको भित्तौ न लगति ॥४३॥

एवं सो विजयघोसो, जयघोसस्स अंतिए ।
अणगारस्स निक्खंतो, धम्मं सुच्चा अणुत्तरं ॥ ४४ ॥

एवममुना प्रकारेण स विजयघोषो ब्राह्मणो जयघोषस्यानगारस्यान्तिके-समीपे निष्क्रान्तो-दीक्षां प्राप्तः, किं कृत्वा ? अनुत्तरं धर्मं श्रुत्वा ॥ ४४ ॥

खवित्ता पुव्वकम्माइं, संजमेण तवेण य ।
जयघोसविजयघोसा, सिद्धिं पत्ता अणुत्तरं ॥ ४५ ॥ त्तिबेमि ॥

जयघोषविजयघोषावुभावप्यनुत्तरां-प्रधानां गतिं सिद्धिं प्राप्तौ । किं कृत्वा ? संयमेन च पुनस्तपसा पूर्वकर्माणि क्षपयित्वा क्षयं नीत्वा, इत्यहं ब्रवीमि, इति सुधर्मास्वामी जम्बूस्वामिनं प्राह ॥ ४५ ॥

इति यज्ञीयाख्यं पञ्चविंशतितममध्ययनम् ॥ २५ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां पञ्चविंशतितममध्ययनं सम्पूर्णम् ॥ २५ ॥

॥ २६ सामाचार्याख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययने ब्रह्मगुणा उक्ताः, ब्रह्मगुणयुक्तस्तु साधुरेव स्यात्, साधुना चावश्यं सामाचारी विधेया, इति हेतोः सामाचारीं साधुजनकर्तव्यतारूपामत्राध्ययने कथयामि ।

सामायारिं पवक्खामि, सव्वदुक्खविमुक्खणिं ।
जं चरित्ताण निग्गंथा, तिन्ना संसारसागरं ॥ १ ॥

अहं तां सामाचारीं साधुकरणीयां क्रियां प्रवक्ष्यामि, तामिति कां ? यां सामाचारीं चरित्वाङ्गीकृत्य निर्ग्रन्थाः संसारसागरं तीर्णाः, संसारसमुद्रस्य पारं प्राप्ताः । कीदृशीं सामाचारीं ? सर्वदुःखविमोक्षणीं, सर्वदुःखेभ्यो विशेषण मोचिकाम् ॥ १ ॥

पढमा आवस्सिया नामं, बिइया य निसीहिया ।
आपुच्छणा य तइया, चउत्थी पडिपुच्छणा ॥ २ ॥

प्रथमा सामाचारी आवश्यकीनाम्नी, यत उपाश्रयान्निर्गच्छन् साधुरावश्यकीति वदति । उपाश्रयाद् बहिर्निःसरणमावश्यकीं विना न स्यात्, तेनावश्यकीति प्रथमा सामाचारी । नैषेधिकीति द्वितीया उपाश्रयाद्बहिर्निःसरणानन्तरं यस्मिन् स्थाने प्रवेशनेन स्थितिः करणीया स्यात्, तत्रापरेषां निषेधान्नैषेधिकी करणीया, निषेधे भवा नैषेधिकी । तृतीया सामाचारी आपृच्छना, यतो हि श्वासोच्छ्वासादिकं त्यक्त्वाऽपरं सर्वं कार्यं गुरोः पृच्छां विना न कार्यं, न करणीयं, तस्मादेषा आपृच्छना । चतुर्थी सामाचारी प्रतिपृच्छनानाम्नी भवति । करणीय-कार्यस्य गुरोः पृच्छया अनन्तरं पुनरपि तस्य कार्यस्य करणप्रस्तावे गुरोः पृच्छना प्रतिपृच्छना ज्ञेया ॥ २ ॥

पंचमी छंदणा नाम, इच्छाकारो य छट्ठओ ।
सत्तमो मिच्छाकारो उ, तहक्कारो य अट्ठमो ॥ ३ ॥

पञ्चमी छन्दनानाम्नी सामाचारी, अन्नादिकमानीयोदरमेव भरणीयं नास्ति, किन्तु यतीनां सर्वेषां निमन्त्रणारूपा छन्दनोच्यते, तस्यामेव छन्दनायामिच्छाकारशब्दः कर्तव्यः । इच्छाकारशब्दस्य कोऽर्थः ? इच्छया स्वाभिप्रायेण करणमिच्छाकार इति व्युत्पत्तिः । यदि भवतामिच्छा भवेत्तदा मम निमन्त्रणा सफला कर्तव्येति कथनम्, इयं षष्ठी सामाचारी । मिथ्याकार इति सप्तमी, मिथ्याकारशब्दस्यार्थं वदति-यदा कुत्रचित्स्खलना स्यात्, तदा तत्र साधुना मिथ्यादुष्कृतं मे इति वक्तव्यम् । मिथ्याकरणं मिथ्याकारः मिथ्यादुष्कृतदान-मित्यर्थः, इयं सप्तमी, अष्टमी सामाचारी तथाकारस्तथा करणं गुरूपदेशं प्राप्य 'तहत्ति' तथास्त् इति कथनमियमष्टमीत्यर्थः ॥ ३ ॥

अब्भुट्ठाणं नवमं, दसमा उवसंपया ।
एसा दसंगा साहूणं, सामायारीपवेइया ॥ ४ ॥

अभ्युत्थानम्, अभीत्याभिमुख्येनोत्थानमुद्यमनमुद्यमकरणमभ्युत्थानम्, अभ्युत्थानस्थाने [१]निर्युक्तिकृता निमन्त्रणाया एवोक्तत्वाद् गृहीतेऽन्नादौ छन्दना, अगृहीते तु निमन्त्रणा, इत्यनयोर्भेदः । तदभ्युत्थानं हि गुरुपूजा, यां गुरुपूजा च गौरवार्हाणामाचार्यग्लानादीनां यथोचिताहारपानीयादिसम्पादनम्, अत्राभ्युत्थानं निमन्त्रणारूपमेव ग्राह्यम् । गुर्वादेशस्य तथास्तु इत्ङ्गीकरणादतन्तरं सर्वकार्ये उद्यमस्य करणमभ्युत्थानमुद्यमनम्, इयं नवमी ज्ञेया । उपसम्पद् दशमी सामाचारी । अस्याः कोऽर्थः ? साधुरुद्यमवान् भूत्वा आचार्यान्तरादधिकज्ञानादिगुणादिसम्पत्तिनिमित्तमाचार्यादीनां पार्श्वेऽवश्थानमुपसम्पत्, इति दशमी ज्ञेया । एषा सामाचारी श्रीतीर्थङ्करैः प्रकर्षेण वेदिता-प्रवेदिताऽधिकं ज्ञाता प्रकाशितेत्यर्थः । कथंभूता सामाचारी ? दसाङ्गा, दश अङ्गानि यस्याः सा दशाङ्गा दशप्रकारेति भावः ॥ ४ ॥

अथ का का सामाचारी कुत्र कुत्र कर्तव्या ? तदाह-

गमणे आवस्सियं कुज्जा, ठाणे कुज्जा निसीहियं ।
आपुच्छणा सयं करणे, परकरणे पडिपुच्छणा ॥ ५ ॥

गमने-स्वस्थानादन्यत्र गमनेऽप्रमत्तत्वेनाऽवश्यकर्तव्यव्यापारे भवा आवश्यिकी, तामावश्यिकीम् । यतो हि साधोर्गमनं निष्प्रयोजनं नास्ति, यद्यवश्यं किञ्चित्कार्यं समुत्पन्नं वर्तते, तदैव साधुः स्वस्थानादुत्थितोऽस्तीति भावः । तथा स्थाने - स्वाश्रये प्रवेशसमये प्रमादादात्मनो निषेधः, तत्र भवा नैषेधिकी, उपाश्रये प्रविशता साधुना नैषेधिकी कर्तव्या, यतो हि स्वाश्रये आगमनादनन्तरं तत्समययोग्यकार्याणामेव करणम्, तेष्वेव कार्येषु प्रमादनिषेधः कर्तव्य इति भावः । स्वयमात्मना कार्याणां करणे गुरोरापृच्छना कर्तव्या, न च गुरौ सति स्वबुद्धयैव गुरुमनापृच्छ्य कार्यं कर्तव्यमिति भावः । परस्य कार्यकरणे गुरोरादेशं प्राप्य यदा कार्यं कर्तुमुद्यतो न भवति, तदा पुनः पृच्छना प्रतिपृच्छनोच्यते ॥ ५ ॥

छंदणा दव्वजाएणं, इच्छाकारे य सारणे ।
[२]मिच्छाकारेप्पनिंदाए, तहक्कारो पडिस्सुणे ॥ ६ ॥

अन्नपानीयरूपद्रव्यैर्यदाऽन्यो यतिर्निमन्त्र्यते, तदा छन्दनोच्यते । साधूनामाहारं पानीयं दर्शयित्वा, यदि भवतां मनसि विचार आयाति, तदैतदाहारादिकं भवद्भिर्गृह्यतां, यथाहं निस्तरामीति वाक्यकथनं छन्दनोच्यते । सारणे स्वस्य परस्य वा कार्यं प्रति योग्यत्वेन प्रवर्तने इच्छया-स्वाभिप्रायेण तत्कार्यकरणमिच्छाकारः । तत्रात्मनो यथेच्छाकारेण युष्माकं वाञ्छितं

१ इच्छा मिच्छा तहक्कारो, आवस्सिआ अ निसीहिआ । आपुच्छणा य पडिपुच्छा, छंदणा य निमंतणा ॥ ४८२ ॥
उवसंपया य काले, सामायारी भवे दसविहाओ । एएसिं तु पयाणं, पत्तेयं परूवणं वुच्छं ॥ ४८३ ॥ निर्युक्तौ ॥
२ मिच्छाकारो य निंदाए - अन्यसंस्करणे ॥

कार्यमहं करोमि । तथा सारणे मम पात्रलेपनादि इच्छाकारेण यूयं कुरुतेति वक्तव्यमिति भावः । मिथ्याकार आत्मनिन्दायां, मयाऽभव्यं कृतमेतादृशमात्मनो निन्दावाक्यं मिथ्यादुष्कृतदानं मिथ्याकारकथनमुच्यते । गुरोः पार्श्वे वाक्यं श्रुत्वा गुरुं प्रतीदं कथनं, यद्भवद्भिरुक्तं तत्तथैव तथास्त्विति करणं तथाकारः, प्रतिश्रुते-गुरुवाक्याङ्गीकारे तथाकारस्तथास्तुकरणमिति भावः ॥ ६ ॥

अब्भुट्ठाणं गुरुपूया, [1]अत्थणे उवसंपया ।
एवं दुपंचसंजुत्ता, सामायारी पवेइया ॥ ७ ॥

गुरूणामाचार्यादीनां पूजायां भयं विनैवातिशयेनाहारपानीयाद्यानीय वैयावृत्त्यविनयसम्पादनं तदभ्युत्थानमुच्यते । 'अत्थणे' इत्यर्थने ज्ञानाद्यर्थं परस्याचार्यस्य पार्श्वेऽवस्थाय ज्ञानादिगुणार्जनमुपसम्पदुच्यते । तस्याचार्यस्य समीपेऽवस्थानाय स्वामिन् ! इयन्तं कालं भवतां समीपे मया स्थातव्यं गच्छान्तरे आचार्यान्तरे ज्ञानाद्यर्थमिति विज्ञप्तिपूर्वकं ज्ञानाद्यभ्यसनरूपोपसम्पत्सामाचारीति भावः । एवममुना प्रकारेण द्विगुणाः पञ्च, अर्थाद्दशसंयुक्ताभेदसहिताः सामाचार्यः प्रकर्षेण वेदिताः प्रवेदितास्तीर्थङ्करगणधरैः कथिताः ॥ ७ ॥

अथ पूर्वमौघिकसामाचारीमाह-

पुव्विल्लंमि चउब्भागे, आइच्चंमि समुट्ठिए ।
भंडयं पडिलेहित्ता, वंदित्ता य तओ गुरुं ॥ ८ ॥

पुच्छिज्जा पंजलिउडो, किं कायव्वं मए इह ।
इच्छं निओइउं भंते, वेयावच्चे व सिज्झाए ॥ ९ ॥ युग्मम् ॥

पूर्वस्मिंश्चतुर्थभागे, यदा दिनस्य चत्वारो भागा भवन्ति, प्रहरप्रहरप्रमिता भवन्ति, तदा प्रथमो भागः प्रथमप्रहरात्मकः, तत्र प्रथमप्रहरस्य चतुर्थे भागे घटिकाद्वयरूपे, अष्टघटिकात्मकः प्रहरः, तस्य चतुर्थो भागो घटिकाद्वयात्मकस्तस्मिन् आदित्ये समुत्थिते सति घटिकाद्वयस्य सूर्ये सति, अथवा पूर्वस्मिन्निति प्रथमे, स्वबुद्ध्या विभागीकृते पूर्वदिक्सम्बन्धिनि आकाशस्य चतुर्थे भागे, यदाऽऽकाशस्य दिनमध्ये चत्वारो भागा बुद्ध्या कल्प्यन्ते, तन्मध्ये प्रथमे आकाशस्य भागे सूर्ये आगते सति, अर्थात्प्रथमे प्रहरे, यदाऽऽकाशे प्रहरप्रमित-सूर्यः समारूढः स्यात्तदेति भावः । अत्र किञ्चिदूनचतुर्भागे, किञ्चिदूने प्रहरेऽपि पादोन-पौरुष्यामयमर्थो गृह्यते । यथा दशागहितोऽपि पटः पट एवोच्यते, तथात्र पादोनपौरुष्यपि पौरुष्येव गृह्यते । तस्मात्पादोनपौरुष्यां भाण्डकं-पात्राद्युपकरणं प्रतिलेख्य चक्षुषा निरीक्ष्य प्रमार्ज्य, ततोऽनन्तरं गुरुं वन्दित्वा शिष्यः प्राञ्जलिपुटः पृच्छेत्-हे गुरो ! इहास्मिन् समये मया किं कर्तव्यं ? हे भन्ते ! हे पूज्य ! अहं वैयावृत्त्ये वाऽथवा स्वाध्याये नियोजयितुं-युष्माभिः प्रेरयितुं स्वात्मानमिच्छामि-वाञ्छामि ॥ ९ ॥

---

१ अच्छणे-अन्यसंस्करणे । तत्र व्याख्या-'अच्छणे' त्ति आसने प्रकमादाचार्यान्तरादिसन्निधौ अवस्थाने, बृहद्वृत्त्यां-प० ५३५ ॥

वेयावच्चे निउत्तेणं, कायव्वमगिलायओ ।
सज्झाए वा निऊत्तेणं, सव्वदुक्खविमोक्खणे ॥ १० ॥

गुरुणा वैयावृत्त्ये नियुक्तेन-प्रेरितेन शिष्येणाऽग्लान्यैव वैयावृत्त्यं कर्तव्यम् । वाऽथवा स्वाध्याये-शास्त्रपठने नियुक्तेन शिष्येण सर्वदुःखविमोक्षणः स्वाध्यायोऽग्लान्यैव कर्तव्य इति भावः ॥ १० ॥

अथौत्सर्गिकदिवसस्य कर्तव्यमाह-

दिवसस्स चउरो भागे, भिक्खू कुज्जा वियक्खणो ।
तओ उत्तरगुणे कुज्जा, दिणभागेसु चउसुवि ॥ ११ ॥

विचक्षणः क्रियासु कुशलो भिक्षुर्दिवसस्य चतुरो भागान् कुर्यात् । ततश्चतुर्भाग-करणानन्तरं चतुर्ष्वपि दिनभागेषूत्तरगुणान् स्वाध्यायादीन् कुर्यात् ॥ ११ ॥

पढमं पोरिसिं सज्झायं, बीयं झाणं झियायई ।
तइयाए भिक्खायरियं, पुणो चउत्थीए सज्झायं ॥ १२ ॥

प्रथमां पौरुषीमाश्रित्य स्वाध्यायं वाचनादिकं कुर्यात्, द्वितीयां पौरुषीमाश्रित्य ध्यानं-मनस्यर्थचिन्तनारूपं ध्यानं ध्येयम् कुर्यात्, इह च प्रतिलेखनाकालोऽल्पत्वान्न विवक्षितः, उभयत्र '[1]कालाध्वनोरत्यन्तसंयोगे' [पाणिनीय० २-२-५] इत्यनेन द्वितीया, तृतीयातीयायां पौरुष्यां भिक्षाचर्यामाहाराद्यर्थं गृहस्थगृहे गमनं कुर्यात् । चतुर्थ्यां पौरुष्यां पुनः स्वाध्यायं प्रतिलेखनस्थण्डिलप्रत्युपेक्षादिकं कुर्यात् । यस्मिन् काले यत्साधोः कर्तुं योग्यं कार्यं, तत्तदेव कर्त्तव्यमिति भावः । अवसरे हि सर्वं कार्यं कृतं फलदं स्यादित्यर्थः ॥ १२ ॥

अथ प्रथमपौरुषीपरिज्ञानार्थं गाथामाह-

आसाढे मासे दुप्पया, पोसे मासे चउप्पया ।
चित्तासोएसु मासेसु, तिप्पया हवइ पोरिसी ॥ १३ ॥

अंगुलं सत्तरत्तेणं, पक्खेण य दुअंगुलं ।
वड्ढए हायए वावि, मासेणं चउरंगुलं ॥ १४ ॥ युग्मम् ॥

अयमाम्नायः सूत्रेऽनुक्तोऽपि गुरुकुलवासाद् ज्ञेयः । दक्षिणं कर्णं सूर्यसन्मुखं विधाय जानुमध्ये तर्जन्यङ्गुलीछायामूर्ध्वीभूय पादैर्गणयेत् । आषाढे-आषाढ्यां पूर्णिमायां द्विपद्या छायया पौरुषी स्यात् यदा जानुच्छाया द्वाभ्यां पादाभ्यां प्रमिता स्यात्तदा प्रहरप्रमाणं दिनं ज्ञेयमिति भावः । एवं पौषीपूर्णिमायां चतुष्पद्या पौरुषी स्यात्, चतुर्भिः पादैः प्रहरं दिनं

१ सिद्धहेमे—काला-ऽध्वनोर्व्याप्तौ ।२।२।४२॥

स्यात्, चैत्रीपूर्णीमायामश्विन्यां पूर्णिमायां त्रिपद्या पौरुषी स्यात्, त्रिभिः पादैः प्रहरं दिनं ज्ञेयमिति भावः । शेषमासदिनेषु पौरुष्यानयनविधिमाह-सप्तरात्रेण-सप्ताहोरात्रेण सार्धेनाङ्गुलं, एवं पक्षेण द्वयङ्गुलं दक्षिणायने कर्कसिंहकन्यातुलावृश्चिकधने सङ्क्रान्ति-षट्के वर्धते । एवं मकरादिषट्के उत्तरायणे सार्धं सप्ताहोरात्रेणाङ्गुलं पक्षेण द्वयङ्गुलं हीयते, मासेन चतुरङ्गुलम् । एवं दक्षिणायने वर्धते उत्तरायणे च हीयते, श्रावणादिमास-षट्के वर्धते, माघादिमासषट्के हीयते । पुनर्यदा केषुचिन्मासेषु चतुर्दशदिनैः पक्षः स्यात्, तदा सप्तरात्रेणाप्यङ्गुलवृद्धिहान्या न कश्चिदपि दोषः ॥ १४ ॥

अथ चतुर्दशदिनैः पक्षसम्भवमाह-

आसाढबहुलपक्खे, भद्दवए कत्तिए य पोसे य ।
फागगुणवइसाहेसु य, नायव्वा ओमरत्ताओ ॥ १५ ॥

एतेषु मासेष्ववमरात्रयो ज्ञेयाः । आषाढे बहुलपक्षे-कृष्णपक्षे, बहुलपक्षशब्दस्य भाद्रपदादिष्वपि सम्बन्धः कर्तव्यः । भाद्रपदे, कार्तिके, पौषे, फाल्गुने, वैशाखे कृष्णपक्षे-ऽवमरात्रयो भवन्ति । अवमा-ऊना एकेनाहोरात्रेण हीना इत्यवमरात्रयः, रात्रिपदेनाहोरात्रग्रहणं कर्तव्यम् । एवमेतेषु मासेषु दिनचतुर्दशकः कृष्णपक्षः स्यादिति भावः ॥ १५ ॥

अथ पादोनपौरुषीपरिज्ञानोपायमाह-

जेट्ठामूले आसाढ - सावणे, छहिं अंगुलेहिं पडिलेहा ।
अट्ठहिं बीयतइयंमि, तईए दस अट्ठहिं चऊत्थे ॥ १६ ॥

ज्येष्ठामूले इति ज्येष्ठानक्षत्रमथ च मूलनक्षत्रं ज्येष्ठमासस्य पूर्णिमायां स्यात्तेन ज्येष्ठामूले ज्येष्ठमासे, तथाऽषाढे श्रावणे च मासे प्रत्यहं प्रागुक्तपौरुषीमाने षड्भिरङ्गुलै-रधिकैः प्रतिलेखा-पादोनपौरुषीप्रतिलेखनाकालः स्यात् । ज्येष्ठादारभ्य प्रथमे मासत्रिके एवं ज्ञेयम् । द्वितीयं त्रिके भाद्रपदाश्विनकार्तिकलक्षणे मासत्रिके पूर्वोक्तपौरुषीमानेऽष्ट-भिरङ्गुलैरधिकैः प्रक्षिप्तैः पादोनपौरुषीकालः स्यात् । एवं तृतीये त्रिके मार्गशीर्षपौष-माघलक्षणे पौरुषीमाने दशभिरङ्गुलैरधिकैः प्रक्षिप्तैः पादोनपौरुषीकालो ज्ञेयः । तथा चतुर्थे त्रिके फाल्गुनचैत्रवैशाखलक्षणे प्रागुक्तपौरुषीमानेऽष्टभिरङ्गुलैरधिकैः प्रक्षिप्तैः पादोनपौरुषीकालो भवेत् ॥ १६ ॥

दिनकृत्यमुक्त्वा रात्रिकृत्यमाह-

रत्तिं पि चउरो भाए, भिक्खू कुज्जा वियक्खणो ।
तओ उत्तरगुणे कुज्जा, राईभागेसु चउसुवि ॥ १७ ॥

पढमे पोरिसि सज्झायं, बिए झाणं झियायई ।
तईयाए निद्दमोक्खं तु, चउत्थी भुज्जोवि सज्झायं ॥ १८ ॥

रात्रेरपि चतुरो भागान् विचक्षणो भिक्षुः क्रियावान् मुनिः कुर्यात्, ततश्चतुर्भागकरणादनन्तरं चतुर्ष्वपि रात्रिभागेषूत्तरगुणान् कुर्यात् ॥ १७ ॥

प्रथमपौरुष्यां स्वाध्यायं कुर्यात्, द्वितीयायामधीतस्य सूत्रार्थस्य स्मरणं-मनसा चिन्तनं कुर्यात् । तृतीयायां पौरुष्यां निद्राया मोक्षो विधेयः, प्रथमपौरुष्यां द्वितीयपौरुष्यां च (निरुद्धया) निद्राया मोक्षो निद्रामोक्षस्तं निद्रामोक्षं-स्वापं कुर्यात् । यद्यपि मुनेः सर्वथा प्रमादत्याग एवोक्तोऽस्ति, तथाप्ययं निद्रायाः समय उक्तः । अत्र केचिन्निद्राया मोक्षं-जागरणं निद्रानिषेधं कुर्यादित्यपि वदन्ति, तच्चिन्त्यम् । निषेधस्य प्राप्तिपूर्वकत्वात्, पूर्वं निद्रायाः करणसमयस्तु नोक्तः । प्रथमप्रहरे स्वाध्यायः, द्वितीयप्रहरे ध्यानं, पूर्वमपि निद्राया निषेध एवोक्तः, तृतीयप्रहरेऽन्यस्य कस्यापि कार्यस्याऽकथनत्वात्, तस्मात् तृतीयपौरुष्यां शयनसमय एव लक्ष्यते, चतुर्थ्यां पौरुष्यां भूयः स्वाध्यायं कुर्यात् ॥ १८ ॥

अथ रात्रेश्चतुर्भागज्ञानस्योपायमाह-

जं नेइ जया रत्तिं, नक्खत्तं तंमि नहचउब्भाए ।
संपत्ते विरमिज्जा, सज्झायं पओसकालंमि ॥ १९ ॥

तम्मेव य नक्खत्ते, गयणचउब्भागसावसेसंमि ।
वेरत्तियंपि कालं, पडिलेहित्ता मुणी कुज्जा ॥ २० ॥

यन्नक्षत्रं रात्रिं समाप्तिं नयति यदा, अस्तसमये यन्नक्षत्रमुदेति, तस्मिन्नेव नक्षत्रे रात्रिः समाप्तीभवति । तस्मिन्नेव नक्षत्रे आकाशस्य चतुर्भागे सम्प्राप्ते विरमेत्, स्वाध्यायाद्विरमेत् । प्रदोषकाले - रजनीमुखे, तदा प्रदोषकालग्रहणं कृत्वा पश्चात्पौरुष्यां प्रथमायां सूत्रस्वाध्यायं कुर्यात् । तस्मिन्नेव नक्षत्रे गगनस्य आकाशस्य चतुर्थे भागे सावशेषे सति वैरात्रिकं नाम कालम्, अपिशब्दात् स्वस्य स्वस्य समये कालं प्रतिलेख्य मुनिः कालग्रहणं कुर्यात् । ततश्चैतावता प्रथमे प्रहरे प्रादोषिकं कालं गृहीत्वा स्वाध्यायः कर्तव्यः, एवमन्येष्वपि ज्ञेयम् ॥ १९-२० ॥

सामान्येन दिनरात्रिकृत्यमुक्त्वा विशेषतो दिनकृत्यमाह-

पुव्विल्लंमि चउब्भागे, पडिलेहित्ताण भंडगं ।
गुरुं वंदित्तु सज्झायं, कुज्जा दुक्खविमोक्खणं ॥ २१ ॥

सूर्योदयाद्दिवसस्य चतुर्थे भागे, सूर्योदयात्प्रथमे प्रहरे, चतुर्थे भागे एतावता प्रथम-पौरुष्यां-प्रथमघटिकाद्वयमध्ये भाण्डकं वर्षाकल्पाद्युपधिवस्त्रशय्योपकरणादिकं प्रतिलेख्य गुरुं वन्दित्वा स्वाध्यायं कुर्यात् । कथंभूतं स्वाध्यायं ? दुःखविमोक्षणं पापनिर्मूलकम् ॥२१॥

पोरिसीए चउब्भागे, वंदित्ताण तओ गुरुं ।
अपडिक्कमित्ता कालस्स, भायणं पडिलेहए ॥ २२ ॥

पौरुष्याश्चतुर्थे भागेऽवशेषे सति, पादोनपौरुष्यां जातायां सत्यां, ततो गुरुन् वन्दित्वा भाजनं-पात्रं प्रतिलेखयेत् । किं कृत्वा ? कालस्येति कालमप्रतिक्रम्य, प्राभातिककालप्रतिक्रमणार्थं कायोत्सर्गमकृत्वा, चतुर्थ्यां पौरुष्यां पुनः स्वाध्यायं करिष्यते, कालप्रतिक्रमणानन्तरं स्वाध्यायकरणमयुक्तं, तस्मात्कालमप्रतिक्रम्येत्युक्तम् ॥ २२ ॥

अथ प्रतिलेखनाविधिमाह-

मुहपत्तियं पडिलेहित्ता, पडिलेहिज्ज गोच्छगं ।
गोच्छगलायांगुलिए, वत्थाइ पडिलेहए ॥ २३ ॥

मुखपोतिकां प्रतिलेख्य गोच्छकं-झोलिकोपरिसत्कमुर्णामयं वस्त्रं, तत्प्रतिलेखयेत् । ततोऽङ्गुलिलातगोच्छकः सन्, अङ्गुल्यां लातं-गृहीतं गोच्छकं येन सोऽङ्गुलिलातगोच्छकः, तादृशः सन् वस्त्राणि प्रतिलेखयेत् । झोलिकोपरिरक्षणीयपटलकरूपाणि वस्त्राणि प्रतिलेखयेत्, प्रस्तावात्प्रमार्जयेदित्यर्थः, दृष्ट्यादिकाः पञ्चविंशतिप्रतिलेखनाः कार्याः ॥ २३ ॥

अथ पटलगोच्छके प्रमृज्य पुनर्यत्कुर्यात्तदाह-

उड्ढं थिरं अतुरियं, पुव्वं तावत्थमेव पडिलेहे ।
तो बिइयं पफोडे, तईयं च पुणो पमिज्जिज्जा ॥ २४ ॥

पूर्वं तावत्प्रथमत ऊर्द्ध्वं यथा स्यात्तथा, स्थिरं यथा स्यात्तथा, अत्वरितं यथा स्यात्तथा वस्त्रमेव प्रतिलेखयेत् । ऊर्द्ध्वमिति कायत उत्कटिकासनो भूत्वा, ऊर्द्ध्वं तिर्यग् प्रसारयेत्, भूमावलगयन् वस्त्रं प्रतिलेखयेत् । पुनः स्थिरं दृढग्रहणेन, पुनरत्वरितमनुत्तालतया प्रतिलेखनीयमित्यर्थः । वस्त्रमिति जातित्वादेकवचनम् । पूर्वं दृष्ट्या आरतः परतश्च निरीक्षेतैव । ततो 'बिइयं' इति द्वितीयवारं हस्तोपरि प्रस्फोटयेत्, हस्तगतान् प्राणिनः प्रमार्जयेत् । पुनस्तृतीयवारं तद्वस्त्रं प्रमार्जयेद्धस्तोपरि प्रस्फोटयेत् ॥ २४ ॥

प्रस्फोटनविधिमाह-

अणच्चावियं अवलियं, अणाणुबंधि अमोसलिं चेव ।
छप्पुरिमा नव खोडा, पाणीपाणिविसोहणं ॥ २५ ॥

एवं वस्त्रप्रतिलेखनं कुर्यात्, कीदृशं वस्त्रं ? अनर्त्तितं, पुनरवलितं मोटनारहितं । वलदानरहितं, पुनराननुबन्धि, नैरन्तर्येण युक्तमनुबन्धि प्रोच्यते, तस्याऽभावोऽननुबन्धि, आन्तर्यसहितम् । कोऽर्थः ? यथा पूर्वापरप्रस्फोटनज्ञानं स्यात्, तथा प्रस्फोटनं विदध्यादिति

भावः । पुनरमोसलिमिति, न विद्यते मोसली यत्र तदमोसलि, ऊर्द्ध्वाधस्तिर्यग् कुड्यादिपरामर्शसहितं यथा न स्यात्तथा वस्त्रं प्रस्फोटयेत् प्रतिलेखयेदित्यर्थः, पुनरिमाः पूर्वमेव क्रियमाणाः षट् प्रस्फोटनामकाः प्रतिलेखनाक्रियाभेदाः कर्तव्याः । प्रथमं वारद्वयं वस्त्रस्य परावर्तनात् प्रस्फोटनात्रयेण त्रयेण च षट् भवन्ति । पश्चान्नव खोडाः हस्तोपरि प्रस्फोटनात्मकाः, क्षोटानां त्रिकत्रिककरणान्नव सम्भवन्ति । पुनः [1]पाणौ पाणिविशोधनं - हस्ते हस्तविशोधनं प्रस्फोटनं विदध्यात्, हस्तं नावाकारं विधायाच्छोटनत्रिकत्रिकोत्तरकालं, एवं नव पूर्वोक्ताः, नव पुनश्च प्रस्फोटनविशेषाः, एवमष्टादशभेदाः, सप्त पूर्वोक्ताः, एवं पञ्चविंशतिविधाः प्रतिलेखना भवन्ति ॥ २५ ॥

अथ प्रतिलेखनादोषत्यागमाह-

आरभडा सम्मद्दा, वज्जेयव्वा य मोसली तइया ।
पप्फोडणा चउत्थी, विक्खित्ता वेइया छट्ठी ॥ २६ ॥

पसिढिलपलंबलोला, एग्गमोसा अणेगरूवधुणा ।
कुणइ पमाणपमायं, संकिए गणणोवयं कुज्जा ॥ २७ ॥

॥ युग्मम् ॥

आरभटा विधेर्विपरीतकरणम्, त्वरितं त्वरितं पृथक् पृथक् नवीनवस्त्रग्रहणं, एषा प्रथमा प्रमादप्रतिलेखना १ । सम्मर्दा वस्त्रान्तकोणानां परस्परमेलनम्, अथवोपधेरुपरि निषीदनम्, एषा द्वितीया प्रमादप्रतिलेखना २ । च पुन-स्तृतीया मोसल्यपि वर्जितव्या, उपर्यधोभागतिर्यग्प्रदेशसङ्घट्टना तृतीया प्रतिलेखना सप्रमाददोषा त्याज्या ३ । चतुर्थी प्रस्फोटना, रजसा खरण्टितस्य वस्त्रस्याच्छोटना, सापि वर्जनीया ४ । पञ्चमी विक्षिप्ता, प्रतिलेखितस्य वस्त्रास्याऽप्रतिलेखितवस्त्रोपरि मोचनम्, अथवा दिक्षु च विलोकनम्, इयमपि सप्रमादा प्रतिलेखना त्याज्या ५ । षष्ठी प्रतिलेखना वेदिकानाम्नी, सापि सप्रमादा त्याज्या ६ । वेदिकायाः पञ्च भेदाः-ऊर्द्ध्ववेदिका १, अधोवेदिका २, तिर्यग्वेदिका ३, उभयवेदिका ४, एकवेदिका ५ च । तत्रोर्द्ध्ववेदिका सा यस्यामुभयोर्जान्वोरुपरि हस्तयो रक्षणम् १ । अधोवेदिका सा यस्यां जान्वोरधः प्रचुरं हस्तयो रक्षणम् २ । तिर्यग्वेदिका सा यस्यां तिर्यग् हस्तौ कृत्वा प्रतिलेखनम् ३ । उभयवेदिका सा यस्यामुभाभ्यां जानुभ्यां बाह्ये उभयोर्हस्तयो रक्षणम् ४ । एकवेदिका सा यस्यामेकं जानु हस्तमध्ये, अपरं जानु बाह्ये रक्ष्यते ५ । एते पञ्चापि वेदिकादोषाः प्रतिलेखनावसरे त्याज्याः । स्त्रीलिङ्गत्वमत्र रूढिवशाद् ज्ञेयम् ॥ २६ ॥

अथ वस्त्रग्रहणे दोषमाह 'पसिढलेत्ति' प्रशिथिलं दृढमग्रहीतं वस्त्रम् १ । प्रलम्बं, यद्विषमत्वग्रहणेन वस्त्रकोणकस्य ग्रहणेनाऽपर-कोणानां लम्बनम् २ । लोला यत्र भूमौ

१ अन्यवृत्त्यामेवं-"'पाणौ' पाणितले प्राणिनां कुन्थ्वादिसत्त्वानां विशोधनम् ॥" बृहद्वृत्याम्-प० ५४१ A ॥

वस्त्रस्य रुलनं स्यात् ३ । एते त्रयोऽपि दोषास्त्याज्या इति योज्यम् । एकामर्शा, एकस्मिन् काले उभयोः पार्श्वयोर्वस्त्रस्याकर्षणम् ४ । स्त्रीत्वं रूढिवशात् । अनेकरूपधुना, अनेकरूपा सङ्ख्यात्रयादधिका धुना-कम्पना यस्यां साऽनेकरूपधुना । तथा यत्प्रमाणे प्रस्फोटनादिसङ्ख्यानां प्रमादं कुरुते । तथा शङ्किते शङ्कोत्पत्तौ मुखेन तथाङ्गुलिरेखास्पर्शनादिना गणनस्योपयोगं गणनोपयोगं कुर्यात्, तदपि दूषणं त्याज्यम्, एतत्प्रतिलेखनादूषणं ज्ञेयम् ॥ २७ ॥

पुनरेनामेव भङ्गकद्वारेण सदोषां निर्दोषां चाह-

अणूणाइरित्तपडिलेहा, अविवच्चासा तहेव य ।
पढमं पयं पसत्थं, सेसाणि य अप्पसत्थाणि ॥ २८ ॥

अनूना ऊना न कर्तव्या १, अतिरिक्ता अधिका न कर्तव्या २, अविव्यत्यासा, विविधो व्यत्यासो यस्यां सा विव्यत्यासा, न विव्यत्यासा, अविव्यत्यासा, विपर्यासरहिता, विपरीतत्वेन रहितेत्यर्थः ३, एतेषां त्रयाणां भेदानामष्टौ भङ्गा उत्पद्यन्ते, तेषु भङ्गेषु प्रथमं पदं प्रशस्तं, प्रथमो भङ्गः समीचीनः, अन्यूना १, अनतिरिक्ता २, अविपर्यासा ३ इत्येवंरूपं प्रथमभङ्गरूपपदं प्रशस्तम्, निर्दोषत्वाच्छुद्धमित्यर्थः । शेषाणि च सप्तभङ्गान्यप्रशस्तानि ॥ २८ ॥

पुनर्दूषणोत्पत्तिकारणमाह-

पडिलेहणं कुणंतो, मिहोकहं कुणइ जणवयकहं वा ।
देइ व पच्चक्खाणं, वाएइ सयं पडिच्छइ वा ॥ २९ ॥

प्रतिलेखनां कुर्वन् साधुर्मिथः परस्परं कथां-वार्तां चेत्करोति, अथवा जनपदकथां-देशकथां करोति, पुनः प्रतिलेखनां कुर्वन् कस्मैचित्प्रत्याख्यानं चेद्ददाति, पुनः प्रतिलेखनां कुर्वन्नपरं साधुं वाचयति-वाचनां ददाति, वाऽथवा प्रतिलेखनां कुर्वन् चेत्स्वयमालापादि प्रतीच्छति गृह्णाति ॥ २९ ॥

पुढवि आउक्काए, तेऊवाऊवणस्सइतसाणं ।
पडिलेहणापमत्तो, छण्हंपि विराहओ होइ ॥ ३० ॥

एतानि पूर्वोक्तानि कार्याणि कुर्वन् प्रतिलेखनायां प्रमत्तः- प्रमादकर्त्ता साधुः षण्णामपि कायानां विराधको भवति । तेषां षट्कायानां नामान्याह—पृथ्वीकायः १, अप्कायः २, तेजस्कायः ३, वायुकायः ४, वनस्पतिकायः ५, त्रसकायश्च ६, एतेषां सम्मर्दकः स्यात्, तत्कथं विराधको भवति ? कुम्भकारादिशालायां स्थितस्तत्र प्रमादवशात्प्रतिलेखनायां जलकुम्भादिपातनात्तेन पानीयेन मृत्तिकाग्निवायुकुन्थुकादिकास्त्रसाः स्थावराश्च जायन्ते, तदा षण्णामपि विराधना स्यात्, यदाहार्हन्-

[1]जत्थ जलं तत्थ वणं, जत्थ वणं तत्थ सासओ अग्गी ।
तेऊवाऊसहिया, एवं छण्हंपि सह जोओ ॥ १ ॥ इति वचनात् ॥ ३० ॥

[2]पुढवी आउक्काए, तेऊवाऊवणस्सइतसाणं ।
पडिलेहण आउत्तो, छण्हंपि आराहओ होइ ॥ ३१ ॥

प्रतिलेखनायामायुक्तः-सावधानोऽप्रमादी साधुः पृथिव्यादीनां षण्णामपि कायानामाराधको भवति ॥ ३१ ॥ इत्यनेन प्रथमपौरुष्याः कर्तव्यमुक्तम्, द्वितीयपौरुष्याः कर्तव्यं स्वाध्यायादिकं पूर्वमुक्तमेवाभूत् ।

अथ तृतीयपौरुष्याः कृत्यमाह-

तइयाए पोरिसीए, भत्तं पाणं गवेसए ।
छण्हमन्नतरागम्मि, कारणंमि समुट्ठिए ॥ ३२ ॥

तृतीयायां पौरुष्यां भक्तपानं गवेषयेत्, अयमुत्सर्गिको नयः, स्थविरकल्पिकानां हि यथाकालं भक्तपानगवेषणमुक्तम् । क्व सति ? षण्णां कारणानां मध्येऽन्यतरस्मिन्नेकस्मिन् कारणे समुत्थिते सति । आहारग्रहणस्य षट् कारणानि सन्ति, तैः कारणैराहारं कर्तव्यम् ॥३२॥

तानि षट् कारणान्याह-

वेयणवेयावच्चे, इरियट्ठाए य संयमट्ठाए ।
तह पाणवत्तियाए, छट्ठं पुण धम्मचिंताए ॥ ३३ ॥

वेदनायाः क्षुत्पिपासादिरोगादिवेदनाया उपशमनाय, वेदना क्षन्तुं न शक्यते, प्राकृतत्वाद्विभक्तिलोपः, इति प्रथमं कारणम् १ । तथा वैयावृत्त्याय-वैयावृत्त्यर्थं, यतो हि क्षुत्पिपासया पीडितो वैयावृत्यकृत्साधुराचार्यादीनां वैयावृत्त्यं कर्तुं न शक्नोति, एतद् द्वितीयं कारणम् २ । तथा 'इरियट्ठाए' ईर्यार्थायेर्यासमित्यर्थं, क्षुधातृषार्दितस्य निर्जरार्थिनोऽपि साधोश्चक्षुरिन्द्रियबलहीनस्य लघुजीवादिकमपश्यत ईर्यायाः पालनं न स्यात्, तदर्थमाहार करणं तृतीयं कारणम् ३ । तथा पुनः संयमार्थाय-चारित्रस्य क्रियानुष्ठानातापनावश्यकाद्याराधनार्थं, यथा शकटाङ्गं घृतादिना संस्कृतमेव चलति, अन्यथा न चलति, एतच्चतुर्थं कारणम् ४ । तथा पुनः- प्राणप्रत्ययाय, प्राणानां प्रत्ययो जीवितावधिधारणं प्राणप्रत्ययस्तस्मै प्राणप्रत्याय प्राणधारणार्थं, जीवितावधौ सम्पूर्णे जाते सत्येव प्राणमोचनं कर्तव्यम्, अन्यथात्महत्यादोषः स्यात्, तस्माज्जीवितव्यधारणार्थं, इदं पञ्चमं कारणम् ५ । षष्ठं पुनरिदं, यदुत धर्मचिन्तायै धर्मध्यानश्रुताभ्यासरूपायै भक्तपानं गवेषयेत्, क्षुत्तृषापीडितस्यार्त्तध्यानयुक्तस्य धर्मध्यानश्रुताभ्यासो न स्यात्, आगतमपि श्रुतं विस्मरतीति षष्ठं कारणम् ६ । ॥ ३३ ॥

---

१ यत्र जलं तत्र वनस्पतिः, यत्र वनस्पतिस्तत्र शाश्वतोऽग्निः ।
तेजोवायुसहितौ, एवं षण्णामपि सह योगः ॥ १ ॥

२ इयं गाथा अन्यसंस्करणे न दृश्यते ॥

निग्गंथो धिइमंतो, निग्गंथी वि न करिज्ज छहिं चेव ।
ठाणेहिं उ इमेहिं, अणइक्कमणा य से होइ ॥ ३४ ॥

निर्ग्रन्थः- साधुर्धृतिमान्-धैर्यवान् तथा निर्ग्रन्थ्यपि - साध्व्यपि षड्भिर्वक्ष्यमाणैः कारणैर्भक्तपानगवेषणां न कुर्यात्, यत एभिः स्थानैः 'स' इति तस्य साधोः साध्व्या वा आहारमकुर्वतोऽनतिक्रमणं भवति, संयमयोगानामुल्लङ्घनं न भवति । अन्यथाऽऽहारं त्यजतः साधोः संयमयोगस्यातिक्रमणमुल्लङ्घनं स्यादिति भावः ॥ ३४ ॥

तानि षट् कारणानि दर्शयति-

आयंके उवसग्गे, तितिक्खया बंभचेरगुत्तीसु ।
पाणिदयातवहेऊ, सरीरवोच्छेयणट्ठाए ॥ ३५ ॥

आतङ्के ज्वरादिरोगे १, उपसर्गे देवादिकृतस्योपसर्गस्यागमने २, तथा ब्रह्मचर्यगुप्तिषु तितिक्षया हेतुभूतया यद्याहारं क्रियते, तदेन्द्रियाणि बलवन्ति स्युः, तदा ब्रह्मगुप्तिरक्षापि-दुष्करा, तस्माद् ब्रह्मगुप्तितितिक्षयाऽहारनिषेधः, एतत् तृतीयं कारणम् ३ । तथा प्राणिदया हेतोः, वर्षादौ निपतदप्कायादिजीवदयार्थं दर्दुरिकादिरक्षायै ४ । तपसो हेतोश्चतुर्थ-षष्ठादिवर्गतपोधनतपसोः करणहेतोर्वा पञ्चमं कारणम् ५ । पुनः शरीरव्यवच्छेदार्थाय, उचितकाले संलेखनामनशनं कृत्वा शरीरत्यागायाहारं साधुर्न गवेषयेदिति सम्बन्धः, इति षष्ठं कारणम् ६ ॥ ३५ ॥

अथ तद्गवेषणायां विधिं क्षेत्रावधिं चाह-

अवसेसं भंडगं गिज्झ, चक्खुसा पडिलेहए ।
परमद्धजोयणाओ, विहारं विहरए मुणी ॥ ३६ ॥

साधुरवशेषं-समस्तं भाण्डकमुपकरणं गृहीत्वा चक्षुषा प्रतिलेखयेत्, ततः साधुः परमुत्कृष्टमर्धयोजनादर्धयोजनमाश्रित्य विहारं विहरेत्, अधिकं व्रजतो हि साधोः क्षेत्रातीत आहारदोषः स्यात्, तस्माद्योजनार्धं क्रोशद्वयमाहारार्थं विहारं विहृत्याहारमानीयोपाश्रये गुरोरग्रे आलोच्य विधिपूर्वकमाहारं कृत्वा यत्कर्तव्यं तदाह-॥ ३६ ॥

चउत्थीए पोरिसीए, निक्खिवित्ताण भायणं ।
सज्झायं तओ कुज्जा, सव्वभावविभावणं ॥ ३७ ॥

ततश्चतुर्थ्यां पौरुष्यां भाजनं निक्षिप्य झोलिकादौ बद्ध्वा ततः स्वाध्यायं कुर्यात् । कीदृशं स्वाध्यायं ? सर्वभावविभावनं-सर्वजीवादिपदार्थप्रकाशकम् ॥ ३७ ॥

पोरिसीए चउब्भाए, वंदित्ताण तओ गुरुं ।
पडिक्कमित्ता कालस्स, सिज्जं तु पडिलेहए ॥ ३८ ॥

मुनिः पौरुष्या अर्थाच्चतुर्थ्याः पौरुष्याश्चतुर्भागे शेषे गुरुं वन्दित्वा, ततः स्वाध्याया-दनन्तरं कालस्य कालं प्रतिक्रम्य, तु पुनः शय्यां-वसतिं प्रतिलेखयेत् ॥ ३८ ॥

पासवणुच्चारभूमिं च, पडिलेहिज्ज जयं जई ।
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमोक्खणं ॥ ३९ ॥

ततः पश्चाद्यतिः-साधुर्यत्नावान् सन् यत्नया प्रश्रवणोच्चारभूमिं प्रत्येकं द्वादशस्थण्डिलात्मकां, चशब्दात्कालभूमिं च स्थण्डिलात्मकां प्रतिलेखयेत्, लघुनीतिस्थाने द्वादशमण्डलानि, बृहन्नीतिस्थाने च द्वादशमण्डलानि, कालग्रहणभूमिस्थाने मण्डलानि त्रीणि, एवं सप्तविंशतिमण्डलानि कुर्यात् । दिनकृत्यमुक्त्वोत्तरार्धेन रात्रिकृत्यमारभ्यते—ततो भूमि-प्रतिलेखनानन्तरं कायोत्सर्गं कुर्यात्, कीदृशं कायोत्सर्गं ? सर्वदुःखविमोक्षणम्, कायोत्सर्गेण महती कर्मनिर्जरा, यदुक्तं-

"[१]काउस्सग्गे जह सुठियस्स, भज्जंति अंगुवंगाइं ।
इइ भज्जंति सुविहिया, अट्ठविहं कम्म संघायं ॥ १ ॥"

कायोत्सर्गस्यैहिकामुष्मिकफलं स्यात्, ऐहिकं यशोदेवाकर्षणादिकम्, आमुष्मिकं च स्वर्गापवर्गादिकसुखप्राप्तिरूपम् अत्र सुदर्शनकथा ॥ ३९ ॥

देवसियं च अइयारं, चिंतिज्ज अणुपुव्वसो ।
नाणे य दंसणे चेव, चरित्तंमि तहेव य ॥ ४० ॥

कायोत्सर्गं च कृत्वा, च पुनर्दैवसिकमतीचारं 'अणुपुव्वसो' अनुक्रमेण ज्ञाने दर्शने चारित्रे, तथैवानुक्रमेणैव चिन्तयेत् ॥ ४० ॥

पारियकाउस्सग्गो, वंदित्ताण तओ गुरुं ।
देवसियं तु अइयारं, आलोइज्ज जहक्कमं ॥ ४१ ॥

ततः पालितकायोत्सर्गः सन् साधुर्गुरुं द्वादशावर्त्तवन्दनेन वन्दित्वा, तु पुनर्यथाक्रमं दैवसिकमतीचारमालोचयेत् ॥ ४१ ॥

पडिक्कमित्ता निस्सल्लो, वंदित्ताण तओ गुरुं ।
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमोक्खणं ॥ ४२ ॥

ततः प्रतिक्रम्याऽपराधस्थानेभ्यः प्रतिकूलं निवृत्य, प्रतिक्रमणसूत्रमुक्त्वा निःशल्यः सन्-शल्यरहितो भूत्वा, ततः पश्चाद् गुरुं द्वादशावर्त्तवन्दनेन वन्दित्वा, श्रीगुरुं च क्षमयित्वा

---

१ कायोत्सर्गे यथा सुस्थितस्य अङ्गोपाङ्गानि भज्यन्ति ।
तथा भज्यन्ति सुविहिता अष्टविधं कर्मसङ्घातम् ॥ १ ॥

'आयरियउवज्झाय' इति गाथात्रयं पठित्वा, ततः पश्चात्कायोत्सर्गं चारित्रदर्शनश्रुतज्ञान-शुद्धयर्थं कुर्यात्, जातित्वादेकवचनम्। कीदृशं कायोत्सर्गं ? सर्वदुःखविमोक्षणम् ॥४२॥

[1]पारियकाउस्सग्गो, वंदित्ताण तओ गुरुं।
थुइमंगलं च काउं, कालं संपडिलेहए ॥ ४३ ॥

पश्चात्पालितकायोत्सर्गो नमस्कारपूर्वं 'लोगस्सुज्जोयगरे' इत्यनेन पारयित्वा, ततोऽनन्तरं द्वादशावर्त्तवन्दनेन गुरुं वन्दित्वा 'इच्छामो अणुसिट्ठियं, इत्युक्त्वा, स्थित्वा पश्चात्स्तुतिमङ्गलं च स्तुतित्रयात्मकं वर्धमानाक्षरस्तुतित्रयपाठरूपं मङ्गलं कृत्वा कालं प्रत्युपेक्षते - प्रतिजागर्ति, तदवसरसत्कं कालं कालग्रहणं साधुर्गृह्णातीत्यर्थः ॥ ४३ ॥

ततोऽनन्तरं यत्करणीयं तदाह-

पढमं पोरिसि सज्झायं, बीइए झाणं झियायई।
तईयाए निद्दमोक्खं तु, सज्झायं तु चउत्थीए ॥ ४४ ॥

प्रथमपौरुष्यां स्वाध्यायं कुर्यादिति शेषः। द्वितीयायां ध्यानं पिण्डस्थादिकं धर्म-ध्यानादिकं चाधीतसूत्रार्थं ध्यायेच्चिन्तयेत्। तृतीयायां निद्राया मोक्षो निद्रामुत्कलता विधेया, चतुर्थ्यां पुनरपि स्वाध्यायं कुर्यात्। द्वितीयवारकथनाच्छिष्याय गुरुभिरुपदेशो दातव्यः, न तु पाठने प्रयासश्चिन्तनीय इति ज्ञेयम् ॥ ४४ ॥

चतुर्थ्याः पौरुष्याः कृत्यमाह-

पोरिसीए चउत्थीए, कालं तु पडिलेहए।
सज्झायं तु तओ कुज्जा, अबोहं तु असंयए ॥ ४५ ॥

चतुर्थ्यां पौरुष्यां पुनः कालं प्रतिलेख्य-प्रत्युपेक्ष्य प्रतिजागर्य, प्राग्वद्गृहीत्वा ततः स्वाध्यायं कुर्यात्, परं किं कुर्वन् स्वाध्यायं कुर्यात् ? असंयतीन् गृहस्थानबोधयन्नजागरयन् शनैः शनैः पठन्नित्यर्थः। उच्चैः पठनश्रवणाद् गृहस्थाः सावद्यव्यापारं कुर्वन्ति, तदा साधु-रप्यारम्भक्रियाभाक् स्यादिति भावः ॥ ४५ ॥

पोरिसीए चउब्भाए, वंदिऊण तओ गुरुं।
पडिक्कमित्ता कालस्स, कालं तु पडिलेहए ॥ ४६ ॥

चतुर्थ्याः पौरुष्याश्चतुर्थभागेऽवशेषे सति घटिकाद्वये रजन्या अवशिष्टे सति, तदा हि कालवेलासम्भवान्न कालस्य ग्रहणं, तस्मात्ततो गुरुं वन्दित्वा द्वादशावर्त्तवन्दनं दत्वा कालस्येति तत्समययोग्यं कालं प्रतिक्रम्य तत्सम्बन्धिनीं क्रियां कृत्वा, तु पुनः कालं-

---

१ सिद्धाणं संथवं किच्चा, वंदित्ताण-अन्यसंस्करणे ॥

प्राभातिकं कालं प्रतिलेखयेत्, प्राभातिकालग्रहणं गृह्णीयात्, इत्यनेनावश्यकवेलां ज्ञात्वा-ऽऽवश्यकानि कुर्यात् ॥ ४६ ॥

आगए कायवुस्सग्गे, सव्वदुक्खविमोक्खणे ।
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमोक्खणं ॥ ४७ ॥

रात्रिप्रतिक्रमणस्थापनानन्तरं कायव्युत्सर्गे आगते सति कायोत्सर्गवेलायां प्राप्तायां-कायोत्सर्गसमये प्रमादो न विधेयः । कथंभूते समये ? सर्वदुःखविमोक्षणे ततः कायोत्सर्गं कुर्यात् । कीदृशं कायोत्सर्गं ? सर्वदुःखविमोक्षणं, अत्र पुनः सर्वदुःखविमोक्षणमिति विशेषणेन कायोत्सर्गस्यात्यन्तकर्मनिर्जराहेतुत्वं प्रतिपादितम् । तथेह कायोत्सर्गग्रहणेन चारित्रदर्शनज्ञानशुद्ध्यर्थं कायोत्सर्गत्रयं ग्राह्यम् । तत्र तृतीयकायोत्सर्गे रात्रिकोऽतिचार-श्चिन्तनीयः ॥ ४७ ॥

एतदेवाग्रेतनगाथायामाह-

राईयं च अईयारं, चिंतिज्ज अणुपुव्वसो ।
नाणंमि दंसणंमि, चरित्तंमि तवंमि य ॥ ४८ ॥

रात्रौ भवं रात्रिकम्, च-पादपूरणे, अतीचारं चिन्तयेत्, आनुपूर्व्याऽनुक्रमेण ज्ञाने दर्शने चारित्रे तपसि, चशब्दाद्वीर्ये । शेषकायोत्सर्गेषु चतुर्विंशतिस्तवचिन्त्यतया प्रतीतः साधारणश्चेति नोक्तः ॥ ४८ ॥

ततश्च-

पारियकाउसग्गो, वंदित्ताण तओ गुरुं ।
राईयं तु अईयारं, आलोएज्ज जहाक्कमं ॥ ४९ ॥
पडिक्कमित्तु निसल्लो, वंदित्ताण तओ गुरुं ।
काउसग्गं तओ कुज्जा, सव्वदुक्खविमोक्खणं ॥ ५० ॥ युग्मम् ॥

ततः पारितकायोत्सर्गः सन् साधुर्गुरुं वन्दित्वा द्वादशावर्त्तवन्दनं दत्वा रात्रिकमतीचारमालोचयेत् । यथाक्रमं यथा यथाऽनुक्रमेणातीचाराणि लग्नानि, तथाऽऽलोचयेदित्यर्थः, आलोचनापाठं पठेत् ॥ ४९ ॥ ततः पश्चात्पदसम्पदासहितं प्रतिक्रम्य प्रतिक्रमणसूत्रमुक्त्वा निःशल्यो भूत्वा, ततः पुनर्गुरुं द्वादशावर्त्तवन्दनेन वन्दित्वा 'आयरियउवज्झाय' इति गाथा-त्रयं पठित्वा, ततः कायोत्सर्गं कुर्यात् । कथंभूतं कायोत्सर्गं ? सर्वदुःखविमोक्षणम् ॥ ५०॥

कायोत्सर्गे स्थितः किं चिन्तयेदित्याह-

किं तवं पडिवज्जामि, एवं तत्थ विचिंतए ।
काउसग्गं तु पारित्ता, वंदई य तओ गुरुं ॥ ५१ ॥

अद्याहं किं तपो नमस्कारसहितादियावत्षण्मासोपवासादिकं प्रतिपद्ये ? एवं तत्र कायोत्सर्गे चिन्तयेत् । भगवान श्रीमहावीरः षण्मासं यावन्निरशनो विहृतवान् । तत्किमहमपि स्थातुं समर्थो भवामि ? न वेति ? एवं पञ्चमासाद्यपि यावन्नमस्कारसहितं तावत्परिभावयेत् । ततः कायोत्सर्गं पारयित्वा गुरुं द्वादशावर्त्तवन्दनेन वन्दयेत् ॥ ५१ ॥

पारियकाउसग्गो, वंदित्ताण तओ गुरुं ।
तवं संपडिवज्जिज्जा, करिज्ज सिद्धाण संथवं ॥ ५२ ॥

ततः पारितकायोत्सर्गः सन् गुरुं वन्दित्वा, द्वादशावर्त्तवन्दनेन वन्दित्वा तपः सम्प्रतिपद्य यथाशक्त्युपवासादिकमङ्गीकृत्य सिद्धानां संस्तवं दैवसिकप्रतिक्रमणवत्प्रान्ते वर्धमानस्तुतित्रयरूपं पाठं कुर्यात् । तदनु चैत्यसद्भावे तद्वन्दनं कार्यं शक्रस्तवपाठेन, पश्चात्सर्वा क्रिया यथायोग्यं कर्तव्या ॥ ५२ ॥

अथाध्ययनोपसंहारमाह-

एसा सामाचारी, समासेण वियाहिया ।
जं चरित्ता बहुजीवा, तिण्णा संसारसागरं ॥ ५३ ॥ तिबेमि ॥

एषा भगवदुक्ता दशविधसामाचारी समासेन-सङ्क्षेपेण 'वियाहिया' व्याख्याता । याः सामाचारीश्चरित्वाङ्गीकृत्य बहवो जीवाः संसारसागरं तीर्णाः, इत्यहं ब्रवीमि । इति सुधर्मास्वामी जम्बूस्वामिनं प्रत्याह ॥ ५३ ॥

इति सामाचार्याख्यं षड्विंशतितममध्ययनं सम्पूर्णम् ॥ २६ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां सामाचार्याख्यं षड्विंशतितममध्ययनं सम्पूर्णम् ॥ २६ ॥

॥ २७ खलुङ्कीयाख्यमध्ययनम् ॥

सामाचार्यशठेन पाल्यते, तेन शठस्य विपक्षभूताया अशठतायाः कथनेनाऽशठत्वज्ञापनार्थं खलुङ्कीयाख्यमध्ययनं कथ्यते-

थेरे गणहरे गग्गे, मुणी आसि विसारए ।
आइन्ने गणिभावंमि, समाहिं पडिसंधए ॥ १ ॥

गार्ग्यो नाम गणधरो मुनिः स्थविर आसीत्, गणस्य-गच्छस्य धारकत्वाद्गणधरः, धर्मे स्थिरीकरणत्वात्स्थविरः गर्गगोत्रोत्पन्नत्वाद्गार्ग्यः, मनुते-सर्वसावद्यविरमणस्य प्रतिज्ञां कुरुते इति मुनिः, पुनः कीदृशो गार्ग्यः ? विशारदः- सर्वशास्त्रनिपुणः, पुनः कीदृशः सः ? आकीर्ण - आचार्यगुणैर्व्याप्तः, पुनः कीदृशः सः ? गणिभावे-आचार्यत्वे स्थितः, पुनः स गार्ग्यो गणधरः समाधिं धत्ते, कुशिष्यैस्त्रोटितं ज्ञानदर्शनचारित्राणां समाधिं प्रतिसन्धय-तीत्यर्थः ॥ १ ॥

वहणे वहमाणस्स, कंतारं अइवत्तई ।
जोए य वहमाणस्स, संसारे अइवत्तई ॥ २ ॥

यथा यथा वाहने - शकटादौ विनीततुरगवृषभादीन् 'वहमाणस्स' इत्युह्यमानस्य सारथ्यादेः कान्तारमरण्यमतिवर्तते-सम्पूर्णं भवति, तथा योगे संयमव्यापारे सुशिष्यान् वाहयत आचार्यस्य संसारोऽतिवर्तते, शिष्याणां विनीतत्वं दृष्ट्वा स्वयं समाधिमान् जायते, शिष्यास्तु विनीतत्वेन स्वयं संसारमुल्लङ्घयन्ते एव । एवमुभयोर्विनीतशिष्यसदाचार्ययोर्योगः सम्बन्धः संसारच्छेदकर इति भावः ॥ २ ॥

खलुंके जो उ जोएइ, विहम्माणो किलिस्सई ।
असमाहिं च वेएई, तोत्तओ य से भज्जई ॥ ३ ॥

यस्तु सारथिः खलुङ्कान्-गलिवृषभान् योजयति, रथे स्थापयति, स सारथिः 'विहम्माणो' इति विशेषेण तान् खलुङ्कान् घ्नन्-प्राजनकेन ताडयन् सङ्क्लिश्यते, सङ्क्लेशं प्राप्नोति । अत एवाऽसमाधिमसातां वेदयते-प्राप्नोति । च पुनस्तस्य खलुङ्क-वृषभयोजयितुः पुरुषस्य तोत्रकः-प्राजनको भज्यते । खलुङ्कानामतिकुट्टनात्प्राजनको भज्यते इति भावः ॥ ३ ॥

एगं डसइ पुच्छंमि, एगं विंधइऽभिक्खणं ।
एगं भंजइ समिलं, एगो उप्पहपट्ठिओ ॥ ४ ॥

पुनः खलुङ्कवृषभस्वामी-रथारोहको रुष्टः सन् तं खलुङ्कं पुच्छे दन्तैर्दशति, एकः स

एवैकं गलिवृषभमभीक्ष्णं-वारंवारं विध्यति, प्राजनस्याऽऽरया व्यथति । एको गलिवृषभः समिलां युगकीलिकां भनक्ति, एकः पुनर्गलिवृषभ उत्पथमार्गं प्रस्थितो भवति ॥ ४ ॥

एगो पडइ पासेणं, निवेसइ निवज्जई ।
उक्कुद्दइ उप्फिडई, सढे बालगवीं वए ॥ ५ ॥

एको गलिस्ताडितः सन् पार्श्वेन वामदक्षिणभागेन पतति, अन्यः कश्चिद् भूमौ निविशते - नीचैस्तिष्ठति । एकः कश्चिन्निपद्यते स्वपिति, प्रलम्बो भूत्वा शेते, एक उत्कूर्दत्युच्छलति, च दर्दुरवच्चतुष्पालो भवति । अन्यः शठो भवति, धूर्तत्वमाचरति । अन्यः कश्चिद्गलिर्बलीवर्दो बालगवीं-लघिष्ठां धेनुं दृष्ट्वा तामनुव्रजति ॥ ५ ॥

माई मुद्धेण पडई, कुद्धे गच्छइ पडिपहं ।
मयलक्खेण चिट्ठइ, वेगेण य पहावई ॥ ६ ॥

एको मायी-मायावान् भूत्वा मस्तकं भूमौ निक्षिप्य पतति । एकः कश्चित् क्रुद्धः सन् प्रतिपथं, प्रतिकूलः पन्था प्रतिपथस्तं प्रतिपथम्, अग्रेतनमार्गं त्यक्त्वा पश्चान्मार्गं गच्छति । एकः कश्चिन्मृतलक्षेण तिष्ठति, मृतस्य लक्षणं कृत्वा तिष्ठति, निश्चेष्टो भूत्वा पततीत्यर्थः । यदा च पुनः कथञ्चित्सज्जीकृत्योत्थापितस्तदा वेगेन प्रधावति, अनया रीत्या धावति, यथा पश्चात्स्वामी ग्रहीतुं न शक्नोति ॥ ६ ॥

छिन्नाले छिंदई सेल्लिं, दुद्दंते भंजई जुगं ।
से वि य सुस्सुयाइत्ता, उज्जहित्ता पलायई ॥ ७ ॥

एकश्छिन्नालो-दुष्टजातीयः कश्चित् 'सेल्लिं' इति रश्मि-बन्धनरज्जुं छिनत्ति बलात् त्रोटयति, अन्यो दुर्दान्तो-दमितुमशक्यो युगं-जूसरं भनक्ति । 'सेवि' इति स च दुष्टो बलीवर्दः सुतरामतिशयेन सूत्कृत्यात्यन्तं फूत्कारं कृत्वा, उत्प्राबल्येन 'उज्जहित्ता' इति स्वामिनं शकटं वोन्मार्गे लात्वा कुत्रचिद्विषमप्रदेशे मुक्त्वा स्वयं पलायते ॥ ७ ॥

खलुंका जारिसा जोज्जा, दुस्सीसा वि हु तारिसा ।
जोइया धम्मजाणंमि, भज्जंति धिइदुब्बला ॥ ८ ॥

गार्ग्यनामाचार्य एवं वदति-भो मुनयः ! यथा लोके खलुङ्का अत्रोक्तलक्षणा गलिवृषभा योज्या रथस्याग्रे धुरि नोत्कृताः सन्तो यादृशा भवन्ति, रथारोहकस्याऽसमाधिक्लेशकरा भवन्ति, 'हु' इति निश्चयेनाचार्यस्यापि दुःशिष्या दुष्टाः शिष्या विनयरहिताः कुशिष्यास्तादृशा भवन्ति । धर्मयाने मुक्तिनगरप्रापकत्वेन संयमरथे योजिता व्यापारिता भज्यन्ते, संयमक्रियानुष्ठानात् स्खलन्ते, सम्यग् न प्रवर्तन्ते इत्यर्थः । कीदृशास्ते ? धृतिदुर्बला धैर्येण दुर्बला निर्बलचित्ताः, धर्मेऽस्थिरा इत्यर्थः ॥ ८ ॥

इड्ढिगारवए एगे, एगेऽत्थ रसगारवे ।
सायागारविए एगे, एगे सुचिरकोहणे ॥ ९ ॥
भिक्खालसिए एगे, एगे ओमाणभीरुए थद्धे ।
एगं च अणुसासम्मि, हेऊहिं कारणेहि य ॥ १० ॥ युग्मम् ॥

एकः कश्चिद् ऋद्धिगौरविकः, ऋद्धया गौरवमस्यास्तीति ऋद्धिगौरविकः मम श्राद्धा आढ्याः, मम श्राद्धा वश्याः, ममोपकरणं वस्त्रपात्रादि समीचीनम्, इत्यात्मानं बहुमानरूपं मनुते स ऋद्धिगौरविक उच्यते । एतादृशो गुर्वादेशे न प्रवर्तते । एकः कश्चित्पुनरत्र रसगौरविक आहारादिषु रसलोलुपः एतादृशो हि ग्लानाद्याहारदानतपसोर्न प्रवर्तते । एकः कश्चित्कुशिष्यः सातागौरविको भवति, सातागौरवे भवः सातागौरविकः, एतादृशो हि विहारं कर्तुं न शक्नोति । एकः कश्चित्कुशिष्यः सुचिरक्रोधनश्चिरं क्रोधकरणशीलः, एतादृशो हि तपः-क्रियानुष्ठानकरणे योग्यो न भवति ॥ ९ ॥ एकः कश्चिद्भिक्षालसिको भिक्षायामालस्ययुक्तः, तादृशो हि गोचरीपरीषहसहनयोग्यो न भवति । एकः कश्चिदपमानभीरुर्भवति, अपमानाद्भीरुरपमानभीरुः, एतादृशो हि यस्य तस्य गृहे न प्रविशति । एकः कश्चित् स्तब्धोऽहङ्कारी भवति, एतादृशो निजकुग्रहाद्विनयं कर्तुं न शक्नोति । एकं कुशिष्यं प्रति शिक्षादाने आचार्य एवं विचारयति, हेतुभिः कारणैरहमेनं कुशिष्यमनुशास्मि, कथमित्यध्याहारः, कथं शिक्षयिष्यामि ? आचार्य इति चिन्तापरो भवतीति भावः ॥ १० ॥

सोवि अंतरभासिल्लो, दोसमेव पकुव्वई ।
आयरियाणं तं वयणं, पडिकुलेइ अभिक्खणं ॥ ११ ॥

सोऽपि कुशिष्य आचार्येण शिक्षितः सन्नन्तरभाषावान्, गुरुवचनान्तराले एव स्वाभिमतभाषकः । पुनर्दोषमेवापराधमेव प्रकरोति, आचार्यस्य शिक्षायां दोषमेव प्रकाशयति, अपगुणग्राही भवतीत्यर्थः । पुनः स कुशिष्य आचार्याणां यद्वचनं तद्वचनं वारंवारं प्रतिकूलयति, सन्मुखं जल्पति । यदाचार्याः किञ्चिच्छिक्षावचनं वदन्ति, तदा सोऽभीक्ष्णं - मुहुरेवं वदति, किं मां यूयं वदत ? यूयमेव किं न कुरुथेत्यर्थः ॥ ११ ॥

न सा ममं वियाणाइ, नवि सा मज्झ दाहिई ।
निग्गया होहित्ति मन्ने, साहु अन्नोत्थ वच्चउ ॥ १२ ॥

तदाऽऽचार्यः कञ्चित्कुशिष्यं प्रति वदति-भो शिष्य ! अमुकस्य गृहस्थस्य गृहान्मह्यमाहाराद्यानीय देहि ? तदा स कुशिष्यो वदति, सा श्राद्धी 'ममं' इति मां न विजानाति, मां नोपलक्षति, सा श्राद्धी मह्यमाहारादिकं न दास्यति । अथवा स गुरुं प्रत्येवं वदति-हे गुरो ! अहमेवं मन्ये सा श्राद्धी निर्गता भविष्यति, स्वगृहादपरत्रेदानीं गता भविष्यति । अथवान्यः साधुरस्मिन् कार्ये व्रजतु, अहं न व्रजामीत्यर्थः ॥ १२ ॥

पेसिया पलिउंचंति, ते पलियंति समंतओ ।
रायवेट्ठिं व मन्नंता, करिंति भिउडिं मुहे ॥ १३ ॥

पुनस्ते कुशिष्या आचार्येण कुत्रचिद् गृहस्थगृहे आहाराद्यर्थं, गृहस्थस्याकारणाय वा प्रेषिताः सन्तः 'पलिउंचि' त्ति अपनिह्नुवन्त्यपलपन्ति । वयं भवद्भिः कुत्र मुक्ताः ? अस्माकं स न स्मरति, अथवा गृहस्थेन दत्तं मिष्टाहारादिकं गोपयन्ति, अथवोक्तं कार्यं न निष्पादयन्ति । अनुत्पादितमप्युत्पादितमिति वदन्ति, उत्पादितं चाऽनुत्पादितं वदन्ति । अथवा यत्र भवद्भिर्वयं प्रेषिताः, स गृही न कश्चिद् दृष्टः, इति पृष्टाः सन्तोऽपलपन्ति । पुनस्ते कुशिष्याः समन्ततः सर्वासु दिक्षु परियन्ति-पर्यटन्ति, गुरुपार्श्वे कदाचिन्नायान्ति, नोपविशन्ति । कदाचिद्वयं गुरूणां पार्श्वे स्थास्यामस्तदास्माकं किञ्चित्कार्यं कथयिष्यन्ति, इति मत्वान्यत्र भ्रमन्तीति भावः । कदाचित्कस्मिन् कार्ये गुरुभिः प्रेषितास्तदा राजवेष्टिमिव मन्यमानास्तत्कार्यं कुर्वन्ति । नृपस्य [1]वेष्टिः पतितेति जानन्तो मुखे भृकुटीं भ्रूभङ्गरचनां कुर्वन्ति अन्यामपीर्ष्यासूचिकां चेष्टां कुर्वन्तीति भावः ॥ १३ ॥

वाइया संगहिया चेव, भत्तपाणेण पोसिया ।
जायपक्खा जहा हंसा, पक्कमंति दिसोदिसिं ॥ १४ ॥

पुनस्ते कुशिष्या गुरुभिर्वाचिताः सूत्रं ग्राहिताः, शास्त्राभ्यासं कारयित्वा पण्डितीकृताः, पुनः सङ्गृहीताः सम्यक् स्वनिश्रायां रक्षिताः, पुनर्भक्तपानैः पोषिताः पुष्टिं नीताः, चकारद्दीक्षिताः स्वयमेवोपस्थापिताः, पश्चात्ते कार्ये सृते दिशि दिशि प्रक्रमन्ति, यथेच्छं विहरन्ति ते कुशिष्याः । के इव ? यथा जातपक्षा हंसाः, जाताः पक्षास्तनूरुहाणि येषां ते जातपक्षा हंसा इव । यथोत्पन्नपक्षा हंसाः स्वजननीं जनकं च त्यक्त्वा दशसु दिक्षु व्रजन्ति, तथा ते कुशिष्या अपीति भावः ॥ १४ ॥

अह सारही विचिंतेइ, खलुंकेहिं समं गओ ।
किं मज्झ दुट्ठसीसेहिं, अप्पा मे अवसीयई ॥ १५ ॥

अथानन्तरं सारथिर्गर्गाचार्यो धर्मयानस्य प्रेरकश्चेतसि चिन्तयति, खलुङ्कैर्गलिवृषभसदृशैः कुशिष्यैः समं गतः-सहितः, किं चिन्तयति ? एभिर्दुष्टशिष्यैः प्रेरितैः सद्भिः 'किं मज्झ' इति किमैहिकामुष्मिकफलं वा मम प्रयोजनं सिद्ध्यति ? दुष्टशिष्यैः प्रेरितैः केवलं 'मे' ममात्मैवाऽवसीदति, तेषां प्रेरणात्स्वकृत्यहानिरेव भविष्यति, नान्यत्किमपि फलम् । तत एतेषां कुशिष्याणां त्यागेन मयोद्यतविहारिणैव भाव्यमिति चिन्तयति ॥ १५ ॥

---

१ मजूरी आप्या विना जबरदस्ती करावातु काम ।

जारिसा मम सीसाओ, तारिसा गलिगद्दहा ।
गलिगद्दहे चइत्ताणं, दढं पगिण्हई तवं ॥ १६ ॥

पुनः स आचार्यश्चिन्तयति, यादृशा मम शिष्याः सन्ति, तादृशा गलिगर्दभा भवन्ति । अत्र गलिगर्दभदृष्टान्तेन शिष्याणामत्यन्तनिन्दा सूचिता । ते हि गलिगर्दभाः स्वरूपतोऽप्यति-प्रेरणयैव प्रवर्त्तन्ते, तेषां तथैव कालो याति । ततः गर्गाचार्यो गलिगर्दभसदृशान् कुशिष्यां-स्त्यक्त्वा दृढं यथास्यात्तथा तपो बाह्यमभ्यन्तरं च प्रगृह्णाति, प्रकर्षेणाङ्गीकरोति । तु शब्दः-पादपूरणे । यदैतान् कुशिष्यानहं न त्यक्ष्यामि, तदा मदीयः कालः क्लेशे एव प्रयास्यतीत्या-चार्यो विचारयति ॥ १६ ॥

मिउ मद्दवसंपन्ने, गंभीरे सुसमाहिए ।
विहरइ महिं महप्पा, सीलभूएण अप्पणा ॥ १७ ॥त्तिबेमि ॥

स गार्ग्य आचार्यस्तदेदृशः सन् महीं-पृथिवीं ग्रामानुग्रामं विहरति । कीदृशः सः ? मृदुर्बहिर्वृत्त्या विनयवान्, पुनः कीदृशः ? मार्दवसम्पन्नोऽन्तःकरणेऽपि कोमलतायुक्तः, पुनः कीदृशः ? गम्भीरोऽलब्धमध्यः, पुनः कीदृशः ? सुसमाहितः, सुतरामतिशयेन समाधि-सहितः, पुनः कीदृशः ? शीलभूतेनात्मनोपलक्षितः, शीलं चारित्रं भूतः प्राप्तो यः स शीलभूतः, तेन शीलभूतेन, शीलयुक्तेनात्मना सहितः, यतो हि खलुङ्कत्वं-कुशिष्यत्वं, तत्त्वविनीतत्त्वं, तच्च स्वस्य गुरोश्च दोषहेतुरस्ति, अतोऽविनीतत्त्वं त्यक्त्वा विनीतत्वमङ्गी-कर्तव्यमिति भावः । इत्यहं ब्रवीमीति सुधर्मास्वामी जम्बूस्वामिनं प्राह ॥ १७ ॥

इति खलुङ्कीयाख्यं सप्तविंशतितममध्ययनं सम्पूर्णम् ॥ २७ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्त्तिगणिशिष्यलक्ष्मीवल्लभगणिविर-चितायां खलुङ्कीयाख्यं सप्तविंशतितममध्ययनं सम्पूर्णम् ॥ २७ ॥

२८ मोक्षमार्गीयाख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययनेऽशठस्य मोक्षमार्गप्राप्तिः स्यात्, अतो मोक्षमार्गप्राप्तिविधायकमध्ययनमष्टाविंशं प्रारभ्यते-

मोक्खमग्गगइं तच्चं, सुणेह जिणभासियं ।
चउकारणसंजुत्तं, नाणदंसणलक्खणं ॥ १ ॥

श्रीसुधर्मास्वामी जम्बूस्वाम्यादीन् शिष्यान् वदति, भो मुनयः ! मोक्षमार्गगतिं यूयं श्रृणुत । मोक्षोऽष्टकर्मणां नाशस्तस्य मार्गो ज्ञानादिर्मोक्षमार्गस्तेन गतिः सिद्धिगमनरूपा मोक्षमार्गगतिस्तां मोक्षमार्गगतिं यूयं श्रृणुत । कीदृशीं मोक्षमार्गगतिं ? जिनभाषितां-जिनोक्ताम्, पुनः कीदृशीं ?'तच्चं' इति तथ्यामवितथां-सत्यां तत्त्वरूपाम्, पुनः कीदृशीं ? चतुर्भिः कारणैः संयुक्तां चतुष्कारणसंयुक्ताम्, पुनः कीदृशीं ? ज्ञानदर्शनलक्षणां, ज्ञानं च दर्शनं च लक्षणं स्वरूपं यस्याः सा ज्ञानदर्शनलक्षणा, ताम् ॥ १ ॥

अथ तानि चतुष्कारणान्याह-

नाणं च दंसणं चेव, चरित्तं च तवो तहा ।
एस मगुत्ति पन्नत्तो, जिणेहिं वरदंसिहिं ॥ २ ॥

एष चतुष्कारणरूपो मोक्षमार्गो जिनैः केवलिभिस्तीर्थकरैश्च प्रज्ञप्तः-कथितः, कीदृशैर्जिनैः ? वरदर्शिभिः, वरमव्यभिचारित्वेन वस्तुस्वरूपं द्रष्टुं शीलं येषां ते वरदर्शिनः तैर्वरदर्शिभिः, सम्यग्ज्ञानदर्शनवद्भिरित्यर्थः । अथ चतुर्णां कारणानां नामानि-प्रथमं कारणं ज्ञानं यथास्वरूपस्थानां वस्तूनां विशेषेणावबोधो ज्ञानम्, ज्ञायतेऽनेनेति ज्ञानम्, तदिह सम्यग्ज्ञानमुच्यते । च पुनर्द्वितीयं कारणं दर्शनं, वस्तूनां यथास्वरूपस्थानां सामान्यप्रकारेणावबोधो दर्शनम्, दृश्यतेऽनेनेति दर्शनम्, तदप्यत्र सम्यग्दर्शनमुच्यते । चैवशब्दः पादपूरणे । विशेषावबोधात्मकं ज्ञानं, सामान्यावबोधात्मकं दर्शनमिति ज्ञानदर्शनयोर्भेदः । च पुनस्तृतीयं कारणं चारित्रम्, चर्यते प्राप्यते मोक्षोऽनेनेति चारित्रं संयमरूपम्, चरित्रमेव चारित्रम्, तदिह सम्यक्चारित्रमेव ज्ञेयम् । तथा चतुर्थं तपःकारणम्, तप्यते कर्मवर्गोऽनेनेति तपः, येन कर्मवर्गः प्रज्वलति तत्तपो द्वादशविधम् । अत्र तपसश्चारित्रात्पृथगुपादानं कर्मक्षये तपसोऽसाधारणकारणत्वख्यापनार्थम् ॥ २ ॥

एतदनुवादद्वारेण फलमाह-

नाणं च दंसणं चेव, चरित्तं च तवो तहा ।
एयमग्गमणुपत्ता, जीवा गच्छंति सुग्गइं ॥ ३ ॥

जीवा भव्यजीवा इमं मार्गमनुप्राप्ताः सन्तः सद्गतिं-मोक्षगतिं गच्छन्ति । इमं मार्गं कं ? ज्ञानं च पुनर्दर्शनं, च पुनश्चारित्रं, तथा तपो जिनाज्ञाशुद्धं द्वादशविधमित्यनेन ज्ञानदर्शनचारित्र-तपांसि मोक्षमार्गः, ये पुरुषा अत्र सावधानास्ते मोक्षगामिनो ज्ञेया इति भावः ॥ ३ ॥

तत्थ पंचविहं नाणं, सुयं आभिणिबोहियं ।
ओहिनाणं च तइयं, मणनाणं च केवलं ॥ ४ ॥

तत्र ज्ञानादिषु मध्ये पञ्चविधं-पञ्चप्रकारं ज्ञानं कथितम् । तान् प्रकारानाह-प्रथमं श्रुतं श्रुतज्ञानम्, अक्षरशब्दात्मकं द्वादशाङ्गीरूपम्, श्रूयते यत्तत् श्रुतं-श्रुतज्ञानं भावश्रुतं गृह्यते । द्वितीयमाभिनिबोधिकं, अभिमुखो नियतः स्वस्य विषयस्य बोधो यस्मात्सोऽभिनि-बोधः, अभिनिबोध एवाभिनिबोधिकम् । आभिनिबोधिकशब्देन मतिज्ञानमुच्यते । पञ्चे-न्द्रियैः समनस्कैरुत्पन्नमित्यर्थः । तृतीयमवधिज्ञानम्, अवेत्यधोऽधो विस्तारभावेन धावतीत्य-वधिर्मर्यादा, अवधिनोपलक्षितं ज्ञानमवधिज्ञानमुच्यते । कोऽर्थः ? यद् ज्ञानं मर्यादासहितं स्यात्, तत्तृतीयं ज्ञानम् । अथ चतुर्थं मनोज्ञानं, मनः शब्देन मनोद्रव्यपर्यायाः, तेषु मनोद्रव्य-पर्यायेषु मनोद्रव्यपर्यायाणां नामभेदकारणज्ञानं मनोज्ञानम् । यस्य कस्यचिन्मनः पुद्गला यादृक्स्वभावेन वर्तन्ते, तेषां तादृग्प्रकारेण ज्ञानं मनःपर्यायज्ञानमित्यर्थः । पञ्चमं केवलमेकं सकलमनन्तं च ज्ञानं केवलज्ञानं, केवलं च तद् ज्ञानं च केवलज्ञानं, यस्योदये सत्यन्येषां ज्ञानानामकिञ्चित्करत्वं भवतीति भावः । यद्यपि [1]नन्दीसूत्रादौ पूर्वं मतिज्ञानमुक्तम्, अत्र चादौ श्रुतग्रहणं कृतं, तच्छेषज्ञानानां स्वरूपं श्रुतज्ञानेनैव ज्ञेयत्वात्सर्वाण्यपि ज्ञानानि श्रुतज्ञानानीत्यर्थः ॥ ४ ॥

एयं पंचविहं नाणं, दव्वाण य गुणाण य ।
पज्जवाणं च सव्वेसिं, नाणं नाणीहि देसियं ॥ ५ ॥

एतत्पञ्चविधं ज्ञानं सर्वेषां द्रव्याणां गुणानां पर्यायाणां च यद् ज्ञानं तद् ज्ञानिभिः केवलिभिर्देशितं-कथितम् । ज्ञायते यत्तद् ज्ञानमिति भावव्युत्पत्तिः ॥ ५ ॥

अथ द्रव्यलक्षणमाह-

गुणाणमासयो दव्वं, एगदव्वसिया गुणा ।
लक्खणं पज्जवाणं तु, उभओ अस्सिया भवे ॥ ६ ॥

गुणानां रूपरसस्पर्शादीनामाश्रयः स्थानं द्रव्यम्, [2]यत्र गुणा उत्पद्यन्तेऽवतिष्ठन्ते विलीयन्ते च तद् द्रव्यं, इत्यनेन रूपादिवस्तु द्रव्यात् सर्वथाऽतिरिक्तमपि नास्ति । द्रव्ये एव रूपादिगुणा लभ्यन्त इत्यर्थः । गुणा ह्येकद्रव्याश्रिताः, एकस्मिन् द्रव्ये आधारभूते

१ णाणं पंचविहं पण्णत्तं । तं जहा-आभिणिबोहियणाणं १, सुयनाणं २, ओहिनाणं ३, मणपज्जवनाणं ४, केवलणाणं ५, ॥ नन्दीसूत्रे-सूत्र-८ ॥

२ उत्पादव्ययध्रौव्यं युक्तं सत् । तत्त्वार्थसूत्रे ५/३० ॥

आधेयत्वेनाश्रिता एकद्रव्याश्रितास्ते गुणा उच्यन्ते । इत्यनेन ये केचिद् द्रव्यमेवेच्छन्ति, तद्व्यतिरिक्तान् रूपादीन् नेच्छन्ति, तेषां मतं निराकृतम्, तस्माद्रूपादीनां गुणानां द्रव्येभ्यो-ऽभेदोऽप्यस्ति । तु पुनः पर्यायाणां नवपुरातनादिरूपाणां भावानामेतल्लक्षणं ज्ञेयम् । एतल्लक्षणं किं ? पर्याया ह्युभयाश्रिता भवेयुः, उभयोर्द्रव्यगुणयोराश्रिता उभयाश्रिताः, द्रव्येषु नवीननवीनपर्याया नाम्नाऽऽकृत्या च भवन्ति । गुणेष्वपि नवपुराणादिपर्यायाः प्रत्यक्षं दृशयन्ते एव ॥ ६ ॥

पूर्वं द्रव्यभेदानाह-

धम्मो १ अधम्मो २ आगासं ३, कालो ४ पुग्गल ५ जंतवो ।
एस लोगुत्ति पन्नत्तो, जिणेहिं वरदंसिहिं ॥ ७ ॥

धर्म इति धर्मास्तिकायः १, अधर्म इत्यधर्मास्तिकायः २, आकाशमित्याकाशास्ति-कायः ३, कालः समयादिरूपः ४, 'पुग्गलत्ति' पुद्गलास्तिकायः ५, जन्तव इति जीवाः ६, एतानि षट् द्रव्याणि ज्ञेयानीत्यन्वयः । एष इति सामान्यप्रकारेणोत्येवंरूप उक्तः षट्द्रव्यात्मको लोको जिनैः प्रज्ञप्तः-कथितः । कीदृशैर्जिनैः ? वरदर्शिभिः सम्यक् यथास्थितवस्तुरूपज्ञैः ॥७॥

धर्मादिभेदानाह-

धम्मो १ अधम्मो २ आगासं ३, दव्वं इक्किक्कमाहियं ।
अणंताणि य दव्वाणि, कालो पुग्गल जंतवो ॥ ८ ॥

धर्मः १, अधर्मः २, आकाशं ३, द्रव्यमिति प्रत्येकं योज्यम् । धर्मद्रव्यमधर्मद्रव्य-माकाशद्रव्यं चेत्यर्थः । एतद् द्रव्यत्रयमेकैकमित्येकत्वयुक्तमेव तीर्थकरै-राख्यातम्, अग्रेतनानि त्रीणि द्रव्याण्यनन्तानि स्वकीयस्वकीयानन्तभेदयुक्तानि भवन्ति । तानि त्रीणि द्रव्याणि कानि ? कालः समयादिरनन्तः, अतीतानागताद्यपेक्षया, पुद्गला अप्यनन्ताः, जन्तवो-जीवा अप्यनन्ता एव ॥ ८ ॥

अथ षट्द्रव्याणां लक्षणमाह-

गइलक्खणो उ धम्मो, अहम्मो ठाणलक्खणो ।
भायणं सव्वदव्वाणं, नहं उग्गहलक्खणं ॥ ९ ॥

धर्मो-धर्मास्तिकायो गतिलक्षणो ज्ञेयः लक्ष्यते ज्ञायतेऽनेनेति लक्षणम् । एकस्मा-द्देशाज्जीवपुद्गलयोर्देशान्तरं प्रति गमनं गतिः, गतिरेव लक्षणं यस्य स गतिलक्षणः । अधर्मो-ऽधर्मास्तिकायः स्थितिलक्षणो ज्ञेयः, स्थितिः स्थानं गतिनिवृत्तिः, सैव लक्षणमस्येति स्थानलक्षणोऽधर्मास्तिकायो ज्ञेयः, स्थितिपरिणतानां जीवपुद्गलानां स्थितिलक्षणकार्येण ज्ञायते सोऽधर्मास्तिकायः । यत्पुनः सर्वद्रव्याणां जीवादीनां भाजनमाधाररूपं नभ-आकाशमुच्यते, तच्च नभोऽवगाहलक्षणम् अवगाढुं प्रवृत्तानां जीवपुद्गलानामालम्बो भवतीत्यवगाहोऽवकाशः, स एव लक्षण यस्य तदवगाहलक्षणं नभ उच्यते ॥ ९ ॥

वत्तणालक्खणो कालो, जीवो उवओगलक्खणो ।
नाणेणं दंसणेणं च, सुहेण य दुहेण य ॥ १० ॥

वर्ततेऽनवच्छिन्नत्वेन निरन्तरं भवतीति वर्तना, सा वर्तनैव लक्षणं-लिङ्गं यस्येति वर्तनालक्षणः काल उच्यते । तथोपयोगो मतिज्ञानादिकः, स एव लक्षणं यस्य स उपयोगलक्षणो जीव उच्यते । यतो हि ज्ञानादिभिरेव जीवो लक्ष्यते, उक्तलक्षणत्वात् । पुनर्विशेषलक्षणमाह-ज्ञानेन विशेषावबोधेन, च पुनर्दर्शनेन सामान्यावबोधरूपेण, च पुनः सुखेन, च पुनर्दुःखेन च ज्ञायते स जीव उच्यते ॥ १० ॥

पुनर्लक्षणान्तरमाह-

नाणं च दंसणं चेव, चरित्तं च तवो तहा ।
वीरियं उवओगो य, एयं जीवस्स लक्खणं ॥ ११ ॥

ज्ञानं, ज्ञायतेऽनेनेति ज्ञानम्, च पुनर्दृश्यतेऽनेनेति दर्शनं, च पुनश्चारित्रं क्रियाचेष्टादिकं, तथा तपो द्वादशविधं, तथा वीर्यं वीर्यान्तिरायक्षयोपशमादुत्पन्नं सामर्थ्यं, पुनरुपयोगो ज्ञानादिष्वेकाग्रत्वं, एतत्सर्वं जीवस्य लक्षणम् ॥ ११ ॥

अथ पुद्गलानां लक्षणमाह-

सद्दंधयारउज्जोओ, पहा छायातवेइ वा ।
वन्नगंधरसा फासा, पुग्गलाणं तु लक्खणं ॥ १२ ॥

शब्दो ध्वनिरूपपौद्गलिकः, तथान्धकारं, तदपि पुद्गलरूपं, तथोद्योतो रत्नादीनां प्रकाशः, तथा प्रभा चन्द्रादीनां प्रकाशः, तथा छाया वृक्षादीनां छाया शैत्यगुणा, तथाऽऽतपो रवेरुष्णप्रकाशः, इति पुद्गलस्वरूपम् । तु शब्दः समुच्चये । वर्णगन्धरसस्पर्शाः पुद्गलानां लक्षणं ज्ञेयम् । वर्णाः शुक्लपीतहरितरक्तकृष्णादयः, गन्धो दुर्गन्धसुगन्धात्मको गुणः । रसाः षट् तिक्तकटुककषायाम्लमधुरलवणाद्याः, स्पर्शाः शीतोष्णखरमृदुस्निग्धरूक्षलघुगुर्वादयः । एते सर्वेऽपि पुद्गलास्तिकायस्कन्धलक्षणवाच्या ज्ञेया इत्यर्थः । एभिर्लक्षणैरेव पुद्गला लक्ष्यन्ते इति भावः ॥ १२ ॥

अथ पर्यायलक्षणमाह-

एगत्तं च पुहत्तं च, संखा संठाणमेव य ।
संजोगा य विभागा य, पज्जवाणं तु लक्खणं ॥ १३ ॥

एतत्पर्यायाणां लक्षणम्, एतत्किं ? एकत्वं भिन्नेष्वपि परमाण्वादिषु यदेकोऽयमिति बुद्ध्या घटोऽयमिति प्रतीतिहेतुः । च पुनः पृथक्त्वम्, अयमस्मात्पृथग्, घटः पटाद्भिन्नः,

पटो घटाद्भिन्नः, इति प्रतीतिहेतुः । सङ्ख्या, एको द्वौ बहव इत्यादिप्रतीतिहेतुः । च पुनः संस्थानमेव, वस्तूनां संस्थानमाकारश्चतुरस्रवर्त्तुलतिस्रादिप्रतीतिहेतुः । च पुनः संयोगाः, अयमङ्गुल्याः संयोग इत्यादिव्यपदेशहेतवः । विभागाः अयमतो विभक्त इति बुद्धिहेतवः । एतत्पर्यायाणां लक्षणं ज्ञेयम् । संयोगा विभागा इति बहुवचनान्नवपुराणत्वाद्यवस्था ज्ञेयाः । लक्षणं त्वसाधारणरूपम्, गुणानां लक्षणं रूपादि प्रतीतत्वान्नोक्तम्, ॥ १३ ॥

अथ दर्शनलक्षणमाह नवतत्त्वद्वारेण-

जीवाजीवा य बंधो य, पुन्नं पावासवो तहा ।
संवरो निज्जरा मुक्खो, संति ए तहिया नव ॥ १४ ॥

जीवाश्चेतनालक्षणाः, अजीवा धर्माधर्माकाशकालपुद्गलरूपाः, बन्धोजीवकर्मणोः संश्लेषः, पुण्यं शुभप्रकृतिरूपं, पापमशुभं मिथ्यात्वादि, आश्रवः कर्मबन्धहेतुर्हिंसामृषाऽदत्तमैथुनपरिग्रहरूपः, तथा संवरः समितिगुप्त्यादिभिराश्रवद्वारनिरोधः, निर्जरा तपसा पूर्वार्जितानां कर्मणां परिशाटनम्, मोक्षः सकलकर्मक्षयादात्मस्वरूपेणात्मनोऽवस्थानम् । एते नवसङ्ख्याकास्तथ्या अवितथा भावाः सन्तीति सम्बन्धः । नवसङ्ख्यात्वं ह्येतेषां भावानां मध्यमापेक्षम् । जघन्यतो हि जीवाजीवयोरेव बन्धादीनामन्तर्भावाद् द्वयोरेव सङ्ख्यास्ति । उत्कृष्टतस्तु तेषामुत्तरोत्तरभेदविवक्षयाऽनन्तत्वं स्यात् ॥ १४ ॥

तहियाणं तु भावाणं, सब्भावे उवएसणं ।
भावेण सद्दहंतस्स, सम्मत्तं तं वियाहियं ॥ १५ ॥

अर्हद्भिस्तस्य पुरुषस्य सम्यक्त्वं सम्यग्भावोऽर्थाद्दर्शनं व्याख्यातं कथितमित्यर्थः । कीदृशस्य पुरुषस्य ? तथ्यानां सत्यानां भावानां जीवाजीवादितत्त्वानां सद्भावे-सद्भावविषये उपदेशेन-गुरूणां शिक्षावाक्येन भावेन शुद्धमनसा श्रद्दधानस्य, तथेत्यङ्गीकुर्वाणस्य, यो हि जीवादिपदार्थान् सम्यग्जानाति, भावेन च श्रद्दधाति, स पुमान् सम्यक्त्ववानित्यर्थः ॥१५॥

अथ सम्यक्त्वभेदानाह-

निस्सग्गु १ वएसरुई २, आणारुइ ३ सुत्त ४ बीयरुइमेव ।
अभिगम ६ विच्छाररुई ७, किरिया ८ संखेव ९ धम्मरुई १० ॥ १६ ॥

एते दश भेदाः सम्यक्त्वस्य ज्ञेयाः । तत्र प्रथमो निसर्गरुचिः, निसर्गः स्वभावस्तेन रुचिस्तत्त्वानामभिलाषो यस्य स निसर्गरुचिर्विज्ञेयः १ । द्वितीय उपदेशरुचिः, उपदेशेन गुरुक्तेन रुचिर्यस्य स उपदेशरुचिः, यदा गुरुर्धर्ममुपदिशति, तदैकाग्रचित्तो यः श्रृणोति स उपदेशरुचिर्द्वितीयो ज्ञेयः २ । तृतीय आज्ञया सर्वज्ञवचनेन रुचिर्यस्य स आज्ञारुचिर्विज्ञेयः ३ । सूत्रेणागमेनैव रुचिर्यस्य स सूत्ररुचिश्चतुर्थो ज्ञेयः ४ । पञ्चमो बीजरूचिः, बीजेन

रुचिर्यस्य स बीजरुचिः, बीजं ह्येकमप्यनेकार्थप्रबोधकं वचनं, तेन रुचिर्यस्येति बीजरुचिः ५। अभिगमरुचिः षष्ठः, अभिगमेन ज्ञानेन रुचिर्यस्य सोऽभिगमरुचिः ६। सप्तमो विस्तार-रुचिः, विस्तारेण रुचिर्यस्य स विस्ताररुचिः ७। तथा क्रियारुचिः, क्रियया धर्मानुष्ठानेन रुचिर्यस्य स क्रियारुचिरष्टमो ज्ञेयः ८। तथा सङ्क्षेपरुचिः, सङ्क्षेपेण-सङ्ग्रहेण रुचिर्यस्य स सङ्क्षेपरुचिर्नवमः ९। तथा धर्मेण श्रुतधर्मेण रुचिर्यस्य स धर्मरुचिः, श्रुतधर्माभ्यास-रुचिर्दशमः १०। यद्यपि सम्यक्त्वस्य जीवाद्भेदो नास्ति, जीवस्य स्वरूपं सम्यक्त्वम्, तथापि लक्ष्य-लक्षणयोर्गुणगुणिनोः कथनमात्रेण कथञ्चिद्भेदोऽप्यस्ति ॥ १६ ॥

अथ सम्यक्त्वभेदान्नाममात्रेणोक्त्वा विस्तरेणाह-

भूयत्थेणाहिगया, जीवाजीवा य पुण्णपावं च ।
सहसंमुइयासवसंवरो य, रोएइ उ निसग्गो ॥ १७ ॥

स निसर्गरुचिः कथ्यते, यत्तदोर्नित्याभिसम्बन्धात्, स इति कः ? येन जीवा अजीवाश्च, पुण्यं पापं च, एते पूर्वोक्ता भावा भूतार्थेन-सत्यार्थेनाधिगताः, भूतः सद्भूतोऽर्थो विषयो यस्य तद् भूतार्थं ज्ञानमुच्यते। तेनामी जीवादयो भावाः सद्भूताः सन्तीति कृत्वा गृहीताः। च पुनः पूर्वोक्ता जीवाजीवाः, पुण्यपापं च, पुनराश्रवसंवरौ, चशब्दाद् बन्धमोक्षौ, इत्यादि नवापि भावान् सह संमत्या सहात्मना सङ्गता मतिः सहसंमति-स्तथा सह संमत्या-स्वबुद्ध्या परोपदेशं विना जातिस्मृत्यादिविशदबुद्ध्या यस्मै रोचन्ते स निसर्गरुचिः सम्यक्त्ववानुच्यते ॥ १७ ॥

अमुमेवार्थं पुनराह-

जो जिणुद्दिट्ठभावे, चउव्विहे सद्दहाइ सयमेव ।
एमेव नन्नहत्ति य, स निसग्गरुइत्ति नायव्वो ॥ १८ ॥

स निसर्गरुचिर्ज्ञातव्यः, स इति कः ? यश्चतुर्विधान् द्रव्यक्षेत्रकालभावरूपान् जिनोद्दिष्टान् भावान्-जिनोक्तान् पदार्थान् स्वयमेव परोपदेशं विनैव श्रद्दधाति मनसि धारयति, पुनर्यो जिनोक्तेषु तत्त्वेष्वेवमेवैतत्, यथा जिनैर्दृष्टं जीवादि तत्तथैवेति, नान्यथेति बुद्धिं कुरुते, स निसर्गरुचिरुच्यते ॥ १८ ॥

अथोपदेशरुचेः स्वरूपमाह-

एए चेव हु भावे, उवइट्ठे जो परेण सद्दहई ।
छउमत्थेण जिणेण य, उवएसरुइ त्ति नायव्वो ॥ १९ ॥

स उपदेशरुचिरिति ज्ञातव्यः, स इति कः ? य एतांश्चैव भावान् जीवाजीवादीन् परेणान्येन छद्मस्थेन, वाऽथवा जिनेन केवलिना तीर्थकरेणोपदिष्टान् श्रद्दधाति, हुशब्दो निश्चये, चेवशब्दः पादपूरणे ॥ १९ ॥

अथाज्ञारुचेः स्वरूपमाह-

रागो दोसो मोहो, अन्नाणं जस्स अवगयं होइ ।
आणाए रोयंतो, सो खलु आणारुई नाम ॥ २० ॥

स खलु निश्चयेनाज्ञारुचिर्नामेति प्रसिद्धो भवति । स इति कः ? यस्य रागः स्नेहः, द्वेषोऽप्रीतिः, मोहः शेषमोहनीयप्रकृतयः, अज्ञानं मिथ्यात्वरूपम्, एतत्सर्वं नष्टं भवति, अस्य देशतोऽपगतं गम्यते, न सर्वतः अपगतशब्दस्य प्रत्येकं सम्बन्धः । यस्य रागो देशतोऽपगतः, यस्य द्वेषोऽपि देशतोऽपगतः, यस्य मोहोऽपि देशतोऽपगतः, यस्याज्ञानं देशतोऽपगतं, एतेषामपगमादाज्ञया आचार्याद्युपदेशेन रोचमानजीवाजीवादितत्त्वं तथेति प्रतिपद्यमानो यो भवति, स आज्ञारुचिरित्यर्थः । अत्र माषतुषदृष्टान्तः, 'मा रूस, मा तुसे' ति स्थाने माषतुषेति दृष्टान्तोऽस्ति ॥ २० ॥

जो सुत्तमहिज्जंतो, सुएण ओगाहई उ सम्मत्तं ।
अंगेण बाहिरेण य, सो सुत्तरुइत्ति नायव्वो ॥ २१ ॥

स सूत्ररुचिर्ज्ञातव्यः, स इति कः ? यः सूत्रमागममधीयानः पठन् सन् सूत्रेणागमेन सम्यक्त्वमवगाहते प्राप्नोति । कीदृशेन सूत्रेण ? अङ्गेनाचाराङ्गादिना, अथवा 'बाहिरेण' बाह्येनानङ्गप्रविष्टेनोत्तराध्ययनादिना सम्यक्त्वं गोविन्दवाचकवल्लभते, स सूत्ररुचिर्ज्ञेयः ॥२॥

अथ बीजरुचेः स्वरूपमाह-

एगेण अणेगाइं, पयाई जो पसरइ उ सम्मत्तं ।
उदएव्व तिल्लबिंदू, सो बीयरुइत्ति नायव्वो ॥ २२ ॥

स बीजरुचिरिति ज्ञातव्यः, स इति कः ? यः 'सम्मत्तं' इति सम्यक्त्ववान्, गुणगुणिनोरभेदोपचारात् सम्यक्त्वशब्देन सम्यक्त्वधार्यात्मैव गृह्यते, तस्माद्यः सम्यक्त्वी एकेन पदेन जीवादिना, अनेकेषु बहुषु पदेषु जीवादिषु तु निश्चयेन प्रसरति, व्यापकबुद्धिमत्त्वेन जानातीत्यर्थः । कस्मिन् क इव ? उदके तैलबिन्दुरिव, यथोदकस्यैकदेशतो गतोऽपि तैलबिन्दुः सर्वमुदकमाक्रामति, तथा तत्त्वैकदेशोत्पन्नरुचिरप्यात्मा तथाविधक्षयोपशमादशेषेषु तत्त्वेषु रुचिमान् भवति, स एवंविधो बीजरुचिर्ज्ञातव्य इत्यर्थः । यथा बीजमेकमपि क्रमेणानेकबीजानां जनकं स्यात्, तथास्यापि रुचिर्विषयभेदतो रुच्यन्तराणां जनयित्री स्यादिति भावः ॥ २२ ॥

अथाभिगमरुचेः स्वरूपमाह-

सो होइ अभिगमरुई, सुअनाणं जेण अत्थओ दिट्ठं ।
एक्कारसअंगाई, पईन्नगं दिट्ठिवाओ य ॥ २३ ॥

सोऽभिगमरुचिर्भवति । स इति कः ? येन श्रुतज्ञानमर्थतोऽर्थमाश्रित्य दृष्टं, येन श्रुतज्ञानस्यार्थोऽधिगतो भवति । किं तत् श्रुतज्ञानमित्याह-एकादशाङ्गान्याचाराङ्गादीनि, तथा प्रकीर्णकमिति जातित्वादेकवचनम् । प्रकीर्णकान्युत्तराध्ययनादीनि, दृष्टिवादः परिकर्मसूत्रादिः, चशब्दादुपाङ्गान्युपपातिकादीनि, सर्वाणि येनार्थतो ज्ञातानि भवन्ति, सोऽभिगमरुचिर्भवतीत्यर्थः ॥ २३ ॥

अथ विस्ताररुचेः स्वरूपमाह-

दव्वाण सव्वभावा, सव्वपमाणेहिं जस्स उवलद्धा ।
सव्वाहि नयविहीहि य, वित्थाररुइत्ति नायव्वो ॥ २४ ॥

स विस्ताररुचिरिति ज्ञातव्यः । स इति कः ? यस्य पुरुषस्य द्रव्याणां धर्मास्तिकायादीनां सर्वे भावाः, एकत्वपृथक्त्वसंयोगविभागादिसमस्तपर्यायाः सर्वप्रमाणैः प्रत्यक्षाऽनुमानोपमानाऽऽगमैश्च पुनः सर्वैर्नयविधिभिर्नैगम-सङ्ग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढैवंभूतैरुपलब्धा यथारूपेण ज्ञाताः सन्ति, स विस्ताररुचिर्विज्ञेय इत्यर्थः ॥ २४ ॥

अथ क्रियारुचिस्वरूपमाह-

दंसणनाणचरित्ते, तवविणए सच्चसमिइगुत्तीसु ।
जो किरिया भावरुई, सो खलु किरियारुई नाम ॥ २५ ॥

स खलु निश्चयेन क्रियारुचिर्नाम प्रसिद्धो ज्ञेयः । स इति कः ? यः पुरुषो दर्शनज्ञानचारित्रे, तथा तपोविनये क्रियाभावरुचिर्भवति, तथा सत्यसमिति गुप्तिषु क्रियाभावरुचिर्भवति । दर्शनं च ज्ञानं च चारित्रं च दर्शनज्ञानचारित्रम्, तस्मिन् । तपांसि च विनयाश्च तेषां समाहारस्तपोविनयम्, तस्मिंस्तपोविनये । तपस्सु द्वादशविधेषु, तथा विनयेष्वाचार्यादीनां भक्तिषु, तथा सत्या याः समितयः सत्यसमितयस्तासु सत्यसमितिषु । क्रियायां दर्शनज्ञानचारित्रतपोविनयसत्यसमितीनामाराधनानुष्ठानविधौ भावेन रुचिर्यस्य स क्रियाभावरुचिः ॥२५॥

अथ सङ्क्षेपरुचिस्वरूपमाह-

अणभिग्गहियकुदिट्ठी, संखेवरुइ त्ति होइ नायव्वो ।
अविसारओ पवयणे, अणभिग्गहिओ य सेसेसु ॥ २६ ॥

स सङ्क्षेपरुचिर्भवतीति ज्ञातव्यः । स इति कः ? योऽनभिगृहीतकुदृष्टिः, अनभिगृहीताऽनङ्गीकृता कुदृष्टिर्बौद्धमतादिरूपा येन सोऽनभिगृहीतकुदृष्टिः, येन मिथ्यात्विनां कुमतिश्चाङ्गीकृता नास्तीत्यर्थः । पुनर्यः प्रवचने - जिनोक्तसिद्धान्तेऽविशारदोऽचतुरः, पुनर्यस्तु शेषेषु मतेष्वपि कपिलादिमतेष्वपि कुशलो नास्ति, स चैतादृशः पुरुषः सङ्क्षेपरुचिः स्यात् ॥ ५६ ॥

अथ धर्मरुचेः स्वरूपमाह-

जो अत्थिकायधम्मं, सुयधम्मं खलु चरित्तधम्मं च ।
सद्दहइ जिणाभिहियं, सो धम्मरुइत्ति नायव्वो ॥ २७ ॥

स धर्मरुचिर्भवतीति ज्ञातव्यम् । यः पुरुषोऽस्तिकायानां धर्मादीनाम्, अर्थाद्धर्मास्तिकायाऽधर्मास्तिकायाकाशास्तिकायादीनां धर्ममसाधारणलक्षणं स्वभावं चलनस्वभाव-स्थिरसंस्थानावकाशदानादिकं जिनाभिहितं तीर्थङ्करोक्तं श्रद्दधाति पुनर्यो जिनोक्तमेव श्रुतधर्ममङ्गप्रविष्टादिरूपं, च पुनश्चारित्रधर्मं सामायिकच्छेदोपस्थापनीय-परिहारशुद्धि-सूक्ष्मसम्पराय-यथाख्यातादिकं जिनोक्तं श्रद्दधाति, न तु यो धर्मादीनां लक्षणं पाखण्डि-भिरुक्तं श्रद्धत्ते । अत्र हि पृथगुपाधिभेदेन सम्यक्त्वभेदकथनं शिष्यव्युत्पादनार्थम् । अन्यथा तु निसर्गरुचिरुपदेशरुचिश्च, एतावुभौ भेदावभिगमरुचावेवान्तर्भवतः ॥ २७ ॥

अथ सम्यक्त्वलिङ्गान्याह-

परमत्थसंथवो वा, सुदिट्ठपरमत्थसेवणा वा वि ।
वावन्नकुदंसणवज्जणा, य सम्मत्तसद्दहणा ॥ २८ ॥

एतत्सम्यक्त्वश्रद्धानं सम्यक्त्वस्य लक्षणं सम्यक्त्ववतः पुरुषस्य चिह्नं ज्ञेयम् । किं तल्लक्षणं ? परमार्थसंस्तवः, परमाश्च तेऽर्थाश्च परमार्था-जीवादितत्त्वानि, तेषां परमार्थानां-जीवादिभावानां संस्तवः स्वरूपज्ञानादुत्पन्नपरिचयः परमार्थसंस्तवः, एतत्प्रथमं सम्यक्त्व-वतो लक्षणम् । वाशब्दः पादपूरणे वाऽथवाऽन्यल्लक्षणमिदम् सुदृष्टपरमार्थसेवनम्, सुष्ठु यथास्वरूपं दृष्टाः दर्शिता वा परमार्था जीवादयो यैस्ते सुदृष्टपरमार्था गीतार्थाः, तेषां सेवनं सुदृष्टपरमार्थसेवनम् । बहुश्रुतानामाचार्यादीनां यथाशक्ति वैयावृत्त्यस्य करणम्, एतदपि सम्यक्त्वलक्षणम् । च पुनर्व्यापन्नकुदर्शनवर्जनम्, व्यापन्नं-विनष्टं दर्शनं येषां ते व्यापन्न-दर्शनाः, यैः पूर्वं सम्यक्त्वं लब्ध्वा सम्यक्त्वघातकर्मोदयात्पुनः सम्यक्त्वं वान्तं, ते व्यापन्न-दर्शना निह्नवादयः । तथा कुत्सितं दर्शनं येषां ते कुदर्शनाः शाक्यादयः । व्यापन्नदर्शनाश्च कुदर्शनाश्च व्यापन्नकुदर्शनाः तेषा वर्जनं व्यापन्नदर्शनकुदर्शनवर्जनम् । एतदपि सम्यक्त्व-लक्षणं ज्ञेयम् । यः सम्यक्त्ववान् भवति, स निह्नवैः कुलिङ्गिभिश्च परिचयं न करोति ॥२८॥

सम्यक्त्वमाहात्म्यमाह-

नत्थि चरित्तं सम्मत्तविहूणं, दंसणे उ भवियव्वं ।
सम्मत्तचरित्ताई, जुगवं पुव्वं च सम्मत्तं ॥ २९ ॥

हे शिष्य ! सम्यक्त्वविहीनं चारित्रं नास्ति, सम्यक्त्वेन विना चारित्रं नासीत्, न भविष्यति नास्ति च । कोऽर्थः ? यावत्सम्यक्त्वं नोत्पद्यते तावच्चारित्रं न स्यात् । तु -

पुनर्दर्शने - सम्यक्त्वे तु चारित्रेण भवितव्यम् । अथवा सम्यक्त्वे चारित्रं भक्तव्यं भजनीयम्, सम्यक्त्वं च चारित्रं च सम्यक्त्वचारित्रे, युगपदेककालमुत्पद्येते इति शेषः । तथापि तत्रानुक्रमोऽस्ति, पूर्वं सम्यक्त्वं पश्चाच्चारित्रमुत्पद्यते । सम्यक्त्वचारित्रयोर्युगपदुत्पादेऽप्ययं नियमोऽस्तीति भावः ॥ २९ ॥

पुनरपि तदेवाह -

नादंसणिस्स नाणं, नाणेण विणा न होइ चरणगुणा ।
अगुणिस्स नत्थि मुक्खो, नत्थि अमोक्खस्स निव्वाणं ॥ ३० ॥

अदर्शनिनः-सम्यक्त्वरहितस्य ज्ञानं नास्ति, इत्यनेन सम्यक्त्वं विना सम्यग्ज्ञानं न स्यादित्यर्थः । ज्ञानं विना चारित्रगुणाः, चारित्रं पञ्चमहाव्रतरूपं, तस्य गुणाः पिण्डविशुद्ध्यादयः करणचरणसप्ततिरूपा न भवन्ति । अगुणिनश्चारित्रगुणै रहितस्य मोक्षः-कर्मक्षयो नास्ति, अमोक्षस्य-कर्मक्षयरहितस्य निर्वाणं - मुक्तिसुखप्राप्तिर्नास्ति ॥ ३० ॥

अथ सम्यक्त्वस्याष्टावाचारानाह-

निस्संकिय निक्कंखिय, निव्वितिगिच्छा अमूढदिट्ठी य ।
उववूह थिरीकरणे, वच्छल्लपभावणे अट्ठ ॥ ३१ ॥

निःशङ्कितत्वं देशतः सर्वतश्च शङ्कारहितत्वम्, पुनर्निःकाङ्क्षितत्वं शाक्याद्यन्यदर्शनग्रहणवाञ्छारहितत्वम्, निर्विचिकित्स्यं फलं प्रति सन्देहकरणं विचिकित्सा, निर्गता विचिकित्सा निर्विचिकित्सा, तस्या भावो निर्विचिकित्स्यम्, किमेतस्य तपः प्रभृतिक्लेशस्य फलं वर्तते न वेति लक्षणम् । अथवा विदन्तीति विदः साधवः, तेषां विजुगुप्सा, किमेते मलमलिनदेहाः ? अचित्तपानीयेन देहं प्रक्षालयतां को दोषः स्यादित्यादिनिन्दा तदभावो निर्विजुगुप्स्यम् । प्राकृतार्षत्वात्सूत्रे निर्विचिकित्स्यमिति पाठः । अमूढा दृष्टिरमूढदृष्टिः, ऋद्धिमत्कुतीर्थिकानां परिव्राजकादीनामृद्धिं दृष्ट्वाऽमूढा किमस्माकं दर्शनं ? यत्सर्वथा दरिद्राभिभूतं, इत्यादिमोहरहिता दृष्टिर्बुद्धिरमूढदृष्टिः । यत्परतीर्थिनां भूयसीमृद्धिं दृष्ट्वापि स्वकीयेऽकिञ्चने धर्मे मतेः स्थिरीभावः । अयं चतुर्विधोऽप्याचारोऽन्तरङ्ग उक्तः ।

अथ बाह्याचारमाह-उपबृंहणा, दर्शनादिषु गुणवतां प्रशंसा । पुनः स्थिरीकरणम्, धर्मानुष्ठानं प्रति सीदतां धर्मवतां पुरुषाणां साहाय्यकरणेन धर्मे स्थिरीकरणम् । पुनर्वात्सल्यं, साधर्मिकाणां भक्तपानीयैर्भक्तिकरणम् । पुनः प्रभावना च स्वतीर्थोन्नतिकरणम्, एतेऽष्टावाचाराः सम्यक्त्वस्य ज्ञेया इत्यर्थः ॥ ३१ ॥

अथ चारित्रभेदानाह-

सामाइयत्थ पढमं, छेओवट्ठावणं भवे बीयं ।
परिहारविसुद्धीयं, सुहुमं तह संपरायं च ॥ ३२ ॥

अकसायमहक्खायं, छउमत्थस्स जिणस्स वा ।
एयं चयरित्तकरं, चारित्तं होइ आहियं ॥ ३३ ॥ युग्मम् ॥

अथ प्रथमं सामायिकं चारित्रं ज्ञेयम्, समो रागद्वेषरहितश्चित्तपरिणामः, तस्मिन्, समेऽयो-गमनं समायः, समाय एव सामायिकम् । अथवा समानां ज्ञानदर्शनचारित्राणा-मायोलाभः समायः, समाय एव सामायिकं सर्वसावद्यपरिहाररूपम् । यद्यपि सर्वमपि चारित्रं सामायिकमेवोच्यते, तथापि छेदोपस्थापनादिभेदेषु प्रथमत्वात्प्रथमं नाम्नां भेदाद् ज्ञेयम् । यतो हि शब्दाधिक्यादर्थाधिक्यं प्रथमं कथनमात्रत्वेन । तदपि सामायिकं नाम चारित्रं द्विविधं, इत्वरं १ । यावत्कथितं च २ । भरतैरवतमहाविदेहेषु मध्यमजिनतीर्थेषु चोपस्थाप-नायाः सद्भावे यावत्कथितं सम्भवति, उपस्थापनाया अभावे यावज्जीवमपि भवति । इत्वरं छेदोपस्थापनीयानां साधुनां भवति ।

तथा द्वितीयं छेदोपस्थापनीयम्, अस्य शब्दस्य कोऽर्थः ? सातिचारस्य निरतिचारस्य वा साधोस्तीर्थान्तरं प्रतिपद्यमानस्य पूर्वपर्यायव्यवच्छेदच्छेदः, तस्मै छेदाय योग्योपस्थापना महाव्रतारोपणा यस्मिंस्तच्छेदोपस्थापनं चारित्रं द्वितीयं ज्ञेयम् । तदपि द्विविधं, सातिचारं निरतिचारं च ।

अथ परिहारविशुद्धं तृतीयम्, परिहारस्तपोविशेषः तेन विशुद्धिर्यस्मिंस्तत्परिहार-विशुद्धिकं भवति । तद्विधिश्चायं-नव यतयो गणात्पृथग्भूयाष्टादशमासान् यावत्साधयन्ति । तत्र नवसाधूनां मध्ये चत्वारः परिहारिका भवन्ति, चत्वारोऽन्ये तेषां वैयावृत्त्यकराः, तेऽनु-परिहारिका भवन्ति । एकस्तु नवमः कल्पस्थितो वाचनाचार्यो भवति । एवं षण्मासं यावत्तपः कृत्वा, पश्चात् षण्मासं यावद्ये परिहारिकास्तेऽनुपहारिका भवन्ति, अनुपहारिकाश्च परिहारिका भवन्ति । षण्मासं यावदेव तपः कुर्वन्ति । ततश्च यः कल्पस्थितः सोऽपि तेनैव विधिना षण्मासं यावत्तपः करोति, शेषेषु षट्सु मासेष्वेकः कश्चित् कल्पस्थितो भूत्वा, तेऽन्ये सर्वेऽप्यनुपहारिकाश्च भवन्ति । एवं विधिनाऽष्टादशमासप्रमाणः कल्पो ज्ञातव्यः । कल्पसमाप्तौ तु पुनः परिहारविशुद्धिमन्तो नवापि यतयो जिनकल्पं वा गणं वाऽऽश्रयन्ति । एतदाचारवन्तः साधवो हि जिनस्य, जिनपार्श्वे स्थितस्य स्थविरस्य गणधरस्य वा समीपं प्रतिपद्यन्ते, नान्यस्य पार्श्वे तिष्ठन्ति । तेषां चारित्रं परिहारविशुद्धिकं तृतीयं ज्ञेयम् ।

तथा सूक्ष्मसम्परायं चतुर्थं भवति । सूक्ष्मः-किट्टीकरणात् स्वल्पीकृतः सम्परायो-लोभाख्यः कषायो यत्र तत् सूक्ष्मसम्परायम् । एतच्चारित्रं उपशमश्रेणिक्षपकश्रेण्यारूढस्य साधोर्लोभानुवेदनसमये भवति । 'सूक्ष्मं संपरायं' इत्यनुस्वारः प्राकृतत्वात् ॥ ३२ ॥

अकषायं-कषायरहितं क्षपितकषायावस्थायामेतद्भवति, यथाख्यातनामकं तीर्थङ्-करोक्तं पञ्चमं ज्ञेयम् । इदं हि यथाख्यातं चारित्रं छद्मस्थस्योपशान्तमोहाख्ये एकादशे, तथा क्षीणमोहाख्ये द्वादशे गुणस्थाने वर्तमानस्य भवति । वाऽथवा जिनस्य केवलिनस्त्रयो-

दशे सयोगाख्ये गुणस्थाने, तथाऽयोगाख्ये च चतुर्दशे गुणस्थाने वर्तमानस्य भवति, एतत्पञ्चविधं चारित्रं भवति। कीदृशं चारित्रं ? 'चयरित्तकरं' चयानां-कर्मराशीनां रिक्तमभावं करोतीत्येवंशीलं, चयानां रिक्तकरं तीर्थकरैराख्यातं, कर्मराशीनामभावकरं, सामायिकादि-पञ्चविधं चारित्रं कर्मक्षयकारकमित्यर्थः ॥ ३३ ॥

अथ तपोभेदमाह-

तवो य दुविहो वुत्तो, बाहिरोब्भिंतरो तहा ।
बाहिरो छव्विहो वुत्तो, एवमब्भिंतरो तवो ॥ ३४ ॥

तपो द्विविधं प्रोक्तम्, बाह्यं तथाभ्यन्तरं, बाह्यं षड्विधं प्रोक्तम् एवमिति षड्विध-मेवाभ्यन्तरमपि तपः प्रोक्तम् ॥ ३४ ॥

अथ ज्ञानदर्शनचारित्राणां मध्ये मोक्षमार्गे कस्य कीदृशो व्यापारो वर्तते ? तमाह -

नाणेण जाणई भावे, दंसणेण य सद्दहे ।
चरित्तेण निगिण्हाइ, तवेण परिसुज्झई ॥ ३५ ॥

ज्ञानेन-मतिज्ञानादिना भावान्-जीवाजीवादीन् जानाति, च पुनर्दर्शनेन भगवद्वचनं श्रद्धया श्रद्धते सत्यत्वेनाङ्गीकुरुते। चारित्रेण-विरतिप्रत्याख्यानेन निगृह्णाति, विषयेभ्यो निवर्तते। तपसा परि-समन्तात् शुद्ध्यति कर्ममलापगमान्निर्मलो भवतीत्यर्थः ॥ ३५ ॥

अथ मोक्षफलभूतां गतिमाह-

खवित्ता पुव्वकम्माइं, संजमेण तवेण य ।
सव्वदुक्खपहीणट्ठा, पक्कमंति महेसिणो ॥ ३६ ॥त्तिबेमि ॥

महर्षयो महामुनयः संयमेन सप्तदशविधेन, पुनस्तपसा द्वादशविधेन, चशब्दाद् ज्ञान-दर्शनाभ्यां च पूर्वकर्माणि पूर्वोपार्जितकर्माणि क्षपयित्वा प्रहीणसर्वदुःखार्थाः सन्तो मोक्षाभिलाषिणः सन्तः प्रक्रमन्ति-पराक्रमं कुर्वन्तः सिद्धिं गच्छन्ति। प्रहीणानि प्रकर्षेण हानिं प्राप्तानि सर्वदुःखानि यत्र तत्प्रहीणसर्वदुःखं-मोक्षस्थानं, तदर्थयन्तेऽभिलषन्तीति प्रहीणसर्वदुःखार्था, मोक्षाभिलाषिण इत्यर्थः। प्रहीणसर्वदुःखार्था इति स्थाने सर्वदुःखप्रही-णार्था इति पाठस्तु आर्षत्वात्। इत्यहं ब्रवीमीति सुधर्मास्वामी जम्बूस्वामिनं प्राह ॥ ३६ ॥

इति मोक्ष मार्गीयाख्यमध्ययनम् सम्पूर्णम् ॥ २८ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविर-चितायां मोक्षमार्गीयाख्यमष्टाविंशमध्ययनं सम्पूर्णम् ॥ २८ ॥

॥ २९ सम्यक्त्वपराक्रमाख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययने मोक्षमार्गगतिरुक्ता, सा च वीतरागत्वपूर्विकेति यथा वीतरागत्वं स्यात्तथाभिधायकमेकोनत्रिंशत्तमं कथ्यते-

सुयं मे आउसं तेणं भगवया एवमक्खायं, इह खलु सम्मत्तपरक्कमे नामज्झयणे समणेणं भगवया महावीरेणं कासवेणं पवेइया, जं सम्मं सद्दहित्ता, पत्तियाइत्ता, रोइत्ता, फासित्ता, पालइत्ता, तीरइत्ता, किट्टइत्ता, सोहइत्ता, आराहित्ता, आणाए अणुपालइत्ता बहवे जीवा सिज्झंति बुज्झंति मुच्चंति परिनिव्वाइंति, सव्वदुक्खाणमंतं करंति ॥ १ ॥ इत्यालापकम् ।

हे आयुष्यमन्निति सम्बोधनम्, हे जम्बू ! मया श्रुतं, तेन भगवता ज्ञानवता आयुष्मता जीवता विद्यमानेन श्रीमहावीरेणैवमाख्यातमेवं कथितम् । एवमिति किमुक्तं ? तदाह- इहास्मिन् जगत्यागमे वा खलु-निश्चयेन सम्यक्त्वपराक्रमं नामाध्ययनम्, सम्यक्त्वे सति वर्धमानैर्गुणैः कर्मशत्रुजयलक्षणः पराक्रमो बलं यस्मिंस्तत्सम्यक्त्वपराक्रमं नामाध्ययनं श्रमणेन तपस्विना भगवतैश्वर्ययुक्तेन श्रीमहावीरेण काश्यपगोत्रीयेण प्रवेदितम्, यत्सम्यक्त्वपराक्रममध्ययनं श्रद्धाय सूत्रार्थाभ्यां सामान्येन प्रतिपद्य, प्रतीत्य विशेषेण प्रतीतिमानीय, रोचयित्वा तस्याध्ययनस्यार्थाभिलाषमनुष्ठानाभिलाषमात्मन्युत्पाद्य, पुनः स्पृष्ट्वा मनोवाक्कायैस्तदुक्तानुष्ठानं संस्पृश्य, पालयित्वा तस्याध्ययनस्य गुणेनातीचारवर्जनेन रक्षयित्वा, तीरयित्वाऽनुष्ठानं पारं नीत्वा, कीर्तयित्वा गुरुं प्रति विनयपूर्वकं मया भवद्भ्यः सकाशात्सम्यक्प्रकारेण सम्पूर्णमधीतमिति कथनेन, शोधयित्वा गुरोर्वचनात् पश्चाच्छुद्धं कृत्वा, आराध्य यथोक्तोत्सर्गापवादनयविज्ञानेन सेवनं कृत्वा, आज्ञया गुर्वादेशेनानुपाल्य, नित्यमासेव्य बहवो जीवाः सिद्धयन्ति-सिद्धिगुणयुक्ता भवन्ति, बुद्धयन्ति-घातिकर्मनिवारणेन तत्त्वज्ञा भवन्ति, मुच्यन्ते-भवोपग्राहिकर्मचतुष्टयबन्धान्मुक्ता भवन्ति, परिनिर्वान्ति कर्मदावानलोपशमेन शीतलत्वं प्राप्नुवन्ति । सर्वदुःखानां शारीरमानसानामन्तं कुर्वन्ति । इत्यालापकार्थः ॥ १ ॥

तस्स णं अयमट्ठे एवमाहिज्जइ ॥ २ ॥

तस्य सम्यक्त्वपराक्रमाध्ययनस्यायं वक्ष्यमाणोऽर्थं एवममुना प्रकारेण श्रीमहावीरेणाख्यायते - कथ्यते ॥ २ ॥

तं जहा-संवेगे १, निव्वेए २, धम्मसद्धा ३, गुरुसाहम्मियसुस्सूसणया ४, आलोअयणा ५, निंदणया ६, गरहणया ७, सामाईए ८, चउवीसत्थए ९, वंदणे १०, पडिक्कमणे ११, काउस्सग्गे १२, पच्चक्खाणे १३, थयथुइमंगले

१४, कालपडिलेहणया १५, पायच्छित्तकरणे १६, खमावणया १७, सज्झाए १८, वायणया १९, पडिपुच्छणया २०, परियट्टणया २१, अणुप्पेहा २२, धम्मकहा २३, सुयस्स आराहणया २४, एगग्गमणसंनिवेसणया २५, संजमे २६, तवे २७, वोदाणे २८, सुहसाए २९, अप्पडिबद्धया ३०, विवित्त-सयणासणसेवणया ३१, विणियट्टणया ३२, संभोगपच्चक्खाणे ३३, उवहिपच्चक्खाणे ३४, आहारपच्चक्खाणे ३५, कसायपच्चक्खाणे ३६, जोगपच्चक्खाणे ३७, सरीरपच्चक्खाणे ३८, सहायपच्चक्खाणे ३९, भत्तपच्चक्खाणे ४०, सब्भावपच्चक्खाणे ४१, पडिरूवया ४२, वेयावच्चे ४३, सव्वगुणसंपण्णया ४४, वीयरागया ४५, खंती ४६, मुत्ती ४७, मद्दवे ४८, अज्जवे ४९, भावसच्चे ५०, करणसच्चे ५१, जोगसच्चे ५२, मणगुत्तया ५३, वयगुत्तया ५४, कायगुत्तया ५५, मणसमाहारणया ५६, वयसमाहारणया ५७, कायसमाहारणया ५८, नाणसंपन्नया ५९, दंसण-संपन्नया ६०, चरित्तसंपन्नया ६१, सोइंदियनिग्गहे ६२, चक्खिंदियनिग्गहे ६३, घाणिंदियनिग्गहे ६४, जिब्भेंदियनिग्गहे ६५, फासिंदियनिग्गहे ६६, कोहविजये ६७, माणविजये ६८, मायाविजये ६९, लोहविजये ७०, पेज्ज-दोसमिच्छादंसणविजये ७१, सेलेसी ७२, अकम्मया ७३, ॥ ३ ॥इति सूत्रम् ॥

एतस्य सम्यक्त्वपराक्रमाध्ययनस्य श्रीमहावीरेण यथानुक्रममर्थो व्याख्यायते तद्यथा-संवेगो मोक्षाभिलाषः १, निर्वेदः संसाराद्विरक्तता २, धर्मे श्रद्धा-धर्मे रुचिः ३, गुरुस्तत्त्वोपदेष्टा, तस्य गुरोः, साधर्मिणः-समानधर्मकर्तुश्च शुश्रूषणा - सेवा ४, आलोचना गुरोरग्रे पापानां प्रकाशनं ५, निन्दना आत्मसाक्षिकमात्मनो निन्दा ६, गर्हणा अपरलोकानां पुरतः स्वदोषप्रकाशनं ७, सामायिकं शत्रौ मित्रे साम्यं ८, चतुर्विंशतिस्तवो 'लोगस्सुज्जोयगरे' इत्यादिचतुर्विंशतिजिननामपठनं ९, वन्दनं द्वादशावर्त्तवन्दनेन गुरोर्वन्दना १०, प्रतिक्रमणं पापान्निवर्तनं ११, कायोत्सर्गोऽतीचारशुद्ध्यर्थं कायस्य व्युत्सर्जनं कायममत्ववर्जनं १२, प्रत्याख्यानं मूलगुणोत्तरगुणधारणं १३, स्तवस्तुतिमङ्गलं, स्तवः शक्रस्तवपाठः, स्तुति-रूद्ध्वीभूय जघन्येन चतुष्टयस्तुतिकथनं, मध्यमेनाष्टस्तुतिकथनं, उत्कृष्टेन १०८ स्तुति कथनम् । स्तवश्च स्तुतयश्च स्तवस्तुतयः, स्तवस्तुतय एव मङ्गलं स्तवस्तुतिमङ्गलम् १४, कालप्रतिलेखना, कालस्य व्याघातिकप्रभृतिकालचतुष्टयस्य प्रतिलेखना प्ररूपणा काल-ग्रहणरूपा कालप्रतिलेखना १५, प्रायश्चित्तकरणं, लग्नस्य पापस्य निवृत्त्यर्थं तपसः करणम् १६, क्षमापना अपराधक्षामणं १७, स्वाध्यायः पञ्चविधो वाचनादिकः १८, वाचना

गुरुसमीपे सूत्राक्षराणां ग्रहणं १९, प्रतिपृच्छना गुरोः पुरतः सन्देहस्य पृच्छनम् २०, परिवर्तना सूत्रपाठस्य मुहुर्मुहुर्गुणनं २१, अनुप्रेक्षा सूत्रस्य चिन्तनं २२, धर्मकथा धर्मसम्बद्धाया वार्तायाः कथनम् २३, श्रुताराधना सिद्धान्तस्याराधना २४, एकाग्रमनःसन्निवेशना, चित्तस्यैकस्मिन् प्रधाने ध्येयवस्तुनि स्थिरीकरणं २५, संयम आश्रवाद्विरतिरूपः २६, तपो द्वादशविधं २७, व्यवदानं विशेषेणावदानं कर्मशुद्धिर्व्यवदानं-कर्मणां निर्जरा २८, सुखशातं सुखस्य विषयसुखस्य शातं शातनं स्पृहानिवारणं २९, अप्रतिबद्धता नीरागत्वं ३०, विविक्तशयनासनसेवना स्त्रीपशुपण्डकादिरहितशयनासनानामासेवना ३१, विनिवर्तना पञ्चेन्द्रियाणां विषयेभ्यो विशेषेण निवर्तनं ३२, सम्भोगप्रत्याख्यानं सम्भोग एकमण्डली-भोक्तृत्वं, तस्य प्रत्याख्यानं,गीतार्थावस्थायां जिनकल्पाचारग्रहणेन परिहारः सम्भोगप्रत्या-ख्यानं ३३, उपधिप्रत्याख्यानं रजोहरणमुखवस्त्रिकां विहायाऽन्योपधिपरिहारः ३४, आहार-प्रत्याख्यानं सदोषाहारपरिहारः ३५, कषायप्रत्याख्यानं क्रोधादिपरिहारः ३६, योग-प्रत्याख्यानं, मनोवाक्कायानां व्यापारो योगस्तस्य प्रत्याख्यानं-परिहारः ३७, शरीरप्रत्याख्यानं प्रस्तावे समागते शरीरस्यापि व्युत्सर्जनं ३८, साहाय्यप्रत्याख्यानं साहाय्यकारिणां परिहारः ३९, भक्तपानप्रत्याख्यानमनशनग्रहणं ४०, सद्भावप्रत्याख्यानं सद्भावेन पुनरकरणेन परमार्थ-वृत्त्या प्रत्याख्यानं सद्भावप्रत्याख्यानं ४१ ।

प्रतिरूपता प्रतिः-सादृश्ये, ततः प्रतिः स्थविरकल्पिमुनिसदृशो रूपं-वेषो यस्य स प्रतिरूपः, प्रतिरूपस्य भावः प्रतिरूपता, स्थविरकल्पिसाधुयोग्यवेषधारित्वं ४२, वैयावृत्त्यं (व्यावृतो-गुर्वादिकार्येषु व्यापारवान्, तद्भावो वैयावृत्त्यं) साधुनामाहाराद्यानयनसाहाय्यं ४३, सर्वगुणसम्पन्नता ज्ञानादिगुणसहितत्वं ४४, वीतरागता रागद्वेषनिवारणं ४५, क्षान्तिः क्षमा ४६, मुक्तिर्निर्लोभता ४७, मार्दवं मानपरिहारः ४८, आर्जवं सरलत्वं ४९, भावसत्यमन्तरात्मनः शुद्धत्वं ५०, करणसत्यं प्रतिलेखनादिक्रियाविषये निरालस्यं ५१, योगसत्यं मनोवाक्काययोगेषु सत्यं योगसत्यं ५२, मनोगुप्तित्वं मनसोऽशुभपदार्थाद् गोपनं ५३, वचोगुप्तित्वं वचसोऽशुभपदार्थाद् गोपनं ५४, कायगुप्तित्वं कायस्याऽशुभव्यापाराद् गोपनं ५५, मनःसमाधारणा मनसः शुभस्थाने स्थिरत्वेन स्थापनं ५६, वचःसमाधारणा वचनस्य शुभकार्ये स्थापनं ५७, कायसमाधारणा कायस्य शुभकार्ये स्थापनं ५८, ज्ञानसम्पन्नता श्रुतज्ञानसहितत्वं ५९, दर्शनसम्पन्नत्वं सम्यक्त्वसहितत्वं ६०, चारित्रसम्पन्नत्वं यथाख्यातचारित्रयुक्तत्वं ६१, श्रोत्रेन्द्रियनिग्रहः ६२, चक्षुरिन्द्रियनिग्रहः ६३, घ्राणेन्द्रिय-निग्रहः ६४, जिह्वेन्द्रियनिग्रहः ६५, स्पर्शेन्द्रियनिग्रहः ६६, क्रोधविजयः ६७, मानविजयः ६८, मायाविजयः ६९, लोभविजयः ७०, प्रेय्यद्वेषमिथ्यादर्शनविजयः, प्रेय्यं प्रेमरागरूपं, द्वेषोऽप्रीतिरूपः, मिथ्यादर्शनं सांशयिकादि, तेषां विजयः, प्रेय्यं च द्वेषश्च मिथ्यादर्शनं च प्रेय्यद्वेषमिथ्यादर्शनानि, तेषां विजयः प्रेय्यद्वेषमिथ्यादर्शनविजयः ७१, शैलेशी चतुर्दश-गुणस्थानस्थायित्वं ७२, अकर्मता कर्मणामभावः ७३ ।

इत्येतेषां त्रिसप्ततिवचनानामर्थमुक्त्वा, अथैतेषामेव प्रत्येकं फलमाह-

संवेगेणं भंते जीवे किं जणयइ ? संवेगेणं अणुत्तरं धम्मसद्धं जणयइ, अमुत्तराए धम्मसद्धाए सवेगं हव्वमागच्छइ, अणंताणुबंधिकोहमाणमाया-लोभे खवेइ, नवं च कम्मं न बद्धइ, तप्पच्चईयं च णं मिथत्तविसोहिं काऊण दंसणाराहए भवइ, दंसणविसोहिएणं विसुद्धाए अच्छेगइए तेणेव भवग्ग-हणेणं सिज्जइ, सोहिए णं विसुद्धाए तच्चं पुणो भवग्गहणं नाइक्कमइ ॥१॥

शिष्यः पृच्छति, हे भदन्त ! हे पूज्य ! संवेगेन-मोक्षाभिलाषेण कृत्वा जीवः किं जनयति ? किमुत्पादयति ? तदा गुरुराह-हे शिष्य ! संवेगेन कृत्वा जीवोऽनुत्तरां प्रधानां धर्मश्रद्धां-धर्मरुचिं जनयति, तया प्रधानया धर्मस्य श्रद्धया संवेगं - मोक्षाभिलाषं 'हव्व' इति शीघ्रमागच्छति-प्राप्नोति । ततो नरकानुबन्धिनो नरकगतिदायिनोऽनन्तानुबन्धिक्रोध-मानमायालोभांश्चतुरोऽपि कषायान् क्षपयति, नवं च कर्म न बध्नाति । तत्प्रत्ययाम्, स एवाऽनन्तानुबन्धिचतुष्कषायक्षय एव प्रत्ययः-कारणं यस्याः सा तत्प्रत्यया, तां तत्प्रत्यया-मनन्तानुबन्धिकषायक्षयादुत्पन्नां मिथ्यात्वविशुद्धिं - सर्वथा मिथ्यात्वक्षतिं कृत्वा दर्शनाराधको भवति । क्षायकशुद्धसम्यक्त्वस्याराधको निरतिचारपालको भवति । ततः सम्यक्त्व-विशुद्धया विशुद्धयाऽतिनिर्मलयाऽस्त्येकः कश्चिद् भव्यो यः स तेनैव भवग्रहणेन, तेनैव जन्मोपादानेन सिद्धयति-सिद्धिं प्राप्नोति । एकः पुनः सम्यक्त्वस्य निर्मलया विशुद्धया तृतीयं पुनर्भवग्रहणं नातिक्रामति । इत्यनेन शुद्धक्षायिकसम्यक्त्ववान् भवत्रयमध्ये मोक्षं व्रजत्येव ॥ १ ॥

निव्वेएणं भंते जीवे किं जणयइ ? निव्वेएणं दिव्वमाणुसतेरिच्छिएसु कामभोगेसु निव्वेयं हव्वमागच्छइ, सव्वविसएसु विरज्जइ, सव्वविसएसु विरज्जमाणो [1]आरंभपरिग्गहपरिच्चायं करेइ, [1]आरंभपरिग्गहपरिच्चायं करेमाणे संसारमग्गं वोछिंदइ, सिद्धिमग्गं पडिवन्ने भवइ ॥ २ ॥

हे भगवन् ! हे पूज्य ! निर्वेदेन सामान्येन संसाराद्विरागभावेन जीवः किं जनयति ? गुरुराह—निर्वेदेन देवमनुष्यतिर्यग्सम्बन्धिषु कामभोगेषु निर्वेदं-विरागं, एते कामभोगा विरसाः, एतेषु कोऽनुरागः ? इति बुद्धिः शीघ्रमायाति । तदा सर्वविषयेषु सर्वविषयेभ्यो विरक्तः स्यात्, सर्वविषयेभ्यो विरज्यमानः पुमानारम्भः- कर्षणादिः, परिग्रहो-धनधान्यादिषु मूर्च्छारूपः, तयोः परित्यागं करोति । आरम्भपरिग्रहपरित्यागं कुर्वाणः संसारमार्गं मिथ्यात्वा-ऽविरत्यादिकं व्युच्छिन्नत्ति, सिद्धिमार्गं प्रतिपन्नो भवति, शुद्धक्षायिकसम्यक्त्वरूपं मुक्तिमार्गं प्रत्युन्मुखो भवति ॥ २ ॥

---

१ आरंभपरिच्चायं-अन्यसंस्करणे ॥

धम्मसद्धाए णं भंते जीवे किं जणयइ ? धम्मसद्धाए णं सायासोक्खेसु रज्जमाणे विरज्जइ, आगारधम्मं च णं चयइ, अणगारे णं जीवे सारीरमाणसाणं दुक्खाणं छेयणभेयणसंजोगाईणं वोच्छेयं करेइ, अव्वाबाहं च णं सुहं निव्वत्तेइ ॥ ३ ॥

हे स्वामिन् ! हे पूज्य ! धर्मश्रद्धया धर्मविषये रुच्या जीवः किं जनयति ? गुरुराह-हे शिष्य ! धर्मश्रद्धया सातासुखेषु सातावेदनीयकर्मजनितसुखेषु विषयसुखेषु रज्यमानः पूर्वं रागं कुर्वाणो विरज्यते-विरक्तो भवति । तदाऽऽगारधर्मं-गृहस्थधर्मं त्यजति, ततश्चानगारः साधुः सन् जीवः शारीरमानसानां दुःखानां व्याधीनां छेदनभेदनसंयोगवियोगादीनां कष्टानां व्युच्छेदं करोति, तन्निबन्धनकर्मोच्छेदं करोति । ततश्चाऽव्याबाधसुखं-मोक्षसुखं निर्वर्तयति । मोक्षसुखं निष्पादयतीत्यर्थः ॥ ३ ॥

धर्मश्रद्धानन्तरं गुर्वादीनां शुश्रूषको भवति, अतस्तत्फलं प्रष्टुकामः शिष्य आह-

गुरुसाहम्मियसुस्सुसणयाए णं भंते जीवे किं जणयइ ? गुरुसाहम्मियसुस्सुसणयाए णं विणयपडिवत्तिं जणयइ, विणयपडिवन्ने य णं जीवे अणच्चासायणसीले नेरइयतिरिक्खजोणियमाणुस्सदेवकुगइओ[1] निरुंभइ, वण्णसंजलणभत्तिबहुमाणयाए मणुस्सदेवसुग्गइओ निबंधइ, सिद्धिसुगइं च विसोहेइ, पसत्थाइं च णं विणयमूलाइं सव्वकज्जाइं [2]सोहेइ, अन्ने य बहवे जीवे विणयत्ता भवइ ॥ ४ ॥

हे भगवन् ! गुरूणामाचार्याणां साधर्मिकाणामेकधर्मवतां शुश्रूषया-सेवया जीवः किं जनयति ? तदा गुरुराह—गुरुसाधर्मिकशुश्रूषया विनयप्रतिपत्तिं विनयधर्मस्याराधनां विनयाङ्गीकारत्वं जनयति । विनयं प्रतिपन्नः प्रतिपन्नविनयोऽङ्गीकृतविनयो जीवोऽनत्याशातनशीलः सन्नाचार्यादीनामभक्तिनिन्दाहीलाऽवर्णवादाद्याशातनानिवारकः सन् नरकतिर्यग्योनिं, तथा मनुष्यदेवयोः कुगतिं च रुणद्धि-निषेधयति । आचार्याणामत्याशातनानिवारको नरो नरकयोनौ नोत्पद्यते, तिर्यग्योनौ च नोत्पद्यते, मनुष्येषु कुयोनौ म्लेच्छादौ, देवेषु कुयोनौ किल्बिषादौ नोत्पद्यते ।

तथा पुनर्वर्णसञ्ज्वलनभक्तिबहुमानतया मानवेषूच्चैःकुलेषु सर्वसुखभाग् मनुष्यः स्यात् । वर्णः-श्लाघा, तेन वर्णेन सञ्ज्वलनं गुणप्रकटीकरणं वर्णसञ्ज्वलनम्, भक्तिरभ्युत्थानादिका, बहुमानोऽभ्यन्तरप्रीतिविशेषः, वर्णश्च सञ्ज्वलनं च भक्तिश्च बहुमानश्च वर्णसञ्ज्वलनभक्तिबहुमानाः, तेषां भावो वर्णसञ्ज्वलनभक्तिबहुमानता, तया वर्ण-

---

१ देवदुग्गइओ-अन्यसंस्करणे ॥ २ साहेइ-अन्यसंस्करणे, तत्र वृत्ति-साधयति ॥

सञ्ज्वलनभक्तिबहुमानतया पुमान् भवेत् । यस्य गुणश्लाघाभक्तिप्रीतयः सर्वैः क्रियते, तादृगुत्तमकुलप्रसूतो नरः स्यादित्यर्थः । देवोऽपि च महर्द्धिकः स्यात् । च पुनः स सिद्धिसङ्गतिं च मोक्षरूपां समीचीनगतिं विशेषेण शोधयति, प्रशस्तानि च विनयमूलानि श्रुतज्ञानादीनि सर्वाणि धर्मकार्याणि शोधयति । स च स्वयं विनयमूलसर्वकार्यविशोधकः सन्नन्यानपि बहून् जीवान् विनेता-विनयं ग्राहयिता भवति ॥ ४ ॥

गुरुशुश्रूषां कुर्वाणस्याऽतीचारसम्भवेऽतीचारालोचनाद्यत्फलं भवति, तत्प्रश्नपूर्वमाह-

आलोयणाए णं भंते जीवे किं जणयइ ? आलोयणाए णं माया-नियाणमिच्छादरिसणसल्लाणं मोक्खमग्गविग्घाणं अणंतसंसारवद्धणाणं उद्धरणं करेइ, उज्जुभावं च जणयइ, उज्जुभावपडिवन्नेवि य णं जीवे अमाई इत्थिवेयं नपुंसगवेयं च ण बंधइ, पुव्वबद्धं च निज्जरेइ ॥ ५ ॥

हे भगवन् ! हे भदन्त ! हे पूज्य ! आलोचनया गुर्वग्रे आत्मनो दोषप्रकाशनेन जीवः किं जनयति ? तदा गुरुराह-आलोचनया कृत्वा जीवो मायानिदानमिथ्यादर्शनशल्याना-मुद्धरणं करोति । तत्र माया-कापट्यम्, निदानं तपसो विक्रयः, ममास्य तपसः फलं स्यात्तर्हि राज्येन्द्रादिपदभागहं स्यामिति निदानम्, मिथ्यादर्शनं सांशयिकादिविपरीतमति-रूपं, माया च निदानं च मिथ्यादर्शनं च मायानिदानमिथ्यादर्शनानि, तान्येव शल्यानि मायानिदानमिथ्यादर्शनशल्यानि, तेषामुद्धरणं दूरीकरणं करोतीत्यर्थः । कीदृशानां मायानिदानमिथ्यादर्शनशल्यानां ? मोक्षमार्गे विघ्नकारकाणां, पुनः कीदृशानां ? अनन्तसंसारवर्धनानाम्, पुनः ऋजुभावं - सरलत्वं जनयति, ऋजुभावं प्रतिपन्नोऽपि निश्चयेन, 'णं' वाक्यालङ्कारे, जीवोऽमायी मायारहितः सन् स्त्रीवेदं नपुंसकवेदं च न बध्नाति । स्त्रीवेदनपुंसकवेदं चेत्पूर्वं बद्धं स्यात्तर्हि निर्जरयति ॥ ५ ॥

आलोचना हि दुष्कृतनिन्दाकारकस्यैव सफला स्यात्, अतस्तत्फलं प्रश्नपूर्वमाह-

निंदणयाए णं भंते जीवे किं जणयइ ? निंदणयाए णं पच्छाणुतावं जणयइ, पच्छाणुतावेणं विरज्जमाणे करणगुणसेढिं पडिवज्जइ, करण-गुणसेढिं पडिवन्ने य अणगारे मोहणियं कम्मं उग्घाएइ ॥ ६ ॥

हे भदन्त ! निन्दनया जीवः किं जनयति ? गुरुराह हे-शिष्य ! आत्मनः पापस्य निन्दनेन पश्चात्तापं जनयति, हा ! मया दुष्कृतं कृतम्, इत्यादिबुद्धिमुत्पादयति, पश्चात्तापेन विरज्यमानो-वैराग्यं प्राप्नुवन् सन् करणगुणश्रेणिम्, अपूर्वकरणेन-पूर्वं कदाप्यप्राप्तेन विशदमनःपरिणामविशेषेण गुणश्रेणिं-क्षपकश्रेणिं प्रतिपद्यतेऽङ्गीकुरुते । करणगुणश्रेणिं प्रतिपन्नः प्रतिपन्नापूर्वगुणश्रेणिः सन्ननगारः साधुर्मोहनीयं कर्म दर्शनमोहनीयादिकं कर्मोद्-घातयतेऽतिशयेन क्षपयति ॥ ६ ॥

कश्चित्स्वदोषान्निन्दन्नपि पापभीरुतया गर्हामपि कुर्यात्, अतस्तत्फलं प्रश्नपूर्वमाह-

गरहणाए णं भंते जीवे किं जणयइ ? गरहणाए णं अपुरक्कारं जणयइ, अपुरक्कारगए णं जीवे अप्पसत्थेहिंतो जोगेहिंतो निवत्तेइ, पसत्थजोगे य पवत्तेइ पसत्थजोगपडिवन्ने य णं अणगारे अणंतधाइपज्जवे खवेइ ॥ ७ ॥

शिष्यः पृच्छति—हे स्वामिन् ! गर्हणेन-परसमक्षमात्मनो दोषोद्भावनेन जीवः किं जनयति ? तदा गुरुराह—हे शिष्य ! जीवो गर्हणेनाऽपुरस्कारं जनयति, आत्मनि गुरुत्वारोपणं पुरस्कारः, न पुरस्कारोऽपुरस्कारस्तमपुरस्कारमात्मनोऽवहीलां जनयति । यदा हि स्वस्य गर्हणां करोति, स्वस्य धिक्क्रियां करोति, तदाऽवहीलावान् भवति । अपुरस्कारगतो जीवोऽप्रशस्तेभ्यः कर्मबन्धहेतुभ्यो योगेभ्यो निवर्तते, अप्रशस्तकर्मबन्धहेतुयोगान्नाङ्गीकुरुते, प्रशस्तयोगांस्तु प्रतिपद्यते । प्रशस्तयोगप्रतिपन्नश्च, प्राकृतत्वात्प्रतिपन्नप्रशस्तयोगोऽङ्गीकृतसम्यग्योगोऽनन्तघातिनः पर्यायान् क्षपयति । अनन्तविषयतयाऽनन्ते ज्ञानदर्शने हन्तुं-विनाशयितुं शीलं येषां तेऽनन्तघातिनः, तान् पर्यायान् ज्ञानावरणादिकर्मणां पर्यवान् परिणतिविशेषान् क्षपयति ॥ ७ ॥

आलोचनादीनि सामायिकवत एव भवन्तीत्यतस्तत्प्रश्नोत्तरपूर्वं फलमाह-

सामाइए णं भंते जीवे किं जणयइ ? सामाइए णं सावज्जजोगविरइं जणयइ ॥ ८ ॥

हे भदन्त ! सामायिकेन - समतारूपेण जीवः किं जनयति ? गुरुराह-हे शिष्य ! सामायिकेन सावद्ययोगविरतिं जनयति, कर्मबन्धकारणेभ्यः सपापमनोवाक्काययोगेभ्यो विरतिं पश्चान्निवर्तनं जनयति ॥ ८ ॥

अथ सामायिकवांश्चतुर्विंशतिजिनस्तुतिं विधत्ते, तत्कारकस्य फलं प्रश्नपूर्वमाह-

चउवीसत्थए णं भंते जीवे किं जणयइ ? चउवीसत्थए णं दंसणविसोहिं जणयइ ॥ ९ ॥

हे भदन्त ! हे स्वामिन् ! चतुर्विंशतिस्तवेन 'लोगस्सुज्जोयगरे' इत्यादिपठनेन जीवः किं जनयति ? गुरुराह-हे शिष्य ! चतुर्विंशतिस्तवेन दर्शनविशुद्धिं जनयति, सम्यक्त्वनैर्मल्यं करोति ॥ ९ ॥

वंदणए णं भंते जीवे किं जणयइ ? वंदणए णं नीयागोयं कम्मं खवेइ, उच्चागोयं कम्मं निबंधइ, सोहग्गं च णं अप्पडिहयं आणाफलं निवत्तेइ, दाहीणभावं च णं जणयइ ॥ १० ॥

हे भदन्त ! हे पूज्य ! वन्दनकेन-गुरूणां द्वादशावर्त्तविधिवन्दनेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! श्रीगुरूणां वन्दनकेन नीचैर्गोत्रं कर्म क्षपयति, गुरूणां वन्दनकारी नीचैर्गोत्रे नावतरतीत्यर्थः, पूर्वबद्धं च क्षपयति । उच्चैर्गोत्रकर्म बध्नाति, उच्चैर्गोत्रेऽवतरतीत्यर्थः । पुनरुच्चैर्गोत्रेऽवतीर्णः सन् सौभाग्यं सर्वलोकेषु वल्लभत्वं, पुनरप्रतिहतं केनापि निवारयितुमशक्यमाज्ञाफलमाज्ञासारं प्रभुत्वं निर्वर्तयत्युत्पादयति । च पुनर्दाक्षिण्यभावं सर्वलोकानामनुकूलत्वं जनयति ॥ १० ॥

एतद्गुणोपयुक्तेन साधुना आदीश्वरमहावीरयोस्तीर्थे प्रवर्तमानेनावश्यं प्रतिक्रमणं कार्यम्, अतस्तत्फलं प्रश्नपूर्वमाह-

पडिक्कमणेणं भंते जीवे किं जणयइ ? पडिक्कमणेणं वयछिद्दाइं पिहेइ पिहियवयछिद्दे पुण जीवे निरुद्दासवे असबलचरित्ते, अट्ठसु पवयणमायासु उवउत्ते, अपुहत्ते सुप्पणिहिंदिए विहरइ ॥ ११ ॥

हे भदन्त ! प्रतिक्रमणेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! प्रतिक्रमणेनाऽपराधेभ्यः पश्चान्निवर्तनेन व्रतच्छिद्राणि पिदधाति, व्रतानां प्राणातिपातविरमणादीनां छिद्राण्यतीचारान् स्थगयति-रुणद्धि, पिहितव्रतच्छिद्रः सन् पुनर्जीवो निरुद्धाश्रवो भवति । निरुद्धाश्रवश्च पुनरशबलचारित्रो-निर्मलचारित्रोऽष्टसु प्रवचनमातृषूपयुक्तः सन् समितिगुप्तिषु सावधानः सन्नपृथक्त्वः संयमयोगेभ्योऽभिन्नः सन् सुप्रणिहितो विहरति, सुप्रणिहितान्यसन्मार्गान्निषेध्य सन्मार्गे व्यवस्थापितानीन्द्रियाणि येन स सुप्रणिहितेन्द्रियः- सन्मार्गप्रस्थापितेन्द्रियः साधुः स्वमार्गे विहरतीत्यर्थः ॥ ११ ॥

अत्रातीचारविशुद्ध्यर्थं कायोत्सर्गं करोति, अतस्तत्फलं प्रश्नपूर्वकमाह-

काउसग्गेणं भंते जीवे किं जणयइ ? काउसग्गेणं तीयपडुप्पन्नं पायच्छित्तं विसोहेइ, विसुद्धपायच्छित्ते णं जीवे निव्वुइयहियए ओहरियभरुव्वभारवहे पसत्थझाणोवगए सुहं सुहेणं विहरइ ॥ १२ ॥

हे भदन्त ! कायोत्सर्गेऽतीचारविशुद्ध्यर्थं कायस्य व्युत्सर्जनेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! कायोत्सर्गेणातीतं चिरकालसम्भूतं, प्रत्युत्पन्नमासन्नकाले वर्तमानं प्रायश्चित्तमुपचारात्प्रायश्चित्तार्हमतीचारं विशोधयत्यपनयति । विशुद्धप्रायश्चित्तश्च जीवो निवृतं-स्वस्थीकृतं हृदयं यस्य स निर्वृतहृदयः प्रशस्तसद्भावनायामुपगतः सुखंसुखेन विहरति, सुखानां परम्परया विचरति । क इव ? अपहृतभारो भारवह इव, यथोत्तारितभारभरो भारवाहकः सुखंसुखेन विहरति, तथा कायोत्सर्गेण प्रायश्चित्तविशुद्धिं विधाय स्वस्थीकृतहृदयो जीवः सुखेन विचरतीति भावः ॥ १२ ॥

एवमपि शुद्ध्यमानेन प्रत्याख्यानं कार्यम्, अतस्तफलं प्रश्नपूर्वकमाह-

पच्चक्खाणेणं भंते जीवे किं जणयइ ? पच्चक्खाणेणं आसवदाराइं निरुंभइ, [1]पच्चक्खाणेणं इच्छानिरोहं जणयइ, इच्छानिरोहगए णं जीवे सव्वदव्वेसु विणीयतण्हे सीयलभूए विहरइ ॥ १३ ॥

हे भदन्त ! प्रत्याख्यानेन - मूलगुणोत्तरगुणरूपप्रत्याख्यानेन जीवः किं जन-यति ? गुरुराह—हे शिष्य ! प्रत्याख्यानेनाश्रवद्वाराणि निरुणद्धि, अतिशयेनावृणोति । अत्र प्रत्यन्तरे कुत्रचिदयं प्रश्नोति-हे स्वामिन् ! प्रत्याख्यानेन जीवः किं जनयति ? अत्रोत्तरं-हे शिष्य ! प्रत्याख्याननेच्छानिरोधमाहारादिवाञ्छाया निरोधं जनयति । इच्छानिरोधं प्राप्तो जीवः सर्वद्रव्येषु सुविनीततृष्णो भवति, सुतरामतिशयेन विनीता-स्फेटिता तृष्णा येन स सुविनीततृष्णः, अत्यन्तदूरीकृततृष्णः सन् शीतलीभूतो विहरति, बाह्याभ्यन्तरसन्तापरहितो विचरति ॥ १३ ॥

प्रत्याख्यानानन्तरं चैत्यवन्दना कार्या, अतस्तत्फलं प्रश्नपूर्वमाह-

थवथुइमंगलेणं भंते जीवे किं जणयइ ? थवथुइमंगलेणं नाणदंसणचरित्तबोहिलाभं जणयइ, नाणदंसणचरित्तबोहिलाभसंपन्ने य जीवे अंतकिरियं कप्पविमाणोववत्तियं आराहणं आराहेइ ॥ १४ ॥

हे भदन्त ! स्तवः शक्रस्तवरूपः, स्तुतिर्योर्ध्वीभूयकथनरूपा, अथवैकादिसप्तश्लोकान्ता यावदष्टोत्तरशतश्लोका वाच्याः । स्तुतिश्च स्तवश्च स्तुतिस्तवौ, तावेव मङ्गलं भावमङ्गलरूपं स्तुतिस्तवरूपं मङ्गलं, तेन स्तुतिस्तवमङ्गलेन जीवः किं जनयति ? स्तवस्तुतिमङ्गलेनेति पाठस्तु आर्षत्वात् । गुरुः प्रश्नोत्तरमाह- हे शिष्य ! स्तुतिस्तवमङ्गलेन जीवो ज्ञानदर्शनचारित्रबोधिलाभं जनयति । तत्र ज्ञानं मतिश्रुतादि, दर्शनं क्षायिकसम्यक्त्वं, चारित्रं विरतिरूपं, तद्रूप एव बोधिलाभो जैनधर्मप्राप्तिर्ज्ञानदर्शनचारित्रबोधिलाभस्तं जनयति । ज्ञानदर्शनचारित्रबोधिलाभसम्पन्नश्च जीव आराधनां ज्ञानादीनामासेवनामाराधयति साधयति । कीदृशीमाराधनां ? कल्पविमानोत्पत्तिकां, कल्पाश्च विमानानि च तेषूत्पत्तिर्यस्याः सा कल्पविमानोत्पत्तिका, ताम् । पुनः कीदृशीमाराधनां ? अन्तक्रियां, अन्तस्य संसारस्य कर्मणां वाऽवसानस्य क्रियान्तक्रिया, ताम्, एवंभूतां ज्ञानाद्याराधनां साधयति । कल्पाः सौधर्मादयो देवलोकाः, विमानानि नवग्रैवेयकपञ्चानुत्तरविमानानि । ज्ञानाद्याराधनया कश्चिद्भरतादिवद्दीर्घकालेन मुक्तिं प्राप्नोति, कश्चिद् गजसुकुमालवत्स्वल्पकालेनैव मुक्तिं प्राप्नोतीति भावः ॥ १४ ॥

---

१ पच्चक्खाणेणं इच्छानिरोहं जणयइ, इच्छानिरोहगए णं जीवे सव्वदव्वेसु विणीयतण्हे सीयलभूए विहरइ-एवं पाठोऽन्यसंस्करणे नास्ति ॥

अर्हच्चैत्यवन्दनानन्तरं स्वाध्यायो विधेयः, स च कालं दृष्ट्वैव विधीयते, अतस्तत्फलं प्रश्नपूर्वकमाह-

कालपडिलेहणयाए णं भंते जीवे किं जणयइ ? कालपडिलेहणयाए णं नाणावरणिज्जं कम्मं खवेइ ॥ १५ ॥

हे भदन्त ! कालप्रतिलेखनया, कालस्य प्रादोषिकप्राभातिकादिकस्य प्रतिलेखना प्रत्युप्रेक्षणा, सिद्धान्तोक्तविधिना सत्यप्ररूपणाग्रहणप्रतिजागरणासावधानत्वं कालप्रतिलेखना, तया जीवः किं जनयति ? गुरुराह—हे शिष्य ! कालप्रतिलेखनया जीवो ज्ञानावरणीयं कर्म क्षपयति ॥ १५ ॥

कदाचिदकालपाठे प्रायश्चित्तं कर्तव्यम्, तदा प्रायश्चित्तकरणे यत्फलं तदपि प्रश्नपूर्वमाह-

पायच्छित्तकरणेणं भंते जीवे किं जणयइ ? पायच्छित्तकरणेणं पावकम्मविसोहिं जणयइ, निरइयारे आविभवइ, सम्मं च णं पायच्छित्तं पडिवज्जमाणे मग्गं च मग्गफलं च विसोहेइ, आयारं च आयारफलं च आराहेइ ॥ १६ ॥

हे भदन्त ! प्रायश्चित्तकरणेन पापशुद्धिकरणेनालोचनादिकेन जीवः किं जनयति ? गुरुर्वदति—हे शिष्य ! प्रायश्चित्तकरणेन पापकर्मविशोधिं जनयति, ततश्च निरतीचारोऽतीचाररहितो भवति । सम्यक् प्रायश्चित्तं प्रतिपद्यमानः सन् मार्ग-सम्यक्त्वं, च पुनर्मार्गफलं, मार्गस्य-सम्यक्त्वस्य फलं ज्ञानं, तद्विशोधयति, च पुनराचारमाराधयति आचारशब्देन चारित्रमाराधयति । पुनराचारस्य चारित्रस्य फलं मोक्षमाराधयति साधयति ॥ १६ ॥

प्रायश्चित्तं यदा करोति, तदा क्षामणामपि करोत्येव, अतस्तत्फलं प्रश्नपूर्वमाह-

खमावणयाए णं भंते जीवे किं जणयइ ? खमावणयाए णं पल्हायणभावं जणयइ, पल्हायणभावमुवगए य सव्वपाणभूयजीवसत्तेसु मित्तीभावं उप्पाएइ, मित्तीभावमुपगए यावि जीवे भावविसोहिं काऊण निब्भए भवइ ॥ १७ ॥

हे भदन्त ! क्षामणया, दुष्कृतानन्तरं क्षन्तव्यमिदं ममेत्यादिरूपया जीवः किं जनयति ? गुरुराह—हे शिष्य ! क्षामणया गुरोरग्रे स्वकृतनिन्दया प्रह्लादनभावं चित्तप्रसत्तिरूपं जनयति, प्रह्लादनभावमुपगतो जीवः सर्वप्राणभूतजीवसत्त्वेषु, प्राणाश्च भूताश्च जीवाश्च सत्त्वाश्च प्राणभूतजीवसत्त्वाः, सर्वे च ते प्राणभूतजीवसत्त्वाश्च सर्वप्राणभूतजीवसत्त्वाः, तेषु

मैत्रीभावमुत्पादयति । मैत्रीभावं गतस्तु जीवो भावविशोधिं कृत्वा रागद्वेषनिवारणं निधायेहलोकादिसप्तभयानि निवार्य निर्भयो भवति ॥ १७ ॥

क्षामणाकारिणा साधुना स्वाध्यायः कर्तव्यः, अतस्तत्फलं प्रश्नपूर्वकमाह-

सज्झाएणं भंते जीवे किं जणयइ ? सज्झाएणं नाणावरणिज्जं कम्मं खवेइ ॥ १८ ॥

हे भदन्त ! स्वाध्यायेन पञ्चप्रकारेण जीवः किं जनयति ? गुरुराह—हे शिष्य ! स्वाध्यायेन ज्ञानावरणीयं कर्म क्षपयति ॥ १८ ॥

तत्र पञ्चविधस्य स्वाध्यायस्य पृथक्फलं प्रश्नपूर्वकमाह-

वायणयाए णं भंते जीवे किं जणयइ ? वायणयाए णं निज्जरं जणयइ, सुयस्स य अणासायणाए वट्टइ, सुयस्स अणासायणाए वट्टमाणे तित्थधम्मं अवलंबइ, तित्थधम्मं अवलंबमाणे महानिज्जरे महापज्जवसाणे भवइ ॥१९॥

हे पूज्य ! वाचनया, वाचयतीति वाचना पाठना, तया जीवः किं जनयति ? गुरुराह-हे शिष्य ! वाचनया-सिद्धान्तवाचनेन निर्जरां-कर्मशाटनं जनयति, तथा पुनः श्रुतस्याऽनाशातनायां प्रवर्तते, तत्र च प्रवर्तमानो जीवस्तीर्थो-गणधरस्तस्य धर्म आचारः श्रुतप्रदानरूपस्तीर्थधर्मस्तमालम्बते । ततस्तीर्थधर्ममवलम्बमानस्तीर्थधर्ममाश्रयन् महानिर्जरो भवति, महानिर्जरा यस्य स महानिर्जरो महाकर्मविध्वंसको भवति । पुनर्महापर्यवसानो महत्प्रशस्य मुक्त्यवाप्त्या पर्यवसानमन्तः कर्मणो भवस्य वा यस्य स महापर्यवसानश्च भवति, मुक्तिभाग्भवतीति हार्दम् ॥ १९ ॥

अथ गृहीतवाचनेन पुनः संशयादौ पुनः पृच्छनं प्रतिपृच्छना, अतस्तत्फलं प्रश्नपूर्वकमाह-

पडिपुच्छणयाए णं भंते जीवे किं जणयइ ? पडिपुच्छणयाए णं सुत्तत्थतदुभयाइं विसोहेइ, कंखामोहणिज्जं कम्मं वुच्छिंदइ ॥ २० ॥

हे स्वामिन् ! प्रतिपृच्छनया पूर्वाधीतस्य सूत्रादेः पुनः पृच्छनेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! प्रतिपृच्छनया सूत्रार्थतदुभयानि विशोधयति । सूत्रार्थयोः संशयं निवार्य निर्मलत्वं विधत्ते, तथा काङ्क्षामोहनीयं कर्म व्युच्छिनत्ति, काङ्क्षाशब्देन सन्देहः, काङ्क्षया-सन्देहेन मोहनं काङ्क्षामोहनं, तत्र भवं काङ्क्षामोहनीयम्, एतत्कर्म विशेषेणापनयति । इदमित्थं तत्त्वं अथवेदमित्थं नास्ति, वेदं ममाध्ययनाय योग्यमयोग्यं वेत्यादिघटना काङ्क्षा वाञ्छा, तदूपमेव मोहनीयं कर्माऽनभिग्रहिकमिथ्यात्वरूपम्, तद्विनाशयति ॥२०॥

अधीत्य पुनः सन्देहमपि प्रतिपृच्छनेन निराकृत्य यदि परावर्तनं-गुणनं न क्रियते, तदा सुष्ठ्वधीतमपि शास्त्रं विस्मरति, अतः परावर्तनेन यत्फलं स्यात्तदपि प्रश्नपूर्वमाह-

परियट्टणयाए णं भंते जीवे किं, जणयइ ? परियट्टणयाए णं ।
वंजणाइं जणयइ, वंजणलद्धिं च उप्पाएइ ॥ २१ ॥

हे पूज्य ! हे स्वामिन् ! परिवर्तनया-शास्त्रस्य गुणनेन जीवः किं जनयति ? गुरुराह-हे शिष्य ! परिवर्तनया जीवो व्यज्यतेऽर्थ एभिरिति व्यञ्जनान्यक्षराणि जनयति, विस्मृताऽन्यक्षराण्यानयति । तथाविधकर्मक्षयोपशमाद्व्यञ्जनलब्धिं व्यञ्जनसमुदायरूपां पदलब्धिं-पदानुसारिणीं लब्धिं जनयति ॥ २१ ॥

सूत्रवदर्थस्यापि विस्मरणसम्भवात्सूत्रार्थयोश्चिन्तनं विधेयम्, अतस्तत्फलमपि प्रश्नपूर्वमाह-

अणुप्पेहाए णं भंते जीवे किं जणयइ ? अणुप्पेहाए णं आऊयवज्जाओ सत्तकम्मपयडीओ घणियबंधणबद्धाओ सिथिलबंधणबद्धाओ पकरेइ, दीहकालठिइयाओ हस्सकालठिइयाओ पकरेइ, तिव्वाणुभावाओ मंदाणुभावाओ पकरेइ, बहुपएसग्गाओ अप्पपएसग्गाओ पकरेइ, आउसं च णं कम्मं सिय बंधइ सिय नो बंधइ, असायावेयणिज्जं च णं कम्मं नो भुज्जो भुज्जो उवचिणाइ, अणाइयं च णं अणवयग्गं दीहमद्धं चाउरंतसंसारकंतारं खिप्पामेव वीईवयइ ॥ २२ ॥

हे भदन्त ! हे स्वामिन् ! अनुप्रेक्षया-सूत्रार्थचिन्तनिकया जीवः किं जनयति ? गुरुराह-हे शिष्य ! अनुप्रेक्षया कृत्वा जीवः सप्तकर्मप्रकृतीर्ज्ञानावरण-दर्शनावरण-वेदनीय-मोहनीय-नाम-गोत्रा-ऽन्तरायरूपाणां सप्तानां कर्मणां प्रकृतय एकशतचतुष्पञ्चाशत्प्रमाणाः सप्तकर्मप्रकृतयस्ताः सप्तकर्मप्रकृतीः, 'घणियबंधणबद्धा' गाढबन्धनबद्धा-निकाचिता बद्धाः शिथिलबन्धनबद्धाः प्रकरोति । यतो ह्यनुप्रेक्षा स्वाध्यायविशेषः, सा तु मनसस्तत्रैव नियोजनाद् भवति, स चानुप्रेक्षास्वाध्यायो ह्यभ्यन्तरं तपः, तपस्तु निकाचितकर्माणि शिथिलीकर्तुं समर्थं भवत्येव । कथंभूताः सप्तकर्मप्रकृतीः ? आयुर्वर्जाः, प्रकृष्टभावहेतुत्वेनायुर्वर्जयन्तीत्यायुर्वर्जाः ।

पुनर्हे शिष्य ! अनुप्रेक्षया कृत्वा जीवस्ता एव कर्मप्रकृतीर्दीर्घकालस्थितिकाः शुभाध्यवसाययोगात् स्थितिखण्डानामपहारेण ह्रस्वकालस्थितिकाः प्रकरोति, प्रचुरकालभोग्यानि कर्माणि स्वल्पकालभोग्यानि करोतीत्यर्थः । पुनस्तीव्रानुभावाः कर्मप्रकृतीर्मन्दानुभावाः प्रकरोति । तीव्र उत्कटोऽनुभावो रसो यासां तास्तीव्रानुभावाः, ईदृशीः कर्मप्रकृतीर्मन्दो निर्बलोऽनुभावो यासां ता मन्दानुभावास्तादृशीः प्रकर्षेण विदधाति । पुनर्बहुप्रदेशाग्रा अल्पप्रदेशाग्राः प्रकरोति, बहुप्रदेशाग्रं कर्मपुद्गलदलिकप्रमाणं यासां ता बहुप्रदेशाग्राः,

एतादृशीः कर्मप्रकृतीरल्पप्रदेशाग्राःप्रकरोति । इत्यनेनानुप्रेक्षयाऽशुभश्चतुर्विधोऽपि बन्धः, प्रकृतिबन्धः, स्थितिबन्धः, अनुभागबन्धः, प्रदेशबन्धश्च, शुभत्वेन परिणमतीत्यर्थः ।

अत्र चायुर्वर्जमित्युक्तं तत्त्वेकस्मिन् भवे सकृदेवान्तर्मुहूर्तकाले एवायुर्जीवो बध्नाति, च पुनरायुःकर्मापि स्याद् बध्नाति, स्यान्न बध्नाति, संसारमध्ये तिष्ठति चेत्तर्ह्यशुभमायुर्न बध्नाति, शुभं चायुर्बध्नाति, जीवेन तृतीयभागादिशेषायुष्केणायुः कर्म बध्येते, अन्यथा न बध्यते तेनायुःकर्मबन्धे निश्चयो नोक्तः, इत्यनेन मुक्तिं व्रजति तदायुर्न बध्नातीत्युक्तम् । पुनरनुप्रेक्षया कृत्वा जीवोऽसातावेदनीयं कर्म शारीरादिदुःखहेतु च कर्म, चशब्दादन्याश्चाऽशुभप्रकृतीर्नो भूयोभूय उपचिनोति ।

अत्र भूयोभूयग्रहणेनैवं ज्ञेयम्, कश्चिद्यतिः प्रमादस्थानके प्रमादं व्रजेत्तदा बध्नात्यपीति हार्दम् । पुनरनुप्रेक्षया कृत्वा जीवश्चातुरन्तं संसारकान्तारं क्षिप्रमेव 'वीईवयइ' इति व्यतिव्रजति । चत्वारश्चतुर्गतिलक्षणा अन्ता-अवयवा यस्य तच्चातुरन्तं, तदेव संसारकान्तारं संसारारण्यं, तच्छीघ्रमुल्लङ्घयति । कीदृशं संसारारण्यं ? अनादिकमादेरभावादादिरहितम् । पुनः कीदृशं संसारकान्तारं ? अनवदग्रम्, अनवदनागच्छदग्रं परिमाणं यस्य तदनवदग्रमनन्तमित्यर्थः । प्रवाहापेक्षयाऽनाद्यनन्तम् । पुनः कीदृशं ? दीर्घाध्वं दीर्घकालम्, 'दीहमद्धं' इत्यत्र मकारोऽलाक्षणिकः प्राकृतत्वात् ॥ २२ ॥

एवमभ्यस्तशास्त्रेण धर्मकथा कर्तव्या, ततो धर्मकथाकर्तुः किं फलं स्यात् ? अतस्तत्फलमपि प्रश्नपूर्वमाह-

धम्मकहाए णं भंते जीवे किं जणयइ ? [१]धम्मकहाए णं पवयणं पभावेइ, पवयणप्पभावए णं जीवे [२]आगमेसिस्स भद्दत्ताए कम्मं निबंधइ ॥ २३ ॥

हे स्वामिन् ! धर्मकथया जीवः कि जनयति ? गुरुराह-हे शिष्य ! धर्मकथया धर्मव्याख्यानेन जीवः प्रवचनं - श्रीसिद्धान्तं भगवद्वचनं प्रभावयति - प्रकाशयति । प्रवचनप्रभावकः- सिद्धान्तोद्दीपको जीव आगमिष्यद्भद्रतयोपलक्षितं कर्म निबध्नाति, आगामिनि काले भद्रत्वेनोपलक्षितमर्थाच्छुभं कर्म समुपार्जयतीति भावः ॥ २३ ॥

पञ्चविधस्वाध्यायरतेन श्रुतमाराधितं स्यादतस्तस्य फलं प्रश्नपूर्वकमाह-

सुयस्स आराहणयाए णं भंते जीवे किं जणयइ ? सुयस्स आराहणयाए णं अन्नाणं खवेइ, न य संकिलिस्सइ ॥ २४ ॥

---

१ इतः पूर्वे-धम्मकहाए णं निज्जरं जणयइ-इत्यपि पाठः कस्मिंश्चित् संस्करणेऽस्ति ॥

२ 'आगमेसिस्स भद्दत्ताह'-अस्य द्वौ व्याख्यानौ, एकस्तु अत्र कृत एव, द्वितीय एवं-यदिवाऽऽगमिष्यतीत्यागमः-आगामी कालस्तस्मिन् शश्वद्भद्रतया-अनवरतकल्याणतयोपलक्षितं कर्म निबध्नाति, शुभानुबन्धि शुभमुपार्जयतीति भावः ॥ बृहद्वृत्त्यां-प. ५८६ A ॥

हे भदन्त ! श्रुतस्याराधनया जीवः किं जनयति ? गुरुराह—हे शिष्य ! श्रुतस्याराधनया सम्यगासेवनयाऽज्ञानं क्षपयति, विशिष्टतत्त्वावबोधस्याऽवाप्तेः । च पुनर्न सङ्क्लिश्यते, रागद्वेषजनितं क्लेशं न भजतीति भावः ॥ २४ ॥

श्रुताराधना चैकाग्रमनःसन्निवेशनावत एव स्यादतस्तत्फलं प्रश्नपूर्वमाह-

एगग्गमणसंनिवेसणयाए णं भंते जीवे किं जणयइ ? एगग्गमण-संनिवेसणयाए णं चित्तनिरोहं जणयइ ॥ २५ ॥

हे भदन्त ! हे स्वामिन् ! एकमग्रं प्रस्तावाच्छुभमालम्बनमस्येत्येकाग्रम्, एकाग्रं च तन्मनश्चैकाग्रमनस्तस्य सन्निवेशना स्थापना, तयैकाग्रमनःसन्निवेशनया शुभावलम्बनेन चित्तस्य स्थिरीकरणेन जीवः किं फलं जनयति ? गुरुराह—हे शिष्य ! एकाग्रमनः सन्निवेशनया चित्तनिरोधं जनयति, चित्तस्येतस्तत उन्मार्गप्रस्थितस्य निरोधो - नियन्त्रणं चित्तनिरोधस्तं करोतीति भावः ॥ २५ ॥

एवंविधस्य साधोः संयमादेरिष्टफलस्य प्राप्तिरिति नियमात्तत्फलं प्रश्नपूर्वमाह-

संजमेणं भंते जीवे किं जणयइ ? संजमेणं अणण्हयत्तं जणयइ ॥२६॥

हे भगवन् ! संयमेन जीवः किं जनयति ? गुरुराह-संयमेन अनंहस्कत्वं, न विद्यतेंऽहः-पापं यस्मिंस्तदनंहस्कं, तस्य भावोऽनंहस्कत्वं, तज्जनयति । संयमेनाश्रवनिरोधं जनयतीत्यर्थः ॥ २६॥

संयमवान् साधुस्तपोनिरतः स्यादतस्तत्फलं प्रश्नपूर्वकमाह-

तवेणं भंते जीवे किं जणयइ ? तवेणं वोदाणं जणयइ ॥ २७ ॥

हे भगवन् ! तपसा कृत्वा जीवः किं फलं जनयति ? गुरुराह—हे शिष्य ! तपसा जीवो व्यवदानं जनयति, पूर्वबद्धकर्मापगमनेन विशेषेण शुद्धिं जनयति ॥ २७ ॥

व्यवदानेन किं फलं स्यात् ? अतस्तत्फलं प्रश्नपूर्वमाह-

वोदाणेणं भंते जीवे किं जणयइ ? वोदाणेणं अकिरियं जणयइ, अकिरियए भवित्ता तओ पच्छा सिज्झइ, बुज्झइ, मुच्चइ, परिनिव्वायइ, सव्वदुक्खाणमंतं करेइ ॥ २८ ॥

हे भदन्त ! व्यवदानेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! व्यवदानेन जीवोऽ-क्रियं जनयति, न विद्यते क्रिया यस्मिन् सोऽक्रियस्तमक्रियं व्युपरतक्रियाख्यं शुक्लध्यानस्य चतुर्थं भेदं जनयति । अक्रियको भूत्वा व्युपरतक्रियाख्यशुक्लध्यानवर्ती भूत्वा, ततः पश्चात्सिद्धिं व्रजति, बुद्ध्यति ज्ञानदर्शनाभ्यां सम्यग् वस्तुवेत्ता भवति, मुच्यते संसारान्मुक्तो भवति, परिनिर्वाति, परिसमन्तान्निर्वाति, कर्माग्निं विध्याप्य शीतलो भवति, सर्वदुःखाना-मन्तं करोति ॥ २८ ॥

संयमादिषु सत्स्वपि सुखशातेनैव प्रवर्तनीयमतस्तत्फलमाह-

सुहसाएण भंते जीवे किं जणयइ ? सुहसाएणं अणुस्सुयत्तं जणयइ, अणुस्सुयाएणं जीवे अणुकंपए अणुब्भडे विगयसोगे चरित्तमोहणिज्जं कम्मं खवेइ ॥ २९ ॥

हे भदन्त ! हे स्वामिन् ! सुखस्य वैषयिकस्य शातस्तद्गतस्पृहानिवारणेनापनयनं सुखशातस्तेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! सुखसातेनाऽनुत्सुकत्वं जनयति, विषयसुखेऽनुत्तालत्वं जनयति । अनुत्सुकश्च जीवोऽनुकम्पते, अग्रेतनं जीवं दृष्ट्वानुकम्पको दयावान् भवतीत्यर्थः । पुनरनुद्भटोऽभिमानरहितः शृङ्गारादिशोभारहितः स्यात् । पुनस्तादृशः सन् विगतशोकः, इहलौकिककार्यभ्रंशादावपि शोचनं न कुरुते । पुनस्तादृशो मोक्षार्थी शुभाध्यवसायवर्ती कषायनोकषायरूपचारित्रमोहनीयरूपं कर्म क्षपयति ॥ २९ ॥

अथ सुखशातस्थितस्य चाप्रतिबद्धता भवति, अतस्तत्फलं प्रश्नपूर्वमाह-

अप्पडिबद्धयाए णं भंते जीवे किं जणयइ ? अप्पडिबद्धायए णं निस्संगत्तं जणयइ, निस्संगत्तेणं जीवे एगे एगग्गचित्ते दिया वा राओ असज्जमाणे अप्पडिबद्धे आवि विहरइ ॥ ३० ॥

हे भदन्त ! अप्रतिबद्धतया मनसि निरभिष्वङ्गतया जीवः किं जनयति ? गुरुराह—हे शिष्य ! अप्रतिबद्धतया निःसङ्गत्वं-बाह्यसङ्गाभावं जनयति, निःसङ्गत्वं गतो जीव एको रागादिरहितः स्यात्, तादृशश्चैकाग्रचित्तो धर्मे एव दृढमनस्कः स्यात् । पुनर्दिवा-दिवसे रात्रौ वाऽसज्जन् सदा बाह्यसङ्गं त्यजन्नप्रतिबद्धो विहरति, मासकल्पेनोद्यतविहारेण पर्यटतीति भावः ॥ ३० ॥

अप्रतिबद्धता च विविक्तशयनासनसेवकस्य स्यात्, अतस्तत्फलमाह-

विवित्तसयणासणयाए णं भंते जीवे किं जणयइ ? विवित्तसयणासणयाए णं जीवे चरित्तगुत्तिं जणयइ, चरित्तगुत्ते य णं जीवे विवित्ताहारे दढचरित्ते एगंतरए मोक्खभावपडिपन्ने अट्ठविहकम्मगंठि निज्जरेइ ॥ ३१ ॥

हे भदन्त ! विविक्तानि स्त्री-पशुपण्डकवर्जितानि शयनासनान्युपाश्रयस्थानानि यस्य स विविक्तशयनासनः, तस्य भावो विविक्तशयनासनता, तया स्त्रीपशुपण्डकादिरहितस्थितिनिवासत्वेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! विविक्तशयनासनतया जीवश्चारित्रगुप्तिं-चारित्रस्य रक्षां जनयति । गुप्तचारित्रश्च जीवो विविक्तो विकृत्यादिशरीरपुष्टिकारकवीर्यवृद्ध्यादिकृद्वस्तुरहित आहारो यस्य स विविक्ताहारः, तादृशः स्यात् । तथा दृढं-निश्चलं चरित्रं यस्य स दृढचरित्रः, पुनरत एवैकान्तेन निश्चयेन रक्त-आसक्त एकान्तरतः

संयमे सावधानः स्यात्, तथा मोक्षं भावेन-मनसा प्रतिपन्न-आश्रितो मोक्षभावप्रतिपन्नः, मोक्ष एव मया साध्य इति बुद्धिमान्, क्षपकश्रेणिं प्रतिपद्याष्टविधकर्मग्रन्थिं निर्जरयति-क्षपयति ॥ ३१ ॥

विविक्तशयनासनश्च विनिवर्तनावान् स्यात्, अतो विनिवर्तनायाः फलमाह-

विणिवट्टणयाए णं भंते जीवे किं जणयइ ? विणिवट्टणयाए णं पावाणं कम्माणं अकरणयाए अब्भुट्ठेइ, पुव्वबद्धाण य निज्जरणयाए तं नियत्तेइ, तओ पच्छा चाउरंतसंसारकंतारं वीईवयइ ॥ ३२ ॥

हे स्वामिन् ! विनिवर्तनया विषयेभ्य आत्मनः पराङ्मुखीभावेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! विनिवर्तनया पापकर्मणामकारणत्वेन - सावद्यकर्मत्यागेनाऽभ्युत्तिष्ठते, धर्माय सावधानो भवति । पूर्वबद्धानां पापकर्मणां निर्जरया, नूतनपापकर्मणामनुत्पादनेन तत्पापकर्म निवर्तयति निवारयति । ततश्च पश्चाच्चातुरन्तसंसारकान्तारं 'वीईवयई' व्यतिव्रजति, व्युत्क्रामतीत्यर्थः ॥ ३२ ॥

विषयनिवृत्तश्च कश्चित्साधुः संभोगप्रत्याख्यानवान् भवति, अतस्तत्फलमाह-

संभोगपच्चक्खाणेणं भंते जीवे किं जणयइ ? संभोगपच्चक्खाणेणं आलंबणाइ खवेइ, निरालंबणस्स य आययट्ठिआ जोगा भवंति, सएणं लाभेणं संतुस्सइ, परलाभं नो आसाएइ, नो तक्केइ, नो पीहेइ, नो पत्थेइ, नो अहिलसइ, परस्स लाभं अणासाएमाणे अतक्केमाणे अपिहेमाणे अप्पच्छेमाणे अणभिलसेमाणे दोच्चं सुहसिज्जं उवसंपज्जित्ताणं विहरेइ ॥ ३३ ॥

हे भदन्त ! सम्भोगप्रत्याख्यानेन, एकमण्डल्यां स्थित्वाऽऽहारस्य करणं सम्भोगः, तस्य प्रत्याख्यानेनोत्कृष्टत्वेन पृथगाहारकरणेन जीवः किं जनयति ? तदा गुरुराह—हे शिष्य ! सम्भोगप्रत्याख्यानेनालम्बनानि क्षपयति, यतोऽहं ग्लानोऽस्मि, रोग्यस्मीत्यादिकथनानि क्षपयति, धीरो भवतीत्यर्थः । निरालम्बनस्य चायतार्था योगा भवन्ति । आयतो मोक्षः, स एवार्थः प्रयोजनं येषां ते आयतार्थाः, एतादृशा योगा भवन्ति । मनोवाक्काययोगा भवन्ति । स्वेन लाभेन सन्तुष्यति, परस्य लाभं नाऽऽस्वादयति, न वाञ्छयति । ततश्च परस्य लाभं नो तर्कयति, यदिदं मह्यं दास्यतीति मनसा न विकल्पयति । नो स्पृहयति, परलाभे श्रद्धालुतया स्वस्य स्पृहां न प्रकटीकरोति । पुनः परस्य लाभं न प्रार्थयति, मह्यं देहीति न याचते । पुनर्नाभिलषति, परस्य लाभं लालसापूर्वकं न वाञ्छति ।

अथ परस्य लाभं 'अणासायमाणा' अनास्वादयन्, अतर्कयन्, अनीहमानः, अप्रार्थयन्, अनभिलषन्, द्वितीयां सुखशय्यामुपसम्पद्य विहरति, अपरेभ्यः साधुभ्यः पृथगु-

पाश्रयमङ्गीकृत्य प्रवर्तते, यादृशी स्थानाङ्गे उक्तास्ति, तां प्रतिपद्य विहरति । अत्र ह्येते शब्दा एकार्थाः प्रतिपादितास्तदनेकदेशीयशिष्याणां प्रतिबोधनार्थं पर्यायत्वेन प्रतिपादिताः ॥३३॥

सम्भोगप्रत्याख्यानवतः साधोरुपधिप्रत्याख्यानं सम्भवति, अतस्तत्फलं प्रश्नपूर्वकमाह-

उवहिपच्चक्खाणेणं भंते जीवे किं जणयइ ? उवहिपच्चक्खाणेणं अपलिमंथं जणयइ, निरुवहिएणं जीवे निकंखे उवहिमंतरेण न संकिलिस्सइ ॥ ३४ ॥

हे भदन्त ! उपधिप्रत्याख्यानेन रजोहरणमुखवस्त्रिकापात्रादिव्यतिरिक्तस्योपधेः प्रत्याख्यानेनोपधित्यागेन जीवः किमुपार्जयति ? गुरुराह—हे शिष्य ! उपधिप्रत्याख्यानेनाऽपरिमन्थं जनयति । परिमन्थः स्वाध्यायव्याघातः, न परिमन्थोऽपरिमन्थः स्वाध्यायादौ निरालस्यं जनयति । पुनर्निरुपधिको-निष्परिग्रहो जीवो निष्काङ्क्षो भवति, वस्त्रादावभिलाषरहितः स्यादित्यर्थः । तादृशो ह्युपधिमन्तरेणोपधिं विना न सङ्क्लिश्यते, क्लेशं न प्राप्नोति सपरिग्रहो हि क्लेशं प्राप्नोतीति भावः ॥ ३४ ॥

अथोपधिप्रत्याख्यानवान् साधुर्जिनकल्पादिरेषणीयाहारस्याऽलाभेनोपवासं करोति, आहारप्रत्याख्यानं करोति, तदा तत्फलमपि प्रश्नपूर्वमाह-

आहारपच्चक्खाणेणं भंते जीवे किं जणयइ ? आहारपच्चक्खाणेणं जीवियासंसप्पओगं वोच्छिंदइ, जीवियासंसप्पओगं वोच्छिंदित्ता जीवे आहारमंतरेण न संकिलिस्सइ ॥ ३५ ॥

हे भदन्त ! आहारस्य प्रत्याख्यानेन सदोषाहारत्यागेनोपवासादिना जीवः किं फलं जनयति ? गुरुराह—हे शिष्य ! आहारप्रत्याख्यानेन जीवो जीविताशंसप्रयोगं व्यवच्छिनत्ति । जीविते-प्राणधारणे आशंसा-अभिलाषस्तस्याः प्रयोगो व्यापारो जीविताशंसप्रयोगस्तं व्यवच्छिनत्ति - निवारयति । जीविताशंसप्रयोगं विच्छिद्य - निवार्य जीव आहारमन्तरेण न क्लिश्यति । तस्मै यदि शुद्धाहारलाभो न स्यात्तदा जीविताशंसारहितो मुनिर्न क्लेशभाक् स्यादिति भावः ॥ ३५ ॥

एतत्प्रत्याख्यानत्रयमपि कषायाऽभावे एव फलवत् स्यात्, अतस्तत्फलं प्रश्नपूर्वकमाह-

कसायपच्चक्खाणेणं भंते जीवे किं जणयइ ? कसायपच्चक्खाणेणं वीयरायभावं जणयइ, वीयरायभावं पडिवज्जे य णं जीवे समसुहदुक्खे भवइ ॥ ३६ ॥

हे स्वामिन् ! कषायप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! कषायप्रत्याखानेन क्रोधमानमायालोभत्यागेन जीवो वीतरागभावं जनयति । प्रतिपन्नवीतरागभावो जीवः समसुखदुःखो भवति ॥ ३६ ॥

निष्कषायोऽपि योगप्रत्याख्यानवान् भवति, अतस्तत्फलं प्रश्नपूर्वकमाह-

जोगपच्चक्खाणेणं भंते जीवे किं जणयइ ? जोगपच्चक्खाणेणं अजोगित्तं जणयइ, अजोगी णं जीवे नवं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥ ३७ ॥

हे भगवन् ! योगप्रत्याख्यानेन, योगो मनोवाक्कायानां व्यापारस्तस्य प्रत्याख्यानं योगप्रत्याख्यानं, तेन जीवः किं जनयति ? तदा गुरुराह—हे शिष्य ! योगप्रत्याख्यानेनाऽयोगित्वं जनयति, शैलेशीभावं भजति । अयोगी हि जीवश्चतुर्दशगुणस्थाने प्रवर्तमानो नवं कर्म न बध्नाति, पूर्वबद्धं च कर्म निर्जरयति क्षपयतीत्ति भावः ॥ ३७ ॥

योगप्रत्याख्यानतः शरीरप्रत्याख्यानं करोति, अतस्तत्फलं प्रश्नपूर्वकमाह-

सरीरपच्चक्खाणेणं भंते जीवे किं जणयइ ? सरीरपच्चक्खाणेणं सिद्धाइसयगुणत्तं निव्वत्तेइ, सिद्धाइसयगुणसंपन्ने य णं जीवे लोगग्गमुवगए परमसुही होई ॥ ३८ ॥

हे भगवन् ! शरीरप्रत्याख्यानेन-शरीरव्युत्सर्जनेन जीवः किं लाभं जनयति ? गुरुराह-शरीरप्रत्याख्यानेन सिद्धातिशयगुणत्वं निर्वर्तयति, कोऽर्थः ? सिद्धानां येऽतिशयगुणाः सर्वोत्कृष्टगुणास्तेषां भावः सिद्धातिशयगुणत्वं, यतो हि सिद्धा न नीलाः, न लोहिताः, न हारिद्राः, न शुक्ला इत्याद्येकत्रिंशद् गुणाः, तद्वत्त्वं प्राप्नोतीत्यर्थः । प्राप्तसिद्धातिशयगुणो जीवो लोकाग्रं मोक्षमुपगतः सन् परमसुखी भवति । यद्यपि योगप्रत्याख्यानेन शरीरप्रत्याख्यानः समागतः, तथापि मनोवाग्योगयोः शरीरस्य प्राधान्यख्यापनार्थं पृथगुपादानम् ॥३८॥

सम्भोगादिप्रत्याख्यानानि प्रायः साहाय्यप्रत्याख्यानयुक्तस्य भवन्ति, अतस्तत्फलं प्रश्नपूर्वमाह-

साहायपच्चक्खाणेणं भंते जीवे किं जणयइ ? साहायपच्चक्खाणेणं जीवे एगीभावं जणयइ, एगीभावभूए य जीवे एगग्गं भावेमाणे अप्पसद्दे अप्पझंझे अप्पकसाए अप्पकलहे अप्पतुमंतुमे संयमबहुले संवरबहुले समाहिए आवि भवइ ॥ ३९ ॥

सहायाः - साहाय्यकारिणः, सङ्घाटकस्य साधवः, तेषां प्रत्याख्यानं साहाय्यप्रत्याख्यानं, तेन साहाय्यप्रत्याख्यानेन हे भगवन् ! जीवः किं फलं जनयति ? गुरुराह—हे शिष्य ! साहाय्यप्रत्याख्याननैकीभावं जनयति । एकीभावभूतश्चैकत्वं प्राप्तो जीव एकाग्रं भावयन्नेकावलम्बनत्वं चाभ्यसन्नल्पशब्दोऽल्पजल्पको भवति, अल्पझञ्झो भवति - अविद्यमान-

झञ्झोऽविद्यमानवाक्कलहो भवति, पुनरल्पकषायो भवति, पुनरल्पकलहोऽविद्यमानरोषसूचकवचनो भवति, तथाऽल्पतुमंतुमो भवति, अविद्यमानं तुमंतुममिति-त्वं त्वमिति वाक्यं यस्य सोऽल्पतुमंतुमः, त्वमेवैतत्कार्यं कृतवान्, त्वमेक एव सदाऽकृत्यकारी वर्तसे । इत्यादिप्रलपनं न करोति ।

पुनः साहाय्यप्रत्याख्यानेन संयमबहुलो भवति । संयमः सप्तदशविधः, स बहुलःप्रचुरो यस्य स संयमबहुलः । स च पुनः संवरबहुलो भवति । संवर आश्रवद्वारनिरोधः, स बहुलः प्रचुरो यस्य स संवरबहुलस्तादृशो भवति । स च पुनः समाधिबहुलो भवति । समाधिश्चित्तस्वास्थ्यम्, तेन बहुलः समाधिबहुलः समाधिप्रधानो भवति । पुनः समाहितश्चापि भवति, ज्ञानदर्शनवांश्च भवतीत्यर्थः ॥ ३९ ॥

एवंविधः साधुरन्ते भक्तप्रत्याख्यानवान् स्यात्, अतस्तत्फलं प्रश्नपूर्वमाह-

भत्तपच्चक्खाणेणं भंते जीवे किं जणयइ ? भत्तपच्चक्खाणेणं जीवे अणेगाइं भवसहस्साइं निरुंभइ ॥ ४० ॥

हे भदन्त ! भक्तप्रत्याख्यानेनाऽऽहारत्यागेन भक्तपरिज्ञानादिना जीवः किं फलं जनयति ? गुरुराह—हे शिष्य ! भक्तप्रत्याख्यानेन जीवोऽनेकानि भवसहस्राणि निरुणद्धि ॥ ४० ॥

अथ सर्वप्रत्याख्यानप्रधानं सद्भावप्रत्याख्यानम्, अतस्तस्य फलं प्रश्नपूर्वकमाह-

सब्भावपच्चक्खाणेणं भंते जीवे किं जणयइ ? सब्भावपच्चक्खाणेण अणियट्टिं जणयइ, अणियट्टिं पडिवन्ने य अणगारे चत्तारि केवलिकम्मंसे खवेइ, तं जहा-वेयणिज्जं १, आउयं २, नामं ३, गोयं ४, तओ पच्छा सिज्झइ, बुज्झइ, मुच्चइ, परिनिव्वाइ, सव्वदुक्खाणमंतं करेइ ॥ ४१ ॥

हे भगवन् ! सद्भावेन प्रत्याख्यानं सद्भावप्रत्याख्यानं, तेन सद्भावप्रत्याख्यानेन, सर्वथा पुनः करणस्याऽसम्भवादीदृशेन विधिना प्रत्याख्यानं करोति, यथा पुनः करणीयं न स्यात्, इत्यनेन सर्वप्रकारेण शैलेशीकरणं, चतुर्दशगुणस्थाने वर्त्तनेन जीवः किं जनयति ? गुरुराह-हे शिष्य ! सद्भावप्रत्याख्यानेनाऽनिवृत्तिं जनयति, शुक्लध्यानस्थ चतुर्थं भेदं जनयति । अनिवृत्तिं प्रतिपन्नः, प्रतिपन्नानिवृत्तिरनगारश्चत्वारि केवलिनः कर्मांशानि सन्ति कर्माणि भवोपग्राहीणि क्षपयति । अंशशब्दः सत्पर्यायः, विद्यमानकर्माणि क्षपयति । तानि कानि चत्वारि कर्माणि ? तद्यथा-वेदनीयं कर्म १, आयुःकर्म २, नामकर्म ३, गोत्रकर्म ४, एतेषां चतुर्णामपि कर्मणां क्षयं कृत्वा, ततः पश्चात्सिद्ध्यति, सकलार्थं साधयति । सकलार्थं साधयित्वा सिद्धो भवति, ततो बुद्ध्यति तत्त्वज्ञो भवति, मुच्यते कर्मभ्यो मुक्तो भवति, परिनिर्वाति परि समन्तात् कर्मतापाऽभावाच्छीतलो भवति, सर्वदुःखानामन्तं करोति ॥४१॥

एतत्प्रत्याख्यानं प्रायशः प्रतिरूपतायामेव स्यात्, अतः प्रतिरूपतायाः फलमाह-

पडिरूवयाए णं भंते जीवे किं जणयइ ? पडिरूवयाए णं लाघवं जणयइ, लहुभूए णं जीवे अप्पमत्ते पागडलिंगे पसत्थलिंगे विसुद्धसमत्ते सत्तसमितिसम्मत्ते सव्वपाणभूयजीवसत्तेसु विससणिज्जरूवे अप्पडिलेहे जिइंदिए विउलतवसमिइसमन्नागए आवि विहरइ ॥ ४२ ॥

हे भगवन् ! प्रतिरूपतया जीवः किं फलं जनयति ? प्रतिरूपतायाः कोऽर्थः ? प्रतीति स्थविरकल्पिसदृशं रूपं यस्य स प्रतिरूपः, तस्य भावः प्रतिरूपता तया, स्थविरकल्पिसाधुवेषधारित्वेन जीवः किं जनयति ? ।

गुरुराह — हे शिष्य ! प्रतिरूपतया जीवो लघुत्वं जनयति, अधिकोपधित्यागेन लघुत्वमुपार्जयतीत्यर्थः । द्रव्यत उपध्यादिपरिग्रहपरित्यागेन, भावतस्त्वप्रतिबद्धविहारत्वेन लघुर्भवति । लघुभूतश्च जीवोऽप्रमत्तो भवति, तादृशः प्रकटलिङ्गः, प्रकटं स्थविरकल्पादिवेषेण स्फुटं लिङ्गं - चिह्नं यस्य स प्रकटलिङ्गः । पुनः प्रशस्तलिङ्गः, प्रशस्तं समीचीनं रजोहरणमुखपोतिकादिकं यस्य स प्रशस्तलिङ्गः, पुनर्विशुद्धसम्यक्त्वो-निर्मलसम्यक्त्वः, पुनः सत्त्वसमितिसमाप्तः, सत्त्वं च समितयश्च सत्वसमितयस्ताभिः समाप्तः- सम्पूर्णो धैर्यसमितियुक्त इत्यर्थः ।

ततः पुनः सर्वप्राणभूतजीवसत्त्वेषु विश्वसनीयो-विश्वासयोग्यो भवति । पुनस्तादृशोऽल्पप्रतिलेखः, प्रतिलेखनं प्रतिलेखः, अल्पः प्रतिलेखो यस्य सोऽल्पप्रतिलेखः, अल्पोपकरणत्वादल्पप्रतिलेखनावान् भवतीत्यर्थः । पुनः स जितेन्द्रियो भवति । पुनर्विपुलतपःसमितिसमन्वागतश्चापि विहरति, विपुलानि विस्तीर्णानि तपांसि समितयश्च विपुलतपःसमितयस्ताभिरन्वागतिः-सहितः सन् विहरति । द्वादशविधेन तपसा समितिगुप्तिसहितो भूत्वा ग्रामनगरादौ विचरति ॥ ४२ ॥

प्रतिरूपतायामपि वैयावृत्त्यं कर्तव्यं, अतस्तत्फलमाह-

वेयावच्चेणं भंते जीवे किं जणयइ ? वेयावच्चेणं तित्थयरनामगोयं कम्मं निबंधेइ ॥ ४३ ॥

हे भगवन् ! वैयावृत्त्येनाऽऽहारादिसाहाय्येन जीवः किं जनयति ? तदा गुरुराह—हे शिष्य ! वैयावृत्त्येन तीर्थकरनामगोत्रं कर्म निबध्नाति । वैयावृत्यं कुर्वंस्तीर्थकरनामगोत्रं कर्म बध्नातीत्यर्थः ॥ ४३ ॥

अथ वैयावृत्त्यवान् सर्वगुणभाक् स्यात्, अतः सर्वगुणसम्पन्नतायाः फलं प्रश्नपूर्वमाह-

सव्वगुणसंपन्नयाए णं भंते जीवे किं जणयइ ? सव्वगुणसंपन्नयाए

णं अपुणरावत्तिं जणयइ, अपुणरावत्तिपत्तए य णं जीवे सारीरमाणसाणं दुक्खाणं नो भागी भवइ ॥ ४४ ॥

हे भदन्त ! स्वामिन् ! सर्वगुणसम्पन्नतया जीवः किं जनयति ? सर्वे च ते गुणाश्च सर्वगुणाः, ज्ञानदर्शनचारित्रादयस्तैः सम्पन्नता सहितत्वं सर्वगुणसम्पन्नता, तया सर्वगुण-सम्पन्नतया किं फलमुत्पादयति ? गुरुराह—हे शिष्य ! सर्वगुणसम्पन्नतया जीवोऽपुनरावृत्तिं जनयति, मुक्तिमुपार्जयति, अपुनरावृत्तिं प्राप्तो जीवः प्राप्ताऽपुनरावृत्तिः- प्राप्तमोक्षो जीवः शारीरमानसानां दुःखानां विभागी नो भवति ॥ ४४ ॥

सर्वगुणसम्पन्नतया वीतरागो भवति, अतस्तत्फलं प्रश्नपूर्वकमाह-

वीयरागयाए णं भंते जीवे किं जणयइ ? वीयरागयाए णं नेहाणुबंधणाणि य तण्हाणुबंधणाणि य वोच्छिंदइ, मणुन्नेसु सद्दफरिसरसरूवगंधेसु विरज्जइ ॥ ४५ ॥

हे भगवन् ! वीतरागतया जीवः किं जनयति ? वीतो-गतो रागो यस्मात्स वीतरागस्तस्य भावो वीतरागता, तया वीतरागतया रागद्वेषाऽभावेन किं फलं जनयति ? गुरुराह—हे शिष्य ! वीतरागतया स्नेहानुबन्धनानि, स्नेहस्याऽनुकूलानि बन्धनानि, पुत्रमित्र-कलत्रादिषु प्रेमपाशान्, तथा तृष्णानुबन्धनानि, द्रव्यदिष्वाशापाशान् व्यवच्छिनत्ति - विशेषेण त्रोटयति । पुनर्मनोज्ञेषु - मनोहरेषु शब्दस्पर्शरसरूपगन्धेभ्यो विरज्यते । विषयेभ्यो विरक्तो भवतीति भावः ॥ ४५ ॥

वीतरागतायुक्तस्तु श्रामण्यसंयुक्तो भवति, श्रामण्यधर्मे च क्षान्तिरेवाद्या, अतस्तत्फलं प्रश्नपूर्वकमाह-

खंतिए णं भंते जीवे किं जणयइ ? खंतिए णं परीसहे जयइ ॥ ४६ ॥

हे भगवन् ! क्षान्त्या-क्षमया कृत्वा जीवः किं फलं जनयति ? तदा गुरुराह—हे शिष्य ! क्षमया परीषहान् जयति ॥ ४६ ॥

अथ पुनः क्षमावान् मुक्तियुक्तो भवति, निर्लोभी भवति, अतस्तत्फलं प्रश्नपूर्वकमाह-

मुत्तीए णं भंते जीवे किं जणयइ ? मुत्तीए णं अकिंचणं जणयइ, अकिंचणेणं जीवे अत्थलोभाणं अप्पत्थणिज्जे भवइ ॥ ४७ ॥

हे भगवन् ! मुक्त्या - निर्लोभत्वेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! मुक्त्याऽ-किञ्चनत्वं निष्परिग्रहत्वमुत्पादयति, अकिञ्चनत्वेन जीवोऽर्थलोभानामप्रार्थनीयो भवति, कोऽर्थः ? योऽकिञ्चनो-निष्परिग्रहो भवति, स पुरुषोऽर्थे लोभो येषां तेऽर्थलोभा द्रव्यार्थि-

नश्चौरादयः पुरुषास्तेषामप्रार्थनीयस्तैरवाञ्छनीयः, चौरादयो हि निष्परिग्रहं किं कुर्वन्ति ? परिग्रहवतां चौरेभ्यो भीतिः स्यात् ॥ ४७ ॥

लोभे सति माया स्यात्, लोभाऽभावे मायाऽभावः, मायाया अभावे आर्जवं-सरलत्वं स्यात्, अतस्तत्फलं प्रश्नपूर्वकमाह-

अज्जवयाए णं भंते जीवे किं जणयइ ? अज्जवयाए णं काउज्जुययं भावुज्जुययं भासुज्जुययं अविसंवादणं जणयइ, अविसंवादणसंपन्नेणं जीवे धम्मस्स आराहए भवइ ॥ ४८ ॥

हे भदन्त ! आर्जवेण-मायापरिहारेण जीवः किं फलं जनयति ? ऋजोर्भाव आर्जवं, तेन किं फलमुत्पादयति ? तदा गुरुराह—हे शिष्य ! आर्जवेन कायर्जुकतां, भावर्जुकतां, भाषर्जुकतां, अविसंवादनां जनयति । ऋजुरेव ऋजुकः, कायेन ऋजुकः कायर्जुकः, तस्य भावः कायर्जुकता, वक्रशरीरभ्रूविकारादिरहितत्वेन सरलतामुत्पादयति । एवं भावश्चित्ताभिप्रायस्तस्य ऋजुकता भावर्जुकता, तां भावर्जुकतां चित्तसरलतामुत्पादयति । पुनर्भाषाया-वचनस्य ऋजुकता भाषर्जुकता, तां भाषर्जुकतां वचनसरलत्वमुत्पादयति । पुनरविसंवादनं परजीवानामवञ्चनत्वं जनयति । स प्राप्ताऽविसंवादः कायेन वाचा मनसा सम्प्राप्ताऽविसंवादः परवञ्चकतारहितो जीवो धर्मस्य वीतरागधर्मस्याराधको भवति ॥ ४८ ॥

एवमार्जवगुणयुक्तेन मार्दवं विधेयम्, अतो मार्दवफलं प्रश्नपूर्वकमाह-मार्दवं हि मानत्यागरूपं, तत्तु विनयस्य कारणं, धर्मे हि विनयस्य प्राधान्यम्-

मद्दवयाए णं भंते जीवे किं जणयइ ? मद्दवयाए णं जीवे अणुस्सियत्तं जणयइ, अणुस्सियत्तेणं जीवे मिउमद्दवसंपन्ने अट्ठमयठाणाइ निट्ठवेइ ॥ ४९ ॥

हे स्वामिन् ! मार्दवेन-कोमलपरिणामेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! मार्दवेन-मानपरिहारेण जीवोऽनुत्सृतत्वमनहङ्कारित्वमहङ्काराऽभावं जनयति अनुत्सृतत्वेनाहङ्काराभावेन जीवो मृदुः कोमलः सकलभव्यजनमनःसन्तोषहेतुत्वाद् द्रव्यतो भावतश्च सरलोऽवनमनशीलः, मृदोर्भावो मार्दवं, मृदुगुणमार्दवगुणयोरयं भेदः, अवसरेऽवनमनं मृदुगुणः, यत्सर्वदा कोमलत्वभवनं तन्मार्दवं, यद्वा कायेन मानत्यागो मृदुगुणः, मनसा मानपरिहारो मार्दवम् ताभ्यां सम्पन्नो भवति संयुक्तो भवति । तादृशः सन्नष्टौ मदस्थानानि निष्ठापयति क्षपयति ॥ ४९ ॥

एतत्प्रायः सत्यसंस्थितस्य साधोर्भवति, सत्येषु भावसत्यमेव प्रधानम्, अतस्तत्फलं प्रश्नपूर्वकमाह-

भावसच्चेणं भंते जीवे किं जणयइ ? भावसच्चेणं भावविसोहिं जणयइ, भावविसोहिए वट्टमाणे जीवे अरहंतपन्नत्तस्स धम्मस्स आराहणयाए

अब्भुट्ठेइ, अरहंतपन्नत्तस्स धम्मस्स आराहणायाएणं अब्भुट्ठेत्ता परलोगधम्मस्स आराहए भवइ ॥ ५० ॥

हे भदन्त ! भावसत्येन, भावेऽभ्यन्तरात्मनि सत्यं भावसत्यं, तेन भावसत्येन जीवः किं जनयति ? गुरुराह—हे शिष्य ! भावसत्येन जीवो भावविशुद्धिं जनयति, निर्मलाध्यवसायं जनयति । भावविशुद्धौ वर्तमानोऽर्हत्प्रज्ञप्तस्य-श्रीजिनप्रणीतस्य धर्मस्याराधनायै अभ्युत्तिष्ठति सावधानो भवति अर्हत्प्रज्ञप्तस्य धर्मस्याराधनायै अभ्युत्थाय सावधानो भूत्वा परलोके धर्मस्याराधको भवति । परलोके सम्यग्गतिं प्राप्य धर्ममाराधयतीत्यर्थः ॥ ५० ॥

भावसत्यं च करणसत्ययुक्ते सम्भवति, अतः करणसत्यस्य फलं प्रश्नपूर्वकमाह-

करणसच्चेणं भंते जीवे किं जणयइ ? करणसच्चेणं करणसत्तिं जणयइ, करणसच्चे वट्टमाणे जीवे जहावाई तहाकारी आवि भवइ ॥ ५१ ॥

हे भदन्त ! करणसत्येन जीवः किं जनयति ? करणे प्रतिलेखानादिक्रियायां सत्यं यथोक्तविधिनाऽऽराधनं करणसत्यं, तेन करणसत्येन जीवः किं फलमुपार्जयति ? तदा गुरुराह—हे शिष्य ! करणसत्येन करणशक्तिं-क्रियासामर्थ्यं जनयति । पुनः करणसत्ये वर्तमानो जीवो यथावादी तथाकारी भवति । क्रियासत्यः पुमान् यादृशं सूत्रार्थं पठति, यादृशं क्रियाकलापं वदति, तथैव करोतीति भावः ॥ ५१ ॥

एवंविधस्य योगसत्यमपि स्यात्, अतो योगसत्यस्य फलं प्रश्नपूर्वमाह-

जोगसच्चेणं भंते जीवे किं जणयइ ? जोगसच्चेणं जोगे विसोहइ ॥ ५२॥

हे भदन्त ! योगसत्येन, मनोवाक्काययोगानां सत्यं योगसत्यं, तेन योगसत्येन मनोवाक्कायसाफल्येन जीवः किं जनयति ? तदा गुरुराह—हे शिष्य ! योगसत्येन योगान् विशोधयति, मनोवाक्काययोगान् विशदीकरोति, कर्मबन्धाऽभावान्निर्दोषान् करोतीति भावः ॥ ५२ ॥

इदं सत्यं हि गुप्तिसहितस्य भवति, गुप्तीनामादौ मनोगुप्तिरस्ति, तस्मात्पूर्वं तस्याः फलं प्रश्नपूर्वकमाह-

मणगुत्तयाए णं भंते जीवे किं जणयइ ? मणगुत्तयाए णं जीवे एगग्गं जणयइ, एगग्गचित्ते णं जीवे मणगुत्ते संजमाराहए भवइ ॥ ५३ ॥

हे भदन्त ! मनोगुप्ततया जीवः किं जनयति ? तदा गुरुराह—हे शिष्य ! मनोगुप्ततया जीव एकाग्र्यं धर्मे एकान्तत्वमुपार्जयति । एकाग्रचित्तो जीवो गुप्तमनाः सन् संयमस्याराधकः पालको भवति ॥ ५३ ॥

अथ वचोगुप्तिफलमाह-

वयगुत्तयाए णं भंते जीवे किं जणयइ ? वयगुत्तयाए णं निव्वियारत्तं जणयइ, निव्वियारेणं जीवे वयगुत्ते अज्झप्पजोगसाहणजुत्ते आवि भवइ ॥ ५४॥

हे भदन्त ! वचोगुप्ततया जीवः किं फलं जनयति ? गुरुराह—हे शिष्य ! वचोगुप्ततया निर्विकारत्वं विरागभावमुत्पादयति । निर्विकारो जीवो वाग्गुप्तो गुप्तवचनश्च सर्वविकथात्यागाद्वाग्निरोधी-वाग्गुप्तिमान् सन्नध्यात्मयोगसाधनयुक्तश्चापि भवति । आत्मन्यधितिष्ठतीत्यध्यात्मं मनस्तस्य योगाः शुभव्यापारा धर्मध्यानादयस्तेषां साधनमेकाग्र्यमध्यात्मयोगसाधनं, तेन युक्तोऽध्यात्मयोगयुक्तः । तादृशश्चापि स्यादित्यर्थः ॥ ५४ ॥

अथ तृतीयगुप्तेः फलं प्रश्नपूर्वकमाह-

कायगुत्तयाए णं भंते जीवे किं जणयइ ? कायगुत्तयाए णं संवरं जणयइ, संवरेणं कायगुत्ते पुणो पावासवनिरोहं करेइ ॥ ५५ ॥

हे भदन्त ! कायगुप्ततया जीवः किं जनयति ? गुरुराह—हे शिष्य ! कायगुप्ततया जीवः संवरं जनयति, संवरेण गुप्तकायः पुनः पापाश्रवनिरोधं करोति ॥ ५५ ॥

अथ गुप्तित्रयधारकस्य साधोर्मनोवाक्कायानां समाधारणा भवति, अतस्तत्फलं प्रश्नपूर्वमाह-

मणसमाहारणयाए णं भंते जीवे किं जणयइ ? मणसमाहारणयाए णं एगग्गं जणयइ एगग्गं जणइत्ता नाणपज्जवे जणयइ, नाणपज्जवे जणइत्ता सम्मत्तं विसोहेइ, मिच्छत्तं च निज्जरेइ ॥ ५६ ॥

हे भदन्त ! मनःसमाधारणया जीवः किं जनयति ? मनसः सम्यक् प्रकारेण आमर्यादया सिद्धान्तोक्तमार्गमभिव्याप्य वा धारणा स्थापनं मनःसमाधारणा, तया जीवः किं फलमुत्पादयति ? तदा गुरुराह—हे शिष्य ! मनःसमाधारणया मनसो मर्यादया रक्षणेनैकाग्र्यं धर्मे स्थैर्यं जनयति । धर्मे एकाग्र्यमुत्पाद्य ज्ञानपर्यवान् जनयति विशिष्टान् मतिज्ञानश्रुतज्ञानादीनां पर्यायांस्तत्त्वावबोधरूपान् विशेषान् जनयति, पुनः सम्यक्त्वविशुद्धिं जनयति, मिथ्यात्वं च निर्जरयति - निवारयति ॥ ५६ ॥

वचःसमाधारणाया अपि फलमाह-

वयसमाहारणयाए णं भंते जीवे किं जणयइ ? वयसमाहारणयाए णं वयसाहारणदंसणपज्जवे विसोहेइ, वयसाहारणदंसणपज्जवे विसोहित्ता सुलभबोहियत्तं निव्वत्तेइ, दुल्लहबोहियत्तं निज्जरेइ ॥ ५७ ॥

हे भगवन् ! सिद्धान्तोक्तमार्गे वचनसमाधारणया स्वाध्याये एव वाग्निवेशनेन जीवः किं फलं जनयति ? तदा गुरुराह—हे शिष्य ! वचःसमाधारणया वाक्साधारणदर्शनपर्यवान् विशोधयति, वाचा साधारणा वाक्साधारणाः, वाचा कथयितुं योग्या ये पर्यवाः, शब्दविशेषाः, तथा दर्शनस्य-सम्यक्त्वस्य ये पर्यवा भेदास्तान् विशोधयति-निर्मलीकरोति ।

यतो हि वाक्समाधारणं कुर्वन् स्वाध्यायं करोति, स्वाध्यायं कुर्वन् द्रव्यानुयोगाद्यभ्यासं विदधदनेकनयज्ञो भूत्वा शङ्कादिदोषान्निवारयति । अतः सम्यक्त्वं निर्मलं करोति । यतो वाक्साधारणदर्शनपर्यवान् विशोध्य सुलभबोधित्वं निर्वर्तयति । सुलभबोधिः परभवे जैनधर्मप्राप्तिर्यस्य स सुलभबोधिस्तस्य भावः सुलभबोधित्वं, तदुत्पादयति, दुर्लभबोधित्वं निर्जरयति - क्षपयति ॥ ५७ ॥

अथ कायसमाधारणाया अपि फलमाह-

कायसमाहारणयाए णं भंते जीवे किं जणयइ ? कायसमाहारणयाए णं जीवे चरित्तपज्जवे विसोहेइ, चरित्तपज्जवे विसोहित्ता अहक्खायचरित्तं विसोहेइ, अहक्खायचरित्तं विसोहित्ता चत्तारि केवलिकम्मंसे खवेइ, तओ पच्छा सिज्झइ बुज्झइ ॥ ५८ ॥

हे भगवन् ! कायसमाधारणया जीवः किं जनयति ? कायस्य समाधारणा संयमयोगेषु देहस्य सम्यग्व्यवस्थापना कायसमाधारणा, तया जीवः किं फलमुत्पादयति ? तदा गुरुराह- हे शिष्य ! कायसमाधारणया चारित्रपर्यवान् चारित्रभेदान् क्षायोपशमिकान् विशोधयति । चारित्रपर्यवान् विशोध्य यथाख्यातचारित्रं विशोधयति, यथाख्यातचारित्रं निर्मलं कुरुते । ननु यथाख्यातचारित्रमविद्यमानं कथं निर्मलं भवति ? अत्रोत्तरं—यथाख्यातचारित्रं सर्वथाऽविद्यमानं नास्ति, अविद्यमानस्य निर्मलाऽसम्भवात्, तस्माद्यथाख्यातचारित्रं पूर्वमस्ति, परं चारित्रमोहनीयेन मलिनमस्ति । तदेव यथाख्यातचारित्रं चारित्रमोहोदयनिर्जरेण निर्मलीकुरुते । यथाख्यातचारित्रं विशोध्य चतुरः केवलिसत्कर्मांशान्, चत्वारि विद्यमानकर्माणि घनघातीनि वेदनीयायुर्नामगोत्रलक्षणानि भवोपग्राहीणि क्षपयति । ततः सिद्धयति बुद्ध्यति च ॥ ५८ ॥

एवं समाधारणात्रयमुक्त्वा यथाक्रमं ज्ञानादित्रयस्य सम्पन्नतायाः फलं प्रश्नपूर्वकमाह-

नाणसंपन्नयाए णं भंते जीवे किं जणयइ ? नाणसंपन्नायए णं जीवे सव्वभावाभिगमं जणयइ, नाणसंपन्ने णं जीवे चाउरंते संसारकंतारे न विणस्सइ, जहा सूई ससुत्ता पडिया न विणस्सई, तहा जीवोवि ससुत्तो संसारे न विणस्सइ, णाणविणयतवचरित्तजोगे संपाउणइ, [१]ससमयपरसमयविसारए संघायणिज्जे भवइ ॥ ५९ ॥

हे भदन्त ! ज्ञानसम्पन्नतया, ज्ञानस्य श्रुतज्ञानस्य सम्पन्नता श्रुतज्ञानसम्पत्तिस्तया जीवः किं फलं जनयति ? तदा गुरुराह—हे शिष्य ! श्रुतज्ञानसम्पन्नतया जीवः सर्वभावा-

१ ससमयपरसमयसंघायणिज्जे-केचित् संस्करणे । ससमयपरसमयविसारए य असंघायणिज्जे भवइ-कश्चित् संस्करणे । 'विसारए' इति शब्दस्य व्याख्या क्वाऽपि न दृश्यते ॥

भिगमं, सर्वे च ते भावाश्च सर्वभावा-जीवाजीवादयस्तेषामभिगमः सर्वभावाभिगमस्तं सर्वभावाभिगमं-जीवाजीवादितत्त्वज्ञानं जनयति । तथा ज्ञानसम्पन्नो जीवश्चतुरन्तसंसार-कान्तारे-चतुर्गतिलक्षणे संसारवने न विनश्यति, मोक्षाद्विशेषेण दूरं नाऽदृश्यो भवति । यथा हि ससूत्रा सूची कचवरादिषु पतिता सती न नश्यति, अदृश्या न भवति, नाशं न प्राप्नोति, तथा जीवोऽपि ससूत्रः श्रुतज्ञानसहितः संसारे विनष्टो न भवतीति भावः । ततश्च श्रुतज्ञानी ज्ञान विनयतपश्चारित्रयोगान् सम्प्राप्नोति । ज्ञानं च विनयश्च तपश्च चारित्रयोगाश्च ज्ञानविनयतपश्चारित्रयोगास्तान् सम्यक् प्रकारेण प्राप्नोति । तत्र ज्ञानमवध्यादि, विनयः प्रसिद्धः, तपो द्वादशविधं, चारित्रयोगाश्च चारित्रव्यापारास्तान् सर्वान् लभते । पुनः श्रुतज्ञानी स्वसमयपरसमयसङ्घातनीयो भवति, स्वमतपरमतयोः सङ्घातनीयो-मीलनीयः स्यात् । एतावता स्वमतपरमताभिज्ञत्वेन प्रधानपुरुषत्वात् पण्डितेषु गणनीयो भवतीति भावः ॥५९॥

दंसणसंपन्नयाए णं भंते जीवे किं जणयइ ? दंसणसंपन्नयाए णं भवमिच्छत्तछेयणं करेइ, परं नो विज्झाइ, [१]परं अणुज्झायमाणे अणुत्तरेणं नाणदंसणेणं अप्पाणं संजोएमाणे सम्मं भावमाणे विहरइ ॥ ६० ॥

हे भगवन् ! दर्शनसम्पन्नतया दर्शनस्य क्षायोपशमिकस्य सम्पन्नता दर्शनसम्पन्नता, तया दर्शनसम्पन्नतया क्षयोपशमसम्यक्त्वसहितत्वेन जीवः किं फलं जनयति ? तत्र गुरुरुत्तरमाह—हे शिष्य ! दर्शनसम्पन्नतया जीवो भवमिथ्यात्वच्छेदनं करोति, अर्थात् क्षायिकसम्यक्त्वं प्राप्नोति, परं - ततः पश्चान्न विध्यापयति, ज्ञानदर्शनचारित्राणां प्रकाशं नो निवारयति । ततः परं च ज्ञानदर्शनचारित्राणां प्रकाशमविध्यापयन् - ज्ञानदर्शनचारित्राणां तेजोऽविनाशयन्ननुत्तरेण सर्वोत्कृष्टेन क्षायिकत्वात्प्रधानेन ज्ञानदर्शनेनात्मानं संयोजयन्, सम्यक् प्रकारेणात्मानमात्मनैव वशीकुर्वन् विहरति, भवस्थकेवलतया मुक्ततया वा विचरतीति भावः ॥ ६० ॥

चरित्तसंपन्नयाए णं भंते जीवे किं जणयइ ? चरित्तसंपन्नयाए णं सेलेसीभावं जणयइ, सेलेसीं पडिवन्ने य अणगारे चत्तारि केवलकम्मंसे खवेइ, तओ पच्छा सिज्झइ, बुज्झइ, मुच्चइ, परिनिव्वायइ, सव्वदुक्खाणमंतं करेइ ॥ ६१ ॥

हे स्वामिंश्चारित्रसम्पन्नतया, चारित्रेण यथाख्यातचारित्रेण सम्पन्नता चारित्रसम्पन्नता तया, यथाख्यातचारित्रसहितत्वेन जीवः किं जनयति ? तदा गुरुराह—हे शिष्य ! चारित्र-सम्पन्नतया यथाख्यातचारित्रसहितत्वेन शैलेशीभावं जनयति । शैलानां पर्वतानामीशः शैलेशो-मेरुस्तस्येयमवस्था शैलेशी, तस्या भवनं शैलेशीभावस्तमुत्पादयति । अंशशब्दः

१ परं अणुज्झायमाणे नास्ति अन्यस्मिन् संस्करणे ॥

सत्तार्थवाचकश्चतुर्दशगुणस्थानं भजते । ततः पश्चात्सिद्ध्यति, सकलकर्माणि क्षपयित्वा सिद्धिं प्राप्नोति, बुद्ध्यति तत्त्वज्ञो भवति, मुच्यते कर्मभ्यो मुक्तो भवति, परिनिर्वाति कषायाग्नेरुपशमाच्छीतलो भवति, सर्वदुःखानामन्तं करोति ॥ ६१ ॥

अथ चारित्रे सति पञ्चेन्द्रियनिग्रहो युज्यते, अतस्तत्फलं प्रश्नपूर्वमाह-

सोइंदियनिग्गहेणं भंते जीवे किं जणयइ ? सोइंदियनिग्गहेणं मणुन्नामणुन्नेसु सद्देसु रागद्दोसनिग्गहं जणयइ, तप्पच्चइयं कम्मं न बंधइ, पुव्वबद्धं च निज्जरइ ॥ ६२ ॥

हे भदन्त ! हे स्वामिन् ! श्रोत्रेन्द्रियनिग्रहेण-कर्णेन्द्रियविजयेन जीवः किं जनयति ? तदा गुरुराह—हे शिष्य ! श्रोत्रेन्द्रियनिग्रहेण मनोज्ञामनोज्ञेषु शब्देषु रागद्वेषनिग्रहं जनयति । पुना रागद्वेषाऽभावे सति तत्प्रत्ययिकं कर्म न बध्नाति । तौ रागद्वेषावेव प्रत्ययो-निमित्तं यस्य तत्तत्प्रत्ययं, तत्प्रत्यये भवं तत्प्रत्ययिकम् । रागद्वेषाभावे रागद्वेषनैमित्तिकं कर्म न बध्नाति । पूर्वबद्धं रागद्वेषोपार्जितं कर्म निर्जरयति - क्षपयति ॥ ६२ ॥

चक्खिंदियनिग्गहेणं भंते जीवे किं जणयइ ? चक्खिंदियनिग्गहेणं मणुन्नामणुन्नेसु रूवेसु रागद्दोसनिग्गहं जणयइ, तप्पच्चइयं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥ ६३ ॥

हे भदन्त ! हे स्वामिन् ! चक्षुरिन्द्रियनिग्रहेण जीवः किं जनयति ! तदा गुरुराह—हे शिष्य ! चक्षुरिन्द्रियनिग्रहेण मनोज्ञामनोज्ञेषु रूपेषु रागद्वेषनिग्रहं - रागद्वेषजयं जनयति । ततश्च तत्प्रत्ययिकं रागद्वेषोत्पन्नं कर्म न बध्नाति । पूर्वबद्धं रागद्वेषोपार्जितं कर्म निर्जरयति-क्षपयति ॥ ६३ ॥

घाणिंदियनिग्गहेणं भंते जीवे किं जणयइ ? घाणिंदियनिग्गहेणं मणुन्नामणुन्नेसु गंधेसु रागद्दोसनिग्गहं जणयइ, तप्पच्चइयं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥ ६४ ॥

हे भदन्त ! हे स्वामिन् ! घ्राणेन्द्रियनिग्रहेण जीवः किं जनयति ? गुरुर्वदति—हे शिष्य ! घ्राणेन्द्रियनिग्रहेण मनोज्ञामनोज्ञेषु गन्धेषु रागद्वेषनिग्रहं जनयति । ततो रागद्वेषजयात्तत्प्रत्ययिकं रागद्वेषोत्पन्नं कर्म न बध्नाति, पूर्वोपार्जितं कर्म निर्जरयति ॥ ६४ ॥

जिब्भेंदियनिग्गहेणं भंते जीवे किं जणयइ ? जिब्भेन्दियनिग्गहेणं मणुन्नामणुन्नेसु रसेसु रागद्दोसनिग्गहं जणयइ, तप्पच्चइयं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥ ६५ ॥

हे भदन्त ! जिह्वेन्द्रियनिग्रहेण जीवः किं जनयति ? गुरुराह—हे शिष्य ! जिह्वेन्द्रिय-निग्रहेण जीवो मनोज्ञाऽमनोज्ञेषु रसेषु रागद्वेषनिग्रहं जनयति, ततश्च तत्प्रत्ययिकं रागद्वेष-नैमित्तिकं कर्म न बध्नाति । पूर्वबद्धं रागद्वेषोपार्जितं कर्म निर्जरयति - क्षपयति ॥ ६५ ॥

फासिंदियनिग्गहेणं भंते जीवे किं जणयइ ? फासिंदियनिग्गहेणं मणुन्नामणुन्नेसु फासेसु रागद्दोसनिग्गहं जणयइ, तप्पच्चइयं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥ ६६ ॥

हे भगवन् ! स्पर्शेन्द्रियनिग्रहेण जीवः किं जनयति ? तदा गुरुराह—हे शिष्य ! स्पर्शेन्द्रियनिग्रहेण जीवो मनोज्ञामनोज्ञेषु स्पर्शेषु रागद्वेषनिग्रहं जनयति, ततश्च तत्प्रत्ययिकं कर्म न बध्नाति, पूर्वबद्धं च निर्जरयति ॥ ६६ ॥

इन्द्रियनिग्रहकर्ता कषायविजयी स्यात्, अतः कषायविजयफलं प्रश्नपूर्वकमाह-

कोहविजएणं भंते जीवे किं जणयइ ? कोहविजएणं खंतिं जणयइ कोहवेयणिज्जं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥ ६७ ॥

हे भगवन् ! क्रोधविजयेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! क्रोधविजयेन जीवः क्षान्तिं जनयति, क्रोधविजयी क्षान्तिमान् भवतीत्यर्थः । पुनः क्रोधवेदनीयं कर्म न बध्नाति । क्रोधोदयेन वेद्यते इति क्रोधवेदनीयं, क्रोधहेतुभूतं पुद्गलरूपं मोहनीयकर्मणो भेदं न बध्नाति, पूर्वबद्धं च कर्म निर्जरयति ॥ ६७ ॥

माणविजएणं भंते जीवे किं जणयइ ? माणविजएणं मद्दवं जणयइ, माणवेयणिज्जं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥ ६८ ॥

हे भगवन् ! मानविजयेन जीवः किं फलं जनयति ? गुरुराह—हे शिष्य ! मानविजयेन जीवो मार्दवं-सुकुमालत्वं जनयति । मानविजयान्नमनशीलो भवतीति भावः । पुनर्मानेन मानोदयेन वेद्यते इति मानवेदनीयं कर्म न बध्नाति, पूर्वबद्धं च कर्म निर्जरयति ॥ ६८ ॥

मायाविजएणं भंते किं जणयइ ? मायाविजएणं उज्जुभावं जणयइ, मायावेयणिज्जं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥ ६९ ॥

हे भगवन् ! मायाविजयेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! मायाविजयेन जीव ऋजुभावं - सरलत्वमुत्पादयति, ततश्च मायावेदनीयं कर्म न बध्नाति, पूर्वबद्धं च कर्म निर्जरयति-क्षपयति ॥ ६९ ॥

लोहविजएणं भंते जीवे किं जणयइ ? लोहविजएणं संतोषिभावं जणयइ, लोहवयेणिज्जं कम्मं न बंधइ, पुव्वबद्धं च कम्मं निज्जरेइ ॥७०॥

हे भगवन् ! लोभविजयेन जीवः किं जनयति ? गुरुराह—हे शिष्य ! लोभविजयेन जीवः सन्तोषिभावं, सन्तोषिणो भावः सन्तोषिभावस्तमुत्पादयति, लोभवेदनीयं कर्म न बध्नाति, पूर्वनिबद्धं च कर्म निर्जरयति ॥ ७० ॥

कषायविजयिना साधुना रागद्वेषमिथ्यादर्शनविजयः कर्त्तव्यः, अतस्तेषां जयफलं प्रश्नपूर्वकमाह-

पिज्जदोसमिच्छादंसणविजएणं भंते जीवे किं जणयइ ? पिज्जदोसमिच्छादंसणविजएणं नाणदंसणचरित्ताराहणाए अब्भुट्ठेइ, अट्ठविहस्स कम्मस्स गंठिविमोयणट्ठाए तप्पढमयाए जहाणुपुव्विए अट्ठावीसइविहं मोहणिज्जं कम्मं उग्घाएइ, पंचविहं नाणावरणिज्जं, नवविहं दंसणावरणिज्जं पंचविहमंतरायं, एए तिन्निवि कम्मंसे जुगवं खवेइ, तओ पच्छा अणुत्तरं अणंतं कसिणं पडिपुण्णं निरावरणं वितिमिरं विसुद्धलोगालोगप्पभावयं केवलवरनाणदंसणं समुप्पाडेइ, जाव सजोगी भवइ ताव इरियावहियं कम्मं बंधइ, सुहफरिसं दुसमयठिइयं तं पढमसमए बद्धं, बीयसमए वेइयं, तईयसमए निज्जिण्णं तं बद्धं पुट्ठं उईरिअं वेइअं निज्जिण्णं सेयाले अकम्मं चावि भवइ ॥ ७१ ॥

हे भदन्त ! स्वामिन् ! प्रेय्यद्वेषमिथ्यादर्शनविजयेन जीवः किं फलं जनयति ? तत्र प्रेय्यशब्देन प्रेमरागः, द्वेषः प्रसिद्धः, मिथ्यादर्शनं संशयादिभिर्विपरीतमतित्वं, प्रेय्यं च द्वेषश्च मिथ्यादर्शनं च प्रेय्यद्वेषमिथ्यादर्शनानि, तेषां विजयः प्रेय्यद्वेषमिथ्यादर्शनविजयस्तेन जीवः किं फलमुत्पादयति ? तदा गुरुराह—हे शिष्य ! मिथ्यादर्शनविजयेन जीवो ज्ञानदर्शनचारित्राणामाराधनायै अभ्युत्तिष्ठते, सावधानो भवति, अभ्युत्थाय चाष्टविधकर्मणां ग्रन्थि घातिकर्मणां कठिनजालं विमोचनार्थं क्षपयितुमभ्युत्तिष्ठते-सावधानो भवति ।

अथ कर्मग्रन्थिविमोचनेऽनुक्रममाह-तत्प्रथमतया यथानुक्रममष्टाविंशतिविधं मोहनीयं कर्मोद्घातयति, क्षपकश्रेणिमारूढः सन् क्षपयति-षोडशकषायाः, नवनोकषायाः, मोहनीयत्रयं, एवमष्टाविंशतिविधं मोहनीयकर्म विनाशयति । ततश्चरमसमये यत्क्षपयति तत्क्रममाह—मतिश्रुतावधिमनःपर्यायकेवलज्ञानावरणरूपं कर्म, पञ्चान्नवविधं दर्शनावरणीयं कर्म, चक्षुर्दर्शनाऽचक्षुर्दर्शनावधिदर्शनकेवलदर्शनावरणं, निदापञ्चकं, चैवं नवविधं दर्शनावरणीयं कर्म, ततः पञ्चात्पञ्चविधमन्तरायं, एतानि त्रीणि 'कम्मंस्से' इति सत्कर्माणि विद्यमानानि त्रीणि कर्माणि युगपत्क्षपयति, क्षपकश्रेणीमारूढः सन् समकालं क्षयं नयतीत्यर्थः ।

ततः पश्चादनन्तरं-तेषां कर्मणां क्षयीकरणादनन्तरमनुत्तरं सर्वेभ्यः प्रधानं, अनन्तमनन्तार्थग्राहकं, कृत्स्नं समस्तवस्तुपर्यायग्राहकं, प्रतिपूर्णं सकलैः स्वपरपर्यायैः सहितं, निरावरणं समस्तावरणरहितं, वितिमिरमज्ञानांशरहितं, विशुद्धं सर्वदोषरहितं, लोकालोकप्रभावकं-लोकालोकयोः प्रकाशकारकम्, एतादृशं केवलज्ञानदर्शनं समुत्पादयति, यावत्सयोगी भवति, मनोवाक्कायानां योगो व्यापारस्तेन सह वर्तते इति सयोगी भवति, त्रयोदशगुणस्थाने यावत्तिष्ठति, तावदीर्यापथिकं कर्म बध्नाति । ईरणमीर्या-गतिस्तस्याः पन्था ईर्यापथः, ईर्यापथे भवमीर्यापथिकम्, पथो ग्रहणं ह्युपलक्षणं, तस्य तिष्ठतोऽपि सयोगस्येर्याया सम्भावत्, सयोगतायां केवलिनोऽपि सूक्ष्मसञ्चाराः सन्ति ।

तदीर्यापथिकं कर्म कीदृशं भवति ? तदुच्यते- सुखयतीति सुखः, सुखः-सुखकारी स्पर्श, आत्मप्रदेशैः सह संश्लेषो यस्य तत्सुखस्पर्शं, द्विसमयस्थितिकं, द्वौ समयौ यस्याः सा द्विसमया, द्विसमया स्थितिरस्येति द्विसमयस्थितिकम् । तद्द्विसमयस्थितिकस्वरूपमाह-प्रथमसमये बद्धं, स्वस्य स्पर्शनायाधीनं कृतम्, आधीनकरणात्स्पृष्टमपि द्वितीये समये तद्बद्धं स्पष्टं वेदितं-कायेनानुभूतम् । तृतीयसमये निर्जीर्णं परिशाटितं, निष्कषायस्योत्तरकालस्थितेरभावो वर्तते, उत्तरकाले सकषायस्य बन्धो भवति, परं केवलिनो न भवति, तदेव पुनः सूत्रकारो भ्रान्तिनिवारणार्थमाह-तदीर्यापथिकं कर्म केवलिनो बद्धमात्मप्रदेशैः सह श्लिष्टं - स्पृष्टं व्योम्ना पटवत्, तथा स्पृष्टं मसृणमपि कोमलमपि कुड्यापतितशुष्कचूर्णवदिति विशेषणद्वयेन केवलिनो हि निधत्तनिकाचितावस्थयोरभावः । पुनरुदीरितमुदयप्राप्तं सद्वेदितमनुभूतं, केवलिनो ह्युदीरणा न भवति, ततो निर्जीर्णं क्षयमुपगतम् । ततः 'सेयाले' इति एष्यत्काले-आगामिनि कालेऽकर्मा चापि भवति, कर्मरहितो भवतीत्यर्थः ॥ ७१ ॥

अथ शैलेश्यकर्मताद्वारद्वयमर्थतो व्याचिख्यासुराह-

अहाउयं पालयित्ता अंतोमुहुत्तवसेसाउए जोगनिरोहं करेमाणे सुहुमकिरियं अप्पडियाइं सुक्कज्झाणं झायमाणे तप्पढमयाए मणजोगं निरुंभइ, मणजोगं निरुंभित्ता वयजोगं निरुंभइ, वयजोगं निरुंभित्ता कायजोगं निरुंभइ, कायजोगं निरुंभित्ता आणपाणनिरोहं करेइ, आणपाणनिरोहं करित्ता इसिं पंचहस्सक्खरुच्चारद्धाए णं अणगारे समुच्छिन्नकिरियं अनियट्टिसुक्कज्झाणं झियायमाणे वेयणिज्जं आउयं नाम गोयं च एए चत्तारि वि कम्मंसे जुगवं खवेइ ॥ ७२ ॥

अथ केवलप्राप्तेरनन्तरमायुष्कं देशोनपूर्वकोटिप्रमितमायुः प्रपाल्य, अथवाऽन्यदप्यायुः पालयित्वान्तर्मुहूर्तावशेषायुष्को, यदा केवलिनोन्तर्मुहूर्तप्रमाणमायुस्तिष्ठति, तदा केवली योगं मनोवाक्कायव्यापारं, तस्य निरोधं कुर्वाणः सन्, सूक्ष्मा क्रिया यत्र तत् सूक्ष्मक्रियमप्रतिपातिशुक्लध्यानं, शुक्लध्यानस्य तृतीयभेदलक्षणं, तद्ध्यायंस्तत्प्रथमतया प्रथमतो मनोयोगो-मनोव्यापारो मनोद्रव्यजनितो जीवव्यापारस्तं निरुणद्धि । तं निरुध्य च वचोयोगं

भाषाद्रव्यसाचिव्यजनितजीवव्यापारं निरुणद्धि । तं निरुध्य च काययोगं-कायव्यापारं निरुणद्धि । तं निरुध्य चानप्राणनिरोधं-श्वासप्रश्वासयोर्निरोधं करोति । तन्निरोधं कृत्वा-योगत्रयनिरोधं कृत्वेषत्स्वल्पप्रयासेन यथोच्चार्यते, तथा पञ्चानां ह्रस्वाक्षराणामुच्चारकालेन, यावता कालेनेषत्प्रयासेन पञ्चाक्षराणि 'अ इ उ ऋ लृ' इत्येतानि कथ्यन्ते, तावता कालेना-नगारः समुच्छिन्नक्रियं, सम्यगुच्छिन्नास्त्रोटिताः क्रिया यत्र तत्समुच्छिन्नक्रियं पुनरनि-वृत्तिशुक्लध्यानं-शुक्लध्यानस्य चतुर्थभेदरूपं ध्यायन् शैलेश्यवस्थामनुभवन् सन् वेदनीयं १, आयुः २, नाम ३, गोत्रं ४, चैतांश्चत्वारः कर्मांशान्, एतानि चत्वारि सत्कर्माणि विद्यमानानि कर्माणि युगपत्समकालं क्षपयति ॥ ७२ ॥

तओ ओरालियकम्माइं च सव्वाहिं विप्पहाणाहिं विप्पजहित्ता उजुसेढीं पत्ते अफुसमाणगई उड्ढं एगसमएणं अविग्गहेणं तत्थ गंता सागारोवउत्ते सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणमंतं करेइ ॥ ७३ ॥

ततः पश्चाद्वेदनीयादिचतुष्कर्मक्षयीकरणादनन्तरमौदारिककार्मणे, चशब्दात्तैजसमपि, एतच्छरीरत्रयमपि सर्वाभिर्विप्रहाणिभिर्विप्रहाय, विशेषेण प्रहाणयो विप्रहाणयः, ताभि-र्विशेषेण प्रहाय-परिशाट्यऋजुश्रेणिं प्राप्तः, ऋजुः- सरला चासौ श्रेणिश्च ऋजुश्रेणिस्तामृजु-श्रेणिम्, सरलाकाशप्रदेशपङ्क्तिं गतः पुनरस्पृशद्गतिः सन्, यावन्तः समोर्ध्वश्रेण्या-माकाशप्रदेशावगाह्यमानास्तानेव स्वप्रदेशैः स्पृशन्नधिकान्न स्पृशन् जीवो यया गत्या व्रजति तादृग्गतिधरः सन्नूर्ध्वग एकेन समयेन विग्रहगत्यभावेन तत्र मोक्षस्थाने गत्वा साकारोपयुक्तो ज्ञानोपयोगयुक्तः सन् सिद्ध्यति बुद्ध्यति परिनिर्वाति सर्वदुःखानामन्तं करोति ॥ ७३ ॥

अथ प्रश्नोत्तरोपसंहारमाह-

एस खलु सम्मत्तपरिक्कमस्स अज्झयणस्स अट्ठे समणेणं भगवया महावीरेणं आघविए पन्नविए परूविए दंसिए णिदंसिए उवदंसिए ॥ ७४ ॥ त्ति बेमि ॥

हे जम्बू ! एष इदानीमुक्तः, खलु निश्चयेन सम्यक्त्व-पराक्रमस्याध्ययनस्यार्थः श्रमणेन भगवता ज्ञानवता श्रीमहावीरेण 'आघविएत्ति' आर्षत्वा-दाख्यातः, पुनः प्रज्ञापितः सामान्यविशेषपर्यायैर्व्यक्तीकरणेन प्रकटीकृतः । पुनः प्ररूपितो हेतुफलादिप्रकर्षज्ञापनेन प्ररूपितः, पुनर्दर्शितो नानाभेदैर्दर्शनेन प्रकाशितः । पुनर्निदर्शितो दृष्टान्तोपन्यासेन दृढीकृतः पुनरुपदर्शितस्वरूपकथनेन ज्ञापितः उपसंहारेण वा ज्ञापितः, इत्यहं ब्रवीमि, इति सुधर्मास्वामी जम्बूस्वामिनं प्राह ॥ ७४ ॥

इति सम्यक्त्वपराक्रमाख्यमध्ययनं सम्पूर्णम् ॥ २९ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविर-चितायां सम्यक्त्वपराक्रमाख्यमध्ययनमेकोनत्रिंशत्तमं सम्पूर्णम् ॥ २९ ॥

॥ ३० तपोमार्गाख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययनेऽप्रमत्तत्वं वीतरागत्वसम्यक्त्वपराक्रमत्वं चोक्तं तेनाप्रमत्तेन सम्यक्त्व-पराक्रमवता मोक्षमार्गाय तपस्युद्यमो विधेयः, अतस्तपोमार्गाध्ययनं त्रिंशत्तमं च कथ्यते-

जहा उ पावयं कम्मं, रागद्दोससमज्जियं ।
खवेइ तवसा भिक्खू, तमेगग्गमणो सुण ॥ १ ॥

यथा येन प्रकारेण भिक्षुस्तपसा रागद्वेषसमर्जितं-रागद्वेषाभ्यामुपार्जितं कर्म क्षपयति, तुशब्दः-पादपूरणे, तं तपोमार्गमेकाग्रमनाः सावधानचित्तः सन् त्वं शृणु । हे जम्बू ! अहं वदामीति सम्बन्धः, अनाश्रवेणैव किल कर्मक्षयः क्रियते ॥ १ ॥

पाणिवहमुसावाए, अदत्तमेहुणपरिग्गहा विरओ ।
राईभोयणविरओ, जीवो हवह [1]निरासओ ॥ २ ॥

हे शिष्य ! ईदृशो जीवो निराश्रवो भवति । कीदृशः ? प्राणिवधमृषावादादत्तमैथुन-परिग्रहाद्विरतो रहितः, पुना रात्रिभोजनविरतः ॥ २ ॥

पुनरनाश्रवो यथा जीवो भवति, तथाह-

पंचसमिओ तिगुत्तो, अकसाओ जिइंदिओ ।
अगारवो य निस्सल्लो, जीवो हवइ अनासवो ॥ ३ ॥

एतादृशो जीवोऽनाश्रवो भवति, आश्रवरहितो भवति । कीदृशो जीवः ? पञ्चभिः समितिभिः समितः-सहितः पञ्चसमितः, पुनस्तिसृभिर्गुप्तिभिर्गुप्तः, पुनरकषायः-कषाय-रहितः, पुनर्जितेन्द्रियः-वशीकृतेन्द्रियः, पुनरगारव-ऋद्धिरससातादिगर्वत्रयरहितः, पुनर्निशल्यो मायानिदानमिथ्यादर्शनशल्यैस्त्रिभी रहितः, एतादृशो जीवोऽनाश्रवो भवति ॥३॥

एवंविधोऽनाश्रवश्च यथा कर्म क्षपयति तथा वदति-

एएसिं तु विवच्चासे, रागद्दोससमज्जियं ।
खवेइ उ जहा भिक्खू, तमेगग्गमणो सुण ॥ ४ ॥

हे शिष्य ! यथा येन प्रकारेण भिक्षुः साधुरेतेषां पूर्वोक्तानां प्राणातिपातमृषावादा-दत्तमैथुनपरिग्रहरात्रिभोजनविरतिलक्षणानां व्रतानां, तथा समितिगुप्त्यादिलक्षणानामना-श्रवकारणानां विपर्यासे-वैपरीत्ये प्राणिवधमृषावादादत्तमैथुनपरिग्रहरात्रिभोजनसमित्य-भावसेवने सति रागद्वेषाभ्यां समर्जितं-सञ्चितं पापकर्म क्षपयति, तं प्रकारमेकाग्रमना-एकचित्तः सन् त्वं शृणु ॥ ४ ॥

---

१ अणासवो-मु. २, अन्यसंस्करणे च ॥

अत्र दृष्टान्तमाह-

जहा महातलागस्स, संनिरुद्धे जलागमे ।
उस्सिंचणाए तवणाए, कमेणं सोसणा भवे ॥ ५ ॥

यथा महातटाकस्य-महाजलाश्रयस्य जलागमे-पानीयागमनमार्गे संनिरुद्धे सम्यक्-प्रकारेण संवृते सति, 'उस्सिंचणाए' उत्सिञ्चनयोद्ध्वंमरघट्टादिनोद्ध्वांकर्षणायाऽऽतपनेन-रविकिरणादीनां सन्तापेन क्रमेण शोषणा-जलस्य शोषणं भवेत्, नवीनजलागमनमार्गो निरुध्यते, पूर्वस्थजलं च निष्कास्यते, तदा जलह्रदो रिक्तः स्यादितिभावः ॥ ५ ॥

अथ दार्ष्टान्तिकमाह-

एवं तु संजयस्सावि, पावकम्मनिरासवे ।
भवकोडीसंचियं कम्मं, तवसा निज्जरिज्जई ॥ ६ ॥

एवममुना प्रकारेण पापकर्मनिराश्रवे सति, पापकर्मणां प्राणिवधाद्यानां निरोधे सति संयतस्यापि-साधोरपि तपसा द्वादशविधेन भवकोटीसञ्चितं कर्म निर्जीर्यते, आधिक्येन क्षयं नीयते । अत्र कोटीग्रहणं बहुत्वोपलक्षणम्, कोटीनियमस्याऽसम्भवात् ॥ ६ ॥

अथ तपोभेदमाह-

सो तवो दुविहो वुत्तो, बाहिरब्भिंतरो तहा ।
बाहिरो छव्विहो वुत्तो, एवमब्भिन्तरो तवो ॥ ७ ॥

तत्तपो द्विविधं प्रोक्तं, बाह्यं तथाभ्यन्तरं 'बाह्यं' षड्विधं प्रोक्तं, एवममुना प्रकारेणा-भ्यन्तरमपि षड्विधं प्रोक्तम् ॥ ७ ॥

प्रथमं बाह्यं षड्विधमाह-

अणसणमूणोयरिया, भिक्खायरिया य रसपरिच्चाओ ।
कायकिलेसो संलीणया, य बज्झो तवो होइ ॥ ८ ॥

अनशनमुपवासः, एकस्मादुपवासादारभ्य षण्मासिकपर्यन्तमनशनं तप उच्यते १, द्वात्रिंशत्कवलप्रमाणमाहारः प्रत्यहमेकैकेन कवलेन न्यूनीकुर्वन् यावदेकस्मिन् कवले स्थाप्यते, सोनोदरिका, ऊनोदरे भवमूनोदरिकं तपः २, प्राकृतत्वाल्लिङ्गव्यत्ययः, भिक्षाचर्या भिक्षयाऽऽहारग्रहणार्थमुच्चावचगृहेषु भ्रमणम् ३, रसत्यागः विकृतिनां परित्यागः ४, कायक्लेशस्तापशीतादीनां सहनम् ५, संलीनताङ्गोपाङ्गादिकं संवृत्य प्रवर्तनं ६, एतत् षड्विधं बाह्यं तपो भवति ॥ ८ ॥

अथेतेषामेव स्वरूपमाह-

इत्तरियमरणकाला, अणसणा दुव्विहा भवे ।
इत्तरियसावकंखा, निरवकंखा बिइज्जिया ॥ ९ ॥

अनशनं द्विविधं भवति, इत्वरिकं - इत्वरे स्तोके काले भवमित्वरिकमल्पकालं नियत-कालावधिकमित्यर्थः । मरणावसानः कालो यस्याः सा मरणकाला, इति द्वितीयम्, यावज्जीवमित्यर्थः । स्त्रीलिङ्गत्वं प्राकृतत्वात् । इत्वरिकं तपः सावकाङ्क्षं भवति, सह अवकाङ्क्षया वर्तते इति सावकाङ्क्षं, घटिकाद्वयाद्यनन्तरमहं भोजनं विधास्यामीतिवाञ्छा-सहितमित्यर्थः । द्वितीयं यावज्जीवं निरवकाङ्क्षमाहारप्रत्याख्यानादारभ्य तज्जन्मनि भोजनाशाऽसम्भवाद् वाञ्छारहितमित्यर्थः ॥ ९ ॥

जो सो इत्तरियतवो, सो समासेण छव्विहो ।
सेढितवो पयरतवो, घणो य तह होइ वग्गो य ॥ १० ॥

यत्त्वित्वरिकं तपस्तत्समासेन-सङ्क्षेपेण षड्विधं भवति, विस्तरस्तु द्वासप्ततिविधं ७२ भेदम्, अथ षड्विधत्वमाह-श्रेणितपः १, प्रतरतपः २, घनतपः ३, तथा वर्गतपः ४, श्रेणिः- पङ्क्तिस्तदुपलक्षितं तपः श्रेणितपः, तच्चतुर्थादिक्रमेण क्रियमाणं षण्मासान्तं गृह्यते, तत्प्रथमतो भवति । तथा श्रेणिरेव श्रेण्या गुणिता प्रतरस्तदुपलक्षितं तपः प्रतरतपः । इह सुबोधार्थं चतुर्थं षष्ठाष्टमदशमाख्यपदचतुष्टयात्मिका श्रेणिर्विवक्ष्यते, सा चतुर्भिर्गुणिता षोडशपदात्मकं प्रताख्यं तपो भवति । तत्प्रतरतपः षोडशपदात्मकमेव यदा पदचतुष्टया-त्मिकया श्रेण्या गुण्यते, तदा घनाख्यं तपो भवति, 'सोल चउका चउसट्ठि' इति भावः । अथ पुनर्यदा घनश्चतुःषष्टिपदात्मैका घनेनैव चतुःषष्टिपदात्मैकेनैव गुण्यते, तदा वर्गो भवति, तदुपलक्षितं तपो वर्गतप उच्यते । चतुःषष्टिश्चतुःषष्टया गुणितानि जातान्यङ्कानि षण्ण-वत्यधिकानि चत्वारि सहस्राणि ४०९६ ॥ १० ॥

अथ पञ्चमषष्ठभेदावाह-

तत्तो य वग्गवग्गो, पंचमो छट्ठओ पइन्नतवो ।
मणइच्छियचित्तत्थो, नायव्वो होइ इत्तरिओ ॥ ११ ॥

तत इति ततो वर्गतपोऽनन्तरं वर्गवर्ग इति पञ्चमः तपो ज्ञेयम् । वर्ग एव वर्गाद्गुणितो वर्गवर्गो भवति, यथा चैककोटिः सप्तषष्टिलक्षाः सप्तसप्ततिसहस्राणि द्विशती षोडशाधिका अङ्कतो भवति १६७७७२१६ । एतदुपलक्षितं तपो वर्गवर्गतप इत्युच्यते इत्यर्थः - एवं पञ्चादिपदेष्वपि भावना कर्तव्या । तथा षष्ठकं तपो यत् श्रेण्यादिनियतरचनारहितं निजशक्त्या नमस्कारसहितादि पूर्वपुरुषाचरितं यवमध्य-वज्रमध्य-चन्द्रप्रतिमादि चेति, तत्प्रकीर्णतपः

मनसीप्सित इष्टश्चित्रोऽनेकप्रकारोऽर्थः स्वर्गापवर्गादिस्तेजोलेश्यादिर्वा यस्मात्तन्मनसीप्सित-चित्रार्थमित्वरिकं प्रक्रमादनशनाख्यं तपो ज्ञातव्यम् ॥ ११ ॥

अथ द्वितीयं मरणकालमनशनमाह-

जा सा अणसणा मरणे, दुव्विहा सा वियाहिया ।
सवियारा अवियारा, कायचेट्ठं पई भवे ॥ १२ ॥

प्राकृतत्वादत्र स्त्रीत्वम् यदनशनं मरणे-मरणसमये भवति, तत्तीर्थकरैर्द्विविधं व्याख्यातम्, सविचारं - सह विचारेण मनोवाक्कायभेदचेष्टारूपेण वर्तते यत्तत्सविचारम्, अङ्गादिचेष्टया सहितं, स्थित्युपविशनत्वग्वर्तनविश्रामणादिकया युक्तमित्यर्थः । द्वितीयम-विचारं चेष्टारहितं पादपोपगममित्यर्थः । तत्सविचारं हि कायचेष्टां प्रतीत्याश्रित्य भवतीत्यर्थः । वैयावृत्त्यकृत्साधुनोत्थापनं, प्रतिस्थापनमुभयपार्श्वाभ्यां स्थापनमित्यादि वैयावृत्यकारा-पणम्, अथवा स्वयमेव शरीरस्योद्वर्तनपरिवर्तनादिचेष्टासहितम्, अन्येन न कारापणम्, ईदृशं यद्भवति तत्सविचारं ज्ञेयमित्यर्थः । त्रिविधचतुर्विधाहारत्यागेन प्रत्याख्यानमुद्वर्तनादि करोति कारयति वा तद्भक्तपरिज्ञाख्यं प्रथमम् १, तथा कृतनिश्चितचतुर्विधाहारत्याग इङ्गितदेशे उद्वर्तनादीङ्गितं-चेष्टितमात्मनैव करोति, अन्येन कारयति, एतद् द्वितीयमिङ्गितमरणम् २, एतद्-द्वयमपि सविचारमनशनं ज्ञेयम् ॥ १२ ॥

एतदेव सूत्रकारो वदति-

अहवा सप्पडिकम्मा, अप्पडिकम्मा य आहिया ।
नीहारिमनीहारी, आहारच्छेओ दोसुवि ॥ १३ ॥

अथवा तत्पुनर्मरणं सप्रतिकर्म अप्रतिकर्म आहितं-कथितमित्यर्थः । सह परिकर्मणा वर्तते इति सप्रतिकर्म वैयावृत्त्यसहितं भक्तपरिज्ञाख्यं इङ्गिनीमरणं च, सप्रतिकर्मणी एते द्वे अपि मरणे, परन्तु मूल्यत्वेनैक एव भेदाः । च पुनरप्रतिकर्म मरणं वैयावृत्त्यरहितं पादपोपगममित्यर्थः । तथा पुनर्निर्हार्यनशनं, ग्रामान्नगराद्बहिर्निर्हार्यते-निःसार्यते इति निर्हारि, पुनरनीहारि, एतत्पादपोपगममपि द्विविधं भवति, द्वयोरपि निर्हाराऽनीहारयोर्मरण-योराहारच्छेदस्तु भवत्येव ॥१३॥

अथोनोदरिकामाह-

ऊमोयरियं पणहा, समासेण वियाहियं ।
दव्वओ खित्तकालेण, भावेणं पज्जवेहि य ॥ १४ ॥

अवमूनमुदरं यस्मिंस्तदवमोदरं, तत्र भवमवमोदरिकं तत्तपः समासेन-सङ्क्षेपेण पञ्चधा व्याख्यातं, द्रव्यतो-द्रव्येण, क्षेत्रेण, कालेन, भावेन, च पुनः पर्यायैः ॥ १४ ॥

तत्र द्रव्यतोऽवमोदरिकमाह-

जो जस्स उ आहारो, तत्तो [१]ऊणं तु जो करे ।
जहन्नेणेगसित्थाई, एवं दव्वेण ओ भवे ॥ १५ ॥

यस्य जीवस्य यावानाहारः स्यात् तत आहाराद्यदूनं कुर्यात्, जघन्येनैकसिक्थके, यत्रैकमेव सिक्थं भुज्यते, आदिशब्दात् सिक्थद्वयादारभ्य यावदेककवलभोजनम्, एतच्चाल्पाहाराख्यमवमोदर्यमाश्रित्योक्तम् । इदं चाष्टकवलान्तम् १ । अथ च नवकादारभ्य द्वादशभिः कवलैरपार्धक्यम् २ । त्रयोदशकादारभ्य षोडशान्तं द्विभागाख्यम् ३, सप्तदशकादारभ्य चतुर्विंशतिस्तत्पर्यन्तं प्राप्ताख्यम् ४, पञ्चविंशतेरारभ्य यावदेकत्रिंशत्कवलभोजनं किञ्चिदूनमवमोदर्यमुक्तं च ५ । इत्येवं पञ्चविधमवमोदर्यम् । उक्तं च-

"अप्पाहार १ अवड्ढा २ दुभाग ३, पत्ता ४ तहेव किंचूणा ५ ।
अट्ठ १ दुवालस २ सोलस ३, चउवीस ४ तहेक्कतीसा य ५ ॥ १ ॥"

एवं द्रव्येणोपाधिभूतेनावमौदर्यम् भवेत् ॥ १५ ॥

अथ क्षेत्रावमौदर्यमाह-

गामे नगरे तह रायहाणि, निगमे य आगरे पल्ली ।
खेडे कब्बडदोणमुह-पट्टणमडंबसंबाहे ॥ १६ ॥

आसमपए विहारे, सन्निवेसे समायघोसे य ।
थलसेणाखंधारे, सत्थे संवट्टकोट्टे य ॥ १७ ॥

वाडेसु य रच्छासु य, घरेसु वा एवमेत्तियं खित्तं ।
कप्पई उ एवमाई, एवं खित्तेण ओ भवे ॥ १८ ॥

एवमित्यमुना प्रकारेण हृदयस्थप्रकारेण एतावन्नियतमानं क्षेत्रं पर्यटितुं मम वर्तते इति, एवमादिर्गुहशालादिपरिग्रहः, अद्यैतावत्प्रमाणं भिक्षार्थं भ्रमितव्यमिति निर्धारणं क्षेत्रेणावमौदर्यं भवेत् । तदेव भिक्षाभ्रमणक्षेत्रमाह-कुत्र कुत्र भिक्षार्थं साधुर्भ्रमति ? ग्रामे, गुणान् ग्रसतीति ग्रामस्तस्मिन् ग्रामे, अथवा ग्रसति सहतेऽष्टादशविधं करमिति ग्रामस्तस्मिन् अथवा कण्टकवाटकावृतो जनानां निवासो ग्रामस्तस्मिन् ग्रामे । पुनर्नगरे, न यत्र कराः सन्तीति नगरं तस्मिन् । तथा राजधान्यां, राजा धीयते यस्यां सा राजधानी, तस्यां राजधान्यां राजपीठस्थाने । निगमे प्रभूतवणिग्निवासे । आकरः-स्वर्णाद्युत्पत्तिस्थानं, तस्मिन्नाकारे । पल्ली वृक्षवंशादिगहनाश्रिता प्रान्तजनस्थानं, तस्यां पल्ल्यां । खेटं-धूलिप्राकारपरिक्षिप्तं, तस्मिन् खेटे । पुनः कर्बटं-कुनगरं । द्रोणमुखं-जलस्थलनिर्गमप्रवेशं, तद्भृगुकच्छादिकं पत्तनं तु

१ ओमं-अन्यसंस्करणे ॥

यत्र सर्वदिग्भ्यो जनाः पतन्त्यागच्छन्तीति पत्तनम्, अथवा पत्तनं रत्नखानिरिति लक्षणं, तदपि द्विविधं, जलमध्यवर्त्ति स्थलमध्यवर्त्ति च । मडम्बं यस्य सर्वदिक्षु सार्धतृतीय-योजनान्तर्ग्रामो न स्यात् तत्र । तथा सम्बाधः प्रभूतचातुर्वर्ण्यनिवासः । कर्बटशब्दादारभ्य सम्बाधशब्दं यावद् द्वन्द्वसमासः कर्त्तव्यः, कर्बटं च द्रोणमुखं च पत्तनं च मडम्बं च सम्बाधश्च कर्बटद्रोणमुखपत्तनमडम्बसम्बाधास्तेषां समाहारः कर्बट-द्रोणमुख पत्तन-मडम्ब-सम्बाधं, तस्मिन् कर्बट-द्रोणमुख-पत्तन-मडम्ब-सम्बाधे एतेषु स्थानेष्वित्यर्थः ॥ १६ ॥

पुनः कुत्र कुत्रेत्याह—आश्रमपदे-तापसाश्रयोपलक्षिते स्थाने, विहारे-देवगृहे, पुनः सन्निवेशे-यात्राद्यर्थं समागतजनावासे, समाजः-परिषत्, घोष-आभीरपल्ली, समाजश्च घोषश्च समाजघोषं तस्मिन् समाजघोषे, तथा 'थलसेणाखंधारे' इति, स्थलं च सेना च स्कन्धावारश्च स्थलसेनास्कन्धावारं, तस्मिन् स्थलसेनास्कन्धावारे । तत्र स्थलमुच्चभूमिभागः, सेना -चतुरङ्गकटकसमूहः, स्कन्धावारः-कटकोत्तरणनिवासः, पुनः सार्थः- क्रयाणकभृतां समूहः प्रतीत एव, तत्र तथा संवर्तो-भयत्रस्तजनसमवायः, कोट्टो-दुर्गः, संवर्तश्च कोट्टश्च संवर्तकोट्टं, तस्मिन् संवर्तकोट्टे ॥ १७ ॥

पुनर्वाटेषु वृत्त्यादिपरिक्षिप्तगृहसमूहेषु, रथ्यासु शेरिकासु, च गृहेषु प्रसिद्धेषु, एतेषु स्थानेष्ववमौदर्यं कृतं क्षेत्रतो भवति ॥ १८ ॥

अथ पुनः प्रकारान्तरेण क्षेत्रावमौदर्यमाह-

पेडा य अद्धपेडा, गोमुत्तिपयंगवीहिया चेव ।
संबुक्कावट्टायय-गंतुं पच्चागया छट्ठा ॥ १९ ॥

षड्विधा क्षेत्रावमौदरिका वर्तते, पेटा पेटाकारा चतुष्कोणा, [1]पेटाकारेण गोचर्यां कृत्वाऽवमोदरीकरणं, एवमर्धपेटाकारेण गोचरीकरणम्, गोमूत्रिकाकारेण, पतङ्गवीथिका पतङ्गः- शलभस्तस्य वीथिकोड्डयनं पतङ्गवीथिका-अनियता निश्चयरहिता शलभोड्डयनसदृ-शीत्यर्थः, पुनः शम्बूकावर्त्ता शम्बूकः-शङ्खस्तद्वदावर्त्तो-भ्रमणं यस्यां सा शम्बूकावर्त्ता, सापि द्विविधा, अभ्यन्तरशम्बूका, बहिःशम्बूका च शङ्खनाभिरूपे क्षेत्रे मध्याद्बहिर्गम्यते साभ्यन्तरशम्बूकावर्त्ता, विपरीता बाह्यान्मध्ये आगमनरूपा बहिः शम्बूकावर्त्ता पञ्चमी । पुनः षष्ठी आयतगन्तुंप्रत्यागमा ज्ञेया । आदित एवायतं-सरलं गत्वा यस्यां प्रत्यागमो भवति, सा षष्ठी ज्ञेयेत्यर्थः । एतासां भिक्षाचर्याणामप्यवमौदर्यत्वं ज्ञेयम् । यतो ह्यवमौदर्यार्थमेवे-दृग्प्रकारेणैव साधुराहारार्थं भ्रमति, तस्मान्नात्र दोषः ॥ १९ ॥

अथ कालावमौदर्यमाह-

दिवसस्स पोरिसीणं, चउण्हं पि जत्तिओ भवे कालो ।
एवं चरमाणो खलु, कालोमाणं मुणेयव्वो ॥ २० ॥

---

१ यत्र चतुःश्रेणिव्यवस्थितगृहपङ्क्तिषु भ्रम्यते, मध्यगृहाणि च मुच्यन्ते सा पेटेत्यर्थः ॥

दिवसस्य चतसृणां पौरुषीणां-प्रहराणां यावान् घटिकाचतुष्टयादिकोऽभिग्रहविषयः कालो भवति, एवममुना प्रकारेण कालेन चरमाण इति गोचर्यां चरतः साधोः खलु निश्चयेन 'कालोमाणं' इति कालेनावमं कालावमं मन्तव्यम् ॥ २० ॥

पुनः कालावमौदर्यमेव प्रकारान्तरेणाह-

अहवा तईयापोरिसीए, ऊणाए घासमेसंते ।
चउभागूणाए वा, एवं कालेण ऊ भवे ॥ २१ ॥

अथवा तृतीयायां पौरुष्यामूनायां-किञ्चिद्धीनायां ग्रासमाहारमेषयन्-गवेषणां कुर्वन्, वाऽथवा चतुर्भागेनोनायां तृतीयायां पौरुष्यां भिक्षाचर्या साधोरुक्तास्ति, एवं कालेनावमौदर्यं भवेत् ॥ २१ ॥

अथ भावावमौदर्यमाह-

इत्थी वा पुरिसो वा, अलंकिओ वाऽणलंकिओ वावि ।
अन्नयरवयत्थो वा, अन्नयरेणं च वत्थेणं ॥ २२ ॥
अन्नेण विसेसेणं, वन्नेणं भावमणुमुयंते उ ।
एवं चरमाणो खलु, भावोमाणं मुणेयव्वं ॥ २३ ॥ युग्मम् ॥

एवममुना प्रकारेण 'चरमाणो' इति प्राकृतत्वाच्चरमाणस्य-भिक्षायां भ्रममाणस्य साधोः खलु इति निश्चयेन 'भावोमाणं' इति भावावमत्वं-भावावमौदर्यं मुणितव्यं ज्ञेयमित्यर्थः । भावेनाऽवमौदर्यं भावावमौदर्यं, कोऽर्थः ? यदा कश्चित्साधुरिति चिन्तयति, अद्य कश्चिद्दाता भावमेतादृशं स्वरूपं 'अणुमुयंते' इत्यनुमुञ्चन्नत्यजन्नेतादृशं स्वरूपं भजन् मह्यमाहारं दास्यति, तदाहं ग्रहीष्यामि, नान्यथेति भावः । को दाता ? कीदृशं च भावमत्यजन् ? तदाह-'इत्थी' इति स्त्री वा पुरुषो वा अलङ्कृत-आभरणादिसहितोऽथवाऽनलङ्कृतोऽलङ्कारै रहितः, 'अन्नयरवयत्थो' अन्यतरवयःस्थो बालतरुणस्थविरादिकानां त्रयाणां वयसां मध्येऽन्यतरस्मिन्नेकस्मिन् वयसि स्थितः, अन्यतरेण पट्टकुलादिवस्त्रेणोपलक्षितः ॥ २२ ॥

अन्येन विशेषेण कुपितप्रहसितादिनाऽवस्थाभेदेनोपलक्षितः, वर्णेन श्वेतरक्तादिनोपलक्षितः, भावं पर्यायमुक्तरूपमलङ्कारादिकं 'अणुमुयंते' अनुमुञ्चन्नेतादृशः सन् मह्यमाहारं दास्यति, तदा लास्यामीत्यभिग्रहधारणेन भावावमौदर्यं ज्ञेयम् ॥ २३ ॥

अथ पर्यायावमौदर्यमाह-

दव्वे खित्ते काले, भावंमि आहिया जे भावा ।
एएहिं ओमचरओ, पज्जवचरओ भवे भिक्खु ॥ २४ ॥

द्रव्येऽशनपानादौ, क्षेत्रे पूर्वोक्ते ग्रामनगरादौ, काले पौरुष्यादौ, भावे स्त्रीत्वादौ, आख्याताः- कथिता ये भावाः पर्यायास्तैः सर्वैरपि द्रव्यादिपर्यायैरवमम्-अवमौदर्यं चरति सेवते यः सोऽवमचरो भिक्षुः पर्यवचरको भवेत्, पर्यायावमौदर्यचरको भवतीत्यर्थः । एकसि-क्थकाद्यल्पाहारेण द्रव्यतोऽवमौदर्यं स्यादेव, परं ग्रामादौ क्षेत्रतः, पौरुष्यादौ कालतः, स्त्री-पुरुषादौ भावतः कथमवमौदर्यं स्यात् ? उत्तरं-क्षेत्रकालभावादिष्वपि विशिष्टाभिग्रहवशादवमौदर्यं स्यादेव इह पुनः पर्यायग्रहणेन पर्यवप्राधान्यविवक्षया पर्यायावमौदर्यं ज्ञेयम् ॥ २४ ॥

भिक्षाचर्यामाह-

अट्ठविहगोयरग्गं तु, तहा सत्तेव एसणा ।
अभिग्गहा य जे अन्ने, भिक्खायरियमाहिया ॥ २५ ॥

भिक्षाचर्या वृत्तिसङ्क्षेपापरनामिका बाह्या तपस्याऽऽख्याता । अष्टविधो गोचराग्रः, प्राकृतत्वादष्टविधोऽग्रगोचर इति पाठः । अग्रः-प्रधानो गोचरोऽग्रग्रोचरः, अष्टविधश्चासावग्र-गोचरश्चाष्टविधाग्रगोचरः अष्टावग्रगोचरगा भेदा इत्यर्थः । पेटा १, अर्धपेटा २, गोमूत्रिका ३, पतङ्गवीथिका ४, अभ्यन्तरशम्बूकावर्त्ता ५, बाह्यशम्बूकावर्त्ता च ६, आयतगन्तुं प्रत्यागमा ७, ऋजुगतिः ८, एवमष्टौ भेदा ऋजुगतिवक्रगतिक्षेपणाद् ज्ञेयाः । सप्तैषणाः संस्पृष्टादयः । संसट्ठा १, असंसट्ठा २, उद्धड ३, अल्पलेपिका ४, उद्गृहीता ५, प्रगृहीता ६, उज्झितधर्मा ७, एषा सप्तविधैषणा ज्ञेया च पुनरन्ये येऽभिग्रहाः सन्ति, अभिग्रहा यथा द्रव्यक्षेत्रकाल-भावादिचिन्तनेन भिक्षाग्रहणरूपाः, द्रव्यतो मण्डकादिकं, क्षेत्रतो गृहादौ देहलिकातो मध्ये बहिर्वा, कालतो भिक्षाचरेषु निवर्त्तितेषु, भावतो रुदन् हसन् वा दास्यति, तदाहारो ग्राह्य इतिं चिन्तनेन भिक्षाग्रहणम् । एवं भिक्षाचर्याया भेदास्तीर्थङ्करैराख्याताः- कथिता इत्यर्थः ॥ २५ ॥

अथ रसत्यागाख्यं तप आह-

खीरदहिसप्पिमाई, पणीयं पाणभोयणं ।
परिवज्जणं रसाणं तु, भणियं रसविवज्जणं ॥ २६ ॥

एतद्रसविवर्जनं-रसत्यागाख्यं तपस्तीर्थङ्करैर्भणितं, रसानां परिवर्जनं रसपरिवर्जनं, क्षीरं-दुग्धं, दधि, तथा सर्पिर्घृतं, क्षीरं च दधि च सर्पिश्च क्षीरदधिसर्पींषि, एतान्यादिर्यस्य तत्क्षीरदधिसर्पिरादि, प्रणीतं-पुष्टिकारकं, पानं पानयोग्याहारं, भोजनं भक्तं, रसविवर्धनं यस्मिन् पीते भुक्ते सति बहुकामोद्दीपनं स्यात्, तस्य परिवर्जनं रसत्यागाख्यं तप उच्यते, प्राकृतत्वात् षष्ठीस्थाने द्वितीया 'पणीयं पाणभोयणं परिवज्जणं' इत्यत्र ज्ञेया ॥ २५ ॥

अथ कायक्लेशतप आह-

ठाणा वीरासणाईया, जीवस्स उ सुहावहा ।
उग्गा जहा धरिज्जंति, कायकिलेसं वियाहियं ॥ २७ ॥

तत्कायक्लेशतपो व्याख्यातम्, तदिति किं ? यत्र वीरासनादीनि स्थानानि काय-स्थितिविशेषाणि यथा धार्यन्ते क्रियन्ते, वीरासनगरुडासनलगुडासनादीनि यथा क्रियन्ते, तथा कायक्लेशः स्यात् । कथंभूतानि स्थानानि ? जीवस्य सुखावहानि, कर्मनिर्मूलन-क्षमाणि, पुनः कीदृशानि ? उग्राणि भीषणानि, यैस्तैः पुरुषैः कर्तुमशक्यानि, प्राकृतत्वाल्लि-ङ्गव्यत्ययः ॥ २७ ॥

अथ संलीनतामाह-

एगंतमणावाए, इत्थीपसुविवज्जिए ।
सयणासणसेवणया, विवित्तसयणासणं ॥ २८ ॥

एकान्ते जनैरनाकुले, पुनरनापाते, न विद्यते आपातः स्त्रीपुरुषादीनामागमनं यत्र तदनापातं, तस्मिन् । पुनः स्त्रीपशुपण्डकादिविवर्जिते, आरामोद्यानशून्यगृहादिस्थाने शयनासनसेवनया कृत्वा संलीनताख्यं तपो ज्ञेयमित्यर्थः ॥ २८ ॥

एसो बहिरंगतवो, समासेण वियाहिओ ।
अब्भिंतरतवं एत्तो, वुच्छामि अणुपुव्वसो ॥ २९ ॥

एतत्पूर्वोक्तं समासेन-सङ्क्षेपेण बाह्यं तपो व्याख्यातम् । 'एत्तो' इति इतोऽनन्तरम-भ्यन्तरं तपो वक्ष्येऽनुक्रमेण ॥ २९ ॥

एतत्किं तदाह-

पायच्छित्तं विणओ, वेयावच्चं तहेव सज्झाओ ।
झाणं उस्सग्गोवि य, अब्भिंतरओ तवो होइ ॥ ३० ॥

पापमालोच्य तपसोऽङ्गीकरणं प्रायश्चित्तं, तथा विनयो वृद्धानामभ्युत्थानादिकरणं, वैयावृत्त्यं वृद्धानामाहारौषधाद्यानीय दानं, तथैव स्वाध्यायः स्वाध्यायस्य पञ्चविधस्य करणं, तथा ध्यानं धर्मशुक्लादिचिन्तनं, उत्सर्गः कायोत्सर्गस्य करणं, अपि च पादपूरणे । एतदभ्यन्तरं तपो भवति ॥ ३० ॥

अथ विस्तरेण षड्विधस्य भेदानाह-

आलोयणारिहादियं, पायच्छित्तं तु दसविहं ।
जे भिक्खू वहइ सम्मं, पायच्छित्तं तमाहियं ॥ ३१ ॥

तत्प्रायश्चित्तमाख्यातं, तत् किं ? यद्भिक्षुः-साधुर्दशविधमालोचनार्हादिकं सम्यग्-वहति, कायेन सेवते, तत्प्रायश्चित्ताख्यमभ्यन्तरं तप आख्यातं, तीर्थकरैरुपदिष्टम् । आलोचनार्हादिकं किमुच्यते ? आलोचनं गुरोरग्रे पापप्रकाशनं, तस्मै अर्हति योग्यो भवती-त्यालोचनार्हे तपःक्रियानुष्ठानादिकं, यतो हि पापमालोचनातः शुद्ध्यति, आलोचनार्हमा-दिर्यस्य तदालोचनार्हादिकं दशविधं यथा ।

"[1]आलोयणा १ पडिक्कमणे २ मीस ३ विवेगे ४ तहा वि उस्सग्गे ५ ।
तव्व ६ छेय ७ मूल ८ अणट्ठीया य ९ पारंचिए १० चेव ॥ ३१ ॥"

अथ विनयभेदानाह-

अब्भुट्ठाणं अंजलिकरणं तहेवासणदायणं ।
गुरुभत्तिभावसुस्सूसा, विणओ एस वियाहिओ ॥ ३२ ॥

अभ्युत्थानं गुरुनागतान् दृष्ट्वा स्वकीयस्थानादूर्ध्वीभवनं, अञ्जलिकरणं करद्वय-योजनं, तथैवासनदापनम्, गुरोरुपरि भक्तिभावः, शुश्रूषा गुरोरादेशकरणं, एष विनयो व्याख्यातः । इति विनयनामकं पञ्चविधतप उक्तमित्यर्थः ॥ ३२ ॥

अथ वैयावृत्त्यं कथ्यते-

आयरियमाइयंमि, वेयावच्चंमि दसविहे ।
आसेवणं जहाथामं, वेयावच्चं तमाहियं ॥ ३३ ॥

तद्वैयावृत्त्यमाख्यातम् । तदिति किं ? यत् 'जहाथामं' इति यथाबलं आचार्यादौ विषये दशविधे वैयावृत्त्यमुचिताहारादिदानं, तथा ऽऽसेवनं तद्वैयावृत्त्याख्यं तपः कथित-मित्यर्थः । आचार्यादयो दश वैयावृत्त्ययोग्या अमी—आचार्य १, उपाध्याय २, स्थविर ३, तपस्वि ४, ग्लान ५, शैक्ष (नूतन दीक्षित) ६, साधर्मिक ७, कुल ८, गण ९, सङ्घ १०, एते दश वैयावृत्त्यार्हाः ॥ ३३ ॥

अथ स्वाध्यायमाह-

वायणा पुच्छणा चेव, तहेव परियट्टणा ।
अणुप्पेहा धम्मकहा, अज्झाओ पंचहा भवे ॥ ३४ ॥

वाचना, पृच्छना, परिवर्तना, अनुप्रेक्षा, धर्मकथा चेति स्वाध्यायः पञ्चधा भवति, एतेषामर्थस्तु पूर्वं कृत एवास्ति ॥ ३४ ॥

---

१ आलोचना १, प्रतिक्रमणे २, मिश्र ३, विवेकौ ४, तथा व्युत्सर्गे ।
तपश्छेदमूलानवस्थिताश्च पाराञ्चिकश्चैव ॥ १ ॥

अथ ध्यानमाह-

अट्टरोद्दाणि वज्जित्ता, झाइज्जा सुसमाहिए ।
धम्मसुक्काइं झाणाइं, झाणं तत्तु बुहा वए ॥ ३५ ॥

बुधाः पण्डितास्तदा तद्ध्यानं वदन्ति । तदेति कदा ? यदा सुसमाहितः सम्यक् समाधियुक्तः साधुरार्त्तरौद्रे दुर्ध्याने त्यक्त्वा धर्मशुक्लध्याने ध्यायति, तदा ध्यानं ध्यानाख्यं तपो ज्ञेयमित्यर्थः ॥ ३५ ॥

अथ कायोत्सर्गतप उच्यते-

सयणासणठाणे वा, जे उ भिक्खू ण वावरे ।
कायस्स विउस्सग्गो, छट्ठो सो परिकित्तिओ ॥ ३६ ॥

तत् षष्ठं कायोत्सर्गाख्यं तपः परिकीर्तितम् । तत् किं ? यत्र शयनासनस्थाने भिक्षुः-साधुर्न व्याप्रियते, न व्यापारं कुर्यात्, शयने-स्वापे, आसने उपवेशने, स्थाने उद्ध्वंस्थितौ यथाशक्ति कायस्य व्युत्सर्गो ममत्वस्य त्यागः स्यात्, तदा कायोत्सर्गाख्यं तपो भवति ॥३६॥

एवं तवं तु दुविहं, जे सम्मं आयरे मुणी ।
से खिप्पं सव्वसंसारा, विप्पमुच्चइ पंडिए ॥ ३७ ॥त्तिबेमि ॥

यो मुनिर्यः साधुरेवममुना प्रकारेण बाह्याभ्यन्तरभेदेन द्विविधं तपः सम्यगाचरति, स पण्डितस्तत्वज्ञो मुनिः क्षिप्रं-शीघ्रं संसाराच्चतुर्गतिभ्रमणाद्विशेषेण प्रमुच्यते । अत्र स्कन्दककथा । इत्यहं ब्रवीमीति सुधर्मास्वामी जम्बूस्वामिनं प्राह ॥ ३७ ॥

इति तपोमार्गाध्ययनं त्रिंशत्तमं सम्पूर्णम् ॥ ३० ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां तपोमार्गाध्ययनं त्रिंशत्तमं सम्पूर्णम् ॥ ३० ॥

॥ ३१ चरणविधिनामाख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययने तपो मोक्षस्य मार्गत्वेन प्रकाशितम्, अथ च तपस्तु चारित्रवतः साधोरेव पार्श्वे सम्यक् प्राप्यते, इत्यग्रेतनाध्ययनेन सम्बन्धः ।

चरणविहिं पवक्खामि, जीवस्स उ सुहावहं ।
जं चरित्ता बहू जीवा, तिण्णा संसारसागरं ॥ १ ॥

सुधर्मा स्वामी वदति-हे जम्बू ! अथाहं चरणविधिं-चारित्रस्य विधानं प्रवक्ष्यामि । कीदृशं चरणविधिं ? जीवस्य भव्यजीवस्य सुखावहं-सुखपूरकं, यं चारित्रविधिं चरित्वाङ्गीकृत्य बहवो जीवाः संसारसागरं तीर्णाः ॥ १ ॥

एगओ विरइं कुज्जा, एगओ य पवत्तणं ।
असंजमे नियत्तिं च, संजमे य पवत्तणं ॥ २ ॥

साधुरेकत-एकस्मात्स्थानाद्विरतिं कुर्यान्निवर्तनं कुर्यात् । एकत एकस्मिन् स्थाने प्रवर्तनं कुर्यात् । सार्वविभक्तिकस्तस् इत्येके इत्युक्तत्वात् । एकतो विरतिं कुर्यादित्यत्र पञ्चम्यर्थे तस् । अग्रे एकत एकस्मिन् स्थाने प्रवर्तनं कुर्यादित्यत्र सप्तम्यर्थे तस्प्रत्ययः, निवर्तनप्रवर्तनयोः स्थानमाह-असंयमे इत्यसंयमात् हिंसाद्याश्रवान्निवृत्तिं कुर्यात् । च पुनः संयमे सप्तदशविधे च प्रवर्तनमुद्यमं कुर्यात् ॥ २ ॥

रागद्दोसे य दो पावे, पावकम्मपवत्तणे ।
जे भिक्खू रुंभइ निच्चं, से न अच्छइ मंडले ॥ ३ ॥

रागद्वेषौ द्वौ पापौ मलिनौ, तथा पापकर्मप्रवर्तकौ, पापकर्माणि मिथ्यात्वादीनि, तेषां प्रवर्तकौ भवतः । अतो यो भिक्षुः-साधुस्तौ रागद्वेषौ निरुणद्धि, कथञ्चिदुदयं प्राप्तौ सतौ ज्ञानेन त्वरितमत्यन्तं तिरस्कुरुते, स साधुर्भिक्षुर्मण्डले चातुर्गतिकसंसारे न 'अच्छइ' इति न तिष्ठति, संसारान्मुक्तो भवति ॥ ३ ॥

दंडाणं गारवाणं च, सल्लाणं च तियं तियं ।
जे भिक्खू चयई निच्चं, से न अच्छइ मंडले ॥ ४ ॥

यो भिक्षुर्दण्डानां, च पुनर्गारवाणां, च पुनः शल्यानां, प्रत्येकं त्रिकं त्रिकं त्यजति, स्वस्यात्मनि न धारयति, स भिक्षुः संसारे न तिष्ठति पूर्ववत् । दण्डयते चारित्रधनापहारेण दरिद्रः क्रियते आत्मैभिरिति दण्डा दुरध्यवसायाः, तेषां त्रिकं मनोवाक्कायैर्दुष्टाध्यवसायचिन्तनत्वेन त्रिःप्रकारकं, एतद्दण्डत्रिकम् । तथा गुरोर्लोभादिसहितस्य चित्तस्य भावा अध्यवसायानि गौरवाणि, तेषां त्रिकं ऋद्धिगौरवरसगौरवसातागौरवरूपम् । तथा शल्यते-

बाध्यते जन्तुरेभिरिति शल्यानि, तेषां त्रिकं मायानिदानमिथ्यादर्शनशल्यरूपं शल्यत्रिकं ज्ञेयम् । एतेषां यो निषेधकः स मुनिर्मुक्तिगामीत्यर्थः ॥ ४ ॥

दिव्वे य जे उवस्सग्गे, तहा तेरिच्छमाणुसे ।
जे भिक्खू सहई निच्चं, से न अच्छइ मंडले ॥ ५ ॥

यो भिक्षुर्दिव्यान् देवैः कृतान्, तथा तैरश्चांस्तिर्यग्भिः कृतान्, तथा मानुष्यकान् मनुष्यैः कृतान्, उपसर्गान् सम्यक् कषायाऽभावेन सहते, स मण्डले-संसारे न तिष्ठति ॥५॥

विगहाकसायसन्नाणं, झाणाणं च दुयं तहा ।
जे भिक्खू वज्जइ निच्चं, से न अच्छइ मंडले ॥ ६ ॥

यो भिक्षुर्विकथाचतुष्कं राज्यदेशभोजनस्त्रीणां वर्णनारूपं, क्रोधमानमायालोभरूपं कषायचतुष्कं, संज्ञाचतुष्कमाहारभयपरिग्रहमैथुनरूपविकारचिन्तनरूपं ज्ञेयम् । च पुनर्ध्यानयोर्द्विकमार्त्तरौद्ररूपं त्यजति, स साधुः संसारे न तिष्ठति । प्राकृतत्वाद्ध्यानानामिति बहुवचनम् । ध्यानानां चतुष्टये वर्जनीयं ध्यानद्वितयं ज्ञेयम्, तस्माद् द्वयोरेव ग्रहणम् ॥ ६ ॥

वएसु इंदियत्थेसु, समिईसु किरियासु य ।
जे भिक्खू जयइ निच्चं, से न अच्छइ मंडले ॥ ७ ॥

यो भिक्षुर्व्रतेषु प्राणातिपातविरत्यादिषु, तथेन्द्रियार्थेषु शब्दादिषु, तथा समितिषु पञ्चसु, तथा क्रियासु कायिक्यधिकरणिकीप्राद्वेषिकीपारितापनिकीप्राणातिपातिकीषु पञ्चसु यतते-यत्नं कुरुते, हेयोपादेयबुद्धिं कुरुते, स मण्डले न तिष्ठति ॥ ७ ॥

लेसासु छसु कायेसु, छक्के आहारकारणे ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ ८ ॥

यः साधुः षट्लेश्यासु, पुनः षट्सु कायेषु, तथाऽऽहारकारणषट्के यतते, यथायोगं विपरीतलेश्यानां निरोधेन, सम्यग्लेश्यानां धारणेन, षट्कायानां रक्षणेन, षड्भिः पूर्वोक्तैः कारणैराहारकरणेन यत्नं कुरुते, स साधुर्मण्डले न तिष्ठति ॥ ८ ॥

पिंडुग्गहपडिमासु, भयट्ठाणेसु सत्तसु ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ ९ ॥

यो भिक्षुः संसृष्टादिषु सप्तसु पिण्डावग्रहप्रतिमास्वाहारग्रहणविषयाभिग्रहरूपासु, तथा पुनः सप्तसु भयस्थानेष्विहलोकादिषु यतते, पिण्डग्रहणप्रतिमासु सप्तसु पालने यत्नं कुरुते, इहलोकादि सप्तसु भयस्थानेषु भयस्याऽकरणे स्थैर्यं कुरुते, स साधुर्मण्डले न तिष्ठति ॥ ९ ॥

मयेसु बंभगुत्तीसु, भिक्खूधम्मंमि दसविहे ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ १० ॥

यो भिक्षुर्मदेषु जात्यादिष्वष्टसु, तथा ब्रह्मगुप्तिषु नवसु ब्रह्मचर्यरक्षणवाटिकासु, तथा दशविधेषु क्षान्त्यादिषु साधुधर्मेषु यतते, मदानां परिहारे ब्रह्मगुप्तिनां रक्षणे, दशविध-क्षान्त्यादिसाधुधर्मपालने उद्यमं कुरुते, स संसारे न तिष्ठति ॥ १० ॥

उवासगाणं पडिमासु, भिक्खूणं पडिमासु य ।
जे भिक्खू जयई निच्चं, से न अच्छई मंडले ॥ ११ ॥

यः साधुरुपासकानां श्राद्धानामेकादशसु प्रतिमासु, तथा भिक्षूणां द्वादशसु प्रतिमासु यत्नं कुरुते, श्राद्धप्रतिमानां सम्यग्ज्ञाननेनोपदेशदानेन, भिक्षुप्रतिमानां च सम्यग् ज्ञात्वा पालने यत्नं कुरुते, स संसारे न तिष्ठति । प्रतिमा अवग्रहविशेषा उच्यन्ते ॥ ११ ॥

किरियासु भूयगामेसु, परमाहम्मिएसु य ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ १२ ॥

यो भिक्षुः क्रियासु कर्मबन्धनभूतासु चेष्टासु, स्वार्थानर्थादिभेदेन त्रयोदशसु, तथा भूतग्रामेषु, भूतानां-प्राणिनां ग्रामाः-सङ्घाताः स्थानानीति यावत्, तेषु भूतग्रामेषु चतुर्दशसु [1]एगिंदियसुहुमियरा इत्यादिषु, तथा परमाधार्मिकेषु पञ्चदशसु [2]अंबे अंबरिसे चेव' इत्यादिषु यत्नं कुरुते, त्रयोदशक्रियाणां परिहारे, चतुर्दशभूतग्रामाणां रक्षणे, परमा-धार्मिकाणां परिज्ञानाद् दुष्टकर्मभ्यो निवर्तने उद्यतो भवति, स संसारे न तिष्ठति ॥ १२ ॥

गाहासोलसएहिं, तहा अस्संजमंमि य ।
जे भिक्खू जयई निच्चं, से न अच्छई मंडले ॥ १३ ॥

यो भिक्षुर्गाथाषोडशकेषु, तथा असंयमे सप्तदशविधेऽपि नित्यं यतते-यत्नं कुरुते, स मण्डले न तिष्ठति । गीयते कथ्यते स्वसमयपरसमयरूपोऽर्थो याभिस्ता गाथाः, तासां षोडशकानि सूत्रकृताङ्गाध्ययनषोडशकानि गाथाषोडशकानि, तेषु गाथाषोडशकेषु, सप्तमी-बहुवचने तृतीयाबहुवचनं प्राकृतत्वात् । सूत्रकृताङ्गाध्ययनानि षोडश सन्ति 'समओ

---

१ एगिंदियसुहुमियरा, सन्नियर पणिंदिया य सबितिचउ ।
अपज्जत्ता पज्जत्ता, कमेण चउदस जिअट्ठाणा ॥ ४ ॥ नवतत्त्वप्रकरेण

२ अंबे अंबरिसी चेव, सामे सबलेत्ति आवरे ।
रुद्दोवरुद्दकाले अ, महाकालेत्ति आवरे ॥ १ ॥
असिपत्ते धणुकुम्भे, वालुए वेअरणीति अ ।
खरस्सरे महाघोसे, एते पन्नरसाहिआ ॥ २ ॥ समवायाङ्ग-सूत्र १५ ॥

वेयालीय' इत्यादि । संयमस्य सप्तदश भेदाः सन्ति, पञ्चाश्रवाद्विरमणं, पञ्चेन्द्रियनिग्रहः, चतुष्कषायजयः, दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः, एतस्माद्विपरीतोऽसंयमोऽपि सप्तदशविधः । तस्मात्सप्तदशविधेऽसंयमे यो न प्रवर्तते, स संसारे न तिष्ठति ॥ १३ ॥

बंभंमि नायज्झयणेसु, ठाणेसु असमाहिए ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ १४ ॥

यो भिक्षूर्ब्रह्मणि-ब्रह्मचर्येऽष्टादशविधे, दिव्यौदारिकमैथुनानां करणकारणानुमतिभेदात् तथा मनोवाक्कायेनाष्टादशप्रकारे । तथा ज्ञाताध्ययनेष्वेकोनविंशतिसङ्ख्येषु उत्क्षिप्तादिषु, तथाऽसमाधिस्थानेषु विंशतिसङ्ख्येषु यत्नं कुरुते, स संसारे न तिष्ठति । विंशत्यसमाधिस्थानानि [1]समवायाङ्गसूत्रे उक्तानि ॥ १४ ॥

एगवीसाइ सबलेसु, बावीसाए परीसहे ।
जे भिक्खू जयइ निच्चं, से न अच्छइ मंडले ॥ १५ ॥

यो भिक्षुरेकविंशतिशबलेषु, च पुनर्द्वाविंशतिपरिषहेषु यतते, स साधुः संसारे न तिष्ठति । शबलयन्ति-कर्बुरयन्ति चारित्रं ये ते शबला अशुभक्रियारूपाः, तेषु शबलेषु हस्तकर्मादिषु यः परिहारबुद्धिं धत्ते । द्वाविंशतिपरीषहास्तु द्वितीयाध्ययने पूर्वमेव कथिताः, तेषां सहने स्थैर्यं कुरुते, स मण्डले न तिष्ठति ॥ १५ ॥

तेवीसाइ सूयगडेसु, रूवाहिएसु सुरेसु य ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ १६ ॥

यो भिक्षुः सूत्रकृतेषु सूत्रकृताङ्गाध्ययनेषु त्रयोविंशतिसङ्ख्येषु, तथा रूपाधिकेषु, रूपमेकाङ्कं, तेनाधिका रूपाधिकास्तेषु रूपाधिकेषु । त्रयोविंशत्यध्ययनानि सूत्रकृताङ्गस्य वर्तन्ते, तानि यदैकेनाधिकानि भवन्ति तदा चतुर्विंशतिसङ्ख्याकानि भवन्ति, तेषु चतुर्विंशतिसुरेषु भुवनपत्यादिषु । अथवा देवेषु ऋषभादिचतुर्विंशतिसङ्ख्येषु यत्नं कुरुते, एतेषु ज्ञानोपयोगं कुरुते, स मण्डले न तिष्ठति ॥ १६ ॥

पणवीसभावणाहिं, उद्देसेसु दसाइणं ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ १७ ॥

यो भिक्षुः पञ्चविंशतिभावनासु, पञ्चमहाव्रतविषये ईर्यासमित्यादिसाधनारूपासु, तथा 'दसाइणं' इति दशादीनां दशाश्रुतस्कन्धकल्पव्यवहाराणामुद्देशेषु षड्विंशतिसङ्ख्येषु यत्नं कुरुते स मण्डले न तिष्ठति ॥ १७ ॥

---

१ समवायाङ्गे सूत्रं २० तमं द्रष्टव्यम् ॥

अणगारगुणेहिं च, पकप्पम्मि तहेव य ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ १८ ॥

यो भिक्षुः सप्तविंशतिसङ्ख्येष्वनगारगुणेषु, तथैव प्रकल्पे आचाराङ्गसूत्रोक्तशास्त्र-परिज्ञानाद्यष्टाविंशत्यध्ययनात्मके साधोः प्रकृष्टाचारे आचाराङ्गे यतते, सम्यगभ्यासं कुरुते, स संसारे न तिष्ठति ॥ १८ ॥

पावसुयप्पसंगेसु, मोहठाणेसु चेव य ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ १९ ॥

यो भिक्षुरेकोनत्रिंशत्पापश्रुतप्रसङ्गेषु, तथा त्रिंशन्मोहस्थानेषु यतते, स संसारे न तिष्ठति । पापोपादानानि श्रुतानि पापश्रुतानि, तेषु प्रसङ्गास्तथाविधशक्तिरूपाः पापश्रुत-प्रसङ्गास्तेष्वष्टाङ्गनिमित्तादिशास्त्राभ्यासेषु । मोहो मोहनीयं कर्म, तत्तिष्ठति येषु तानि मोहस्थानानि, तेषु त्रिंशत्सङ्ख्येषु निवृत्तिं कुरुते ॥ १९ ॥

सिद्धाइगुणजोगेसु, तित्तीसासायणासु य ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥ २० ॥

यः साधुः [1]सिद्धातिशयगुणेषु, एकत्रिंशत्प्रमाणेषु तथा द्वात्रिंशत्प्रमाणेषु [2]योगेषु त्रयस्त्रिंशत्प्रमाणास्वाशातनासु नित्यं यतते, य एकत्रिंशत्सिद्धगुणान् ज्ञात्वा प्ररूपयति, तथा योगेषु योगसङ्ग्रहेष्वालोचनादिषु यत्नं कुरुते, आशातनासु [3]समवायाङ्गसूत्रोक्तासु ज्ञात्वा स्वयं ताभ्यो निवर्तते, अन्यान्निवर्तयति, स संसारे न तिष्ठति ॥ २० ॥

अथाध्ययनोपसंहारमाह-

इइ एएसु ठाणेसु, जे भिक्खू जयई सया ।
से खिप्पं सव्वसंसारा, विप्पमुच्चइ पंडिए ॥ २१ ॥त्तिबेमि ॥

इत्यमुना प्रकारेणैतेष्वत्राध्ययनप्रोक्तेष्वसंयमादिस्थानेषु यो भिक्षुर्यतते, सदा यत्नं कुरुते । स भिक्षुः क्षिप्रं-शीघ्रं सर्वसंसारात्सर्वचतुर्गतिभ्रमणाद्विशेषेण प्रमुच्यते-प्रमुक्तो भवति । इत्यहं ब्रवीमीति सुधर्मास्वामी जम्बूस्वामिनं प्राह ॥ २१ ॥

इति चरणविधिनामाख्यमध्ययनं सम्पूर्णम् ॥ ३१ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविर-चितायां चरणविध्याख्यमेकत्रिंशत्तममध्ययनं सम्पूर्णम् ॥ ३१ ॥

---

१ सिद्धानामतिशायिनो गुणाः सिद्धातिगुणाः संस्थानादिनिषेधरूपा एकत्रिंशत्, तेषु-मु० ॥

२ योगेष्विति पदैकदेशेऽपि पदप्रयोगदर्शनाद्योगसङ्ग्रहेषु, योगाः शुभमनोवाक्कायव्यापाराः, सम्यग् गृह्यन्ते, स्वीक्रियन्ते इति योगसङ्ग्रहा आलोचनादयो द्वात्रिंशत्तेषु-मु० ॥

३ समवायाङ्गे सूत्रं ३३ तमं द्रष्टव्यम् ॥

॥ ३२ प्रमादस्थानाख्यमध्ययनम् ॥

पूर्वाध्ययने चारित्रविधिरुक्तः, स चाऽप्रमादिनः साधोर्भवति, तेन साधुना प्रमादः परिहर्तव्यः, ततः प्रमादज्ञानार्थं प्रमादस्थानाख्यमध्ययनमथोच्यते-

अच्चंतकालस्स समूलयस्स, सव्वस्स दुक्खस्स उ जो पमोक्खो ।
तं भासओ मे पडिपुन्नचित्ता, सुणेह एगंतहियं हियत्थं ॥ १ ॥

भव्यान् प्रति भगवान् वदति । सुधर्मा स्वाम्यपि जम्बूस्वाम्यादिशिष्यान् प्रति वक्ति- भो प्रतिपूर्णचित्ताः ! प्रतिपूर्णं विषयादिभ्यो विरक्तत्वेनाऽखण्डं चित्तं येषां ते प्रतिपूर्णचित्ताः, तेषां सम्बोधनं भो प्रतिपूर्णचित्ताः ! अखण्डमनस्काः ! तमेकान्तेन हितं सम्यग्ज्ञानदर्शन-चारित्रात्मकं मोक्षहेतुतया वक्ष्यमाणं 'मे' मम भाषमाणस्य वचनं यूयं श्रृणुत । किमर्थं ? हितार्थम्, तमिति किं ? यो हेतुः सर्वस्य दुःखस्य मोक्षोऽस्ति । अत्र दुःखशब्देन संसारस्य ग्रहणम् । कीदृशस्य दुःखस्य ? 'अच्चंतकालस्स' अत्यन्तमित्यन्त-मतिक्रान्तमत्यन्तम्, अत्यन्तं कालो यत्र सोऽत्यन्तकालस्तस्य । पुनः कीदृशस्य समूलकस्य, मूलेन कषायाऽविरतिरूपेण सह वर्तते इति समूलकस्तस्य । यदुक्तम्-[1]'मूलं संसारस्स, होंति कसाया अविरई चेव ।'' ॥१॥

अथ यत्पूर्वमेव संसारस्य प्रमोक्षहेतुकं वक्तुं प्रारब्धम्, तदेवाह-

नाणस्स सव्वस्स पगासणाए, अन्नाणमोहस्स विवज्जणाए ।
रागस्स दोसस्स य संखएणं, एगंतसोक्खं समुवेइ मोक्खं ॥ २ ॥

जीवो ज्ञानेन दर्शनेन चारित्रेणैकान्तसौख्यं मोक्षं समुपैति प्राप्नोतीत्यन्वयः । एतावता ज्ञानस्य दर्शनस्य चारित्रस्य मोक्षं प्रति कारणतोक्तेत्यर्थः । ज्ञानस्य सर्वप्रकाशनया सर्वस्य वस्तुनः प्रकाशना-प्रकटीकरणं, प्रकाश्यतेऽनयेति प्रकाशना, तया प्रकाशनया, इत्यनेन ज्ञानात्मको मोक्षहेतुरुक्तः । पुनरज्ञानमोहस्य विवर्जनया जीवो मोक्षं समुपैति । अज्ञानं मत्यज्ञानादि, मोहो मोहनीयम्, अज्ञानं च मोहश्चानयोः समाहारोऽज्ञानमोहं, तस्याऽज्ञान-मोहस्य विवर्जनया विशेषतस्त्यागेन, मिथ्याश्रुतश्रवणकुदृष्टिसङ्गत्यागेन मोक्षः स्यात्, इत्यनेन सम्यग्दर्शनात्मको मोक्षहेतुरुक्तः । तथा पुना रागस्य द्वेषस्य च सङ्क्षयेण - विनाशेन जीवो मोक्षं समुपैति । रागद्वेषाभावेन चारित्रस्याभिधानम्, इत्यनेन चारित्रात्मको मोक्षहेतु-रुक्तः । ततः सम्यग्ज्ञानदर्शनचारित्रैरेकान्तसौख्यं दुःखलेशैरकलङ्कितं मोक्षं समुपैति । मोक्षश्च दुःखप्रमोक्षेणैव-संसारस्य निवृत्त्यैव स्यात् ॥ २ ॥

अतो ज्ञानादीनां दुःखप्रमोक्षत्वमोक्षे हेतुत्वमुक्त्वेदानीं ज्ञानादीनां प्राप्तेर्हेतूनाह-

तस्सेस मग्गो गुरुविद्धसेवा, विवज्जणा बालजणस्स दूरा ।
सज्झायएगंतनिवेसणा य, सुतत्थसंचिंतणया धिईयं ॥ ३ ॥

---

१ मूलं संसारस्य, भवन्ति कषाया अविरतिश्चैव ॥

हे शिष्य ! तस्य मोक्षोपायभूतस्य ज्ञानस्यैव समीपतरवर्ती मम हृदयस्थस्तवाग्रे वक्ष्यमाणो मार्गः प्राप्तिहेतुरुक्त इति शेषः । एष कः ? तं मार्गं दर्शयति—प्रथमं गुरुवृद्धसेवा ज्ञानप्राप्तिहेतुः, गुरुवश्च वृद्धाश्च गुरुवृद्धास्तेषां सेवा गुरुवृद्धसेवा । तत्र गुरवो धर्माचार्याः, वृद्धाः श्रुतपर्यायाभ्यां ये महान्तः, तेषां सेवा ज्ञानदर्शनहेतुभूतेत्यर्थः । पुनर्दूराद् बालजनस्य-मूर्खस्य विशेषेण वर्जना-परिहरणा ज्ञानस्य हेतुभूता । पुनः पञ्चप्रकारस्य स्वाध्यायस्यैकान्ते-नैकाग्रचित्तेन निषेवणाऽभ्यसनं स्वाध्यायैकान्तनिषेवणा ज्ञानप्राप्तिहेतुभूता । पुनः सूत्रार्थयोः सम्यक्प्रकारेण चिन्तना सूत्रार्थसञ्चिन्तना, सापि ज्ञानप्राप्तिहेतुभूता । पुनर्धृतिर्धैर्यं, चित्तस्यै-काग्र्यमुद्वेगाभावत्वम्, एतदपि ज्ञानप्राप्तिहेतुभूतम् । एतैरन्तरेण ज्ञानप्राप्तिर्न स्यादित्यर्थः ॥३॥

एतानिच्छता पुरुषेण प्राक् किं कार्यं तदाह-

आहारमिच्छे मियमेसणीज्जं, सहायमिच्छे निउणत्थबुद्धिं ।
निकेयमिच्छेज्जविवेगजोगं, समाहिकामे समणे तवस्सी ॥ ४ ॥

समाधिकामः श्रमणस्तपस्व्येतदिच्छेत् । समाधिं ज्ञानदर्शनचारित्रलाभं कामयत्य-भिलषतीति समाधिकामो ज्ञानदर्शनचारित्राभिलाषुकः । श्रमणः क्रियानुष्ठानादौ श्रमकर्ता । तपस्वी षष्ठाष्टमादितपःकर्ता एतदिच्छेत् । एतत् किं ? तदाह—पूर्वमेषणीयं दोषरहितमाहार-मिच्छेदभिलषेत्, यादृश आहारस्तादृगुद्गार इति वचनात् । तमपि मितं-प्रमाणोपेतं, न त्वपरि-मितं गृह्णीयात् । पुनः साधुर्निपुणार्थबुद्धिं सहायमिच्छेत्, निपुणार्थेषु जीवादितत्त्वेषु बुद्धि-र्यस्य स निपुणार्थबुद्धिस्तम्, जीवाजीवादितत्त्वज्ञं सहायं-शिष्यमिच्छेत् । यतो हि सम्य-ग्निर्दोषाद्याहारधर्माचारवेदिकात्सहायभूताच्छिष्याद्गुरुरपि शैलकमुनिवद्धर्मे स्थैर्यं लभते । पुनर्यः साधुर्विवेकयोग्यं निकेतमिच्छेत्, विवेकः स्त्रीपशुपण्डकादीनामभावेनैकान्तस्तेन योग्यं विवेकयोग्यं निकेतं-साधुनिवासस्थानमभिलेषत्, ॥ ४ ॥

अथ कालादिदोषवशाच्चेत्पूर्वोक्तगुणः सहायः शिष्यो न लभेत तदा किं कर्त्तव्यमित्याह-

न वा लभिज्जा निउणं सहायं, गुणाहियं वा गुणओ समं वा ।
इक्कोवि पावाइविवज्जयंतो, विहरेज्ज कामेसु असज्जमाणो ॥ ५ ॥

वाशब्दो यद्यर्थे । वा यदि निपुणं-बुद्धिमन्तं सहायं-शिष्यं न लभेन्न प्राप्नुयात्, तं सहायं गुणाधिकं - गुणैः स्वस्मिन् स्थितैर्विनयज्ञानादिभिरधिकमुत्कृष्टं, अथवा तं शिष्यं गुणत इति स्वस्मिन् स्थितैर्ज्ञानादिभिः समं सदृशं न प्राप्नुयात्, तदा स साधुरेकोऽप्येका-क्यपि शिष्यै रहितो विचरेद्विहारं कुर्यात्, न तु हीनानां कुशिष्याणां मुण्डमेलापं कुर्यात् । सम्यक्शिष्याऽभावे साधुनैकाकिनापि विहर्तव्यं, न कश्चिद्दोषः । साधुः किं कुर्वन् विहरेत् ? पापानि पापकारकाणि क्रियानुष्ठानानि विवर्जयेत् । पुनः साधुः किं कुर्वन् विचरेत् ? कामेषु 'असज्जमाणो' इतीन्द्रियसुखेष्वनुद्यतो भवन्, प्रतिबन्धमकुर्वाण इत्यर्थः ॥ ५ ॥

अथ दुःखप्रमोक्षहेतुज्ञापनार्थं दृष्टान्तमाह-

जहा य अंडप्पभवा बलागा, अंडं बलागप्पभवं जहा य ।
एमेव मोहाययणं खु तण्हा, मोहं च तण्हाययणं वयंति ॥ ६ ॥

यथा बलाकापक्षिण्यण्डप्रभवा । अण्डं प्रभवमुत्पत्तिकारणं यस्याः साण्डप्रभवा, अण्डादुत्पन्नेत्यर्थः । यथा च पुनरण्डं बलाकाप्रभवम्, बलाका पक्षिणी प्रभवो यस्य तद्बलाकाप्रभवम्, अण्डं बलाकात उत्पन्नमित्यर्थः । एवममुना दृष्टान्तेनैव खु-निश्चयेन तृष्णां-वाञ्छां मोहायतनं वदन्ति, मोहस्याऽज्ञानस्यायतनमुत्पत्तिहेतुं पण्डितास्तृष्णां वदन्तीति भावः । च पुनर्मोहं तृष्णायतनं, तृष्णाया-वाञ्छाया उत्पत्तिस्थानं पण्डिता वदन्ति । तृष्णा हि वस्तुनि मूर्च्छा, सा च रागप्रधाना, अतस्तया राग उपलक्ष्यते, रागे सति द्वेषोऽपि स्यात्, अतस्तृष्णाग्रहणेन रागद्वेषावुक्तौ ॥ ६ ॥

अतो रागद्वेषयोराधिक्यमाह-

रागो य दोसोवि य कम्मबीयं, कम्मं च मोहप्पभवं वयंति ।
कम्मं च जाईमरणस्स मूलं, दुक्खं च जाईमरणं वयंति ॥ ७ ॥

रागो मायालोभात्मकः, च पुनर्द्वेषः क्रोधमानात्मकः, एतौ द्वावपि कर्मबीजं कर्मणां ज्ञानावरणादीनामष्टानां बीजं-कारणं, कर्मबीजं कः ? कारणमित्यर्थः । च पुनः कर्माष्ट-प्रकारकं मोहप्रभवं, मोहो मूर्छाऽज्ञानं तदेव प्रभवो यस्य तन्मोहप्रभवं तीर्थङ्कस वदन्ति । कर्मेति जातित्वादेकवचनं, कर्मणां मोहः कारणमित्यर्थः । तथा पुनः कर्माष्टप्रकारकं जातिमरणस्य मूलम् जातिश्च मरणं चानयोः समाहारो जातिमरणं, तस्य जातिमरणस्य-जन्ममरणस्य मूलं वदन्ति । च पुनर्दुःखं तु जातिमरणमेव वदन्ति । जन्ममृत्यू एव दुःखं तीर्थङ्करा गणधराश्च वदन्ति, जन्ममरणाभ्यां व्यतिरिक्तमन्यदुःखं नास्तीत्यर्थः ॥ ७ ॥

दुक्खं हयं जस्स न होइ मोहो, मोहो हओ जस्स न होइ तण्हा ।
तण्हा हया जस्स न होइ लोहो, लोहो हओ जस्स न किंचणावि ॥ ८ ॥

यस्य मोहो न भवति, तस्य पुरुषस्य दुःखं हतं, येन पुरुषेण मोहो हतस्तस्य स्वयमेव दुःखं हतं मृतमित्यर्थः, तृष्णाया अभावे मोहस्याप्यभावः । यस्य तृष्णा-वाञ्छा हता, तस्य लोभो न भवति, निःस्पृहस्य तृणं जगदित्युक्तत्वात् । यस्य लोभो हतो-निवृत्तस्तस्य न किञ्चनापि, न किमपीत्यर्थः, स सर्वथाप्यकर्मको भवति ॥ ८ ॥

अथ मोहादीनामुन्मूलनोपायमाह-

रागं च दोसं च तहेव मोहं, उद्धत्तुकामेण समूलजालं ।
जे जे उपाया पडिवज्जियव्वा, ते कित्तइस्सामि अहाणुपुव्विं ॥ ९ ॥

हे शिष्य ! अहमानुपूर्व्याऽनुक्रमेण तानुपायां 'स्ते' तव कीर्तयिष्यामि । तान् कान् ? ये ये उपाया रागं च पुनर्द्वेषं तथैव मोहं समूलजालं - मूलसहितमुद्धर्तुकामेन पुरुषेण प्रतिपत्तव्या-अङ्गीकर्तव्याः, उपायशब्देन तदुद्धरणहेतवः ॥ ९ ॥

रसा पकामं न निसेवियव्वा, पायं रसा दित्तकरा नराणं ।
दित्तं च कामा समभिद्दवंति, दुमं जहा सादुफलं व पक्खी ॥ १० ॥

रागद्वेषमोहोन्मूलनमिच्छता नरेण रसाः श्रृङ्गारादयो दधिदुग्धघृतादयो वा प्रकाममत्यन्तं रसलोलुपत्वेन न निषेवितव्याः, मुहुर्मुहुर्न सेवनीया इत्यर्थः । प्रायेण रसाः सेविताः सन्तो नराणां दीप्तिकरा भवन्ति, धातुबलवीर्यादि दीप्त्युत्पादका भवन्ति । च पुनर्दीप्तं धातुबलवीर्यादियुक्तं मनुष्यं कामाः समभिद्रवन्ति, विषयाः समभ्यायान्ति, तथा दीप्तं वनिता अभिलषन्तीति भावः । के कमिव ? पक्षिणः स्वादुफलं द्रुममिव । स्वादूनि - स्वादयुक्तानि फलानि यस्य स स्वादुफलस्तं मधुरफलं वृक्षं प्रति पक्षिणस्तदभिलाषिणोऽभिमुखमायान्ति, तथा बलिष्टं दीप्तं पुरुषं कामा वनितादयोऽभिमुखमायान्तीति भावः । इत्यनेन रसप्रसेवने दोष उक्तः ॥ १० ॥

अथ सामान्येन प्रकामभोजने दोषमाह-

जहा दवग्गी पउरिंधणे वणे, समारुओ नोवसमं उवेइ ।
एविंदियग्गी वि पगामभोइणो, न बंभयारिस्स हियाय कस्सई ॥ ११ ॥

यथा दवाग्निर्दवानलः प्रचुरेन्धने - बहुलकाष्ठे वने लग्न उपशमं नोपैति-नोपशाम्यति । कीदृशो दावानलः ? समारुतः-पवनसहितः । एवं सकाष्ठवनलग्नसपवनदवाग्निदृष्टान्तेन प्रकामभोजिनो मात्राधिकाहारकारिणो ब्रह्मचारिण इन्द्रियाग्निर्हिताय न भवति, ब्रह्मचर्यक्षयाय भवति । अत्रेन्द्रियशब्देनेन्द्रियजनितरागो गृह्यते, इन्द्रियजनितरागस्याऽनर्थहेतुत्वात्, दवाग्नेरुपमा धर्मवनदाहकत्वात् । मात्राधिकाहारकरणादिन्द्रियग्रामो बलवान् भवति ॥११॥

पुना रागाद्युद्धर्तुकामेन किं कर्तव्यमित्याह-

विवित्तसयणासणजंतियाणं, ओमासणाणं दमिइंदियाणं ।
न रागसत्तू धरिसेइ चित्तं, पराइओ वाहिरिवोसहेहिं ॥ १२ ॥

रागशत्रू राग एव शत्रुर्वैरी रागशत्रुरेतादृशानां साधूनां चित्तं न घर्षयति, न पराभवति । एतादृशानां कीदृशानां ? विविक्तशयनासनयन्त्रितानां, विविक्ताः स्त्रीपशुपण्डकादिरहिता या शयनोपाश्रयो विविक्तशयना, तत्र यदासनं-निवासो विविक्तशयनासनं, तेन यन्त्रिताः-सहिता विविक्तशयनासनयन्त्रितास्तेषां विविक्तशयनासनयन्त्रितानां, एकान्तस्थाननिवाससहितानाम् । पुनः कीदृशानाम् ? अवमाशनानामूनाहारकारिणाम् । पुनः कीदृशानां ?

दमितेन्द्रियाणां वशीकृतेन्द्रियाणाम्, अर्थाद्योगिनां चित्तं रागवैरी न पराभवति । क इव ? औषधैः पराजितो-भेषजैस्तिरस्कृतो व्याधिरिव यथा भेषजैर्निवारितो व्याधिर्देहं पराभवितुं न शक्नोति । तथा रागशत्रुरप्येकान्तवसनतपश्चरणेन्द्रियदमनाद्युपायैः पराभूतः साधूनां चित्तं न क्षोभयति ॥ १२ ॥

स्त्रीप्रमुखसहितस्थानस्य दूषणमाह-

जहा बिरालावसहस्स मूले, न मूसगाणं वसही पसत्था ।
एमेव इत्थीनिलयस्स मज्झे, न बंभयारिस्स खमो निवासो ॥ १३ ॥

यथा बिडालावसथस्य मूले, बिडालस्यावसथं, तस्य मूले-समीपे मूषकाणामुन्दराणां वसति - स्थितिः प्रशस्ता न, समीचीना न भवति, बिडालगृहसमीपे मूषकास्थितिर्मरणायैव । एवममुना दृष्टान्तेन स्त्रीनिलयस्य, स्त्रिया सहितो निलयं गृहं स्त्रीनिलयस्तस्य स्त्रीनिलयस्य मध्ये ब्रह्मचारिणो निवासः क्षमो न, युक्तो नास्ति । तत्र वसमानस्य ब्रह्मचारिणो ब्रह्मचर्यस्य नाश एव स्यादिति भावः ॥ १३ ॥

स्त्र्यादिरहिते स्थाने वसमानेनापि स्त्रीसम्पाते किं कर्तव्यं ? तदाह-

न रूवलावण्णविलासहासं, न जंपियं इंगियपेहियं वा ।
इत्थीण चित्तंसि निवेसइत्ता, दट्ठुं ववस्से समणे तवस्सी ॥ १४ ॥

तपस्वी श्रमणः स्त्रीणामेतत्सर्वं चेष्टितं चित्ते-स्वकीये मनसि संनिवेश्य सम्यगवधार्य द्रष्टुं न व्यवसेत, दर्शनाय सोद्यमो न भवेत् । कोऽर्थः ? साधुः स्त्रीणामेतच्चेष्टितं हृदि धृत्वैतच्चेष्टितं द्रष्टुं व्यवसायं न कुर्यात् । यतो हि पूर्वं मनस इच्छायाः प्रवृत्तिः, ततश्चक्षुरादीनामिन्द्रियाणां प्रवृत्तिरिति । तत् स्त्रीणां किं किं चेष्टितं तदाह-रूपं स्त्रीणां गौरादिवर्णः, लावण्यं नयनाह्लादकः कश्चिद्गुणविशेषः, विलासो विशिष्टनयनचेष्टाविशेषः अथवा मन्थरगतिकरणादिकः, हास्यं स्मितमीषद्दन्तानां दर्शनं, जल्पितं मन्मनोल्लापादिकं, इङ्गितमङ्गोपाङ्गादिमोटनं स्वचित्तविकारसूचकम् । प्रेक्षितं वक्रालोकनं । रूपं च लावण्यं च विलासश्च हास्यं च रूपलावण्यविलासहास्यानि, तेषां समाहारो रूपलावण्यविलासहास्यम् । एतत्सर्वं स्त्रीणां साधुना रागेण न द्रष्टव्यमिति भावः ॥ १४ ॥

अदंसणं चेव अपत्थणं च, अचिंतणं चेव अकित्तणं च ।
इत्थीजणस्सारियझाणजुग्गं, हियं सया बंभचरे रयाणं ॥ १५ ॥

ब्रह्मचर्ये-ब्रह्मव्रते रतानां सावधानानां साधूनामेतदार्यध्यानयोग्यं हितं वर्तते, आर्यं च तद्ध्यानं चार्यध्यानं, सम्यग्ध्यानं धर्मशुक्लादिकं, तस्य योग्यं-हितं पथ्यं, धर्मध्यानस्य स्थैर्यकारकं भवति । कोऽर्थः ? यदा हि ब्रह्मचर्यधारिण एतत्कुर्वन्ति, तदा तेषां धर्मध्यानं

स्थिरं स्यादित्यर्थः । तत् किं किमार्यध्यानयोग्यं ? तदाह—स्त्रीणामदर्शनं रागेणाऽनवलोकनं, च पादपूरणे, एव-निश्चये । पुनः किं ? स्त्रीणामप्रार्थनमभिलाषस्याऽकरणम् । पुनः स्त्रीणामचिन्तनं, यत्कदाचिद्रूपादिकं दृष्टं, तस्य चेतसि न स्मरणमपरिभावनमित्यर्थः । पुनः स्त्रीणामकीर्त्तनं, नाम्ना गुणेन वा न कीर्तनमकीर्तनं, नामगुणोच्चारणस्याऽकरणम् । यदि ब्रह्मचारी स्त्रीणां दर्शनं प्रार्थनं चिन्तनं कीर्तनं करोति, तदा तस्यार्यध्यानस्योत्तमध्यानस्य स्थैर्यं न स्यात् । एतत्तु धर्मध्यानस्य योग्यं हितं नास्ति ॥ १५ ॥

ननु कश्चिद्वक्ष्यति विकारहेतौ सति विक्रियन्ते येषां न चेतांसि ते एव धीराः, तत्किं विविक्तशयनासनसेवनेन ? इति चेत्तत्राह-

कामं तु देवीहिं विभूसियाहिं, न चाइया खोभइउं तिगुत्ता ।
तहावि एगंतहियंति नच्चा, [1]विवित्तभावो मुणिणं पसत्थो ॥ १६ ॥

हे शिष्य ! तथापि मुनीनां विविक्तभाव-एकान्तस्थाननिवासः प्रशस्तः । किं कृत्वा ? विविक्तभावमेकान्तहितं मत्वा । तथेति कथं ? यद्यपि त्रिगुप्तास्तिसृभिर्गुप्तिभिर्गुप्ता मुनयः काममत्यर्थं देवीभिः क्षोभयितुं ध्यानाच्चालयितुं न 'चाइया' इति न शकिताः । कीदृशीभिर्देवीभिः ? विभूषिताभिराभूषणयुक्ताभिः, यदि देवाङ्गनाभिराभरणालङ्कृताभिरपि साधवो ध्यानान्न चालितास्तदा मानुषीभिस्तु क्षोभं प्रापयितुमशक्या एव । तथापि स्त्रीप्रसङ्गत्यागं मुनीनामेकान्तहितं ज्ञात्वा स्त्र्यादिरहितोपाश्रये स्थितिः श्रेयसीति भावः ॥ १६ ॥

स्त्रीप्रसङ्गत्यागं पुनरपि दृढयति-

मुक्खाभिकंखस्स वि माणवस्स, संसारभीरुस्स ठियस्स धम्मे ।
न तारिसं दुत्तरमत्थि लोए, जह त्थिओ बालमणोहराओ ॥ १७ ॥

मोक्षाभिकाङ्क्षस्य-मोक्षाभिलाषुकस्य मानवस्य संसारभीरोरपि, तथा धर्मे स्थितस्य, श्रुतधर्मे स्थितस्य संसारे तादृशं दुस्तरमन्यत्किमपि नास्ति, यथा लोके-संसारे स्त्री दुस्तरास्ति । कीदृशी स्त्री ? बालमनोहरा, बालानामविवेकिनां मनांसि हरतीति बालमनोहरा, तुशब्दः पादपूरणे विशेषार्थे च ॥ १७ ॥

स्त्रीसङ्गातिक्रमे गुणमाह-

एएसि संगं समइक्कमित्ता, सुहुत्तरा चेव भवंति सेसा ।
जहा महासागरमुत्तरित्ता, नई भवे अवि गंगासमाणा ॥ १८ ॥

मनुष्याणामेतान् स्त्रीसम्बन्धिसङ्गान् समतिक्रम्य शेषा धनधान्यादिसम्बन्धाः सुखोत्तराश्चैव भवन्ति । सुखेनोत्तीर्यन्ते इति सुखोत्तराः । यथा महासागरं स्वयम्भूरमणसदृशं

---

१ विवित्तवासो-केचित् संस्करणे ॥

समुद्रमुल्लङ्घ्य गङ्गानद्यपि सुखोत्तरा सुखोल्लङ्घ्यैव, तथा येन स्त्रीसङ्गस्त्यक्तस्तस्यान्य-सङ्गो धनधान्यादिसंयोगः सुत्यज एव ॥ १८ ॥

अथ रागस्य दुःखहेतुत्वमाह-

कामाणुगिद्धिप्पभवं खु दुक्खं, सव्वस्स लोयस्स सदेवगस्स ।
जं काइयं माणसियं च किंचि, तस्संतगं गच्छई वीयरागो ॥ १९ ॥

वीतरागः पुमान् रागद्वेषरहितो मनुष्यस्तस्य द्विविधस्यापि दुःखस्यान्तकं-पर्यन्तं गच्छति-प्राप्नोति । तद् द्विविधं दुःखं कीदृशं ? कायिकं, काये भवं कायिकं रोगादि, तथा मानसिकं, मनसि भवं मानसिकं इष्टवियोगाऽनिष्टसंयोगादि । पुनर्यद्दुःखं सर्वस्य लोकस्य प्राणिगणस्य 'खु' इति निश्चयेन कामानुगृद्धिप्रभवं विषयसततसेवनोद्भूतं वर्तते । काम्यन्तेऽभिलष्यन्ते जनैरिति कामा-विषयास्तेष्वनुगृद्धिः कामानुगृद्धिः, सतताभिकाङ्क्षा कामानुगृद्धिः, ततः प्रभवो यस्य तत्कामानुगृद्धिप्रभवम् । कीदृशस्य लोकस्य ? सदेवकस्य देवैः सहितस्य । वीतरागो विगतकामानुगृद्धिरिहोच्यते ॥ १९ ॥

अथ कामा एव दुःखहेतव इति वदति-

जहा य किंपागफला मणोरमा, रसेण वन्नेण य भुज्जमाणा ।
ते खुद्दए जीविये पच्चमाणे, एओवमा कामगुणा विवागे ॥ २० ॥

यथा च किम्पाकफलानि - विषवृक्षविशेषस्य फलानि रसेन मधुरत्वेन, वर्णेन रक्तादिना, चकाराद् गन्धेन भुज्यमानानि जनस्य मनोहराणि भवन्ति, तानि किम्पाकफलानि क्षुद्रके जीविते-तुच्छे सोपक्रमे मनुष्यायुषि पच्यमानान्युदरान्तरे गत्वा विपाकावस्थां प्राप्तानि मरणान्तदुःखानि भवन्तीत्यध्याहारः । तथा विपाके-परिपाककाले कामगुणा-विषया एतदुपमाः, एतेषां किम्पाकफलानामुपमा येषां ते एतदुपमाः, किम्पाकफलसदृशा विषया इत्यर्थः । विषया हि भोगसमये मनोरमाः, विपाके परलोके नरकादिदुःखदायिनः ॥ २० ॥

रागस्यैव द्वेषसहितस्योद्धरणोपायमाह-

जे इंदियाणं विसया मणुन्ना, न तेसु भावं [1]निसिरे कयाइ ।
न याऽमणुन्नेसु मणंपि कुज्जा, समाहिकामे समणे तवस्सी ॥ २१ ॥

समाधिकामः, समाधिं-रागद्वेषाऽभावेन चित्तस्य स्वास्थ्यं कामयते इति समाधि-कामः, चित्तस्थैर्याभिलाषी तपस्वी श्रमणः साधुस्तेषु विषयेषु कदाचिद्भावं चित्ताभिप्रायं न सृजेन्न कुर्यात् । तेषु केषु ? ये विषया इन्द्रियाणां कर्णादीनां मनोज्ञा-वल्लभा वर्तन्ते । तथा च पुनर्येऽमनोज्ञा-अप्रियास्तेष्वमनोज्ञेष्विन्द्रियाणां विषयेषु मनो न कुर्यात्, इत्यनेन सुन्दरेषु विषयेषु सरागं मनो न कुर्यात्, तथाऽसुन्दरेषु विषयेषु सद्वेषं मनो न कुर्यात् ॥ २१॥

---

१ निसिरे-निसृजेदिति व्याख्या अन्यस्मिन् संस्करणे ॥

अथ मनोज्ञामनोज्ञयोः स्वरूपमाह-

चक्खुस्स रूवग्गहणं वयंति, तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो य यो तेसु स वीयरागो ॥ २२ ॥

चक्षुषो लक्षणं रूपग्रहणं तीर्थङ्करा वदन्ति । रूपं वर्णः संस्थानं वा तद्गृह्यतेऽनेनेति रूपग्रहणम्, चक्षुरिन्द्रियस्यैतल्लक्षणम् । तमिति तद्रूपं रागहेतुकं मनोज्ञमाहुः, यस्मिन् रूपे दृष्टे राग उत्पद्यते तद्रूपं मनोज्ञमाहुः, तदेव रूपं द्वेषहेतुकममनोज्ञमाहुः, यस्मिन् रूपे दृष्टे द्वेष उत्पद्यते तद्रूपममनोज्ञमित्यर्थः । यः साधुस्तेषु मनोज्ञामनोज्ञेषु रूपेषु समः सदृशवृत्तिः स्यात् स साधुर्वीतराग उच्यते ॥ २२ ॥

रूवस्स चक्खु गहणं वयंति, चक्खुस्स रूवं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु, दोसस्स हेउं अमणुन्नमाहु ॥ २३ ॥

तीर्थङ्कराश्चक्षुरिन्द्रियं रूपस्य विषयस्य ग्रहणं वदन्ति । गृह्णातीति ग्रहणं, कर्तरि युप्रत्ययः, रूपस्य ग्राहकं चक्षुरित्यर्थः । पुनस्तीर्थकराश्चक्षुरिन्द्रियस्य रूपं विषयं ग्रहणं वदन्ति । गृह्यते इति ग्रहणं - ग्राह्य, चक्षुषा ग्राह्यं रूपं यच्चक्षुरिन्द्रियेण ग्राह्यं तदेव रूपमिति-भावः । अनेन रूपचक्षुषोर्ग्राह्यग्राहकभावेन परस्परमुपकार्योपकारकभावेन च सम्बन्ध उक्तः । इत्यनेन रूपं रागद्वेषकारणं, तथा चक्षुरपि रागद्वेषकारणमुक्तम् । तत्समनोज्ञं चक्षु-रिन्द्रियं रागहेतुमाहुः-सह मनोज्ञेन ग्राह्येण रूपेण वर्तते इति समनोज्ञं मनोज्ञरूपग्राहकं नेत्रं रागहेतुकमित्यर्थः । अमनोज्ञरूपग्राहकं द्वेषस्य हेतुं-हेतुकमाहुः-कथयन्ति ॥ २३ ॥

रागस्य दूषणमाह-

रूवेसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे से जहा वा पयंगे, आलोयलोले समुवेई मच्चुं ॥ २४ ॥

यः प्राणी रूपेषु तीव्रामुत्कटां गृद्धिं रागमुपैति-प्राप्नोति करोति, धातूनामनेकार्थ-त्वात् । स प्राणी रागातुरः सन् रागपीडितः सन्नकालिकमेव विनाशं प्राप्नोति, अकाले भवमकालिकं, आयुषः स्थितेरर्वागेव म्रियते, यतो मनुष्या हि सोपक्रमायुषः स्युः । क इव ? यथा वेति, वाशब्द इवार्थे, यथैवालोके प्रदीप्तदीपशिखादर्शने लोलो-लम्पट आलोकलोलः पतङ्गश्चक्षुरिन्द्रियो जीवो मृत्युं समुपैति, तथा रागातुरो जीवोऽकालमृत्युं समुपैतीत्यर्थः ॥ २४ ॥

अथ द्वेषदूषणमाह-

जे आवि दोसं समुवेइ तिव्वं, तंसि खणे से समुवेई दुक्खं ।
दुहंतदोसेण सएण जंतु, न किंचि रूवं अवरज्झई से ॥ २५ ॥

यश्चापि जीवो रूपेष्वित्यध्याहारः, यस्मिन् क्षणे तीव्रं दोषं समुपैति, स जीवस्तस्मिन्नेव क्षणे स्वकीयेन दुर्दान्तदोषेण, दुर्दान्तं चक्षुस्तदेव दोषो दुर्दान्तदोषस्तेन दुर्दान्तदोषेण दुःखं चित्तसन्तापं समुपैति। परं 'से' इति तस्य पुरुषस्य रूपं किमपि नापराध्यति, न विरूपं करोति। रूपस्य न कोऽपि दोष इत्यर्थः। तस्य जीवस्यैव दुर्दान्तेन्द्रियस्यैव दोष इत्यर्थः ॥२५॥

एगंतरत्तो रुइरंसि रूवे, अतालिसे से कुणइ पओसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पई तेण मुणी विरागे ॥ २६ ॥

यो मनुष्यो रुचिरे-मनोज्ञे रूपे एकान्तरक्तो भवत्यत्यन्तं रागी भवति, स च पुरुषोऽतादृशेऽसुन्दरे रूपे प्रद्वेषं करोति। ततो बालोऽज्ञानी रागी पुमान् दुःखस्य सम्पीडं-सङ्घातमुपैति। विरागी मुनिस्तेन रागद्वेषजनितदुःखेन न लिप्यते, न श्लिष्यते ॥ २६ ॥

इदानीं रागस्यैव सकलाश्रवहेतुत्वमाह-

रूवाणुगासाणुगए य जीवे, चराचरे हिंसइणेगरूवे ।
चित्तेहिं ते परियावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥ २७ ॥

क्लिष्टो रागबाधितो रागवशवर्ती बालोऽज्ञानी जीवश्चित्रैरनेकप्रकारैः शस्त्राद्युपायैः कृत्वा चराचरांस्त्रसस्थावराननेकरूपवान् जीवान् पीडयति, एकदेशदुःखोत्पादनेन पीडामुत्पादयति। पुनः परितापयति, परि-समन्ताद् दुःखयति। पुनर्हिनस्ति, प्राणेभ्यः पृथक्करोति। परं स रागी जीवः कीदृशः सन्? रूपानुगाशानुगतः सन्, रूपं प्रस्तावान्मनोज्ञमनुगच्छतीच्छतीति रूपानुगा, रूपानुगा चासावाशा च रूपानुगाशा रूपविषयोऽभिलाषः, तमनुगतोऽनुप्राप्तो रूपानुगाशानुगतः, तादृशः सन् सुन्दररूपविलोकनमनोरथसहितः सन्नित्यर्थः। पुनः कीदृशो बालः? 'अत्तट्ठगुरु' इत्यात्मार्थगुरुः, आत्मनः स्वस्यार्थः-प्रयोजनं गुरु यस्य स आत्मार्थगुरुः स्वप्रयोजननिरतः, स्वार्थीपुमान् किं किं न कुर्यादिति भावः ॥२७॥

तस्य रूपलोभाभिभूतस्य प्राणिनः कुतः सुखं? तदेव दर्शयति-

रूपाणुवाएण परिग्गहेण, उप्पायणे रक्खणसंनिओगे ।
वए विओगे य कहिं सुहं से, संभोगकाले य अतित्तिलाभे ॥ २८ ॥

रूपानुरागे सति रूपानुरागेण वा रूपानुपाते सति परिग्रहेण-मूर्छारूपेण हेतुना, 'उप्पायणे' इत्युत्पादने उपार्जने, तथा रक्षणसंनियोगे, रक्षणं चाऽपायनिवारणं, संनियोगश्च स्वपरप्रयोजनेषु सम्यग्व्यापारः, ततो द्वन्द्वे रक्षणसंनियोगं, तस्मिन्। तथा व्यये विनाशे, तथा विरहे, च पुनः सम्भोगकालेऽतृप्तिलाभे सति, तृप्तेः-सन्तुष्टेर्लाभस्तृप्तिलाभः, न तृप्तिलाभोऽतृप्तिलाभस्तस्मिन्नतृप्तिलाभे सति, 'से' इति तस्य लोभयुक्तस्य जीवस्य कदापि न

सुखम्, पूर्वं हि लोभी जीवो रूपानुरागी सन् मूर्छया रूपवद्गजतुरगकलत्रादीनामुत्पादने दुःखं प्राप्नोति, ततस्तेषामुत्पन्नानां कष्टेभ्यो रक्षणे दुःखं प्राप्नोति । ततश्च संनियोगे स्वपरप्रयोजने सम्यग्व्यापारणे दुःखं प्राप्नोति । तेषां रूपवद्गजादीनां सम्भोगकालेऽपि प्राप्तावतृप्तिलाभेऽपि सन्तोषस्याऽभावे सति दुःखं प्राप्नोति । यदुक्तम्-"न जातकामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव, भूय एवाभिवर्धते ॥ १ ॥"

तस्मात्परिग्रहेण जीवस्य कुतः सुखं ? कदापि सुखं नास्तीति भावः ॥ २८ ॥

रूवे अतित्ते य परिग्गहंमि, सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥ २९ ॥

रूपेऽतृप्तश्च पुरुषः परिग्रहे-मूर्च्छायां सक्तो-प्रसक्तो भवति, सामान्येनासक्तिमान् सक्तः, उपसक्तश्च गाढमासक्तः स्यात् । ततश्च मूर्छायां सक्तोपसक्तः, पूर्वं सक्तः, पश्चादुपसक्तः सक्तोपसक्तः । एतादृशः सन्मनुष्यस्तुष्टिं-सन्तोषं नोपैति । ततश्चातुष्टिदोषेणाऽसन्तोषदोषेण दुःखी सन् परस्यान्यस्याऽदत्तं सुरूपवस्त्विति शेषः, आदत्ते-गृह्णाति । कीदृशः स रूपेऽतृप्तः । लोभाविलो लोभेनाविलः-कलुषो लोभाविलः ॥ २९ ॥

पुनर्दोषान्तरमाह-

तण्हाभिभूयस्स अदत्तहारिणो, रूवे अतित्तस्स परिग्गहस्स ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा न विमुच्चइ से ॥ ३० ॥

तृष्णाभिभूतस्य-लोभपराजितस्य जीवस्याऽदत्तहारिणोऽदत्तग्राहकस्य, तथा रूपे-रूपविषये परिग्रहेऽतृप्तस्याऽसन्तुष्टस्य लोभदोषाल्लोभापराधान्मायामृषा वर्धते, तृष्णायाऽदत्तं गृह्णाति, ततो लोभात्परस्य गृहीतवस्तुरक्षणपरो मायामृषां वक्ति, तत्रापि मृषाभाषणेऽपि दुःखान्न विमुच्यते । स लोभी दुःखस्य भागेव स्यादित्यर्थः ॥ ३० ॥

दुःखयुक्तत्वमेव प्रकटयति-

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, रूवे अतित्तो दुहिओ अणिस्सो ॥ ३१ ॥

'मोसस्स' मृषावाक्यस्य पश्चात्पुरतश्च प्रयोगकाले च कालत्रयेऽपि सुरूपवस्तुलोभाददत्तग्राहकः पुमान् दुःखी भवतीति शेषः । सुरूपवस्तुलोभाददत्तग्राहकः पुमानित्यपि कर्तृपदं प्रस्तावाद् गृह्यते । कोऽर्थः ? पूर्वं हि लोभान्मृषाभाषणं कुरुते, मृषाभाषणस्य पश्चान्मृषावचनमुक्त्वा पश्चात्पश्चात्तापं कुरुते, मनसि जानाति मया मृषोक्तं, मा ज्ञास्यत्यसौ वस्तुस्वामीति । तथा पुरतश्च मृषाभाषणात्पूर्वमपि दुःखी भवति, मयासौ सुरूपवस्तुस्वामी केन प्रकारेण वञ्चनीय इति । पुनः प्रयोगकाले मृषाजल्पनकालेऽपि दुःखी भवति, मनस्येवं जानाति, मा कदाचिन्मम मृषावचनमसौ जानात्यपि । कीदृशः स पुरुषः ? दुरन्तो दुष्टोऽन्तः-

पर्यवसानं यस्य स दुरन्तः । इह लोके विटम्बनातः, परभवे च दुर्गतिदुःखाद् दुष्टावसान इत्यर्थः । एवममुना प्रकारेण रूपेऽतृप्तोऽदत्तानि समाचरन्ननिश्रः सन् दुःखितो भवति, न विद्यते निश्रा यस्य सोऽनिश्रोऽवष्टम्भरहितः । यतो हि चौरस्य मृषाभाषिणश्च न कोऽपि रक्षक इति भावः ॥ ३१ ॥

रूवाणुरत्तस्स नरस्स एवं, कत्तो सुहं हुज्ज कयाइ किंचि ।
तत्थोवभोगेवि किलेसदुक्खं, निव्वत्तई जस्स कएण दुक्खं ॥ ३२ ॥

एवममुना प्रकारेण प्रागुक्तसूत्रप्रकारेण रूपानुरक्तस्य-रूपानुरागिणः पुरुषस्य कदापि रात्रौ दिवसे वा किञ्चित्स्तोकमात्रमपि कुतः कस्मात्सुखं भवेत् ? अपि तु कदापि किमपि सुखं न भवेत् । यतस्तत्र रूपानुरागे उपभोगेऽपि क्लेशदुःखमतृप्तिलाभत्वलक्षणपीडाजनित-मसातं निर्वर्तयत्युत्पादयति । पुनः 'जस्स कएण', इति यस्य मनोज्ञरूपाद्युपभोगस्य कृते, मनोज्ञरूपाद्युपभोगार्थं दुःखमात्मनः कष्टं भवति ॥ ३२ ॥

इति रागस्य दुःखहेतुत्वमुक्त्वा द्वेषस्य दुःखहेतुत्वमाह-

एमेव रूवंमि गओ पओसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से पुणो होइ दुहं विवागे ॥ ३३ ॥

एवममुना प्रकारेणैव यथा मनोज्ञरूपोपरि रागाद्दुःखं लाभप्रकारेणैव, तथा जीवोऽमनोज्ञे रूपे प्रद्वेषं गतः सन्-प्रद्वेषपरम्परातः प्रदुष्टचित्तः संस्तत्कष्टकर्म चिनोत्यु-पार्जयति । 'जं' इति यत्कर्म 'से' इति तस्य दुष्टचित्तस्य विपाके-कर्मानुभवकाले, इह परत्र च दुःखं दुखदायि भवति ॥ ३३ ॥

रागद्वेषोद्धरणगुणमाह-

रूवे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पई भवमज्झे वसंतो, जलेण वा पुक्खरिणीपलासं ॥ ३४ ॥

रूपे विरक्तो मनुष्यो मनोज्ञरूपे रागमकुर्वन्नेतया दुःखौघपरम्परया पूर्वोक्तया दुःख-समूहश्रेण्या भवमध्ये वसन्नपि न लिप्यते, रागजनितदुःखावलिप्तो न स्यादित्यर्थः । कीदृशः स पुमान् ? विशोको विगतशोकः, केन किमिव ? जलेन पुष्करिणीपलाशमिव, यथा पद्मिनीपत्रं जले तिष्ठदपि जलेन नावलिप्यते, एवं विरक्तोऽपि संसारे वसन्नपि संसारदुःखैर्न लिप्यते ॥ ३४ ॥

एवं चक्षुरिन्द्रियमाश्रित्य त्रयोदश गाथा व्याख्याताः, अथ शेषेन्द्रियाणां मनसश्च त्रयोदशत्रयोदश गाथा व्याख्येयाः सन्ति । अत्र चेन्द्रियाणां चक्षुषो दोषबाहुल्य-प्रादुर्भावात्पूर्वं चक्षुरिन्द्रियद्वारेण रागद्वेषौ दर्शितौ, अन्यथा तु दुर्दमनं रसनेन्द्रियमुक्तमस्ति ।

अथ श्रोत्रमाश्रित्य दूषणान्याह-

सोयस्स सद्दं गहणं वयंति, तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो य जो तेसु स वीयरागो ॥ ३५ ॥

तीर्थङ्कराः श्रोत्रेन्द्रियस्य ग्रहणं विषयं शब्दं वदन्ति । शब्दग्राहकं श्रोत्रमिति श्रोत्रेन्द्रियस्य लक्षणम् । शब्दः श्रोत्रेणैव गृह्यते, तं शब्दं मनोज्ञं स्त्रीगीतादिकं रागहेतुकमाहुः, वीतरागाः कथयन्ति । तमेव शब्दममनोज्ञं खरवायसादिप्रोक्तं कर्कशं द्वेषहेतुकमाहुः । यस्तु मनोज्ञामनोज्ञयोः शब्दयोर्विषये समो रागद्वेषरहितः स वीतराग उच्यते ॥ ३५ ॥

सद्दस्स सोयं गहणं वयंति, सोयस्स सद्दं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु, दोसस्स हेउं अमणुन्नमाहु ॥ ३६ ॥

तीर्थङ्कराः 'सोयं' इति श्रोत्रेन्द्रियं शब्दस्य ग्रहणं ग्राहकं वदन्ति । गृह्णातीति ग्रहणम् । पुनस्तीर्थङ्कराः शब्दं विषयं श्रोत्रस्य श्रोत्रेन्द्रियस्य ग्रहणं, गृह्यते इति ग्रहणं ग्राह्यं वदन्ति । शब्दः श्रोत्रेण ग्राह्यः, तस्माच्छब्दश्रोत्रयोर्ग्राह्यग्राहकभावसम्बन्ध उक्तः । तत्समनोज्ञं सुन्दरशब्दविषयग्राहकं रागस्य हेतुकमाहुः । पुनरमनोज्ञमसुन्दरं शब्दविषयग्राहकं श्रोत्रेन्द्रियं द्वेषस्य हेतुमाहुः ॥ ३६ ॥

सद्देसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे हरिणमिगेव मुद्धे, सद्दे अतित्ते समुवेइ मच्चुं ॥ ३७ ॥

यः पुरुषः शब्देषु तीव्रामधिकां गृद्धिं-मूर्छामुपैति, स शब्देऽतृप्तो मनोज्ञशब्दे सन्तुष्टो रागातुरः सन् मुग्धो मूढोऽकालिकमायुःस्थितेर्वागेव सोपक्रमायुष्कत्वान्मृत्योरवसरं विनैव विनाशं मरणं प्राप्नोति । स मूढः क इव मृत्युं समुपैति ? शब्देऽतृप्तो मुग्धो हरिण इव मृग इव हरिणपशुरिव, अत्र मृगशब्दः पशुपर्यायवाचकः, हरिणश्चासौ मृगश्च हरिणमृगः ॥ ३७॥

जे आवि दोसं समुवेइ तिव्वं, तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, न किंचि सद्दं अवरज्झइ से ॥ ३८ ॥

यश्चापि जन्तुर्जीवो यस्मिन् क्षणेऽमनोज्ञे शब्दे तीव्रं द्वेषं समुपैति, स जन्तुस्तस्मिन्नेव क्षणे स्वकीयेन दुर्दान्तदोषेण, दुर्दान्तं श्रोतेन्द्रियं, तदेव दोषोऽथवा तस्य दोषस्तेन दुःखमुपैति-प्राप्नोति, स जन्तुः स्वकीयश्रोत्रेन्द्रियदोषेण दुःखीक्रियते । परन्तु तस्य पुरुषस्य शब्दः किञ्चिदपि नापराध्यति, शब्दस्य न कोऽपि दोषः, जन्तोः श्रोत्रेन्द्रियस्यैव दोष इत्यर्थः ॥३८॥

एगंतरत्तो रुइरंमि सद्दे, अतालिसे से कुणई पओसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पई तेण मुणी विरागे ॥ ३९ ॥

यो मनुष्यो रुचिरे-मनोज्ञे शब्दे एकान्तरक्तोऽत्यन्तमासक्तो भवति, रागं कुरुते, स मनुष्योऽतादृशेऽमनोज्ञे शब्दे प्रद्वेषं करोति। स बालो रागद्वेषासक्तो दुःखस्य सम्पीडामुपैति, असातासम्बन्धिनीमत्यन्तपीडां प्राप्नोति, तेन रागद्वेषोत्पन्नदुःखेन विरागी मुनिर्न लिप्यते, वीतरागः पुमान् सदा सुखभाक् स्यादिति भावः ॥ ३९ ॥

अथ शब्दानुरक्तस्य रागद्वेषयोरेवाश्रवकारणत्वमाह-

सद्दाणुगासाणुगए य जीवे, चराचरे हिंसइऽणेगरूवे ।
चित्तेहिं ते परितावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥ ४० ॥

जीवः शब्दानुगाशानुगतः सन्, मनोज्ञशब्दश्रवणाशायुक्तः सन्, चराचराननेकरूपान् जीवान् हिनस्ति । स बालोऽज्ञानी चित्रैरनेकप्रकारैरुपायैः शस्त्रादिभिः कांश्चिज्जीवान् परितापयति, कांश्चिज्जीवान् पीडयति । कीदृशः स बालः ? 'अत्तट्ठगुरु' आत्मार्थगुरुः स्वार्थपरायणः, पुनः कीदृशः ? 'किलिट्ठे' क्लिष्टो रागद्वेषोपहतचित्तः ॥ ४० ॥

मनोज्ञशब्दश्रवणलोभाभिभूतस्य प्राणिनः कुतः सुखं ? तदेवाह-

सद्दाणुवाएण परिग्गहेण, उप्पायणे रक्खणसंनियोगे ।
वए वियोगे य कहिं सुहं से, संभोगकाले य अतित्तिलाभो ॥ ४१ ॥

शब्दानुरागेण तथा परिग्रहेण मूर्छारूपेणोत्पादने मनोहरशब्दोपेतचेतनाचेतनद्रव्योत्पादने, पश्चात्तेषां रक्षणे, पश्चात्तेषां संनियोगे स्वपरप्रयोजने सम्यग्व्यापारणे, व्यये-विनाशे, वियोगेऽर्थाच्छब्दार्थिनः पुरुषस्य कुतः सुखं ? पुनस्तस्य शब्दानुरागिणो जन्तोः सम्भोगकाले चातृप्तिलाभो दुःखं भवति, शब्दश्रवणे रागिणां न तृप्तिरिति भावः ॥ ४१ ॥

सद्दे अतित्ते य परिग्गहंमि, सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥ ४२ ॥

शब्देऽतृप्तो जीवः परिग्रहे सक्तः स्यात्, सामान्येन रक्तो भवेत्, उपसक्तश्च गाढमासक्तः स्यात् । ततश्च सक्तोपसक्तः स्यात् । अत्यन्तं सक्त उपसक्तः, सक्तश्चासावुपसक्तश्च सक्तोपसक्तः, परिग्रहे गाढानुरक्तस्तुष्टिं-सन्तोषं नोपैति, अतुष्टिदोषेण दुःखी भवति । पुनरसन्तोषी परस्यान्यस्य सम्बन्धि शोभनशब्दकारिवस्तुवादित्रादिलोभाविलो लोभकलुषोऽदत्तमादत्ते, अदत्तं गृह्णाति ॥ ४२ ॥

तण्हाभिभूयस्स अदत्तहारिणो, सद्दे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा न विमुच्चइ से ॥ ४३ ॥

शब्देऽतृप्तस्य प्राणिनः परिग्रहे तृष्णाभिभूतस्याऽदत्तहारिणश्च लोभदोषान्मायामृषा संवर्धते । पुनस्तस्य प्राणिनस्तत्रापि - मायामृषायामपि दुःखान्न विमुच्यते, मायामृषाजल्पनकालेऽपि दुःखभाक् स्यादित्यर्थः ॥ ४३ ॥

तदेव दुःखं दर्शयति-

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंते, सद्दे अतित्तो दुहिओ अणिस्सो ॥ ४४ ॥

मृषाभाषी पुमान् मृषावाक्यस्य पश्चात्पुरतश्च प्रयोगकाले च दुरन्तो-दुःखान्तो भवति, अन्ते दुःखभाक् स्यात् । मायया मृषामुक्त्वा, पश्चान्मृषाभाषणस्य पश्चात्तापं करोति, मनस्येवं जानाति, मया सुसंस्थापितं वाक्यं नोक्तमिति पश्चात्तापं करोति । पुनः शब्दलोभी मृषाभाषणस्य पुरस्ताच्च कथं मयासौ शोभनशब्दगुणवान् पदार्थो ग्राह्यो वञ्चना वा कार्येति मृषाभाषणात्पूर्वमपि चिन्तादुःखोपेतः स्यात् । पुनः स च प्रयोगकाले मृषाभाषणप्रस्तावे च दुःखी स्यात्, यतो हि मृषां जल्पन्तं मामसौ मा जानात्यप्येवममुना प्रकारेण शब्देऽतृप्तो जीवोऽदत्तानि शब्दगुणवद्वस्तूनि समाचरन् गृह्णन् दुःखितो भवति । त्रिकालमपि दुःखभाग्भवति । कीदृशः सः ? अनिश्रो निश्रारहितः, यतो ह्यदत्तग्राहिणोऽन्याययुक्तस्य न कोऽप्यवष्टम्भदाता स्यात् ॥ ४४ ॥

सद्दाणुरत्तस्स नरस्स एवं, कत्तो सुहं हुज्ज कया य किंचि ।
तत्थोवभोगेवि किलेसदुक्खं, निव्वत्तई जस्स कएण दुक्खं ॥ ४५ ॥

शब्दानुरक्तस्य मनुष्यस्यैवमनेनोक्तप्रकारेण कदापि किञ्चित्स्तोकमपि सुखं भवति ? अपि तु सर्वथैव न सुखम् । यतस्तत्र शब्दानुरागे उपभोगेऽपि क्लेशदुःखं, अतृप्तिलाभलक्षणपीडाजनितमसातं निर्वर्त्तयत्युत्पादयति । पुनः 'जस्स कएण' इति यस्य मनोज्ञशब्दोपभोगस्य कृते-शब्दोपभोगार्थं दुःखमात्मनः कष्टं निर्वर्त्तयत्युत्पादयति, तस्य कदापि सुखं नास्तीत्यर्थः, सुखस्य कारणं तत्र किमपि नास्ति ॥ ४५ ॥

एमेव सद्दंमि गओ पओसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से पुणो होइ दुहं विवागे ॥ ४६ ॥

एवमनेन प्रकारेणैव, यथा मनोज्ञशब्दोपरि रागमुपगतस्तथाऽमनोज्ञशब्दे प्रद्वेषं गतो जीवो दुःखौघपरम्परामुपैति । ततः प्रदुष्टचित्तो-द्वेषोपहतचित्तः कर्माष्टविधं चिनोति, कर्मबन्धं करोति । यत्कर्म तस्य प्रदुष्टचित्तस्य पुरुषस्य विपाके दुःखं-दुःखदायि भवति ॥ ४६ ॥

सद्दे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पइ भवमज्झे वसंतो, जलेण वा पोक्खरिणीपलासं ॥ ४७ ॥

यो मनुष्यः शब्दे विरक्तो भवति, स विशोकः - शोकरहितः सन् भवमध्ये वसन्नप्येतया पूर्वोक्तदुःखौघपरम्परया न लिप्यते । किमिव ? जले वसदपि पुष्करिणीपत्रमिव ॥ ४७ ॥

अथ घ्राणेन्द्रियमाश्रित्याह-

घाणस्स गंधं गहणं वयंति, तं रागहेउं समणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो य जो तेसु स वीयरागो ॥ ४८ ॥

तीर्थङ्करा घ्राणस्य - नासिकाया ग्रहणं - विषयं गन्धं वदन्ति । तं मनोज्ञं गन्धं रागहेतुमाहुः । पुनस्तं गन्धममनोज्ञं द्वेषहेतुमाहुः । तेषु मनोज्ञामनोज्ञेषु गन्धेषु यः समस्तुल्य-वृत्तिः स वीतरागो ज्ञेयः ॥ ४८ ॥

गंधस्स घाणं गहणं वयंति, घाणस्स गंधं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु, दोसस्स हेउं अमणुन्नमाहु ॥ ४९ ॥

तीर्थङ्करा गन्धस्य सुरभ्यसुरभिपुद्गलस्य ग्रहणं ग्राहकं घ्राणं वदन्ति तथा घ्राणस्य-नासिकाया गन्धं सुरभ्यसुरभिपुद्गलं ग्रहणं ग्राह्यं वदन्ति । एवं गन्धघ्राणयोर्ग्राह्यग्राहकभाव उक्तः । तन्मनोज्ञं मनोज्ञगन्धविषयसहितं घ्राणं रागहेतुमाहुः, एवममनोज्ञगन्धविषयसहितं घ्राणं द्वेषस्य हेतुमाहुः ॥ ४९ ॥

गंधेसु जो तिव्वमुवेइ गिद्धिं, अकालियं पावई से विणासं ।
रागाउरे ओसहिगंधगिद्धे, सप्पे बिलाओ विव निक्खमंतो ॥ ५० ॥

यो मनुष्यो गन्धेषु तीव्रामुत्कटां गृद्धिमुपैति, स मनुष्यो रागातुरः सन्नकालिकं विनाशं प्राप्नोति । स क इव ? बिलान्निष्क्रमन् सर्प इव, यथा बिलान्निस्सरन् सर्प औषधिगन्धगृद्धो-ऽकालिकं विनाशं प्राप्नोति । सर्पो हि नागदमन्यादिकां सुरभिगन्धोपेतां काञ्चिदौषधीमाघ्राय पश्चात्तद्गन्धाकृष्टो बिलान्निर्गच्छन् म्रियते, जनैर्मार्यते । चन्दनगन्धाकर्षितश्च चन्दनमालिङ्ग्य तिष्ठन् म्रियते मार्यते । गन्धलुब्धो नरो हि सर्पोपमो ज्ञेयः ॥ ५० ॥

जे आवि दोसं समुवेइ तिव्वं, तंसि खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, न किंचि गंधं अवरज्झई से ॥ ५१ ॥

यश्चापि जन्तुर्यस्मिन् क्षणेऽमनोज्ञगन्धमाघ्राय तीव्रं द्वेषं समुपैति, स जीवस्तस्मिन्नेव क्षणे स्वकीयेन दुर्दान्तघ्राणेन्द्रियदोषेण दुःखमुपैति, परन्तु तस्य गन्धग्राहकस्य पुरुषस्य गन्धः किमपि नापराध्यति, गन्धस्य न कश्चिद्दोषः, तस्य घ्राणेन्द्रियस्यैव दोषोऽस्ति ॥ ५१ ॥

एगंतरत्तो रुइरंमि गंधे, अतालिसे से कुणई पओसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पई तेण मुणी विरागे ॥ ५२ ॥

यो मनुष्यो रुचिरे-मनोज्ञे गन्धे एकान्तरक्तोऽत्यन्तं रागवान् भवति, सोऽतादृशेऽमनोज्ञे गन्धे प्रद्वेषं करोति, तदा स बालो दुःखस्य पीडां-दुःखसम्बन्धिनीं पीडामसातामुपैति । तेन कारणेन विरागी मुनिस्तेन दुःखेन-रागद्वेषोद्भवेन कष्टेन न लिप्यते ॥ ५२ ॥

गंधाणुगासाणुगए य जीवे, चराचरे हिंसइऽणेगरूवे ।
चित्तेहिं ते परितावेइ बाले, पीलेइ अत्तट्ठगुरुकिलिट्ठे ॥ ५३ ॥

बालोऽज्ञानी जीवो गन्धानुगाशानुगतो मनोज्ञगन्धोपेतपुष्पकर्पूरकस्तूरिकादिद्रव्य-सुरभिग्रहणाशासहितश्चित्रैर्विविधशस्त्राद्युपायैः कृत्वा चराचराननेकरूपान् जीवान् हिनस्ति, परितापयति, पीडयति । कीदृशः सः ? आत्मार्थगुरुः स्वार्थपरायणः, पुनः कीदृशः ? सङ्क्लिष्टो रागाद्युपहतचित्तः ॥ ५३ ॥

गन्धानुरक्तस्य जीवस्य कुतः सुखं भवति ? कुतोऽपि सुखं न स्यादित्यर्थः । तथैव दर्शयति-

गंधाणुवाएण परिग्गहेण, उप्पायणे रक्खणसंनिओगे ।
वए विओगे य कहिं सुहं से, संभोगकाले य अतित्तिलाभो ॥ ५४ ॥

पूर्वं तु गन्धानुवादेन-सुरभिगन्धद्रव्यानुरागेण, सुरभिगन्धद्रव्यानुरागे सति वा परिग्रहेण-मूर्च्छारूपेण दुःखं स्यात्, ततस्तस्योत्पादने दुःखं स्यात्, ततो रक्षणे दुःखं, ततः संनियोगे स्वपरप्रयोजने सम्यग्व्यापारणे दुःखं, ततो व्यये-तस्य न्यूनतायां दुःखं, ततो वियोगे-विनाशे दुःखं भवति । एवं कष्टेन सम्प्राप्ते सुगन्धवस्तुनि सम्भोगकालेऽप्य-तृप्तिलाभः, स च दुःखं, एवमसन्तोषी महादुःखीत्युक्तत्वात् । तस्मादेतादृशस्य गन्धानुरक्तस्य कुतः सुखं स्यात् ? अपि तु न स्यादेव ॥ ५४ ॥

गंधे अतित्तो य परिग्गहंमि, सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥ ५५ ॥

गन्धेऽतृप्तोऽसन्तुष्टः पुमान् परिग्रहे सक्तो भवति, सामान्येन रतिमान् भवति । ततः पश्चात्सक्तः सन्नुपसक्तोऽत्यन्तं रतिमान् भवति । तदा च सक्तोपसक्त उच्यते । तादृशः सक्तोपसक्तश्च तुष्टि-सन्तोषं नोपैति । स चातुष्टिदोषेण दुःखी सन्नन्यस्याऽदत्तं द्रव्यमादत्ते । कीदृशः सः ? लोभाविलो लोभेन कलुषः ॥ ५५ ॥

तण्हाभिभूयस्स अदत्तहारिणो, गंधे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा न विमुच्चई से ॥ ५६ ॥

तृष्णाभिभूतस्य सुगन्धद्रव्यलोभेन पराभूतस्य, ततोऽदत्तहारिणो गन्धे गन्धविषये-ऽतृप्तस्य पुरुषस्य लोभदोषान्मायामृषा संवर्धते । तत्रापि मायामृषायामपि स मृषावादी जीवो दुःखान्न विमुच्यते ॥ ५६ ॥

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, गंधे अतित्तो दुहिओ अणिस्सो ॥ ५७ ॥

मृषाभाषी पुरुषो मृषावाक्यस्य पश्चाच्च पुनः पुरस्तात्पूर्वं च पुनः प्रयोगकाले दुरन्तो दुःखी भवति । मृषाभाषणस्य पश्चादेवं जानाति, मया किमर्थं मृषावाक्यमुक्तं ? मृषाभाषणस्य पूर्वमेवं जानात्यसौ मम मृषावाक्यं ज्ञास्यति । मृषाभाषणकाले चैवं जानाति अस्याग्रेऽहं मृषा वदामि, परमसौ जानातीति चिन्ताकुलत्वेन सर्वदा दुरन्तो दुःखी-अत्यन्तदुःखी स्यात् । एवम-दत्तानि समाचरन् गन्धेऽतृप्तो जीवो दुःखितो भवति । कीदृशः सः ? अनिश्रो निश्रारहितः ॥५७॥

गंधाणुरत्तस्स नरस्स एवं, कत्तो सुहं हुज्जा क्यावि किंचि ।
तत्थोवभोगे वि किलेसदुक्खं, निव्वत्तई जस्स कएण दुक्खं ॥ ५८ ॥

एवममुना प्रकारेण गन्धानुरक्तस्य नरस्य कदापि किञ्चित्कुतः सुखं भवेत् ? तत्रापि गन्धोपभोगेऽपि क्लेश एव दुःखं निर्वर्त्तयति, क्लेशदुःखमुत्पादयति । यस्य कृते गन्धस्योपभोगार्थं दुःखमात्मनः कष्टं भवति ॥ ५८ ॥

एमेव गंधंमि गओ पओसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से पुणो होइ दुहं विवागे ॥ ५९ ॥

एवमेव यथा गन्धानुरक्तो नरो दुःखौघपरम्परां प्राप्नोति, तथैव गन्धे दुष्टगन्धे प्रद्वेषं गतो दुःखौघपरम्परामुपैति । प्रदुष्टचित्तः सन् दुष्टं कर्म चिनोति, यत्कर्म तस्य पुरुषस्य विपाके-विपाककाले दुःखं-दुःखकारि भवति ॥ ५९ ॥

गंधे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पई भवमज्झे [१]वसंतो, जलेण वा पुक्खरिणीपलासे ॥ ६० ॥

गन्धे विरक्तो-गन्धाद्विरागी मनुजो विशोकः-शोकरहितः सन्नेतेन दुःखौघपरम्परया न लिप्यते न स्पृश्यते । किं कुर्वन्नपि ? भवमध्ये वसन्नपि, किमिव ? जलेन पुष्करिणीपत्रं-पद्मिनीपत्रमिव ॥ ६० ॥

अथ रसनेन्द्रियमाश्रित्य दूषणमाह-

जीहाए रसं गहणं वयंति, तं रागहेउं समणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो य जो तेसु स वीयरागो ॥ ६१ ॥

रस्यते आस्वाद्यते इति रसो मधुरादिः, तं रसं तीर्थङ्करा जिह्वाया रसं मधुरादिकं विषयं ग्रहणं वदन्ति । तं रसं मनोज्ञं मनोहरगुणसहितं रागहेतुमाहुः, तमेव रसं कटुकादिकममनोज्ञममनोहरं द्वेषहेतुमाहुः । यश्चैतेषु मनोज्ञामनोज्ञेषु रसेषु समस्तुल्यवृत्तिः स वीतराग उच्यते इति शेषः ॥ ६१ ॥

---

१ व संतो-अन्यसंस्करणे ॥

रसस्स जीहं गहणं वयंति, जीहाए रसं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु, दोसस्स हेउं अमणुन्नमाहु ॥ ६२ ॥

रसस्य मधुरादेर्जिह्वा-जिह्वेन्द्रियं ग्रहणं ग्राहकं वदन्ति, तथा जिह्वाया रसनेन्द्रियस्य रसं मधुरादिकं ग्रहणं ग्राह्यं वदन्ति । रसरसनयोर्ग्राह्यग्राहकसम्बन्ध उक्तः । तद्रसनेन्द्रियं समनोज्ञं रागहेतुकमाहुः, अमनोज्ञं च द्वेषस्य हेतुकमाहुः ॥ ६२ ॥

रसेसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे बडिसविभिन्नकाए, मच्छे जहा आमिसलोभगिद्धे ॥ ६३ ॥

यो मनुष्यो रसेषु मधुरादिषु तीव्रां गृद्धिमुपैति, स रागातुरोऽकालिकं विनाशं प्राप्नोति । क इव ? मत्स्य इव, यथा मत्स्य आमिषलोभगृद्धो बडिशविभिन्नकायो-लोहकण्टकविद्ध-शरीरोऽकालिकं विनाशं प्राप्नोति । तथा रसगृद्धो जीवोऽपि ॥ ६३ ॥

जे आवि दोसं समुवेइ तिव्वं, तंसि खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, रसं न किंचि अवरज्झइ से ॥ ६४ ॥

यश्चापि जन्तुर्यस्मिन् क्षणे तीव्रं द्वेषं समुपैति, स जीवस्तस्मिन्नेव क्षणे स्वकीयेन दुर्दान्तदोषेण दुर्दान्तरसनेन्द्रियदोषेण दुःखमुपैति-प्राप्नोति । परन्तु तस्य मनुष्यस्य रसः किमपि नापराध्यति । तस्य रसनेन्द्रियस्यैव दोषः, न तु रसस्य कश्चिद्दोषोऽस्तीति भावः ॥६४॥

एगंतरत्तो रुइरे रसंमि, अतालिसे से कुणई पओसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पइ तेण मुणी विरागे ॥ ६५ ॥

यो रुचिरे - मनोज्ञे मधुरादौ रसे एकान्तरक्तोऽत्यन्तमासक्तो भवति, स बालोऽज्ञानी जीवोऽतादृशेऽमनोज्ञे रसे द्वेषं करोति, ततश्च स दुःखसम्पीडां स्वस्य दुःखसम्बन्धिनीं पीडा-मुपैति-प्राप्नोति, तेन कारणेन विरागी न लिप्यते आसक्तो न भवति ॥ ६५ ॥

रसागुणासाणुगए य जीवे, चराचरे हिंसइऽणेगरूवे ।
चित्तेहिं ते परितावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥ ६६ ॥

बालोऽज्ञानी जीवो रसानुगाशानुगतो मधुरादिरसास्वादाभिलाषसहितश्चित्रैर्विविधैः शस्त्राद्युपायैः कृत्वाऽनेकरूपांश्चराचरान् जीवान् हिनस्ति, परितापयति, पीडयति । कीदृशः स बालः ? 'अत्तट्ठगुरू' आत्मार्थपरायणः, पुनः कीदृशो बालः ? क्लिष्टो रागाद्युपहतचित्तः ॥ ६६ ॥

रसाणुवाएण परिग्गहेण, उप्पायणे रक्खणसंनिओगे ।
वए वियोगे य कहिं सुहं से, संभोगकाले य अतित्तिलाभे ॥ ६७ ॥

रसानुरक्तस्य जीवस्य रसानुरागेण अथवा रसानुरागे सति वा परिग्रहेण रसयुक्तद्रव्याणां मूर्च्छया, तथा रसयुक्तद्रव्याणामुत्पादने, तथा तेषां रक्षणे, तथा तेषां द्रव्याणां संनियोगे-स्वपरेषां प्रयोजने रक्षणे, तथा व्यये-रसद्रव्याणां न्यूनत्वे, तथा वियोगे-विरहे तस्य रसानुरक्तस्य कुतः सुखं भवति ? कस्मादपि कारणात्सुखं न भवति । सम्भोगकाले रसास्वादनकालेऽप्यतृप्तिलाभोऽपि दुःखमसन्तुष्टिरेव दुःखमेव ॥ ६७ ॥

रसे अतित्ते य परिग्गहंमि, सत्तोवसत्तो न ऊवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥ ६८ ॥

रसेऽतृप्तो जीवः परिग्रहे सक्तो भवति, ततश्च सक्तः सन्नुपसक्तो भवति, सक्तोपसक्तश्च तुष्टिं नोपैति, अतुष्टिदोषेण दुःखी पुमान् परस्यादत्तं सरसं वस्तु गृह्णाति । कीदृशः सः ? लोभाविलो लोभकलुषः ॥ ६८ ॥

तण्हाभिभूयस्स अदत्तहारिणो, रसे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा न विमुच्चई से ॥ ६९ ॥

तृष्णाभिभूतस्याऽदत्तहारिणः, रसे - रसविषये परिग्रहेऽतृप्तस्य पुरुषस्य लोभदोषान्मायामृषा वर्धते, तत्रापि मायामृषायामपि सोऽसन्तोषी सरसवस्तुग्राही दुःखान्न विमुच्यते ॥ ६९ ॥

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, रसे अतित्तो दुहिओ अणिस्सो ॥ ७० ॥

मृषावाक्यस्य पश्चात्पुरतश्च प्रयोगकाले च दुरन्तो दुःखी भवति । दुर्दुष्टोऽन्तो यस्य स दुरन्तः, एतादृशो दुःखी भवति । एवममुना प्रकारेण रसेऽतृप्तोऽदत्तानि समाचरंश्चौर्याणि कुर्वन् दुःखितो भवति । पुनरनिश्रो भवति, निश्रारहितो भवति ॥ ७० ॥

रसाणुरत्तस्स नरस्स एवं, कत्तो सुहं हुज्ज कयावि किंचि ।
तत्थोवभोगेवि किलेसदुक्खं, निव्वत्तई जस्स कएण दुक्खं ॥ ७१ ॥

एवममुना प्रकारेण रसानुरक्तस्य कदापि किञ्चित्कुतः सुखं भवति ? कुतोऽपि सुखं न भवतीत्यर्थः । तत्र रसोपभोगसमयेऽप्यतृप्तिलाभरूपं क्लेशदुःखं निर्वर्तयत्युत्पादयति । तस्य रसोपभोगस्य कृते आत्मनो दुःखं कष्टं जीव उत्पादयतीत्यर्थः ॥ ७१ ॥

एमेव रसंमि गओ पओसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से पुणो होइ दुहं विवागे ॥ ७२ ॥

एवमेव रसे गृद्धो जीवः प्रद्वेषं गतः प्रदुष्टचित्तः सन् दुःखौघपरम्परया तत्कर्म चिनोति, येन कर्मणा पुनस्तस्य जीवस्य विपाके दुःखं भवति ॥ ७२ ॥

रसे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पई भवमज्झे वसंतो, जलेण वा पुक्खरिणीपलासं ॥ ७३ ॥

रसे विरक्तो मनुजो विशोकः सन् भवमध्ये वसन्नप्येतेन पूर्वोक्तदुःखौघपरम्परया न लिप्यते । केन कमिव ? जलेन पुष्करिणीपत्रमिव ॥ ७३ ॥ एवं त्रयोदशगाथाः ।

अथ स्पर्शनेन्द्रियमाश्रित्याह-

कायस्स फासं गहणं वयंति, तं रागहेउं समणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो य जो तेसु स वीयरागो ॥ ७४ ॥

तीर्थङ्कराः कायस्य-स्पर्शनेन्द्रियस्य स्पर्शं शीतोष्णखरमृद्वादिकमष्टविधं विषयं ग्रहणं वदन्ति । तं स्पर्शविषयं मनोज्ञं मनोहरगुणसहितं रागहेतुमाहुः, तमेवाऽमनोज्ञमसुन्दरं द्वेषहेतुमाहुः । तेषु मनोज्ञामनोज्ञेषु स्पर्शेषु यः समतुल्यपरिणामः स वीतराग उच्यते इति शेषः ॥ ७४ ॥

फासस्स कायं गहणं वयंति, कायस्स फासं गहणं वयंति ।
रागस्सहेउं समणुन्नमाहु, दोसस्स हेउं अमणुन्नमाहु ॥ ७५ ॥

तीर्थङ्कराः स्पर्शस्य शीतोष्णादेः पुद्गलस्य कायं-स्पर्शनेन्द्रियं ग्रहणं ग्राहकं वदन्ति, तथा कायस्य-स्पर्शनेन्द्रियस्य स्पर्शं शीतोष्णादिकं ग्रहणं ग्राह्यं वदन्ति । तत्स्पर्शनेन्द्रियं शरीरं समनोज्ञं मनोज्ञस्पर्शग्राहकं रागहेतुकमाहुः । तदेव स्पर्शनेन्द्रियममनोज्ञममनोज्ञस्पर्शग्राहकं द्वेषहेतुकमाहुः ॥ ७५ ॥

फासेसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे सीयजलावसन्ने, गाहग्गहीए महिसेव रन्ने ॥ ७६ ॥

यो मनुष्यः स्पर्शेषु-स्पर्शनेन्द्रियविषयेषु तीव्रामुत्कटां गृद्धिमुपैति सोऽकालिकं विनाशं प्राप्नोति । स क इव ? रागेणातुरो रागातुरः, शीतजलेऽवसन्नस्तापोपशमनाय शीतलजले मग्नस्तत्र ग्राहगृहीतो महामकरेणोपात्तोऽरण्यमहिष इव नाशं प्राप्नोति ॥ ७६ ॥

जे यावि दोसं समुवेइ तिव्वं, तंसि खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, न किंचि फासं अवरज्झई से ॥ ७७ ॥

यश्चापि जन्तर्जीवो यस्मिन् क्षणे तीव्रं द्वेषं समुषैति । स च जन्तुः स्वकीयेन दुर्दान्तदोषेण स्पर्शनेन्द्रियदोषेण तस्मिन्नेव क्षणे दुःखमुपैति । परं स्पर्शः शुभाशुभस्पर्शनेन्द्रियविषयस्तस्य जीवस्य किमपि नापराध्यति, तस्य स्पर्शनेन्द्रियस्यैव दोषः ॥ ७७ ॥

एगंतरत्तो रूइरंमि फासे, अतालिसे से कुणई पओसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पई तेण मुणी विरागे ॥ ७८ ॥

यो मनुष्यो रुचिरे स्पर्शे एकान्तरक्तो भवति, सोऽतादृशेऽसुन्दरे स्पर्शे प्रद्वेषं करोति । स च बालोऽज्ञानी दुःखस्य सम्पीडामुपैति । तेन कारणेन विरागी मुनिर्न लिप्यते ॥ ७८ ॥

फासाणुगासाणुगए य जीवे, चराचरे हिंसइऽणेगरूवे ।
चित्तेहिं ते परितावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥ ७९ ॥

स्पर्शानुगाशानुगतो जीवः-स्पर्शाभिलाषसहितो जीवो बालो - निर्विवेकी चित्रैरनेकरूपैरुपायैः शस्त्रैः कृत्वाऽनेकरूपांस्त्रसांस्थावरान् जीवान् हिनस्ति-पीडयति । कीदृशः सः ? आत्मार्थगुरुः-स्वार्थपरायणः, पुनः कीदृशः ? क्लिष्टो रागाद्युपहतचित्तः ॥ ७९ ॥

फासाणुवाएण परिग्गहेण, उप्पायणे रक्खणसंनिओगे ।
वए विओगे य कहं सुहं से, संभोगकाले य अतित्तिलाभे ॥ ८० ॥

स्पर्शानुरागेण, स्पर्शानुरागे जाते सति वा स्पर्शपरिग्रहेण स्पर्शानुरक्तस्य जीवस्य स्पर्शानामुत्पादने तथा स्पर्शानां रक्षणे, तथा स्पर्शानां संनियोगे स्वपरयोग्यप्रयोजनव्यापारणे, तथा पुनः स्पर्शानां व्यये न्यूनत्वे, तथा स्पर्शानां वियोगे विनाशे तस्य स्पर्शानुरक्तस्य कुतः सुखं स्यात् ? सर्वकालेऽसुखमेव स्यात् । च पुनः स्पर्शानां सम्भोगकालेऽप्यतृप्तिलाभ एव दुःखमेव भवति ॥ ८० ॥

फासे अतित्ते य परिग्गहंमि, सत्तोवसत्तो न उवेई तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥ ८१ ॥

स्पर्शेऽतृप्तः पुमान् परिग्रहे-मूर्च्छायां सक्तो भवति, सामान्येन सक्तो भवति । ततश्चोपसक्तोऽत्यन्तासक्तो भवति । ततश्च सक्तोपसक्तोऽतृप्तिदोषेण दुःखी सन् परस्यान्यस्य स्पर्शमदत्तमादत्ते - गृह्णाति । कीदृशः सः ? लोभाविलो लोभमलिनचित्तः ॥ ८१ ॥

तण्हाभिभूयस्स अदत्तहारिणो, फासे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा न विमुच्चई से ॥ ८२ ॥

तृष्णाभिभूतस्य मनुष्यस्य पुनरदत्तहारिणश्च पुनः स्पर्शे स्पर्शविषये परिग्रहेऽतृप्तस्य लोभदोषान्मायामृषा वर्धते, तत्रापि मायामृषायामपि दुःखादसन्तोषी न विमुच्यते ॥ ८२ ॥

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, फासे अतित्तो दुहिओ अणिस्सो ॥ ८३ ॥

मायामृषाभाषी पुमान् मृषावाक्यस्य पश्चात्पुरतश्च पुनः प्रयोगकाले-भाषणप्रस्तावे दुरन्तोऽत्यन्तं दुःखी भवति । एवममुना प्रकारेणाऽदत्तानि समाचरन् स्पर्शेऽतृप्तः सन् दुःखी भवति । परं कीदृशः सः ? अनिश्रो निश्रारहितः ॥ ८३ ॥

फासाणुरत्तस्स नरस्स एवं, कत्तो सुहं हुज्ज कयाइ किंचि ।
तत्थोवभोगे वि किलेसदुक्खं, निव्वत्तई जस्स कएण दुक्खं ॥ ८४ ॥

एवममुना प्रकारेण स्पर्शानुरक्तस्य पुरुषस्य कदापि किञ्चिदपि कुतः सुखं भवेत् ? अपि तु न भवेत् । तत्र स्पर्शोपभोगसमयेऽपि क्लेशदुःखं, यस्य स्पर्शस्य कृते उपभोगार्थमात्मनो दुःखं निर्वर्तयति ॥ ८४ ॥

एमेव फासंमि गओ पओसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से पुणो होइ दुहं विवागे ॥ ८५ ॥

एवमेव यथा स्पर्शे रागवान् दुःखौघपरम्परया प्रदुष्टचित्तः सन् कर्माष्टप्रकारं चिनोति, तथा स्पर्शे प्रद्वेषं गतो दुःखौघपरम्परया प्रदुष्टचित्तः संस्तत्कर्म चिनोति, तत्कर्मोपार्जयति, यत्कर्म तस्य पुरुषस्य पुनर्विपाके दुःखदायि भवति ॥ ८५ ॥

फासे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पई भवमज्जे वसंतो, जलेण वा पोक्खरिणीपलासं ॥ ८६ ॥

स्पर्शे विरक्तो मनुष्यो विशोकः सन्नेतया दुःखौघपरम्परया भवमध्ये वसन्नपि न लिप्यते । केन किमिव ? जलेन पुष्करिणीपत्रमिव ॥ ८६ ॥ एताभिस्त्रयोदशगाथाभिः-स्पर्शनेन्द्रियदोष उक्तः पञ्चमोऽधिकारः ।

मणस्स भावं गहणं वयंति, तं रागहेऊं समणुन्नमाहु ।
तं दोसहेऊं अमणुन्नमाहु, समो य जो तेसु स वीयरागो ॥ ८७ ॥

तीर्थङ्करा मनसश्चित्तस्य भावमभिप्रायं चिन्तनरूपं ग्रहणं ग्राह्यं वदन्ति, तमभिप्रायं समनोज्ञं मनोज्ञरूपादिविषयचिन्तनसहितं रागहेतुकमाहुः, अथवा स्वप्नकामादिषु भावोपस्थापितो रूपादिः, सोऽपि भाव उच्यते, तं भावं मनसो ग्राह्यं तीर्थङ्करा वदन्ति, स्वप्नादिषु हि केवलं मनस एव व्यापारोऽस्ति, तमेव भावममनोज्ञं द्वेषहेतुमाहुः, यो मनुष्यो मनोज्ञामनोज्ञेषु भावेषु समस्तुल्यवृत्तिः स वीतराग उच्यते ॥ ८७ ॥

भावस्स मणं गहणं वयंति, मणस्स भावं गहणं वयंति ।
रागस्स हेऊं समणुन्नमाहु, दोसस्स हेऊं अमणुन्नमाहु ॥ ८८ ॥

तीर्थङ्करा भावस्य शुभाशुभाशयस्य मनो ग्रहणं ग्राहकं वदन्ति, मनसश्चित्तस्य भावं शुभाशुभाभिप्रायं ग्राह्यं वदन्ति । इत्यनेन भावमनसोर्ग्राह्यग्राहकभावः सम्बन्ध उक्तः । तत्र तन्मनः समनोज्ञं प्रमोदयुक्तं रागहेतुकमाहुः, अमनोज्ञं कुत्सितभावसहितं द्वेषस्य हेतुकमाहुः ॥ ८८ ॥

भावेसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे कामगुणेसु गिद्धे, करेणुमग्गावहिएव नागे ॥ ८९ ॥

यो मनुजो भावेषु विषयाभिलाषेषु तीव्रां गृद्धिमुपैति, स मनुजोऽकालिकं विनाशं प्राप्नोति । स पुना रागातुरः कामगुणेषु गृद्धः सन् करेणुमार्गाप्रहृतो नाग इव, हस्तिन्या स्वमार्गे आनीतो गज इव परवशो भूत्वाऽकालिकं विनाशं प्राप्नोति । यदा हि मदोन्मत्तो हस्ती दूरात्करेणुकां हस्तिनीं दृष्ट्वा तदूपमोहितस्तस्या मार्गे पतितो जनैर्गृहीत्वा सङ्ग्रामादौ प्रावेश्य विनाश्यते, तथा भावातुरोऽप्यकाले म्रियते इत्यर्थः ॥ ८९ ॥

(ननु चक्षुरादीन्द्रियवशादेव गजस्य प्रवृत्तिस्तत्कथमस्यात्र भावविषये दृष्टान्तत्वेनाभिधानं ? उच्यते—एवमेतन्मनःप्राधान्यविवक्षया तज्ज्ञेयम् । अथवा तथाविधकामदशायां चक्षुरादीन्द्रियव्यापाराभावेऽपि मनसः प्रवृत्तिरिति न दोषः । इह च कामस्य मनस एवोत्पादादिति भावः)

जे यावि दोसं समुवेइ तिव्वं, तंसि खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, न किंचि भावं अवरज्झई से ॥ ९० ॥

यश्चापि मनुष्यो यस्मिन् क्षणे शुभाशुभभावे तीव्रं द्वेषं समुपैति, स मनुष्यः स्वकीयेन दुर्दान्तदोषेण-दुष्टमनोलक्षणदोषेण तस्मिन्नेव क्षणे दुःखमुपैति, परन्तु तस्य मनुष्यस्य भावः शुभाशुभव्यापारः किमपि नापराध्यति, भावस्य न कोऽपि दोषः, किन्तु तस्य पुरुषस्य मनस एव दोष इत्यर्थः ॥ ९० ॥

एगंतरत्तो रुइरंमि भावे, अतालिसे से कुणई पओसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पइ तेण मुणी विरागे ॥ ९१ ॥

यो मनुष्यो रुचिरे-मनोज्ञे भावे ऋद्धिरससातागौरवादावेकान्तरक्तो भवति, स मनुष्यः 'अतालिसे' अतादृशेऽमनोज्ञे भावे प्रद्वेषं करोति, स च बालोऽज्ञानी दुःखस्य सम्पीडामुपैति, तेन कारणेन विरागी मुनी रागद्वेषाभ्यां न लिप्यते ॥ ९१ ॥

भावाणुगासाणुगए य जीवे, चराचरे हिंसइऽणेगरूवे ।
चित्तेहिं ते परियावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥ ९२ ॥

जीवो भावानुगाशानुगतः शुभाशुभविषयाभिलाषसहितश्चित्रैरनेकप्रकारैः सङ्कल्पनैरनेनौषधेनामुं वशीकरणं करोमि, अनेनौषधेन स्वर्णसिद्धिं करोमि, अनेनौषधेन पुत्रो भवति, इत्यादिचिन्तनैर्बालोऽविवेकी चराचराननेकरूपान् जीवान् हिनस्ति, परितापयति तथा पीडयति । परं कीदृशः सः ? 'अत्तट्ठगुरु' स्वार्थपरायणः, पुनः कीदृशः ? क्लिष्टो रागाद्युपहतचित्तः ॥ ९२ ॥

भावाणुवाएण परिग्गहेण, उप्पायणे रक्खणसंनिओगे ।
वए विओगे य कहं सुहं से, संभोगकाले य अतित्तिलाभो ॥ ९३ ॥

भावानुपातेन विषयादिचिन्तनेन, तथा परिग्रहेण विषयादिमीलनेन, तथोत्पादने, एते विषयादिपदार्थाः कथं मे मिलिष्यन्ति ? इति चिन्तने, तथा रक्षणे आसेगबुद्धिप्रमुखभाव-रक्षणे, तथा संनियोगे परस्य कुबुद्धिसुबुद्ध्यादि दाने, तथा व्यये-निद्रास्मृतिप्रमुखाणां हीनत्वे, वियोगे परस्योत्तरदानादौ समर्थाया बुद्धेः स्फुरणस्याऽभावे भावानुरक्तस्य कुतः कस्मात्सुखं भवेत् ? अपि तु कुतोऽपि सुखं न स्यादेव । पुनः सम्भोगकाले चाऽतृप्तिलाभो दुःखं भावनां चिन्तनकालेऽपि तृप्तेर्लाभो न स्यात्, सत्कुम्भभञ्जकपुरुषवत् सुखं न लभते ॥ ९३ ॥

भावे अतित्ते य परिग्गहंमि, सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥ ९४ ॥

भावे शुभाशुभाध्यवसायेऽतृप्तोऽसन्तुष्टो जनः परिग्रहे सक्तो भवति, सामान्येन सक्तो भवति । ततश्च सामान्येन सक्तः सन्नुपसक्तोऽत्यन्तासक्तो भवति । एतादृशश्च संस्तुष्टिं नोपैति । अतुष्टिदोषेण दुःखी सन् परस्यान्यस्य द्रव्यादौ लोभाविलो लोभकलुषोऽदत्तमादत्ते ॥ ९४ ॥

तण्हाभिभूयस्स अदत्तहारिणो, भावे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा न विमुच्चइ से ॥ ९५ ॥

तृष्णाभिभूतस्याऽदत्तहारिणः पुनर्भावे भावविषये, परिग्रहे विषयादिमीलनेऽतृप्तस्य पुरुष-स्य लोभदोषान्मायामृषा वर्धते, तत्रापि मृषाभाषणेऽपि स मृषाभाषी दुःखान्न विमुच्यते ॥९५॥

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, भावे अतित्तो दुहिओ अणिस्सो ॥ ९६ ॥

मृषावाक्यस्य पश्चात्पुरतश्च प्रयोगकाले च पुरुषो दुरन्तो दुःखी भवति । एवममुना प्रकारेण भावेऽतृप्तः सङ्कल्पेऽसन्तुष्टोऽदत्तानि च समाचरन् दुःखितो भवति । कथंभूतः सः ? अनिश्रो निश्रारहितः, धर्मशुक्लाभ्यां रहित आर्तरौद्राभ्यां सहित इत्यर्थः ॥ ९६ ॥

भावाणुरत्तस्स नरस्स एवं, कत्तो सुहं हुज्ज कयावि किंचि ।
तत्थोवभोगेवि किलेसदुक्खं, निव्वत्तई जस्स कएण दुक्खं ॥ ९७ ॥

एवममुना प्रकारेण भावानुरक्तस्य, भावे-स्वाभिप्रायेऽनुरक्तो भावानुरक्तस्तस्य कदापि कुतः सुखं भवेत् ? कुतोऽपि कदापि किमपि सुखं न स्यादित्यर्थः । तत्र च भावोपभोगेऽपि सङ्कल्पविकल्पानुरागेऽपि चिरकालचिन्तनेऽपि क्लेशदुःखमतृप्ति-लाभजनितं क्लेशरूपं दुःखं निर्वर्तयत्युत्पादयति । पुनर्यस्य कृते, यस्य भावोपभोगेऽपि विषय-चिन्तनाद्यर्थं नरस्य दुखं स्यात् ॥ ९७ ॥

एमेव भावंमि गओ पओसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से पुणो होइ दुहं विवागे ॥ ९८ ॥

एवमेव यथा भावे रागं प्राप्तो दुःखौघपरम्परया प्रदुष्टचित्तः सन्नष्टप्रकारकं कर्म चिनोति । तथा भावे चित्ताभिप्राये प्रद्वेषं गतो जन्तुर्दुःखौघपरम्परया प्रदुष्टचित्तः सन् तत्कर्म चिनोति बध्नाति, यत्कर्म तस्य जीवस्य विपाके-कर्मवेदनकाले दुःखं-दुःखविधायि भवति ॥ ९८ ॥

भावे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पई भवमज्झे वसंतो, जलेण वा पुक्खरिणीपलासं ॥ ९९ ॥

भावे विरक्तः सङ्कल्पाद्विमुक्तो मनुष्य एतया पूर्वोक्तया दुःखौघपरम्परया भवमध्ये वसन्नपि न लिप्यते । कीदृशः सः ? विशोको विगतशोकः, केन कमिव ? जलेन पद्मिनी-पत्रमिव ॥ ९९ ॥

एताभिस्त्रयोदशगाथाभिर्भावाधिकारः सम्पूर्णः ।

अथ पूर्वोक्तार्थमेवोपसंहरन्नाह-

एविंदियत्था य मणस्स अत्था, दुक्खस्स हेऊ मणुयस्स रागिणो ।
ते चेव थोवंपि कयाइ दुक्खं, न वीयरागस्स करिंति किंचि ॥ १०० ॥

एवं पूर्वोक्तप्रकारेण रागिणो रागद्वेषसहितस्य मनुष्यस्येन्द्रियार्थाः, इन्द्रियाणां चक्षु-रादीनामर्था विषया रूपादयश्च पुनर्मनसोऽर्थाः सङ्कल्पविकल्पा दुःखहेतवो भवन्तीत्यध्या-हारः, ते एवेन्द्रियार्था मनसोऽर्थाश्च कदापि किञ्चित्स्तोकमपि दुःखं वीतरागस्य न कुर्वन्ति । यो हि जितेन्द्रियो भवति, स एव वीतराग उच्यते, स एवेन्द्रियार्थानां मनःसङ्कल्पानां च जेता स्यात्, यश्चेदृशो न भवेत्, स च सुखभाक् न स्यात् यथा जिनपालकः, अत्र जिन-पालककथा ॥ १०० ॥

न कामभोगा समयं उविंति, न यावि भोगा विगइं उविंति ।
जे तप्पओसी य परिग्गहे अ, सो तेसु मोहा विगइं उवेइ ॥ १०१ ॥

कामभोगाः शमतां नोपयान्ति, च पुनर्भोगा विकृतिमपि क्रोधादिरूपां विकार-बुद्धिमपि नोपयान्ति । शमस्य क्रोधादेश्च भोगाः कारणं न भवन्तीति भावः । तर्हि को हेतुरित्याह–यस्तत्प्रद्वेषी तेषु कामभोगेषु प्रद्वेषो यस्य स तत्प्रद्वेषी, भोगेषु विरागी, च पुनः परिग्रही तेषु भोगेषु परिग्रही परिग्रहबुद्धिमान् भवति, स जीवो मोहाद्रागद्वेषादिविकृतिमुपैति, यदा हि विषयेषु रागबुद्धिं विधत्ते, तदा भोगासक्तो भवति, यदा च विषयेषु द्वेषबुद्धिं विधत्ते, तदा विषये-विषयेभ्यो विरक्तो भवतीति । तस्मात्कामभोगाः शमतायाः क्रोधादि-कषायाणां च कारणीभवितुं नार्हन्तीत्यर्थः ॥ १०१ ॥

अथ विकृतेः स्वरूपमाह-

कोहं च माणं च तहेव मायं, लोभं दुगंछं अरइं रइं च ।
हासं भयं सोगपुमित्थिवेयं, नपुंसेवयं विविहे य भावे ॥ १०२ ॥

आवज्जई एवमणेगरूवे, एवंविहे कामगुणेसु सत्तो ।
अन्ने य एयप्पभवे विसेसे, कारुण्णदीणे हिरिमे वइस्से ॥ १०३ ॥

युग्मम् ॥

कामगुणेषु शब्दादिविषयेषु सक्तो रागी जीव एवममुना रागवत्वलक्षणप्रकारेणानेकरूपान्नानाविधान् विकारानेवंविधानुक्तस्वरूपाननन्तानुबन्धिप्रमुखानापद्यते - प्राप्नोति । च पुनरेतत्प्रभवानेतेभ्यः क्रोधादिभ्यः प्रभवा उत्पन्ना एतत्प्रभवास्तानेतत्प्रभवान् क्रोधादिजनितान् परितापदुर्गतिपातादिन् प्राप्नोति । कीदृशः सन् ? करुणायै अर्हः-कारुण्यः, कारुण्यत्वेन दीनः कारुण्यदीनोऽत्यन्तं दीन इत्यर्थः । पुनः कीदृशः ? ह्रीमान्-लज्जितः प्रीतिविनाशादिकमिहैवानुभवन्, परत्र च विपाकमतिकटुकं परिभावयन् । पुनः कीदृशः ? 'वइस्से' इत्यार्षत्वाद् द्वेष्यः सर्वत्राप्रीतिकर इत्यर्थः । इति द्वितीयगाथया सम्बन्धमुक्त्वा प्रथमाया अर्थमाह-विषयासक्तो जीवः कान् कान् स्वरूपानापद्यते ? इत्याह-विषयासक्तो जीवः कदाचित्क्रोधं प्राप्नोति, च पुनर्मानं प्राप्नोति, तथैव मायां प्राप्नोति, तथा लोभं मूर्च्छां प्राप्नोति, 'दुगंछं' इति जुगुप्सां प्राप्नोति, विपरीतं सटितं क्वथितं वा दृष्ट्वा [1]सूकरूपां, तथाऽरतिमुद्वेगरूपां, रतिं हर्षरूपां, हास्यं च प्राप्नोति । तथा भयमपि प्राप्नोति, तथा शोकपुंस्त्रीवेदं, शोकं प्रियवियोगजं मनोदुःखरूपं, पुंवेदं स्त्रिया सह विषयाभिलाषरूपं, स्त्रीवेदं-पुरुषेण सह विषयाभिलाषं, शोकश्च पुंस्त्रीवेदश्च शोकपुंस्त्रीवेदं तदपि विषयासक्तो जीवः प्राप्नोति । तथा पुनः कदाचिन्नपुंसकवेदं प्राप्नोति, स्त्रीपुंसोरुभयोर्विषयाभिलाषरूपं नपुंसकवेदं लभते । च पुनर्विविधान् भावान् हर्षविषादादीन् प्राप्नोतीति गाथाद्वयार्थः ॥ १०२ ॥ १०३ ॥

अथ रागद्वेषोद्धरणे उपायं, पुना रागद्वेषयोरनुद्धरणे प्रकारान्तरेण दूषणं चाह-

कप्पं न इच्छिज्ज सहायलिच्छू, पच्छाणुतावे य तवप्पभावं ।
एवं वियारे अमियप्पगारे, आवज्जई इंदियचोरवस्से ॥ १०४ ॥

साधुः सहायलिप्सुः सन् कल्पमपि नेच्छेत्, तदाऽकल्पं कथमिच्छेत् ? च पुनः साधुः पश्चानुतापः संस्तपःप्रभावमपि नेच्छेत् । अत्र हेतुमाह-इन्द्रियचौरवश्यः पुमानमितप्रकारान् बहुविधानेवं पूर्वोक्तान् विकारानापद्यते-प्राप्नोति । कल्पते स्वाध्यायादिक्रियासु समर्थो भवतीति कल्पो योग्यस्तं कल्पं स्वाध्यायादियोग्यं सहायं, मम विश्रामणां करिष्यतीति बुद्ध्या शिष्यं लिप्सतीति सहायलिप्सुस्तादृशः सन् पश्चाद्व्रततपसोरङ्गीकारादनन्तरमनुतापं

१ सूग चडे तेवुं ।

यस्य स पश्चानुतापः (किमेतावन्मया कष्टमङ्गीकृतमिति चित्तबाधात्मकः), तपसः प्रभावो भवान्तरे भोगानां भोक्ता स्यामित्यादिचिन्तनं तपःप्रभावस्तं, अथवेहैवामर्षौषध्यादिलब्धिमान् स्यामित्यादिकं नेच्छेत् ॥ १०४ ॥

तओ से जायंति पओयणाइ, निमज्जिउं मोहमहण्णवंमि ।
सुहेसिणो दुक्खविणोयणट्ठा, तप्पच्चयं उज्जमए य रागी ॥ १०५ ॥

ततः कषायवेदादिनां प्राप्तेरनन्तरं, तस्येन्द्रियचौराणां वशीभूतस्य मोहमहार्णवे-मोहमहासमुद्रे निमज्जयितुं, तं जीवं बूडयितुं प्रयोजनानि विषयसेवनहिंसादीनि जायन्ते उत्पद्यन्ते । किमर्थमेतानि विषयसेवनहिंसादीनि प्रयोजनानि जायन्ते ? दुःखस्य विनोदनार्थं-परिहारार्थं, सुखैषितायां हि दुःखपरिहाराय विषयसेवनादि प्रयोजनसम्भव इति भावः । कीदृशस्य तस्य ? सुखैषिण इन्द्रियसुखाभिलाषिणः । ततश्च तत्प्रत्ययम्, तेषां पूर्वोक्तानां विषयसेवाहिंसादीनां प्रयोजनानां प्रत्ययं-निमित्तं तत्प्रत्ययं, तदर्थं - तन्निमित्तं रागी द्वेषी च जीवः 'उज्जमए' इत्युद्यच्छते - उद्यमं कुरुते ॥ १०५ ॥

विरज्जमाणस्स य इंदियत्था, सद्दाइया तावइयप्पगारा ।
न तस्स सव्वेवि मणुन्नयं वा, निव्वत्तयंति अमणुन्नयं वा ॥ १०६ ॥

तावत्प्रकारास्तावन्तः प्रकारा भेदा येषां ते तावत्प्रकाराः खरमृद्वादिभेदाः शब्दरूपरसगन्धस्पर्शाः सर्वेऽपीन्द्रियार्थास्तस्य पूर्वोक्तस्य विरज्यमानस्य-विरागिणो रागद्वेषरहितस्य पुरुषस्य मनोज्ञत्वं वाऽमनोज्ञत्वं च न निर्वर्तयन्ति नोत्पादयन्ति । रागद्वेषाभ्यां विषयेषु मनोज्ञत्वममनोज्ञत्वं च नोत्पाद्यते । यो हि रागद्वेषाभ्यां रहितस्तस्य विषयाः किं कुर्वन्तीति भावः ॥ १०६ ॥

एवं ससंकप्पविकप्पणासु, संजायई समयमुवट्ठियस्स ।
अत्थे य संकप्पयओ तओ से, पहीयए कामगुणेसु तण्हा ॥ १०७ ॥

एवममुना प्रकारेण स्वसङ्कल्पविकल्पनासूपस्थितस्य पुरुषस्य तथार्थान् (इन्द्रियार्थान्) सङ्कल्पयतः पुरुषस्य च समत्वं सञ्जायते । स्वस्यात्मनः सङ्कल्पा रागद्वेषमोहास्तेषां विकल्पनाः स्वरूपदोषहेतुविचारणाः सङ्कल्पविकल्पनास्तासूपस्थितस्योद्यमयुक्तस्य, च पुनरर्थानिन्द्रियार्थान् शब्दादिविषयान् विचारयतः, यतो रूपादय इन्द्रियार्था मत्तः सकाशात्पृथगेव तिष्ठन्ति, त एते पापहेतवः, पापहेतवस्तु स्वस्मिन् स्थिता रागद्वेषादय इति विचारयतः, एतावता रागद्वेषादीनां स्वरूपं चिन्तयतः, इन्द्रियार्थस्वरूपं चिन्तयतः पुरुषस्य माध्यस्थ्यमुत्पद्यते, अथवाऽर्थान् सङ्कल्पयतो विचारयतः समता सञ्जायते । यदुक्तं-[१]"जीवाइ नवपयत्थे, जो जाणइ तस्स होइ सम्मत्तं" । 'तओ से' इति ततः समत्वोत्पत्तितस्तस्य पुरुषस्य कामगुणेषु विषयेषु तृष्णा - लोभः प्रकर्षेण हीयते ॥ १०७ ॥

---

१ जीवादिन् नवपदार्थान् यो जानाति तस्य भवति सम्यक्त्वम् ।

स वीयरागो कयसव्वकिच्चो, खवेइ नाणावरणं खणेणं ।
तहेव जं दरिसणमावरेइ, जं अंतरायं पकरेइ कम्मं ॥ १०८ ॥

यस्य पुरुषस्य कामगुणेषु शब्दादिषु लोभो निवर्तते, स निर्लोभी वीतरागः कृतसर्वकृत्यः सन्-कृतसर्वकार्यः सन् क्षणेन ज्ञानावरणं पञ्चविधं क्षपयति । तथैव यद्दर्शनं चक्षुर्दर्शनावरणं, यच्चान्तरायं दानादिलब्धेर्विघ्नं प्रकरोति, तत्कर्मान्तरायनामकर्मेत्यर्थः, तदपि क्षपयति ॥ १०८ ॥

सव्वं तओ जाणइ पासए य, अमोहणे होइ निरंतराए ।
अणासवे झाणसमाहिजुत्ते, आउक्खए मोक्खमुवेइ सुद्धे ॥ १०९ ॥

ततः कर्मक्षयानन्तरं सर्वं जानाति, सर्वं पश्यति च, तदाऽमोहनो मोहनीयकर्मरहितः सन्निरन्तरायोऽन्तरायकर्मरहितो भवति । पुनरनाश्रवो भूत्वा ध्यानसमाधियुक्तश्चायुःक्षये शुद्धः सन् मोक्षमुपैति ॥ १०९ ॥

सो तस्स सव्वस्स दुहस्स मुक्को, जं बाहई सययं जंतुमेयं ।
दीहामयविप्पमुक्को पसत्थो, तो होइ अच्चंतसुही कयत्थो ॥ ११० ॥

स मोक्षगामी पुरुषस्तस्माद् दुःखान्मुक्तो भवति । तस्मात् कस्मात् ? यद्दुःखमेतं जन्तुमेतं प्राणिनं सततं-निरन्तरं बाधते पीडयति, तस्मात्सर्वस्माद्दुःखान्मुक्तो भवति । कीदृशः स मोक्षगामी पुरुषः ? दीर्घामयविप्रमुक्तः दीर्घाणि प्रलम्बस्थितीनि यानि कर्माण्येवामया - रोगा दीर्घामयास्तेभ्यो विशेषेण प्रमुक्तो भवति, दीर्घामयविप्रमुक्तो दीर्घकर्मरोगरहितः । पुनः कीदृशः ? अत एव प्रशस्तः प्रशंसायोग्यस्ततः कर्मरोगाऽभावादत्यन्तसुखी कृतार्थः- कृतकृत्यः सिद्धो भवतीत्यर्थः ॥ ११० ॥

अथ निगमनमाह-

अणाइकालप्पभवस्स एसो, सव्वस्स दुक्खस्स पमोक्खमग्गो ।
वियाहिओ जं समुविच्च सत्ता, कमेण अच्चंतसुही भवंति ॥ १११ ॥त्तिबेमि ॥

तीर्थकरैरेष सर्वस्य संसारदुःखस्य प्रमोक्षमार्गो व्याख्यातः, यं प्रमोक्षमार्गं क्रमेण समुपेत्य-सम्यक् प्रतिपद्य सत्त्वाः-प्राणिनोऽत्यन्तं सुखिनो भवन्ति । कीदृशस्य सर्वस्य दुःखस्य ? अनादिकालप्रभवस्येत्यहं ब्रवीमीति सुधर्मा स्वामी जम्बूस्वामिनं प्राह ॥ १११ ॥

इति प्रमादस्थानाख्यमध्ययनम् सम्पूर्णम् ॥ ३२ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां द्वात्रिंशत्तमं प्रमादस्थानाख्यमध्ययनम् सम्पूर्णम् ॥ ३२ ॥

॥ ३३ कर्मप्रकृत्याख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययने प्रमादपरिहार उक्तः, तथा प्रमादस्थानान्युक्तानि, तैः प्रमादैः कृत्वा कर्मप्रकृतीनां बन्धः स्यात्, तदर्थमिहाध्ययने कर्मप्रकृतय उच्यन्ते-

अट्ठकम्माइं वुच्छामि, आणुपुव्विं जहक्कमं ।
जहिं बद्धो अयं जीवो, संसारे परिवत्तई ॥ १ ॥

हे जम्बू ! अहं यथाक्रममानुपूर्व्याऽनुक्रमेण तान्यष्ट कर्माणि वक्ष्यामि । क्रियन्ते मिथ्यात्वाऽविरति-कषाय-योगैर्हेतुभिर्जीवेनेति कर्माण्यष्टसङ्ख्यानि । यद्यप्यानुपूर्वी त्रिधा वर्तते, तथापि यथाक्रमं पूर्वानुपूर्व्या, प्राकृतत्वात्तृतीयास्थाने प्रथमा, तानि कानि कर्माणि ? यैरष्टभिः कर्मभिर्बद्धो नियन्त्रितोऽयं जीवः संसारे चतुर्गतिभ्रमणे परिवर्तते, विविधान् पर्यायान् प्राप्नोति ॥ १ ॥

[१]नाणावरणं चेव, दंसणावरणं तहा ।
वेयणिज्जं तहा मोहं, आउकम्मं तहेव य ॥ २ ॥

नामकम्मं च गोयं च, अंतरायं तहेव य ।
एवमेयाइं कम्माइं, अट्ठेव उ समासओ ॥ ३ ॥ युग्मम् ॥

एवममुना प्रकारेणैतान्यष्टौ कर्माणि समासतः-सङ्क्षेपतो ज्ञेयानीति शेषः । एतानि कानि ? तत्र प्रथमं ज्ञानावरणं, ज्ञानं मतिश्रुतावधिमनःपर्यवकेवललक्षणम्, आवृणोत्याच्छादयतीति ज्ञानावरणं, यथा नेत्रं पट आवृणोति, तद् ज्ञानावरणं कर्म प्रथमम् १ । चैव पादपूरणे । तथा द्वितीयं दर्शनावरणं, दर्शनं सम्यक्त्वमावृणोतीति दर्शनावरणं, प्रतीहारवत्सम्यक्त्वभूपं न दर्शयति २ । तथा वेदनीयं, वेद्यते साताऽसाताऽनेनेति वेदनीयम्, मधुलिप्तखड्गधारातुल्यं तृतीयं कर्म ३ । तथा पुनर्मोहं, मुह्यते मूर्च्छितो भवति जीवोऽनेनेति मोहः, मद्यवच्चतुर्थं मोहनीयम्, मोहाय योग्यं मोहनीयकर्म ज्ञेयम् ४ । तथैव चायाति स्वकीयावसरे इत्यायुर्गतिः, निःसरितुमिच्छन्नपि जीवो निर्गन्तुं न शक्नोति, यस्मिन् सति निगडबद्ध इव तिष्ठतीत्यायुषः स्वभावः, इति पञ्चममायुः कर्म ५ । तथा नामयति चतसृषु गतिषु नवीनान्नवीनान् पर्यायान् प्रापयति जीवं प्रतीति नाम, चित्रकारवन्नामकर्म षष्ठं ज्ञेयम् ६ । गोत्र्यन्ते आहूयन्ते लघुना दीर्घेण वा शब्देन जीवोऽनेनेति गोत्रं, कुम्भकारवद्घटकलशशरावकुण्डकादिभाण्डकृद्भवति, इदं गोत्रं कर्म सप्तमम् ७ । तथान्तर्मध्ये दातृग्राहकयोर्विचाले आयातीत्यन्तरायः यथा राजा कस्मैचिद्दातुमुपदिशति, तत्र भाण्डागारिकोऽन्तराले विघ्नकृद्भवति । तादृगन्तरायकर्माष्टमं भवति ८ । तत्र चाष्टानां कर्मणामादौ ज्ञानावरणं दर्शनावरणं च प्रतिपादितं, तत्त्वात्मनः स्वभावस्तु ज्ञानदर्शनरूप एवास्ति, अतस्तदावरण-

---

१ नाणस्सावरणिज्जं-अन्यसंस्करणे ॥

मादावुक्तम् । याभ्यां कर्मभ्यां जीवस्य स्वभाव आव्रियते, अतस्तयोर्मुख्यत्वम् । ज्ञानदर्शनयोश्च समानत्वेऽप्यन्तरङ्गत्वेन विशेषतो ज्ञानोपयोगे एव सर्वलब्धीनां प्राप्तिः स्यात्, तस्माद् ज्ञानस्य प्राधान्यादादौ तदावरणमुक्तम् । तदनु सामान्यज्ञानोपयोगत्वाद्दर्शनावरणमुक्तम् । एवं शेषकर्मणामपि विशेषस्तु स्वयमेव ज्ञेयः ॥ २ ॥ ३ ॥

इत्थं कर्मणां मूलप्रकृतीरुक्त्वोत्तरप्रकृतीराह-

नाणावरणं पंचविहं, सुयं आभिणिबोहियं ।
ओहिनाणं च तईयं, मणनाणं च केवलं ॥ ४ ॥

ज्ञानावरणं कर्म पञ्चविधं कथितम्, श्रुतं श्रुतज्ञानावरणं १ । तथा आभिनिबोधिकं मतिज्ञानं, तदावरणं द्वितीयम् २ । तृतीयमवधिज्ञानावरणम् ३ । तथा मनोज्ञानं मनःपर्यायज्ञानावरणं चतुर्थम् ४ । तथा पञ्चमं केवलज्ञानावरणम् ५ ॥ ४ ॥

अथ दर्शनावरणस्य द्वितीयकर्मणो भेदानाह-

निद्दा तहेव पयला, निद्दा निद्दा य पयलपयला य ।
तत्तो य थीणगिद्धी उ, पंचमा होइ नायव्वा ॥ ५ ॥

निद्रा सुखजागरणरूपा १, तथैव प्रचला द्वितीया स्थितस्योपविष्टस्य या समायाति २, तृतीया निद्रानिद्रा दुःखप्रतिबोध्या ३, चतुर्थी प्रचलाप्रचला, चलमानस्य याऽऽयाति सा प्रचलाप्रचला ४, तथा पञ्चमी स्त्यानगृद्धिनाम्नी ज्ञेया, स्त्याना-पुष्टा गृद्धिर्लोभो यस्या सा स्त्यानगृद्धिः, अथवा स्त्याना संहतोपचिता ऋद्धिर्यस्यां सा स्त्यानर्द्धिः, यस्या उदये हि वासुदेवार्धबलः प्रबलरागद्वेषवांश्च जन्तुर्जायते, अत एव दिनचिन्तितार्थसाधनीयं पञ्चमी भवति ॥५॥

चक्खुमचक्खुओहिस्स, दरिसणे केवले य आवरणे ।
एवं तु नवविगप्पं, नायव्वं दरिसणावरणं ॥ ६ ॥

एवं त्वमुना प्रकारेण नवविकल्पं नवविधं दर्शनावरणं कर्म ज्ञातव्यम् । दर्शनं सम्यक्त्वमावृणोतीति दर्शनावरणं, पञ्च निद्राः पूर्वगाथायामुक्ताः । चत्वारोऽमी भेदाः, ते के ? उच्यन्ते- 'चक्खुमचक्खुओहिस्स दरिसणि' इति, तत्र 'चक्खुमचक्खुओहिस्स' इत्येकपदं, चक्षुश्च अचक्षुश्चावधिश्च चक्षुरचक्षुरवधिस्तस्य चक्षुरचक्षुरवधेरावरणम्, चक्षुरचक्षुरवधेरित्यत्र प्राकृतत्वाद् द्वन्द्वे एकत्वं पुंस्त्वम् तथा दर्शने रूपसामान्यग्रहणे यदावरणम्, च पुनः केवले-केवलज्ञाने यदावरणम्, एवं नवविधम् । चक्षुषा दृश्यते ज्ञायते इति दर्शनं, तदावृणोत्याच्छादयतीति चक्षुर्दर्शनावरणम् । तथा चक्षुषोऽन्यदचक्षुः श्रोतनक्रसनास्पर्शरूपमिन्द्रियचतुष्कं, तेनाचक्षुषा दृश्यते इत्यचक्षुर्दर्शनं, तदावृणोतीत्यचक्षुर्दर्शनावरणम् ।

१ नाक

रुपवद्द्रव्यं सामान्यप्रकारेण मर्यादासहितं दृश्यते इत्यवधिदर्शनं, तदावृणोतीत्यवधिदर्शनावरणम्, एवं त्रयो भेदाः । चतुर्थं पुनः केवले केवलदर्शनेऽप्यावरणं ज्ञेयम् । केवलं सर्वद्रव्यपर्यायाणां सामान्येन स्वरूपं दृश्यते इति केवलदर्शनं, तत्र यदावरणं तत्केवलदर्शनावरणम् । एवं पञ्चानां निद्राणां, चतुर्णामावरणानां चैकत्रीकरणान्नवविधं दर्शनावरणं ज्ञातव्यमित्यर्थः ॥ ६ ॥

वेयणियंपि य दुविहं, सायमसायं च आहियं ।
सायस्स य बहुभेया, एमेवासायस्स वि ॥ ७ ॥

वेदनीयकर्मापि द्विविधं, वेदितुं योग्यं वेदनीयं कर्म द्विभेदमाख्यातं-कथितम् । एकं सातं च पुनरसातम्, तत्र स्वाद्यते शारीरं मानसं च सुखमनेनेति सातं सातावेदनीयं, ततोऽन्यदसातावेदनीयमित्यर्थः । तु-पुनः सातस्यापि-सातावेदनीयस्यापि बहवोऽनुकम्पादयो भेदा भवन्ति। एवमसातस्याप्यसातावेदनीयस्यापि बहव आर्त्तिशोकसन्तापादयो भवन्तीति शेषः ॥ ७ ॥

मोहणिज्जं पि दुविहं, दंसणे चरणे तहा ।
दंसणे तिविहं वुत्तं, चरणे य दुविहं भवे ॥ ८ ॥

सम्मत्तं चेव मिच्छत्तं, सम्मामिच्छत्तमेव य ।
एयाओ तिन्नि पयडीओ, मोहणिज्जस्स दंसणे ॥ ९ ॥

चारित्तमोहणं कम्मं, दुविहं तु वियाहियं ।
कसायमोहणिज्जं च, नोकसायं तहेव य ॥ १० ॥

सोलसविहभेएण, कम्मं तु कसायजं ।
सत्तविहं नवविहं वा, कम्मं नोकसायजं ॥ ११ ॥ गाथा चतुष्कम् ।

मोहयति जीवं घूर्णयति मद्यवत्परवशं करोतीति मोहः, तदर्हं मोहनीयं कर्मापि द्विविधं भवति, दर्शने तथा चरणे, दर्शने दर्शनविषये मोहनीयं, तथा चरणे चरणविषये मोहनीयम् । तत्र दर्शनं तत्त्वरुचिरूपं, चरणं विरतिरूपम्, तत्रापि दर्शने यन्मोहनीयं तत् त्रिविधं तीर्थकरैरुक्तम् । चरणे चारित्रे यन्मोहनीयं तद् द्विविधं भवेत् ॥ ८ ॥ दृश्यन्ते ज्ञायन्ते जीवादयः पदार्था अनेनेति दर्शनं, तत्र मोहयति मूढीकरोतीति दर्शनमोहनीयं त्रिविधम्, सम्यक्त्वं १, मिथ्यात्वं २, सम्यक्मिथ्यात्वमिश्रम् ३, इत्यर्थः, एव पादपूरणे, सम्यक्त्वमोहनीयं, मिथ्यात्वमोहनीयं, मिश्रमोहनीयं च । तत्र सम्यक्त्वं हि मिथ्यात्वस्यैव पुद्गलाः, अशुद्धपुद्गला अत्यन्तविशुद्धा भवन्ति, तदा सम्यक्त्वं कथ्यते, तत्सम्यक्त्वमेव दर्शनं कथ्यते, दर्शनसम्यक्त्वयोर्नामान्तरमत्र गृह्यते । यदा हि सम्यक्त्वं मिथ्यात्वप्रकृतित्वं भजति, तदा सम्य-

क्त्वस्यातीचारा लगन्ति, तदा मिथ्यात्वं भवति । यदा दर्शनप्रकृतिषु मोहो भवति, अथवौपशमिकादिकं मोहयति, तदपि सम्यक्त्वमोहनीयमुच्यते ।

अथ मिथ्यात्वमोहनीयस्वरूप-मुच्यते-सम्यक्त्वाऽभावो मिथ्यात्वमशुद्धदलिकरूपं, यतस्तत्त्वेऽतत्त्वरुचिः, अतत्त्वे तत्त्व-रुचिरुत्पद्यते तन्मिथ्यात्वम्, तत्र मुह्यते इति मिथ्यात्वमोहनीयम् । यत्तु सम्यग्मिथ्यात्व-मोहनीयं तत्तु शुद्धाशुद्धदलिकरूपं, यस्माज्जिनधर्मोपरि रागोऽपि न भवति, द्वेषोऽपि न भवति, अन्तर्मुहूर्तस्थितिरूपम्, यथा नालिकेरद्वीपवासिपुरुषोऽन्नोपरि राग्यपि न भवति, द्वेष्यपि न भवति, तादृग्स्वभावं मिश्रमोहनीयं तृतीयमुच्यते । एतास्तिस्रः प्रकृतयो दर्शने सम्यक्त्वेऽर्थाद्दर्शनस्य सम्यक्त्वस्य च मोहनीयकर्मणो ज्ञेया इति शेषः । सम्यक्त्वस्याऽज्ञानं सम्यक्त्वमोहनीयम्, मिथ्यात्वस्याऽज्ञानं मिथ्यात्वमोहनीयम्, मिश्रस्य मोहो मिश्रमोहनीयम् । इह हि सम्यक्त्वमिथ्यात्वमिश्ररूपा जीवस्य धर्मा उच्यन्ते ॥ ९ ॥ दर्शनमोहनीयं त्रिविध-मुक्त्वाऽथ चारित्रमोहनीयभेदानाह- 'चरित्तेति' गाथा पूर्वमेवोक्ता ।

अथान्वयः-तीर्थकरै-श्चारित्रमोहनं कर्म द्विविधं व्याख्यातम् । चरित्रे चारित्रग्रहणे मोहयति मूढं करोतीति चारित्र-मोहनम्, यत्र चारित्रफलं जानन्नपि तन्नाद्रियते, तद्द्वैविध्यमाह-कषायमोहनीयं प्रथमं, कषायाः क्रोधादयश्चत्वारस्तैर्मोहयतीति कषायमोहनीयम् । तथा नोकषायैर्नवभिर्हास्यादिषट्कवेदत्रिकरूपैर्मोहयतीति नोकषायमोहनीयम् ॥ १० ॥ तत्र यत्प्रथमं कषायजं मोहनीयं कर्म, तत् षोडशविधं भवति । कषाया हि क्रोधमानमायालोभाः, प्रत्येकमनन्तानुबन्धाऽप्रत्याख्यान-प्रत्याख्यान-सञ्ज्वलनरूपैश्चतुर्भिर्भेदैः षोडशभेदा भवन्ति । अथ नोकषायजं मोहनीयं कर्म सप्तविधं नवविधं वा भवति । हास्य १, रति २, अरति ३, भय ४, शोक ५, जुगुप्सा ६, वेदत्रयाणां च सामान्यगणनयैकत्वमेव गम्यते, हास्यादिषट्कं वेदश्चैवं सप्त-विधम् । यदा हि त्रयो वेदाः पुंस्त्रीनपुंसकरूपा गण्यन्ते तदा नवविधं नोकषायजं मोहनीयं भवतीत्यर्थः ॥ ११ ॥

अथायुःकर्मप्रकृतीराह-

नेरइयतिरिक्खाउं, मणुस्साउं तहेव य ।
देवाउयं चउत्थं तु, आउकम्मं चउव्विहं ॥ १२ ॥

आयुःकर्म चतुर्विधं भवति, तथाहि—नैरयिकतिर्यगायुः, निरये भवा नैरयिकाः, नैरयिकाश्च तिर्यञ्चश्च नैरयिकतिर्यञ्चः, तेषामायुर्नैरयिकतिर्यगायुः, आयुः शब्दस्य प्रत्येकं सम्बन्धः । तथैव तृतीयं मनुष्यायुः, च पुनश्चतुर्थं देवायुः, एवं चतुर्विधमायुर्भवति ॥ १२ ॥

अथ नामकर्मप्रकृतीराह-

नामकम्मं तु दुविहं, सुहं असुहं च आहियं ।
सुहस्स उ बहूभेया, एमेव असुहस्स वि ॥ १३ ॥

नामकर्म द्विविधं व्याख्यातं, शुभं १, च पुनरशुभं २, शुभनामकर्म १, अशुभनामकर्म २, एवं द्विविधम्। तत्र शुभस्य शुभनामकर्मणो बहुभेदाः सन्ति, एवमेवाऽशुभस्याऽशुभनामकर्मणोऽपि बहुभेदा भवन्ति। तत्र शुभस्योत्तरोत्तरभेदतोऽनन्तभेदत्वेऽपि मध्यममपेक्षया सप्तत्रिंशद्भेदा भवन्ति, ते चामी-मनुष्यगतिः १, देवगतिः २, पञ्चेन्द्रियगतिः ३, औदारिक ४, वैक्रिय ५, आहारक ६, तैजस ७, कार्मण शरीराणि ८, समचतुरस्रसंस्थानं ९, वज्रर्षभनाराचसंहननं १०, औदारिकाङ्गोपाङ्गं ११, वैक्रियाङ्गोपाङ्गं १२, आहारकाङ्गोपाङ्गं १३, प्रशस्तवर्णः १४, प्रशस्तगन्धः १५, प्रशस्तरसः १६, प्रशस्तस्पर्शः १७, मनुष्यानुपूर्वी १८, देवानुपूर्वी १९, अगुरुलघु २०, पराघातं २१, उच्छ्वासं २२, आतपं २३, उद्योतं २४, प्रशस्तविहायोगतिः २५, त्रसं २६, बादरं २७, पर्याप्तं २८, प्रत्येकं २९, स्थिरं ३०, शुभं ३१, सुभगं ३२, सुस्वरं ३३, आदेयं ३४, यशःकीर्तिः ३५, निर्माणं ३६, तीर्थङ्करनामकर्म ३७, एताः सर्वा अपि शुभानुभावाच्छुभनामकर्मणः प्रकृतयो ज्ञेयाः।

तथाऽशुभनामकर्मणोऽपि मध्यमभेदविवक्षया चतुस्त्रिंशद्भेदा भवन्ति। तद्यथा-नरकगतिः १, तिर्यग्गतिः २, एकेन्द्रिय ३, द्विन्द्रिय ४, त्रीन्द्रिय ५, चतुरिन्द्रीयजातिः ६, ऋषभनाराच ७, नाराच ८, अर्धनाराच ९, कीलिका १०, सेवार्तकसंहननानि ११, न्यग्रोधपरिमण्डलसंस्थान १२, सादि १३, वामन १४, कुब्ज १५, हुण्डक संस्थानानि १६, अप्रशस्तवर्ण १७, अप्रशस्तगन्ध १८, अप्रशस्तरस १९, अप्रशस्तस्पर्शाः २०, नरकानुपूर्वी २१, तिर्यगानुपूर्वी २२, उपघातं २३, अप्रशस्तविहायोगतिः २४, स्थावरं २५, सूक्ष्मं २६, साधारणं २७, अपर्याप्तं २८, अस्थिरं २९, अशुभं ३०, दुर्भगं ३१, दुःस्वरं ३२, अनादेयं ३३, अयशोऽकीर्तिश्च ३४। एताश्चाऽशुभनारकत्वादिनिबन्धनत्वेनाऽशुभाः। अत्र बन्धनसङ्घाते शरीरेभ्यो, वर्णाद्यवान्तरभेदा वर्णादिभ्यः पृथग् विवक्ष्यन्ते। एताः प्रकृतयस्तु मध्यमविवक्षया प्रोक्ताः। उत्कृष्टविवक्षया तु १०३ प्रोक्ताः सन्ति ॥ १३ ॥

अथ गोत्रकर्मप्रकृतीर्व्यनक्ति-

गोयं कम्मं दुविहं, उच्चं नीयं च आहियं।
उच्चं अट्ठविहं होइ, एवं नीयं पि आहियं ॥ १४ ॥

गोत्रं कर्म द्विविधम्, उच्चं च पुनर्नीचम्, तत्रोच्चमुच्चैर्गोत्रमीक्ष्वाकुजात्यादि, उच्चैर्व्यपदेशहेतुजातिकुलस्वरूपबलश्रुततपोलाभाद्यष्टविधबन्धहेतुत्वादष्टविधमुच्चैर्गोत्रं भवति। एवमित्यष्टविधमेव जातिकुलादिमदाष्टनिबन्धहेतुत्वान्नीचमपि-नीचैर्गोत्रमपि नीचैर्व्यपदेशहेत्वाख्यातम् ॥ १४ ॥

अथान्तरायप्रकृतीराह-

दाणे लाभे य भोगे य, उवभोगे वीरिये तहा।
पंचविहमंतरायं, समासेण वियाहियं ॥ १५ ॥

अन्तरायं समासेन-सङ्क्षेपेण पञ्चविधं व्याख्यातं, तत्पञ्चवैध्यमाह-दाने लाभे भोगे उपभोगे तथा वीर्ये, एतेषु पञ्चस्वन्तरायत्वात्पञ्चविधमन्तरायम्। तत्र दीयते इति दानं तस्मिन्

दाने, लभ्यते इति लाभस्तस्मिन् लाभे, सकृद्भुज्यते पुष्पहारादिपदार्थ इति भोगस्तस्मिन् भोगे, उपेति पुनः पुनर्भुज्यते भुवनाङ्गनांशुकादीनीत्युपभोगस्तस्मिन्नुपभोगे, तथा विशेषेणेर्यते वेद्यतेऽनेनेति वीर्यं, तस्मिन् वीर्ये, सर्वत्रान्तरायमिति सम्बन्धः । ततो विषयभेदात्पञ्चविधमन्तरायम् । तत्र यस्मिन् सति चतुरे ग्रहीतरि, देये वस्तुनि, तस्य फलं जानन्नपि दाने न प्रवर्तते तद्दानान्तरायं १ । यस्मिन् विशिष्टे दातरि सति याचनानिपुणोऽपि याचको न लभते तल्लाभान्तरायम् २ । पुनर्विभवादौ सत्यपि भोक्तुं न शक्नोति तद्भोगान्तरायम् ३ । येनोपभोगयोग्ये वस्तुनि सत्युपभोक्तुं न शक्यते तदुपभोगान्तरायम् ४ । यद्वशाद्बलवान् नीरोगस्तरुणोऽपि तृणमपि भङ्क्तुं न शक्नोति, तस्य पुरुषस्य वीर्यान्तरायं कर्म ज्ञेयम् ५ ॥ १५॥

उक्तार्थस्य निगमनायोत्तरग्रन्थयोजनायाह-

एयाओ मूलपयडीओ, उत्तराओ य आहिया ।
पएसग्गं खित्तकाले य, भावं वा अदुत्तरं सुण ॥ १६ ॥

एता मूलप्रकृतयोऽष्टावाख्याताः, तु पुनरुत्तरा अवान्तरा ज्ञानावरणदर्शनावरणादीनां पञ्चनवाद्या अग्रे कर्मणां प्रकृतय आख्याताः । अथ प्रदेशाग्रं क्षेत्रकालौ च, वाशब्दः पुनरर्थे, पुनर्भावं, अतः प्रकृत्यभिधानादुत्तरमग्रे त्वं शृणु, अहं वदामीति शेषः । तत्र प्रदेशाग्रं किं ? उच्यते—प्रदेशानां परमाणूनामग्रं परिमाणं प्रदेशाग्रं, क्षेत्रमाकाशं, कालश्च बद्धस्य कर्मणो जीवप्रदेशाऽविचटनात्मकः स्थितिकालः, भावमनुभागादिककर्मपर्यायलक्षणं चतुर्विधं प्रकृति-स्थिति-प्रदेशाऽनुभागस्वरूपमहं वदामि, त्वं शृणु ॥ १६ ॥

अथ तावत्प्रदेशाग्रं वदति-

सव्वेसिं चेव कम्माणं, पएसग्गमणंतयं ।
गंठियसत्ताईयं, अंतो सिद्धाण आहियं ॥ १७ ॥

सर्वेषां ज्ञानावरणीयादिकर्मणां प्रदेशाग्रं परमाणुपरिमाणं ग्रन्थिगसत्वातीतं वर्तते, ग्रन्थि-घनरागद्वेषपरिणतिरूपां गच्छन्तीति ग्रन्थिगाः, ग्रन्थिगाश्च ते सत्त्वाश्च ग्रन्थिगसत्त्वाः, तेभ्योऽतीतं तान्, वाऽतीतमतिक्रान्तं ग्रन्थिकसत्त्वातीतम् कोऽर्थः ? रागद्वेषमयीं ग्रन्थिं यावद्भेदनायागताः सन्तः, परं भेत्तुमशक्ताः पश्चादेव व्याघुटिताः, एतादृशा ये सत्त्वा अर्थादभव्या जीवास्तेभ्यः कर्मणां प्रदेशाग्रं परमाणूनां परिमाणमनन्तगुणाधिकं, अभव्येभ्योऽधिकमित्यर्थः । पुनः सर्वेषां कर्मणां प्रदेशाग्रं सिद्धजीवानामन्तराख्यातं, सिद्धेभ्योऽन्तर्मध्ये एवाख्यातं तीर्थकरैः कथितम् । कोऽर्थः ? सिद्धजीवेभ्यः कर्मपरमाणुपरिमाणमनन्तगुणेन हीनमित्यर्थः । कर्माण्वपेक्षया सिद्धा अनन्तगुणा इति भावः । अत एव कर्मपरमाणूनामनन्तकं सिद्धानामन्तर्वर्ति प्रकाशितम् । इदं सङ्ख्यानमेकसमयग्राह्यकर्मपरमाण्वपेक्षमुक्तं वर्तते ॥१७॥

प्रदेशाग्रमुक्त्वा कर्मणां क्षेत्रं वदन्ति-

सव्वजीवाण कम्मं तु, संगहे छद्दिसागयं ।
सव्वेसुवि पएसेसु, सव्वं सव्वेण बद्धगं ॥ १८ ॥

कर्म ज्ञानावरणीयादिकं सर्वजीवानामेकेन्द्रियादीनां, तु पादपूरणे सङ्ग्रहे सङ्ग्रह-क्रियायां योग्यं स्यादिति शेषः । कीदृशं सदित्याह—'छद्दिसागयत्ति' षट्दिशागतं, षण्णां दिशां समाहारः षड्दिशं, तत्र गतं षड्दिशागतं, षड्दिक्स्थितमित्यर्थः । तत्र चतस्रः पूर्वाद्या दिशः, उर्ध्वाधोदिगद्वयं चेदं दिक्षट्कम् । अत्र षड्दिग्गतं कर्म द्वीन्द्रियादिजीवा-नेवाधिकृत्य सङ्ग्रहक्रियायां योग्यं स्यादिति नियमः । एकेन्द्रियाणां तु आगमे त्र्यादिदिक्स्थं कर्मग्रहणक्रियायां योग्यमप्युक्तमस्ति, अपरत्रागमे च तदाह-'एगिंदियाणं भंते तेयाकम्म-पुग्गलाणं गहणं करेमाणे किं तिदिसिं करेइ ? जाव छद्दिसिं करेइ ? गोयमा ! सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं सिय च्छद्दिसिं करेइ । बेंदियाणं भंते पुच्छा, गोयमा ! बेंदिया जाव पंचेंदिया नियमा छद्दिसिं करेइ' ।

तच्च सङ्गृहीतं सत् केन सह ? कियत् ? कथं वा स्यादित्याह-'सव्वेसुत्ति' सर्वैरप्यात्मप्रदेशैः सर्वं ज्ञानावरणादि सर्वेण प्रकृतिस्थित्या-दिना प्रकारेण बद्धं अन्योन्यं सम्बन्धतया क्षीरोदकवदात्मप्रदेशैः श्लिष्टं, तदेव बद्धकं सङ्ग्रहे योग्यं भवति, न त्वन्यत् । आत्मा हि सर्वप्रकृतिप्रायोग्यपुद्गलान् सामान्येनादाय तान् पुद्गलानध्यवसायविशेषात् पृथग् ज्ञानावरणादिरूपत्वेन परिणमयति । यत्र ह्याकाशे जीवोऽवगाढस्तत्र ये आकाशप्रदेशा आत्मन्याश्रितास्तेषु ये कर्मपुद्गला रागादिस्नेहयोगत आत्मनि लगन्ति, ते एव कर्मपुद्गला जीवानां सङ्ग्रहयोग्याः, न तु क्षेत्रान्तरावगाढाः कर्मपुद्गला जीवानां सङ्ग्रहणार्हाः, भिन्नप्रदेशस्थानां ग्रहणयोग्याऽभावात् । 'सव्वेसु पएसेसु' इति प्राकृतत्वात्तृतीया-बहुवचनस्थाने सप्तमीबहुवचनम् । भिन्नप्रदेशस्थाः कर्मपुद्-गलाः कथं ग्रहणयोग्या न भवन्ति ? स्वावगाढाकाशप्रदेशस्थाः कर्मपुद्गलाः कथं ग्रहण-योग्या भवन्ति ? अत्र दृष्टान्तः-यथाग्निः स्वप्रदेशस्थान् प्रायोग्यपुद्गलानात्मसात्करोति, एवं जीवोऽपि स्वप्रदेशस्थान् कर्मपुद्गलानात्मसात्करोति । किञ्चिद्दिदिक्स्थितमपि कर्मात्मा गृह्णाति, परमल्पत्वान्न विवक्षितम् ॥ १८ ॥

अथ कालमाह-

उदहिसरिसनामाणं, तीसई कोडिकोडिओ ।
उक्कोसिया ठिई होइ, अंतोमुहुत्तं जहन्निया ॥ १९ ॥

आवरणिज्जाण दुण्हंपि, वेयणिज्जे तहेव य ।
अंतराए य कम्मंमि, ठिई एसा वियाहिया ॥ २० ॥

उदहिसरिसनामाणं, सत्तरि कोडिकोडिओ ।
मोहणिज्जस्स उक्कोसा, अंतोमुहुत्तं जहन्निया ॥ २१ ॥

तित्तिससागरोवमा, उक्कोसेण वियाहिया ।
ठिई उ आउकम्मस्स, अंतोमुहुत्तं जहन्निया ॥ २२ ॥

---

१ एकेन्द्रियाणां भगवन् ! तेजःकर्मपुद्गलानां ग्रहणं क्रियमाणे किं त्रिदिशिं करोति ? यावत् षट्दिशं करोति ? गौतम ! स्यात् त्रिदिशं, स्यात् चतुर्दिशं, स्यात् पञ्चदिशं, स्यात् षट्दिशं च करोति । द्वीन्द्रियानां भगवन् पृष्टः, गौतम ! द्वीन्द्रियेभ्यो यावत् पञ्चेन्द्रियेभ्यो नियमा षट्दिशं करोति ॥

उदहिसरिसनामाणं, वीसई कोडिकोडिओ ।
नामगोयाण उक्कोसा, अट्ठमुहुत्ता जहन्निया ॥ २३ ॥

एतासां गाथानां व्याख्या ।

प्रथमद्वितीयगाथयोरर्थः-पूर्वमावरणयोर्द्वयोरर्थाद्ज्ञानावरणदर्शनावरणयोर्द्वयोः कर्मणोरुदधिसदृग्नाम्नाम्, उदधिः- समुद्रस्तेन सदृग्नाम येषां तान्युदधिसदृग्नामानि सागरोपमाणि, तेषामुदधिसदृग्नाम्नां सागरोपमाणां त्रिंशत्कोटाकोट्युत्कृष्टा स्थितिर्भवति । तथा जघन्यिका हीनान्तमुहूर्तं स्थितिः, तथैव वेदनीये इति वेदनीयस्य कर्मणः, तथान्तरायेऽन्तरायकर्मणोऽप्येषैव स्थितिः, उत्कृष्टा त्रिंशत्कोटाकोटीस्थितिः, जघन्यिका चान्तर्मुहूर्तस्थितिः । अत्र वेदनीयस्य जघन्या स्थितिरन्तर्मुहूर्तमाना सूत्रकृतोक्ता । अन्ये तु द्वादशमुहूर्तमानामेव तां वेदनीयस्य स्थितिमिच्छन्ति, तदभिप्रायं न विद्मः ॥ १९-२० ॥ मोहनीयस्य सप्ततिकोटाकोटीसागरोपमानोत्कृष्टा स्थितिः, जघन्यिकान्तर्मुहूर्तं स्थितिः ॥ २१ ॥ त्रयस्त्रिंशत्सागरोपमाण्यायुःकर्मण उत्कृष्टेन स्थितिर्व्याख्याता, प्राकृतत्वाद्विभक्तिलोपः । जघन्यिकान्त-र्मुहूर्तं स्थितिः ॥ २२ ॥ नामगोत्रयोर्द्वयोः कर्मणोरुत्कृष्टा विंशतिः कोटाकोट्यः सागरोपमाणां स्थितिर्व्याख्याता, जघन्यिकान्तर्मुहूर्तिका, इयं तु मूलप्रकृतीनां स्थितिरस्ति । उत्तरप्रकृतीनां स्थितिर्विस्तरटीकातो ज्ञेया ॥ २३ ॥

अथ भावमाह-

सिद्धाणऽणंतभागो, अणुभागा हवंति उ ।
सव्वेसुवि पएसग्गं, सव्वजीवे सइच्छियं ॥ २४ ॥

सिद्धानामनन्तसङ्ख्याकानां सिद्धजीवानामनन्ततमोभागोऽनुभागाः कर्मरसविशेषा भवन्ति । सिद्धानन्तभागोऽनन्तसङ्ख्य एव, इत्यनेनानुभागानामप्यानन्त्यमुक्तम्, सर्वेष्वप्यनुभागेषु प्रदेशबुद्ध्या विभज्यमाना अनुभागैकदेशास्तेषामग्रं परिमाणं प्रदेशाग्रं, 'सव्वजीवे सऽइच्छियं' सर्वजीवेभ्यो (भव्याभव्येभ्यः) ऽतिक्रान्तं, ततोऽपि तेषामनन्तगुणत्वं ॥ २४ ॥

अथाध्ययनार्थमुपसंहरन्नाह-

तम्हा एएसि कम्माणं, अणुभागे वियाणिया ।
एएसिं संवरे चेव, खवणे य जए बुहे ॥ २५ ॥ त्तिबेमि ॥

तस्मादेतेषां कर्मणामनुभागान्-कर्मणां रसविशेषान् विज्ञाय तेषां कर्मणां संवरे अनुपागतानां निरोधे, च पुनः क्षपणे उपागतानां क्षयीकरणे बुधः-पण्डितो यतते-यत्नं कुरुते । इति सुधर्मास्वामी जम्बूस्वामिनं प्राह—हे जम्बू ! अहं ब्रवीमि ॥ २५ ॥

इति कर्मप्रकृत्याख्यमध्ययनम् सम्पूर्णम् ॥ ३३ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां कर्मप्रकृत्याख्यं त्रयस्त्रिंशत्तममध्ययनम् सम्पूर्णम् ॥ ३३ ॥

॥ ३४ लेश्याख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययनेऽष्टकर्मप्रकृतय उक्ताः, ताश्च कर्मप्रकृतयः षड्भिर्लेश्याभिर्भवन्ति, ततो लेश्याध्ययनं चतुस्त्रिंशं कथ्यते-

लेसज्झयणं पवक्खामि, आणुपुव्विं जहक्कमं ।
छण्हंपि कम्मलेसाणं, अणुभावे सुणेह मे ॥ १ ॥

अथाहमित्यध्याहारः, अथ यथाक्रममानुपूर्व्याऽनुक्रमेण त्रिविधयाऽतिमलिनतममलिनतरमलिनादिभेदेनाहं लेश्याध्ययनं प्रवक्ष्यामि । लेश्या-अध्यवसायविशेषाः, लेश्याभिधायकमध्ययनं लेश्याध्ययनमहं कथयिष्यामि, 'मे' मम कथयतः षण्णामपि कर्मलेश्यानां कर्मस्थितिविधायकतत्तद्विशिष्टपुद्गलरूपाणामनुभावान् रसविशेषांस्त्वं शृणु ॥ १ ॥

नामाइ वण्णरसगंध-फासपरिणामलक्खणं ।
ठाणं ठिईगइं चाउं, लेसाणं तु सुणेह मे ॥ २ ॥

हे शिष्य ! लेश्यानामेकादशवचनानि 'मे' मम कथयतस्त्वं शृणु । तानि कानि वचनानि ? तावन्नामानि वक्ष्यामि, तथा वर्णरसगन्धस्पर्शपरिणामलक्षणं वक्ष्यामि, तथा स्थानं वक्ष्यामि, तथा स्थितिगती वक्ष्यामि, च पुनरायुर्वक्ष्यामि । वर्णश्च रसश्च गन्धश्च स्पर्शश्च परिणामश्च लक्षणं च, तेषां समाहारो वर्णरसगन्धस्पर्शपरिणामलक्षणम् । तत्र वर्णाः श्यामादयः, रसास्तीक्ष्णादयः, गन्धाः सुरभ्यादयः, स्पर्शाः खरादयः, परिणामा जघन्यादयः, लक्षणं पञ्चाश्रवासेवनादि, स्थानमुत्कर्षापकर्षरूपं, स्थितिमवस्थानकालं, गतिं नरकादिकां, यतो याऽवाप्यते आयुर्यावत्यायुष्यावशिष्यमाणे आगामिभवलेश्यापरिणामस्तदिह गृह्यते ॥ २ ॥

तदेवानुक्रमेणाह-

किण्हा नीला य काऊ य, तेउ पउमा तहेव य ।
सुक्कलेसा य छट्ठीओ, नामाइं तु जहक्कमं ॥ ३ ॥

एतानि लेश्यानां यथाक्रमं नामानि ज्ञेयानि । प्रथमा कृष्णा १, च पुनर्द्वितीया नीला २, तृतीया कापोतनाम्नी ३, चतुर्थी तेजोलेश्या ४, पञ्चमी पद्मलेश्या ५, च पादपूरणे, च पुनः षष्ठी शुक्ललेश्या ६ । एवं षण्णामपि नामानि ॥ ३ ॥

अथ वर्णानाह-

जीमूतनिद्धसंकासा, गवलरिट्ठगसन्निभा ।
खंजंजणनयणनिभा, किण्हालेसा उ वण्णओ ॥ ४ ॥

पूर्वं कृष्णलेश्या वर्णतो ज्ञेया—कीदृशी कृष्णलेश्या ? स्निग्धजीमूतसङ्काशा, प्राकृतत्वात् स्निग्धशब्दस्य परनिपातः, स्निग्धश्चासौ जीमूतश्च स्निग्धजीमूतस्तेन सङ्काशा स्निग्धजीमूतसङ्काशा, सजलघनसदृशा । पुनः कीदृशी ? गवलारिष्टकसन्निभा, गवलं चारिष्टकं च गवलारिष्टके, ताभ्यां सन्निभा गवलारिष्टकसन्निभा, गवलं-माहिषं शृङ्गम्, अरिष्टमरिष्टफलमरिष्टरत्नं वा, ताभ्यां सदृशी । पुनः कीदृशी ? खञ्जाञ्जननयननिभा, खञ्जं च अञ्जनं च नयनं च खञ्जाञ्जननयनानि, तैर्निभा खञ्जाञ्जननयननिभा । खञ्जं शकट-चक्रान्तर्गतलोहदण्डोपरिधृताभ्यक्तशणादिबन्धनं श्यामीभूतम्, अञ्जनं कज्जलं, नयनं नेत्रकनीनिका, तैर्निभा सदृशी ॥ ४ ॥

अथ नीललेश्याया वर्णमाह-

नीलाशोकसंकासा, चासपिच्छसमप्पभा ।
वेरुलियनिद्धसंकासा, नीललेसा उ वण्णओ ॥ ५ ॥

तु पुननींललेश्या वर्णत ईदृशी भवति, कीदृशी ? नीलश्चासावशोकश्च नीलाशोकस्तेन सङ्काशा-सदृशी नीलाशोकसङ्काशा । अशोकवृक्षो रक्तोऽपि भवति, तद्व्यवच्छेदार्थं नीलपदम् । पुनः कीदृशी ? चाषपिच्छसमप्रभा, पुनः कीदृशी ? स्निग्धवैडूर्यसङ्काशा जात्यनीलमणिसदृशी ॥ ५ ॥

अथ कापोतवर्णमाह-

अयसीपुप्फसंकासा, कोइलच्छदसन्निभा ।
पारावयगीवनिभा, काउलेसा उ वन्नओ ॥ ६ ॥

कापोतलेश्या वर्णत ईदृशी भवति । ईदृशी कीदृशी ? अतसी-धान्यविशेषस्तस्य पुष्पमतसीपुष्पं, तेन सङ्काशाऽतसीपुष्पसङ्काशा, पुनः कीदृशी ? कोकिलच्छदसन्निभा कोकिलपक्षिपिच्छसदृशी, पुनः कीदृशी ? पारापतग्रीवानिभा ॥ ६ ॥

अथ तेजोलेश्यावर्णमाह-

हिंगुलयधाउसंकासा, तरुणाइच्चसंनिहा ।
सुयतुंडपईवनिभा, तेउलेसा उ वन्नओ ॥ ७ ॥

तेजोलेश्या वर्णत ईदृशी भवति । ईदृशी कीदृशी ? हिङ्गुलुकः प्रतीतः, स चासौ धातुश्च हिङ्गुलुकधातुस्तेन सङ्काशा हिङ्गुलुकधातुसङ्काशा । अथवा हिङ्गुलुकः प्रसिद्धः, धातुर्गैरिका, ताभ्यां सदृशी । पुनः कीदृशी ? तरुणादित्यसन्निभा-सदृशी । पुनः कीदृशी ? शुकतुण्डप्रदीपनिभा, शुकचञ्चुप्रदीपार्चिस्सदृशी ॥ ७ ॥

अथ पद्मलेश्यावर्णमाह-

हरियालभेयसंकासा, हलिद्दाभेयसप्पभा ।
सणासणकुसुमनिभा, पम्हलेसा उ वण्णओ ॥ ८ ॥

पद्मलेश्या वर्णत ईदृशी भवति । ईदृशी कीदृशी ? हरितालभेदसङ्काशा, हरितालस्य नटमण्डनस्य भेदाः खण्डा हरितालभेदास्तैः सङ्काशा तत्सदृशी, पुनर्हरिद्राभेदसत्प्रभा, पुनः शणासनकुसुमनिभा, शणं च असनश्च शणासनौ, तयोः कुसुमं, तेन सन्निभा शणासनकुसुमसन्निभा, शणं धान्यविशेषम्, असनो बीयकाख्यो वृक्षस्तत्पुष्पसदृशी ॥ ८ ॥

अथ शुक्ललेश्यावर्णमाह-

संखंककुंदसंकासा, खीरपूरसमप्पभा ।
रययहारसंकासा, सुक्कलेसा उ वण्णओ ॥ ९ ॥

शुक्ललेश्या वर्णत ईदृशी भवति । ईदृशी कीदृशी ? शङ्खश्च अङ्कश्च कुन्दं च शङ्खाङ्ककुन्दानि, तैः सङ्काशा शङ्खाङ्ककुन्दसङ्काशा । शङ्खः प्रसिद्धः, अङ्कः शुक्लमणिविशेषः, कुन्दं कुन्दवृक्षपुष्पं, एतैः सदृशी । पुनः क्षीरपूरसमप्रभा-दुग्धपूरसदृशवर्णा । पुना रजतहाराभ्यां सङ्काशा, रजतं जातीयरूप्यं, हारो मुक्ताहारस्ताभ्यां सदृशीत्यर्थः ॥ ९ ॥

अथ षण्णां लेश्यानां रसमाह-

जह कडुयतुंबगरसो, निंबरसो कडुयरोहिणिरसो वा ।
एत्तोवि अणंतगुणो, रसो उ किण्हाए नायव्वो ॥ १० ॥

कृष्णायाः-कृष्णलेश्याया ईदृशो रसो ज्ञातव्यः । ईदृशः कीदृशः ? यथा यादृशः कटुकतुम्बकरसस्तथा निम्बस्य रसस्तथा कटुकरोहिणीरसः, कटुका चासौ रोहिणी च कटुकरोहिणी, तस्या रसः कटुकरोहिणीरसः, रोहिणी वनस्पतिविशेषः, एतेभ्योऽप्यनन्तगुणोऽनन्तसङ्ख्यराशिना गुणितो रसः कृष्णलेश्याया भवतीत्यर्थः ॥ १० ॥

अथ नीललेश्याया रसमाह-

जह तिक्कडुयस्स रसो, तिक्खो जह हत्थिपिप्पलीए वा ।
एत्तो वि अणंतगुणो, रसो उ नीलाए नायव्वो ॥ ११ ॥

नीलाया - नीललेश्याया ईदृशो रसो ज्ञातव्यः । यथा यादृशस्त्रिकटुकस्य त्रयाणां कटूनां समाहारस्त्रिकटु, त्रिकट्वेव त्रिकटुकं, सुण्ठीमरिचपिप्पलात्मकं, तस्य रसो यादृक् तीक्ष्णो भवति । पुनर्यथा हस्तिपिप्पल्या-गजपिप्पल्या वा रसो यादृशो भवति, इत्तोऽप्येभ्योऽपि नीलाया अनन्तगुणो रसस्तीक्ष्णो भवति ॥ ११ ॥

जह तरुणअंबयरसो, तुंवरकविट्ठस्स वावि जारिसओ ।
इत्तोवि अणंतगुणो, रसो उ काऊए नायव्वो ॥ १२ ॥

कापोतलेश्याया रस ईदृशो ज्ञातव्यः । ईदृशः कीदृशः ? यादृशस्तरुणाम्रकरसो भवति, तरुणमपरिपक्वं यदाम्रकमाम्रफलं तरुणाम्रकं, तस्य रसस्तरुणाम्रकरसः, तथा

पुनस्तुम्बरकपित्थस्य रसो यादृशो भवति, तुम्बरं-कच्चं कपित्थं तुम्बरकपित्थं, तस्य रसो यादृग्भवति, एभ्योऽप्यनन्तगुणो रसः कापोतलेश्याया ज्ञातव्यः ॥ १२ ॥

जह परिणयंबगरसो, पक्ककविट्ठस्स वावि जारिसओ ।
इत्तोवि अणंतगुणो, रसो य तेऊए नायव्वो ॥ १३ ॥

तेजोलेश्याया ईदृशो रसो भवति । ईदृशः कीदृशः ? यादृशः परिणताम्रकरसो भवति, पक्वाम्रफलस्य रसो भवति । पुनर्यादृशः पक्वकपित्थस्यापि रसो भवति, 'इत्तो' एभ्योऽप्यनन्तगुणो रसस्तेजोलेश्याया ज्ञातव्यः, इत्यनेन किञ्चिदाम्लः किञ्चिन्मधुरश्चेति हार्दम् ॥१३॥

वरवारुणीयरसो विविहाण, व आसवाण जारिसओ ।
महुमेरगस्स य रसो, इत्तो पम्हाए परएणं ॥ १४ ॥

पद्मायाः-पद्मलेश्याया रस ईदृशो ज्ञातव्यः । ईदृशः कीदृशो ? यादृशः वरवारुण्याः-प्रधानमदिराया रसो भवति, पुनर्विविधानामासवानां कुसुमोत्पन्नानां मद्यानां यादृशो रसो भवति, तथा पुनर्मधुमैरेयकस्य रसो यादृशो भवति, मधु मद्यविशेषं, मैरेयं सरकाभिधानं, मधु च मैरेयं च मधुमैरेयं, तस्य मधुमैरेयस्य रसो यादृग्भवति, अत एभ्यो रसेभ्यः पद्मायाः-पद्मलेश्याया रसः परकेणानन्तगुणाधिकत्वेन भवति । अयं य रसः किञ्चिदाम्लकषायो मधुरश्चेति भाव्यम् ॥ १४ ॥

खज्जूरमुद्दियरसो, खीररसो खंडसक्कररसो वा ।
इत्तोवि अणंतगुणो, रसो उ सुक्काए नायव्वो ॥ १५ ॥

शुक्लायाः-शुक्ललेश्याया ईदृशो रसो भवति । ईदृशः कीदृशः ? यादृशः खर्जूर-मृद्वीकयो रसः, खर्जूरं पिण्डखर्जूरं, मृद्वीका द्राक्षा, तयोर्यादृग् रसः स्यात्, तथा पुनर्यादृक् क्षीरस्य - दुग्धस्य रसो भवति, तथा खण्डशर्कारारसो यादृशो भवति, खण्डश्चेक्षुरसविकार-संस्कारः, शर्करा च तत्प्रभवा, तयो रसो यादृशो भवति, अत एभ्यो रसेभ्योऽपि शुक्ललेश्याया अनन्तगुणो रसो ज्ञातव्यः । अत्यन्तमधुररसो ज्ञेय इत्यर्थः ॥ १५ ॥

अथ षण्णां लेश्यानां गन्धमाह-

जह गोमडस्स गन्धो, सुणगमडस्स व जहा अहिमडस्स ।
एत्तोवि अणंतगुणो, लेसाणं अप्पसत्थाणं ॥ १६ ॥

अप्रशस्तानां लेश्यानां कृष्णनीलकापोतानां तिसृणामतोऽप्येभ्यो दुर्गन्धेभ्योऽप्यनन्त-गुणो दुर्गन्धो भवति । एभ्यः केभ्यः ? यादृशो गोमृतकस्य-गोकलेवरस्य, तथा शुनो मृतकस्य वा, अथवा यथाऽहिमृतकस्य-सर्पकलेवरस्य गन्धो भवति, ततोऽनन्तगुणो दुर्गन्धो भवति, इह लेश्यानामप्रशस्तत्वं गन्धाद्यशुभत्वादितिभावः ॥ १६ ॥

जह सुरहिकुसुमगंधो, गंधवासाण पिस्समाणाणं ।
एत्तोवि अणंतगुणो, पसत्थलेसाण तिण्हंपि ॥ १७ ॥

तिसृणामपि प्रशस्तलेश्यानां तैजसीपद्मशुक्लानामेतादृशो गन्धो भवति । एतादृशः कीदृशः ? यादृशः सुरभिकुसुमानां जातिचम्पकादीनां पुष्पाणां गन्धवासानां यादृशो गन्धो भवति, गन्धाश्च वासाश्च गन्धवासाः, गन्धाः [1]कुष्टपुटपाकनिष्पन्नाः, वासा इतरे [2]कर्पूरकर्चरिकाद्याः, तेषां चूर्णीक्रियमाणानां गन्धो भवति, अत एभ्योऽपि गन्धेभ्योऽनन्तगुणो गन्धः प्रशस्तलेश्यानां ज्ञेय इत्यर्थः ॥ १७ ॥

अथ लेश्यानां स्पर्शमाह-

जह करगयस्स फासो, गोजिब्भाए च सागपत्ताणं ।
एत्तो वि अणंतगुणो, लेसाणं अप्पसत्थाणं ॥ १८ ॥

अप्रशस्तानां लेश्यानां कृष्णनीलकापोतानां स्पर्श एतादृशो भवति । एतादृशः कीदृशः ? यादृशः क्रकचस्य स्पर्शः, पुनर्यादृशो गोजिह्वायाः स्पर्शः तथा सागवृक्षस्य पत्राणां स्पर्शो भवति, एभ्यः स्पर्शेभ्यो ऽप्यशुभानां लेश्यानामनन्तगुणः स्पर्शो ज्ञेयः ॥ १८ ॥

जह बूरस्स व फासो, नवणीयस्स य सिरीसकुसुमाण ।
एत्तोवि अणंतगुणो, पसत्थलेसाण तिण्हंपि ॥ १९ ॥

प्रशस्तलेश्यानां तिसृणामपि तेजोलेश्यापद्मलेश्याशुक्ललेश्यानां स्पर्श ईदृशो भवति । ईदृशः कीदृशः ? यादृशो बूरस्य-वनस्पतिविशेषस्य स्पर्शो भवति, च पुनर्नवनीतस्य - म्रक्षणस्य स्पर्शो यादृशो भवति, पुनः शिरीषवृक्षस्य कुसुमानां यादृशः स्पर्शो भवति, एतेभ्यः स्पर्शेभ्योऽप्यनन्तगुणः स्पर्शो भव्यानां लेश्यानां ज्ञेयः ॥ १९ ॥

अथ सर्वलेश्यानां परिणामा उच्यन्ते-

तिविहोवि नवविहो वा, सत्तावीसइविहेक्कसीओ वा ।
दुसओ तेयालो वा, लेसाणं होइ परिणामो ॥ २० ॥

लेश्यानां परिणामस्तद्गमनात्मकस्त्रिविधोऽपि भवति, पुनर्नवविधो भवति, तथा सप्तविंशतिविधः, तथैकाशीतिविधः, तथा पुनस्त्रिचत्वारिंशदधिकद्विशतविधो वा लेश्यानां परिणामो भवति । तत्र त्रिविधो यथा-जघन्यमध्यमोत्कृष्टभेदेन भवति प्रत्येकम् । यदैतेषामपि जघन्यादीनां स्वस्थानतारतम्यचिन्तायां त्रयेणगुणना क्रियते तदा नवविधः । एवं पुनस्त्रि-

१ कुष्ट - कठ नामनुं सुगंधी मूळीयुं । ते शुष्क होवाथी तेनी सुगंध लेवा माटे माटीना कोडीयामां मूकीने पुट बनावी अग्निमां पकावाय छे. ते कुष्ट पुटपाक कहेवाय ।

२ कपूरकाचली नामनुं सुगंधी द्रव्य ।

कगुणनया सप्तविंशतिविधत्वं भवति, एवं पुनः पुनर्गुणनयैकाशीतिविधत्वं भवति, पश्चात्पुनरेवं त्रिचत्वारिंशदधिकद्विशतविधत्वं भावनीयम्, उपलक्षणं चेदम्, तरतमयोग-विचारणया सङ्ख्यानियमो नास्ति । तथा च प्रज्ञापनासूत्रे-[१]किण्हलेसाणं भंते कइविहं परिणामं परिणमइ ? गोयमा ! तिविहं वा, नवविहं वा, सत्तावीसइविहं वा, इक्कासीइविहं वा, [२]तेयालब्भहिय दुसयविहं वा बहुं वा परिणामं परिणमइ, जाव सुक्कलेसाइत्ति ॥ २०॥

अथ तावत्कृष्णलेश्यापरिणाममाह-

पंचासवप्पवत्तो तीहिं, अगुत्तो छसु अविरओ य ।
तिव्वारंभपरिणओ, खुद्दो साहस्सिओ नरो ॥ २१ ॥

निद्धंसपरिणामो, निस्संसो अजिइंदिओ ।
एयजोगसमाउत्तो, किण्हलेसं तु परिणमे ॥ २२ ॥युग्मम् ॥

एतद्योगसमायुक्तो नरः-प्राणी कृष्णां लेश्यां प्रति परिणमेत्, कृष्णलेश्यां भजेदित्यर्थः, अत्र नरशब्देन केवलं पुरुष एव न गृह्यते, स्त्र्यादिष्वपि कृष्णलेश्यायाः सम्भवात् । एते सूत्रे उच्यमाना योगा एतद्योगास्तैः समायुक्तः सम्यग्प्रवर्तित एतद्योगसमायुक्तः । ते के योगाः ? इत्याह–पञ्च च आश्रवाश्च पञ्चाश्रवाः प्राणातिपातादयः, तेषु प्रवृत्तः सन्, पुनः कीदृशः ? तिसृभिरगुप्तो मनोगुप्तिवाग्गुप्तिकायगुप्तिरहितः । पुनर्यः षट्सु पृथ्व्यादिकायेष्वविरतः षट्कायोपमर्दयुक्त इत्यर्थः । पुनस्तीव्रा उत्कटा आरम्भाः सावद्यव्यापारास्तेषु परिणतस्तदूपतां प्राप्तस्तीव्रारम्भपरिणतः । क्षुद्रो हि सर्वेष्वप्यहितवाञ्छकः । पुनः साहसिकः सहसा अविचार्य प्रवर्तते इति साहसिकः, चौर्यपरदारासेवाकारीत्यर्थः ॥ २१ ॥ पुनः कीदृशः ? निध्वंसपरिणामो नितरां ध्वंसो निध्वंसोऽत्यन्तलोकद्वयविरुद्धचिन्ताविकलः परिणामो यस्य स निध्वंसपरिणामः, पुनर्यो नृशंसो भवति, निस्त्रिंशो जीवान् हिंसन् यो मनागपि शङ्कां न करोति स निस्त्रिंश इत्युच्यते । पुनः कीदृशः ? अजितेन्द्रियो-मुत्कलेन्द्रियः, एतादृशो यो भवति, स कृष्णलेश्यां प्राप्नोतीति भावः ॥ २२ ॥

इस्साअमरिसअतवो, अविज्जा माया अहीरिया ।
गिद्धी पओसो य सढे, पमत्ते रसलोलुए ॥ २३ ॥

सायगवेसेयारंभाऽविरओ, खुद्दो साहस्सिओ नरो ।
एय जोगसमाउत्तो, नीललेसं तु परिणमे ॥ २४ ॥

---

१ कृष्णलेश्यानां भगवन् ! कतिविधं परिणामं परिणमति ? गौतम ! त्रिविधं वा, नवविधं वा, सप्तविंशतिविधं वा, एकाशीतिविधं वा, त्रिचत्वारिंशदधिकद्विशतविधं वा, बहु वा, परिणामं परिणमति यावत् शुक्ललेश्यानामिति ।

२ बेतेयालसतविहं-महावीर जैन विद्यालय संस्करणे ॥

एतद्योगसमायुक्तः प्राणी नीललेश्यां प्रति परिणमेत्, नीललेश्यां भजेत् । ते के योगाः ? ईर्ष्या-परगुणासहम्, अमर्षो महाकदाग्रहः, अतपस्तपसामभावः, ईर्ष्या च अमर्षश्च अतपश्चेर्ष्यामर्षातपः, तथा पुनरविद्या कुशास्त्ररूपा, पुनर्माया कापट्यं, अह्रीका निर्लज्जता, गृद्धिर्विषयलाम्पट्यम्, प्रद्वेषः प्रकृष्टद्वेषभावः, एते सर्वे योगा दोषरूपा यस्मिंस्तिष्ठन्ति, गुणगुणिनोरभेदात्, स प्राणी नीललेश्यापरिणामवान् भवति । पुनः कीदृशः ? शठो-मिथ्याभाषी, पुनः कीदृशः सः ? प्रमत्तोऽष्टमदयुक्तः, पुनर्यो रसलोलुपः ॥ २३ ॥ पुनर्यः प्राणी सातगवेषक इन्द्रियसुखाभिलाषी, कथं मम सुखं स्यादिति बुद्धिमान् । पुनर्य आरम्भात्प्राणिसंमर्दादविरत आरम्भाऽविरतः, पुनर्यः क्षुद्रो नीचः, साहसिकः एतादृशः प्राणी नीललेश्यावानित्यर्थः ॥ २४ ॥

अथ कापोतलेश्यालक्षणमाह-

वंके वंकसमायारे, नियडिल्ले अणुज्जुओ ।
पलिउंचग ओवहिए, मिच्छदिट्ठी अणारिए ॥ २५ ॥

उप्फालगदुट्ठवाई य, तेणे यावि य मच्छरी ।
एयजोगसमाउत्तो, काऊलेसं तु परिणमे ॥ २६ ॥

एतद्योगसमायुक्तः प्राणी कापोतलेश्यां प्रति परिणमेत् प्राप्नुयादित्यर्थः । कीदृशः ? यो वङ्को वचसा वक्रः, पुनः कीदृशः ? वङ्कसमाचारः, वक्रः समाचारो यस्य स वक्रसमाचारो वक्रक्रियाकारी, पुनर्यः 'नियडिल्ले' इति निकृतिमान् निकृतिः शाठ्यं तद्विद्यते यस्येति निकृतिमान्, पुनर्योऽनृजुकोऽसरलः, कथञ्चित्सरलं कर्तुमशक्त इत्यर्थः । पुनर्यः 'पलिउंचग' इति प्रतिकुञ्चकः-स्वदोषप्रच्छादनपरः, पुनः कीदृशः ? औपधिक उपधिना कपटेन चरती-त्यौपधिकः, पुनर्यो मिथ्यादृष्टिर्विपरितश्रद्धावान्, पुनर्योऽनार्यः सम्यग्लक्षणरहितः ॥ २५ ॥ पुनर्य उत्फालकदुष्टवादी, उत्फालयति विदारयति पदं यदुत्फालकं दुःखोत्पादकं दुष्टं वदते इत्येवंशील उत्फालकदुष्टवादी । पुनर्यः स्तेनश्चापि भवति - चौरोऽपि भवति, पुनर्यो मत्सरी, अन्यस्य सम्पदं दृष्ट्वाऽसहनः, एतद्योगसमायुक्त एतादृशः कापोतलेश्यावान् ज्ञेयः ॥ २६ ॥

अथ तेजोलेश्यालक्षणमाह-

नीयावित्ती अचवले, अमाई अकुतूहले ।
विणीयविणए दंते, जोगवं उवहाणवं ॥ २७ ॥

पियधम्मे दढधम्मे, वज्जभीरू हिएसए ।
एयजोगसमाऊत्ते, तेऊलेसं तु परिणमे ॥ २८ ॥

एतद्योगसमायुक्तः प्राणी तेजोलेश्यां परिणमेत् । कीदृशः प्राणी ? नीचैर्वृत्तिः कायवाङ्मनोभिरनुत्सेको नम्रतायुक्त इत्यर्थः । पुनर्यः प्राण्यचपलो भवति, पुनरमायी मायारहितः, पुनर्योऽकुतूहलः कुतूहलरहितः, पुनर्यो विनीतविनयः कृतगुर्वादियोग्यव्यवहारः, पुनर्यो दान्त इन्द्रियदमनपरायणः, पुनर्योगवान् सिद्धान्तपाठव्यापारवान् । पुनर्य उपधानवहन-निरतः, पुनर्यः प्रियधर्मा, पुनर्यो दृढधर्मा, पुनर्योऽवद्यभीरुः- पापभीरुको भवति । पुनर्यो हितैषकः सर्वजीवेषु हितान्वेषी, अथवा हितं मोक्षमिच्छतीति हितैषकः, एतादृशस्तेजोलेश्या-वान् भवति ॥ २६ ॥

अथ पद्मलेश्यालक्षणमाह-

पयणुक्कोहमाणे य, माया लोभे य पयणुए ।
पसंतचित्ते दंतप्पा, जोगवं उवहाणवं ॥ २९ ॥

तहा पयणुवाई य, उवसंते जिइंदिए ।
एयजोगसमाउत्तो, पम्हलेसं तु परिणमे ॥ ३० ॥

एतद्योगसमायुक्तः प्राणी पद्मलेश्यां तु परिणमेत् । कीदृशः ? प्रकर्षेण तनू क्रोधमानौ यस्य स प्रतनुक्रोधमानः, पुनर्यस्य मायालोभौ च प्रतनुकौ भवतः । पुनर्यः प्रशान्तचित्तो भवति । पुनर्यो दान्तात्मा, पुनर्योगवांस्तथोपधानवान् भवति ॥ २९ ॥ तथा प्रतनुवादी-स्वल्पभाषी, पुनरुपशान्तः कषायाभावेन शीतीभूतः, पुनर्यो जितेन्द्रियः, एतैर्योगैः समायुक्त एतद्योगसमायुक्तः पद्मलेश्यावान् भवतीत्यर्थः ॥ ३० ॥

अथ शुक्ललेश्यालक्षणमाह-

अट्टरुद्दाणि वज्जित्ता, धम्मसुक्काणि झायए ।
पसंतचित्ते दंतप्पा, समीए गुत्ते य गुत्तिसु ॥ ३१ ॥

सरागे वीयरागे वा, उवसंते जिइंदिए ।
एयजोगसमाउत्ते, सुक्कलेसं तु परिणमे ॥ ३२ ॥

अनयोरर्थः-एतद्योगसमायुक्तः प्राणी शुक्ललेश्यां परिणमेत् । एतादृशः कीदृशः ? य आर्त्तध्यानरौद्रध्याने वर्जयित्वा धर्मशुक्लौ - धर्मध्यानशुक्लध्याने ध्यायेत् । पुनर्यः प्रशान्त-चित्तो दान्तात्मा च भवेत् । पुनः समितः पञ्चसमितियुक्तस्तिसृषु गुप्तिषु गुप्तो भवेत् ॥ ३१ ॥ स पुनः सरागोऽक्षीणानुपशान्तकषायो, वीतरागस्ततोऽन्यः (क्षीणोपशान्तकषाय), उपशान्तो जितेन्द्रियः, एतैर्लक्षणैर्लक्षितः शुक्ललेश्यां भजते इत्यर्थः ॥ ३२ ॥

इह हि प्रशस्तलेश्यानां तेजःपद्मशुक्लानां विशेषणे पुनरुक्तिदूषणं न ज्ञेयम् । तासां लेश्यानां हि तेजःपद्मशुक्ला-नामुत्तरोत्तरविशुद्ध्या शुभा, शुभतराः शुभतमाः परिणामा भावनीयाः । लेश्यानां लक्षणेषु दृष्टान्तो जम्बूवृक्षं निरीक्ष्य षट्पुरुषाणां परिणामविचारणेन भावनीयः । तथाहि-

एकस्मिन् मार्गे षट्पुरुषाश्चेलुः, तैश्च क्षुधातुरैर्मार्गे चैकः फलितो जम्बूवृक्षो दृष्टः। तदैकेन कृष्णलेश्यावता प्रोक्तमेनं वृक्षं मूलाच्छित्त्वैनं प्रपात्यास्य फलान्यद्याः १। तदा द्वितीयेन नीललेश्यावता चोक्तं किमर्थं मूलाच्छिद्यते ? एका महत्तमा शाखा छेदनीया, तस्याः फलान्यद्यस्तृप्तिं च कुर्मः २। तत् श्रुत्वा तृतीयः कापोतलेश्यावान् प्राह—किमर्थं भो अस्य वृक्षस्य महाशाखा छिद्यते ? एकायाः प्रतिशाखाया अपि फलैः सर्वेषां तृप्तिः स्यात्, तस्मादेका लघ्वी प्रतिशाखैव छेदनीया ३। ततश्चतुर्थस्तेजोलेश्यावानवादीत्-किमर्थं प्रति-शाखायाच्छेदः ? बहवो गुच्छाः सन्ति, तेन गुच्छा एव ग्राह्याः, तैरेव तृप्तिर्भविष्यति ४। ततः पञ्चमेन पद्मलेश्यावता चैवमुचे-किमर्थं भो गुच्छाः पात्यन्ते ? गुच्छेषु तु कच्चान्यपि फलानि भवन्ति, तस्मात्पक्वान्येव फलानि गृहीत्वा गृहीत्वाऽद्याः ५। ततः षष्ठः शुक्ललेश्या—वान् पुमानाह-किमर्थं भो वृक्षात्फलानि पात्यन्ते ? बहून्येवाध एव पतितानि सन्ति तैरेव क्षुधाया उपशमो भावीति। एवं लेश्योदाहरणं ज्ञेयम् ॥ ३२ ॥

अथ लेश्यानां स्थानान्याह-

असंखिज्जाणोसप्पिणीण, उसप्पिणीण जे समया।
संखाईया लोगा, लेसाण हवंति ठाणाइं ॥ ३३ ॥

लेश्यानां सर्वासां तावन्ति स्थानानि भवन्ति, स्थानानि प्रकर्षाप्रकर्षकृतानि, अशुभानां लेश्यानां सङ्क्लेशरूपाणि, शुभानां लेश्यानां विशुद्धरूपाणि भाजनानीत्यर्थः। लेश्यानां कियन्ति स्थानानि भवन्ति ? यथाऽसङ्ख्येया उत्सर्पिण्यो वर्धमान-वर्धमानभावरूपाः, तथा पुनरसङ्ख्येया अवसर्पिण्यो हीयमानभावरूपाः, तासामुत्सर्पिण्यवसर्पिणीनां यावन्तः समया भवन्ति, पुनर्यावन्तोऽसङ्ख्येया लोकाकाशप्रदेशा भवन्ति तावन्ति लेश्यानां स्थाना-न्यारुहन्त्यारुहन्ति, पतन्ति पतन्ति च। शुभान्यशुभानि निर्मलानि कलुषाणि च स्थानानि भवन्तीत्यर्थः ॥ ३३ ॥

अथ लेश्यानां स्थितिमाह-

मुहुत्तद्धं तु जहन्ना, तित्तीसं सागरा मुहुत्तहिया।
उक्कोसा होइ ठिई, नायव्वा किण्हलेसाए ॥ ३४ ॥

कृष्णलेश्याया इति स्थितिर्ज्ञातव्या-जघन्या मुहूर्त्तार्धं, कैश्चिदंशैर्न्यूनं घटिकाद्वयमन्त-र्मुहूर्तमेव कृष्णलेश्यायाः स्थितिर्भवति। तथोत्कृष्टा स्थितिस्त्रयस्त्रिंशत्सागरोपमाणि मुहर्ता-धिकानि। अथ सम्प्रदायान्मुहूर्तार्धशब्देनान्तर्मुहूर्त गृह्यते। अतः कारणात् त्रयस्त्रिंशत्सागरोप-माण्यन्तर्मुहूर्ताधिकानि परमा स्थितिः कृष्णलेश्याया भवति ॥ ३४ ॥

मुहुत्तद्धं तु जहन्ना, दसउदहिपलियमसंखभागमज्झहिया।
उक्कोसा होइ ठिई, नायव्वा नीललेसाए ॥ ३५ ॥

नीललेश्याया जघन्या स्तोककालं चेत्स्थितिर्भवति तदान्तर्मुहूर्तमेव, उत्कृष्टा स्थितिश्च दशसागरोपमाणि पल्योपमासङ्ख्येयभागाधिकानि, इह पूर्वोत्तरभवान्तर्मुहूर्तद्वयप्रक्षेपेऽपि पल्योपमासङ्ख्येयभाग एव, यतोऽसङ्ख्येयभागानामसङ्ख्येयभेदत्वादिति भावः, एवमुत्तरत्रापि भावनीयम् । नीलायाः स्थितिर्भवतीति जघन्योत्कृष्टा च स्थितिर्ज्ञातव्या । इयं स्थितिश्च पञ्चमपृथिव्या धूमप्रभाया उपरितनप्रस्तटमाश्रित्योक्ता ॥ ३५ ॥

मुहुत्तद्धं तु जहन्ना, तिन्नुदहिपलियमसंखभागमब्भहिया ।
उक्कोसा होइ ठिई, नायव्वा काउलेसाए ॥ ३६ ॥

कापोतलेश्याया इयं स्थितिर्ज्ञातव्या, जघन्या स्थितिस्तु कापोतलेश्याया अन्तर्मुहूर्तं भवति, तथा पुनः कापोतलेश्यायास्त्रीणि सागरोपमाणि पल्योपमासङ्ख्येयभागाधिकान्युत्कृष्टा स्थितिर्भवतीति ज्ञातव्या । इयं स्थितिस्तु तृतीयनरकपृथिव्या वालुकाया अपेक्षयोक्तास्ति ॥ ३६॥

मुहुत्तद्धं तु जहन्ना, दोउदहिपलियमसंखभागमब्भहिया ।
उक्कोसा होइ ठिई, नायव्वा तेउलेसाए ॥ ३७ ॥

तेजोलेश्यायाश्चेयं स्थितिर्ज्ञातव्या, जघन्या त्वन्तर्मुहूर्तम्, उत्कृष्टा च तेजोलेश्याया द्वावुदधी-द्वे सागरोपमे पल्योपमासङ्ख्येयभागाधिके परमा स्थितिर्ज्ञातव्या । इयं त्वीशान-देवलोकापेक्षया प्रोक्तास्ति ॥ ३७ ॥

मुहुत्तद्धं तु जहन्ना, दस उदही होंति मुहुत्तमब्भहिया ।
उक्कोसा होइ ठिई, नायव्वा पम्हलेसाए ॥ ३८ ॥

पद्मलेश्याया इयं स्थितिर्ज्ञातव्या । जघन्या त्वन्तर्मुहूर्तमेव स्थितिर्भवति, उत्कृष्टा तु दशसागरोपमाण्यन्तर्मुहूर्ताधिकानि परमा स्थितिरेतावती पद्मलेश्याया भवति । इयं ब्रह्मदेवलोकापेक्षयोक्तास्ति ॥ ३८ ॥

मुहुत्तद्धं तु जहन्ना, तित्तीसं सागरा मुहुत्तहिया ।
उक्कोसा होइ ठिई, नायव्वा सुक्कलेसाए ॥ ३९ ॥

शुक्ललेश्याया इयं स्थितिर्ज्ञातव्या-जघन्या स्थितिरन्तर्मुहूर्तम्, शुक्ललेश्यायास्त्रय-स्त्रिंशत्सागरोपमाणि मुहूर्ताधिकान्युत्कृष्टा स्थितिर्भवति ॥ ३९ ॥

एसा खलु लेसाणं, ओहेणं ठिई उ वन्निया होइ ।
चउसुवि गईसु एत्तो, लेसाण ठिई उ वोच्छामि ॥ ४० ॥

एषा लेश्यानां षण्णामप्योघेन-सामान्यप्रकारेण गतिविवक्षां विना स्थितिर्वर्णिता भवति । इतश्चतसृषु गतिषु लेश्यानां सर्वासां स्थितिं वक्ष्यामि ॥ ४० ॥

दसवाससहस्साइं - काऊए ठिई जहण्णिया होइ ।
तिण्णुदही पलिओवम - मसंखभागं च उक्कोसा ॥ ४१ ॥

कापोतायाः-कापोतलेश्याया दशवर्षसहस्राणि जघन्यिका स्थितिर्भवति । प्रथमायां पृथिव्यां रत्नप्रभायां प्रथमप्रस्तटेऽस्ति, तत्रस्थानां हि जघन्यतो दशवर्षसहस्रायुष्कत्वात् । उत्कृष्टा स्थितिस्तु कापोतलेश्यास्त्रीणि सागरोपमाणि पल्योपमासङ्ख्येयभागयुक्तानि । इयं तु स्थितिस्तृतीयपृथिव्या वालुकाप्रभाया उपरितनप्रस्तटनारकाणामेतावती स्थितिरस्तीति ॥४१॥

तिन्नुदही पलिओवम - असंखभागं जहन्नेण नीलठिई ।
दसउदही पलिओवम - मसंखभागं च उक्कोसा ॥ ४२ ॥

नीलाया जघन्या स्थितिस्त्रीणि सागरोपमाणि पल्योपमासङ्ख्येयभागयुक्तानि । इयती जघन्या स्थितिस्तृतीयाया वालुकाप्रभायाः पृथिव्या अपेक्षया ज्ञेया । पुनर्नीललेश्यायाश्च दशसागरोपमाणि पल्योपमासङ्ख्येयभागयुक्तान्युत्कृष्टा स्थितिर्ज्ञेया । इयमपि पञ्चम्या धूमप्रभाया पृथिव्या उपरितनप्रस्तटापेक्षया ज्ञेया ॥ ४२ ॥

दसउदही पलिओवम - संखभागं जहन्निया होइ ।
तेत्तीससागराइं - उक्कोसा होइ किण्हाए ॥ ४३ ॥

कृष्णायाः कृष्णलेश्याया दशसागरोपमाणि पल्योपमासङ्ख्येयभागयुक्तानि जघन्यिका स्थितिर्भवति । इयं तु पञ्चम्या धूमप्रभाया नरकपृथिव्या अपेक्षया ज्ञेया । कृष्णायाः पुनरुत्कृष्टा स्थितिस्त्रयस्त्रिंशत्सागरोपमाणि । इयमप्युत्कृष्टा स्थितिः कृष्ण-लेश्यायाः सप्तम्यास्तमस्तमःप्रभाया नरकपृथिव्या अपेक्षया ज्ञेया ॥ ४३ ॥

एसा नेरईयाणं लेसाण, ठिई उ वण्णिया होइ ।
तेण परं वुच्छामि, तिरियमणुयाण देवाणं ॥ ४४ ॥

एषा नैरयिकाणां - नरकवासिनां जीवानां लेश्यानां जघन्योत्कृष्टभेदेन स्थितिर्वर्णिता भवति । 'तेण परं' इति ततः परं तिर्यग्मनुष्याणां - तिरश्चां तथा मनुष्याणां देवानां च स्थितिं वक्ष्यामि ॥ ४४ ॥

[१]अंतोमुहुत्तमद्धा लेसाण, ठिई जहिं जहिं जाओ ।
तिरियाण नराणं च, वज्जिता केवलं लेसं ॥ ४५ ॥

यस्मिन् यस्मिन् पृथ्वीकायादौ तिरश्चां यस्मिन् यस्मिन् स्थाने संमूर्च्छिमनराणां च यास्तु कृष्णाद्या लेश्या वर्तते, तासां लेश्यानां जघन्योत्कृष्टा च स्थितिरन्तर्मुहूर्ताद्धा ज्ञेया ।

१ अंतोमुहुत्तमद्धं-अन्यसंस्करणे ॥

अन्तर्मुहूर्तमद्धा कालो यस्या सान्तर्मुहूर्ताद्धा । जघन्याप्यन्तर्मुहूर्तकालं स्थितिः । उत्कृष्टाप्यन्तर्मुहूर्तकालमेव स्थितिरस्ति । किं कृत्वा ? केवलां शुक्लां लेश्यां वर्जयित्वा । तत्र शुक्ललेश्याया अभावो वर्तते, अन्याः कृष्णाद्याः क्वचित्क्वचित्काचित्काचिल्लेश्या सम्भवतीति भावः । तत्र पृथिव्यप्वनस्पतीनां कृष्णादिलेश्याचतुष्टयं, तेजोवायुविकलसंमूर्छिमतिर्यग्मनुष्यनारकाणां प्रथमलेश्यात्रयं भवतीत्यर्थः ॥ ४५ ॥

मुहुत्तद्धं तु जहन्ना, उक्कोसा होइ पुव्वकोडीओ ।
नवहिं वरिसेहिं ऊणा, नायव्वा सुक्कलेसाए ॥ ४६ ॥

शुक्ललेश्याया जघन्या स्थितिर्मुहूर्ताद्धेत्यन्तर्मुहूर्तकालं स्थितिर्ज्ञातव्या । तथा पुनः शुक्ललेश्याया उत्कृष्टा स्थितिस्तु पूर्वकोटी नववर्षैर्न्युना ज्ञातव्या । इह यद्यपि कश्चिदष्टवार्षिकोऽपि पूर्वकोट्यायुर्व्रतपरिणाममाप्नोति, तथापि नैतावद्वयःस्थस्य नववर्षपर्यायादर्वाक् शुक्ललेश्या सम्भवति, अतो नववर्षोना पूर्वकोटिरुक्ता ॥ ४६ ॥

एसा तिरियनराणं, लेसाण ठिई उ वन्निया होइ ।
तेण परं वुच्छामि, लेसाण ठिई उ देवाणं ॥ ४७ ॥

एषा स्थितिस्तिरश्चां नराणां च वर्णिता भवति । 'तेणेति' पञ्चमीस्थाने प्राकृतत्वात्तृतीया, ततः परं देवानां लेश्यानां स्थितिं वक्ष्यामि ॥ ४७ ॥

दसवाससहस्साइं, किण्हाइ ठिई जहन्निया होइ ।
पलियमसंखिज्जइमो, उक्कोसा होइ किण्हाए ॥ ४८ ॥

कृष्णायाः-कृष्णलेश्याया द्वादशवर्षसहस्राणि जघन्यिका स्थितिर्भवति । पुनः कृष्णलेश्यायाः पल्योपमासङ्ख्येयतमो भाग उत्कृष्टा स्थितिर्भवति । इयं च द्विविधा स्थितिर्भवनपतिव्यन्तराणामेतावदायुषामपेक्षयोक्तास्ति ॥ ४८ ॥

जा किण्हाए ठिई खलु, उक्कोसा सा उ समयमब्भहिया ।
जहन्नेण नीलाए, पलियमसंखं च उक्कोसा ॥ ४९ ॥

या कृष्णायाः-कृष्णलेश्यायाः खलु इति निश्चयेनोत्कृष्टा स्थितिरुक्ता, सैव स्थितिः समयाभ्यधिका समयेनैकेनाभ्यधिका समयाभ्यधिका जघन्येन नीललेश्यायाः स्थितिर्ज्ञेया । च पुनर्नीलायाः पल्योपमासङ्ख्येयभाग उत्कृष्टा स्थितिर्भवति । परमयमेव विशेषः—अयं यः पल्योपमासङ्ख्येयो भागो वर्तते, स बृहत्तरो भागो ज्ञेयः ॥ ४९ ॥

जा नीलाए ठिई खलु, उक्कोसा सा उ समयमब्भहिया ।
जहन्नेणं काऊए, पलियमसंखं च उक्कोसा ॥ ५० ॥

खलु निश्चयेन या नीलाया उत्कृष्टा स्थितिरुक्ता, सा पुनः समयाभ्यधिका जघन्येन कापोतायाः कापोतलेश्यायाः स्थितिर्ज्ञेया । च पुनः कापोतलेश्यायाः पल्योपमासङ्ख्येयो भाग उत्कृष्टा स्थितिर्भवति । परमयमपि पल्योपमासङ्ख्येयो भागो बृहत्तमो ज्ञेयः । इत्यनेन भवनपतिव्यन्तराणामेव तावदायुषां लेश्यात्रयं दर्शितम् ॥ ५० ॥

इत्थं निकायत्रयस्याद्यलेश्यात्रयमुक्त्वा चतुर्निकायस्य भाविनीं तेजोलेश्यास्थितिमाह-

तेण परं वुच्छामि, तेउलेसा जहा सुरगणाणं ।
भुवणवइवाणमंतर - जोइसवेमाणियाणं च ॥ ५१ ॥

ततः परं 'भुवणवइवाणमंतरजोइसवेमाणियाणं' इति भुवनपतिव्यन्तरज्योतिष्कवैमानिकानां सुरगणानां यथा-येन प्रकारेण तेजोलेश्या जघन्योत्कृष्टस्थिति र्भवति, तथाऽहं वक्ष्यामि ॥ ५१ ॥

पलिओवमं जहन्ना, उक्कोसा सागरा उ दोन्निहिया ।
पलियमसंखिज्जेणं, होइ भागेण तेऊए ॥ ५२ ॥

तेजोलेश्याया जघन्या स्थितिः पल्योपमं भवति, उत्कृष्टा स्थितिस्तु द्वे सागरोपमे अधिके पल्योपमासङ्ख्येयेन भागेन भवति । इयं परमा स्थितिस्तेजोलेश्याया भवति । इयं च सामान्योपक्रमेऽपि वैमानिकनिकायविषयतया ज्ञेया । तत्र सौधर्मेशानदेवानां जघन्योत्कृष्टाभ्यामेतावदायुर्वर्तते । उपलक्षणाच्छेषनिकायानामपि तेजोलेश्यायाः स्थितिर्ज्ञेया ॥५२॥

दसवाससहस्साइं, तेऊए ठिई उ जहण्णिया होइ ।
दोन्नुदही पलिओवम - असंखभागं च उक्कोसा ॥ ५३ ॥

तेजोलेश्यायाः स्थितिर्दशवर्षसहस्राणि जघन्या भवति । तथा पुनर्द्वे सागरोपमे पल्योपमासङ्ख्येयभागयुक्ते उत्कृष्टा स्थितिस्तेजोलेश्याया भवति । तत्र व्यन्तरभवनपतिदेवानाश्रित्य तेजोलेश्यायाः स्थितिर्दशवर्षसहस्राण्युक्ता, पुनर्द्वे सागरोपमे पल्योपमासङ्ख्येयभागयुक्ते, इयं तु द्वितीयदेवलोकापेक्षया तेजोलेश्याया उत्कृष्टा स्थितिरुक्तेति तात्पर्यम् ॥५३॥

जा तेऊए ठिई खलु, उक्कोसा सा उ समयमब्भहिया ।
जहन्नेणं पम्हाए, दसमुहुत्ताहिया इं उक्कोसा ॥ ५४ ॥

या तेजोलेश्यायाः खलु निश्चयेनोत्कृष्टा स्थितिर्वर्तते, सा तु सैव स्थितिः समयाभ्यधिका पद्मलेश्यायाः स्थितिर्ज्ञेया । इयं तु पद्मलेश्याया जघन्या स्थितिस्तृतीयसनत्कुमारदेवलोकापेक्षया भवति । उत्कृष्टा तु पद्मलेश्याया दशसागरोपमाण्यन्तर्मुहूर्ताधिकानि स्थितिर्भवति । इयं च पद्मलेश्यायाः स्थितिः पञ्चमब्रह्मदेवलोकापेक्षया ज्ञेया ॥ ५४ ॥

जा पम्हाए ठिई खलु, उक्कोसा सा उ समयमब्भहिया ।
जहन्नेणं सुक्काए, तेत्तीसमुहुत्तमब्भहिया ॥ ५५ ॥

या पद्मलेश्यायाः खलु निश्चयेनोत्कृष्टा स्थितिर्वर्तते, सैव स्थितिरेकसमयाभ्यधिका जघन्येन शुक्लायाः स्थितिर्भवति । इयं शुक्ललेश्यायाः स्थितिः षष्ठस्य लान्तकदेवलोकस्यापेक्षयोक्ता । अथ पुनः शुक्ललेश्याया उत्कृष्टा स्थितिस्त्रयस्त्रिंशत्सागरोपमाण्यन्तर्मुहूर्ताभ्यधिकानि भवति । इयं स्थितिस्तु पञ्चानुत्तरविमानापेक्षया ज्ञेया ॥ ५५ ॥

अथ लेश्यानां गतिद्वारमाह-

किण्हा नीला काऊ, तिण्णिवि एया उ अहम्मलेसाओ ।
एयाहिं तिहिं जीवो, दुग्गइं उववज्जई ॥ ५६ ॥

कृष्णा नीला कापोती, एतास्तिस्रोऽपि लेश्या अधमा ज्ञेयाः । एताभिस्तिसृभिर्जीवो दुर्गतिमुपपद्यते ॥ ५६ ॥

तेउ पम्हा सुक्का, तिण्णिवि एयाओ धम्मलेसाओ ।
एयाहिं तिहिं जीवो, सुग्गइं उववज्जई ॥ ५७ ॥

तेजसाद्यास्तेजःपद्मशुक्ला एतास्तिस्रोऽपि लेश्या धर्माधर्मनिबन्धिन्यो ज्ञेयाः । एताभिस्तिसृभिर्लेश्याभिर्जीवः सद्गतिमुपपद्यते ॥ ५७ ॥

लेसाहिं सव्वाहिं पढमे, समयंमि परिणयाहिं तु ।
न हु कस्सवि उववाओ, परे भवे अत्थि जीवस्स ॥ ५८ ॥

लेसाहिं सव्वाहिं चरमे, समयंमि परिणयाहिं तु ।
न हु कस्सवि उववाओ, परे भवे अत्थि जीवस्स ॥ ५९ ॥
॥ युग्मम् ॥

सर्वाभिर्लेश्याभिः कृष्णनीलकापोततेजःपद्मशुक्लाभिः षड्भिः प्रथमे समये तत्प्रतिपत्तिकालापेक्षया परिणताभिरात्मरूपत्वं प्राप्ताभिः सतीभिः परभवे कस्यापि जीवस्योपपातो नास्ति, न भवतीत्यर्थः । उपपत्तिर्न भवतीत्यनेन प्रथमसमये लेश्यासूत्पन्नासु परभवे जीवेनोत्पद्यते । सर्वाभिर्लेश्याभिश्चरमसमयेऽन्त्यसमये परिणताभिरात्मरूपतामापन्नाभिः सतीभिः परभवे कस्यापि जीवस्योपपातो नास्तीति ॥ ५८ ॥ ५९ ॥

तर्हि कदोत्पद्यते ? इत्याह-

अंतोमुहुत्तंमि गए, अंतमुहुत्तंमि सेसए चेव ।
लेसाहिं परिणयाहिं, जीवा गच्छंति परलोयं ॥ ६० ॥

लेश्याभिः परिणताभिः सतीभिः शुभाशुभाभिः षड्भिः सतीभिरन्तर्मुहूर्त्ते गते सत्यन्तर्मुहूर्त्ते च शेषे सति जीवाः परलोकं-परभवं गच्छन्तीत्यनेन जीवस्य मरणकाले आगामिभवलेश्यान्तर्मुहूर्त्तं यावदवश्यं भवति । तथा पुनर्जीवस्योत्पत्तिकालेऽतीतभव-लेश्यान्तर्मुहूर्त्तं यावदवश्यं भवति । अन्यथा नराणां तिरश्चां च देवत्वे नारकत्वे चोत्पत्स्यमा-नानां मृत्युकालेऽन्तर्मुहूर्तमुत्तरभवलेश्याः कथं सम्भवन्ति ? तथा देवानां नारकाणां च च्यवनानन्तरं नरतिर्यक्षूत्पन्नानां प्राग्भवलेश्या अन्तर्मुहूर्तं कथं सम्भवन्ति ? तस्मादन्तर्मुहूर्ता-वशेष-आयुषि परभवलेश्यापरिणामो भवत्येव । यदुक्तमागमे-

"[1]तिरिनरआगामियभव-लेसाए अइगए सुरा निरया ।
पुव्वभवलेससेसे, अंतमुहुत्ते मरणमिति ॥ १ ॥

अत एव देवानां नारकाणां लेश्यायाः प्रागुत्तरभवान्तर्मुहूर्तद्वयसहितनिजायुःकालं यावत्स्थितिमत्त्वमुक्तम् ॥ ६० ॥

सम्प्रत्यध्ययनार्थमुपसञ्जिहीर्षुराह-

तम्हा एयासिं लेसाणं, अणुभागे वियाणिया ।
अप्पसत्था उ वज्जित्ता, पसत्थाओ अहिट्ठिए मुणि ॥ ६१ ॥ त्तिबेमि ॥

मुनिस्तस्मात्कारणादप्रशस्ता लेश्या दुर्गतिकारणं, प्रशस्तलेश्याः सद्गतिहेतुः, सर्वासां प्रशस्ताप्रशस्तानां लेश्यानामनुभागान् रसान् विज्ञाय, अप्रशस्ता लेश्याः कृष्णनील-कापोताख्यास्तिस्रो वर्जयित्वा, प्रशस्तास्तेजःपद्मशुक्लाख्यास्तिस्रो लेश्या अधितिष्ठेत्, भावप्रतिपत्त्याश्रयेदिति सुधर्मास्वामी जम्बूस्वामिनं प्राह— हे जम्बू ! अहं श्रीवीरवाक्यादिति ब्रवीमि ॥ ६१ ॥

इति लेश्याध्ययनं सम्पूर्णम् ॥ ३४ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविर-चितायां लेश्याख्यं चतुस्त्रिंशमध्ययनमर्थतः सम्पूर्णम् ॥ ३४ ॥

---

१ तिर्यक्नरा आगामिकभवलेश्यया अतिगते सुरा नारकाश्च ।
पूर्वभवलेश्याशेषे अन्तर्मुहूर्त्ते मरणमेन्ति ॥ १ ॥

॥ ३५ अनगारमार्गगत्याख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययनेऽप्रशस्तलेश्यास्त्याज्याः, प्रशस्ता लेश्याश्च ग्राह्या इत्युक्तम्, अग्रेतनेऽध्ययने च भिक्षूणां गुणा उच्यन्ते । प्रशस्ता लेश्या हि गुणवतां भिक्षूणामेव सम्भवन्तीति पूर्वापरयोः सम्बन्धः ।

सुणेह मे एगग्गमणे, मग्गं बुद्धेहिं देसियं ।
जमायरंतो भिक्खू, दुक्खाणंतकरो भवे ॥ १ ॥

हे शिष्याः ! मम कथयतो यूयमेकाग्रमनसः सन्तस्तं मार्गं गुणवत्साधुमार्गं श्रृणुत । तमिति कं ? यं मार्गं समाचरन् भिक्षुर्दुःखानामन्तं करोति । कीदृशं तं मार्गं ? बुधैस्तीर्थङ्करैर्देशितं, विस्तरत्वेन प्रकाशितम् ॥ १ ॥

गिहवासं परिच्चज्ज, पव्वज्जामस्सिओ मुणी ।
इमे संगे वियाणिज्जा, जेहिं सज्जंति माणवा ॥ २ ॥

गृहवासं परित्यज्य प्रव्रज्यामाश्रितो मुनिरिमान् वक्ष्यमाणांस्तान् सङ्गान् पुत्रकलत्रादीन् संसारहेतून् विजानीयात् । तान् कान् सङ्गान् ? यैः सङ्गैर्बन्धनैः कृत्वा मानवाः सज्यन्ते, कर्मबन्धनैः कृत्वा संसारिणो बध्यन्ते इत्यर्थः ॥ २ ॥

तहेव हिंसं अलियं, चोज्जं अबंभसेवणं ।
इच्छाकामं च लोहं च, संजओ परिवज्जए ॥ ३ ॥

ते के सङ्गा मुनिना त्याज्याः ? इत्याह—संयत एतान् सङ्गान् परिवर्जयेत् । प्रथमं हिंसां, तथैवशब्दः पादपूरणे, पुनरलीकं मृषाभाषणं, चौर्यं तथाऽब्रह्मसेवनं-मैथुनसेवनम्, इच्छा वाञ्छारूपः, कामं भोगसुखं, लोभं परिग्रहरूपं परिवर्जयेत्समन्तात्त्यजेत् ॥ ३ ॥

मणोहरं चित्तघरं, मल्लधूवेण वासियं ।
सकवाडं पंडुरुल्लोयं, मणसावि न पत्थए ॥ ४ ॥

पुनर्मनोहरं चित्रगृहं - विचित्रमन्दिरं, चित्रैः सहितं गृहं वा चित्रगृहम्, कथंभूतं गृहं ? मल्लधूपनवासितम्, माल्यानि च धूपनानिच माल्यधूपनानि, तैर्वासितं माल्यधूपनवासितम्, तत्र माल्यानि ग्रथितपुष्पाणि, धूपनानि दशाङ्गादीनि, तैः सुगन्धीकृतमित्यर्थः । पुनः कीदृशं चित्रमन्दिरं ? सकपाटं कपाटसहितम्, पुनः कीदृशं ? पाण्डुरोल्लोचमुज्ज्वलचन्द्रोपकम्, साधुरेतादृशं गृहं मनसापि न प्रार्थयेत् । अपि शब्दाद्वचसा न प्रार्थयेत् ॥ ४ ॥

तादृशे गृहे तिष्ठतः साधोः को दोषः ? तमाह-

इंदियाणि उ भिक्खुस्स, तारिसंमि उवस्सए ।
दुक्कराइं निवारेउं, कामरागविवड्ढणे ॥ ५ ॥

तादृशे मनोहरे चित्रमाल्यधूपादिसहिते उपाश्रये भिक्षोः-साधोरिन्द्रियाणि तु निवारयितुं, विषयेभ्यो व्यावर्तयितुं दुष्कराणि-दुःशक्यानि । पुनः कीदृशे मन्दिरे ? कामरागविवर्धने, कामा इष्टेन्द्रियविषयाः, तेषु रागः-स्नेहस्तं विवर्धयतीति कामरागविवर्धनं, तस्मिन् ॥ ५ ॥

तदा कुत्र स्थातव्यमित्याह-

सुसाणे सुन्नगारेवा, रुक्खमूले व एगओ ।
पयरिक्के परकडे वा, वासं तत्थाऽभिरोयए ॥ ६ ॥

एकक-एकाकी द्रव्यतो भावतश्च, द्रव्यतः सहायरहितः, भावतो रागादिरहितः, परिवारयुतोऽपि मनसैकत्वं चिन्तयन् साधुस्तत्र-तेषु स्थानेषु वासं-निवासं रोचयेत् आत्मने रोचयेत् । केषु केषु स्थानेष्वित्याह-स्मशाने, पुनः शून्यागारे, वाशब्दश्चार्थे, तथा पुनर्वृक्षमूले, पुनर्वान्यत्र गृहादौ । 'पइरिक्के' इति देशी भाषयैकान्ते स्त्रीपशुपण्डकादिरहिते । पुनः कीदृशे स्थाने ? परकृते, परैरात्मार्थं कृते ॥ ६ ॥

फासुयंमि अणाबाहे, इत्थीहिं अणभिद्दुए ।
तत्थ संकप्पए वासं, भिक्खू परमसंजए ॥ ७ ॥

भिक्षुर्भिक्षावृत्तिः परमसंयतः-सप्तदशविधसंयमवान् साधुस्तत्र पूर्वोक्तस्थाने स्मशानादौ वासं सङ्कल्पयेत्कुर्यात् । कथंभूते स्थाने ? प्रासुके-जीवरहिते, अनाबाधे स्वाध्यायान्तरायकारणरहिते, पुनः स्त्रीभिरनभिद्रुतेऽकृतोपद्रवे, स्त्र्यादिसमीपवासरहिते इत्यर्थः ॥ ७ ॥

न सयं गिहाइं कुव्विज्जा, नेव अन्नेहिं कारए ।
गिहकम्मसमारंभे, भूयाणं दिस्सए वहो ॥ ८ ॥

साधुः स्वयं गृहाणि न कुर्यात्, न च साधुरन्यैरन्यजनैः कारयेत् । साधुः गृहं न कुर्यान्न च कारयेत् । तत्र को हेतुस्तमाह-यतो गृहकर्मसमारम्भे गृहकर्म इष्टिकामृत्तिकाखननजलाद्यानयनकाष्ठादिनिमित्तवृक्षादिच्छेदनादिकर्म गृहकर्म, तस्य समारम्भो गृहकर्मसमारम्भः, तत्र भूतानां-प्राणिनां वधो दृश्यते ॥ ८ ॥

तसाणं थावराणं च, सुहुमाणं बायराण य ।
तम्हा गिहसमारंभे, संजओ परिवज्जए ॥ ९ ॥

केषां प्राणिनां वधो दृश्यते ? गृहकर्मसमारम्भे त्रसाणां - द्विन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियाणां, तथा स्थावराणां - पृथिव्यप्तेजोवायुवनस्पतीनां, सूक्ष्माणां लघुतरशरीराणाम्, अथवा सूक्ष्माणां चर्मचक्षुरगोचराणां, बादराणां स्थूलशरीराणां वधो दृश्यते । तस्मादारम्भस्य प्राणिवधहेतुत्वात्संयतः साधुरारम्भं परिवर्जयेत् ॥ ९ ॥

अथाहारविधिमाह-

तहेव भत्तपाणेसु, पयणे पयावणेसु य ।
पाणभूयदयट्ठाए, न पए न पयावए ॥ १० ॥

तथैव साधुर्भक्तपानेष्वन्नपानीयेषु पचने पाचने च त्रसानां स्थावराणां च वधत्वेन प्राणभूतदयार्थं - त्रसस्थावराणां दयार्थं स्वयमन्नपानीयं न पचेत् तथा साधुर्नान्नपानीयमन्येन पाचयेत् ॥ १० ॥

अन्नपानीयपचनपाचने जीवहिंसा दर्शयति-

जलधन्ननिस्सिया जीवा, पुहवीकट्ठनिस्सिया ।
हम्मंति भत्तपाणेसु, तम्हा भिक्खु न पयावए ॥ ११ ॥

भक्तपानेषु पच्यमानेषु तथा पाच्यमानेषु सत्सु जलधान्यनिश्रितास्तत्रस्था जीवास्तथा पृथ्वीकाष्टनिश्रिता जीवा हन्यन्ते । जलं च धान्यं च जलधान्यं, तत्र निश्रितास्तत्रोत्पन्नास्तत्रगताः, जलरूपा एकेन्द्रिया जीवाः, तथा तत्रभवाः पूतरकादयो जीवाः, ते पचनकाले ततोऽन्यत्र निश्रिता वा हन्यन्ते, यतो हि ये जीवा यत्र तिष्ठन्ति, यत्रोत्पद्यन्ते तत्र स्थिता एव ते सुखिनो भवन्ति । तदाश्रयनाशे तेषामपि नाशो भवति । एवं पृथ्वी च काष्टं च पृथ्वीकाष्टे, तत्र निश्रिताः पृथ्वीकाष्टनिश्रिता घूणाद्या हन्यन्ते । भक्तपानपाके हि पृथ्वीकायवनस्पतिकाययोर्विराधना स्यादेव, तस्मात् त्रसस्थावरविनाशहेतुत्वाद् भिक्षुर्न पचेन्न पाचयेदिति भावः ॥ ११ ॥

अथाग्नेरारम्भो हिंसाकारणमाह-

विसप्पे सव्वओ धारे, बहुपाणविणासणे ।
नत्थि जोइसमे सत्थे, तम्हा जोइं न दीवए ॥ १२ ॥

साधुस्तस्मात्कारणाज्ज्योतिर्न दीपयेत्, अग्निं न प्रज्ज्वालयेत्, किं कारणं ? तदाह-ज्योतिःसममग्नितुल्यं बहुप्राणिविनाशनमन्यच्छस्त्रं नास्ति, अग्निः सर्वान् प्राणिनो विनाशयति । कथंभूतं ज्योतिःशस्त्रं ? विसर्पद्विशेषेण सर्पतीति स्फुरतीति विसर्पत्, प्रसरणशीलम् । पुनः कीदृशं ज्योतिःशस्त्रं ? सर्वतो धारं, सर्वतश्चतुर्दिक्षु धारा शक्तिर्यस्य तत्सर्वतोधारं, सर्वदिशास्थितजीवविनाशहेतुकमित्यर्थः । प्राकृतत्वादत्र लिङ्गव्यत्ययः । पचनपाचनं त्वग्निप्रज्वालनं विना न स्यात्, अग्निप्रज्वालननिषेधेन पचनपाचनयोर्निषेधः । पुनरग्निप्रज्वालननिषेधेन च शीतकालादावप्यग्निसमारम्भो निषिद्धः । यदा पचनपाचनाग्निप्रज्वालनादिनिषेधो भवति, तदा क्रयविक्रयाभ्यां निर्वाहः क्रियते, अतः साधूनां तन्निषेधोऽप्युच्यते ॥ १२ ॥

हिरण्णं जायरूवं च, मणसावि न पत्थए ।
समलेट्ठुकंचणे भिक्खू, विरए कयविक्कए ॥ १३ ॥

किणंतो कइओ होइ, विक्किणंतो य वाणिओ ।
कयविक्कयंमि वट्टंतो, भिक्खू हवइ न तारिसो ॥ १४ ॥ युग्मम् ॥

अनयोर्व्याख्या—भिक्षुः-साधुर्हिरण्यं हेम, जातरूपं रूप्यं, चशब्दाद्धनधान्यादि मनसापि न प्रार्थयेत् । यदि मनसापि न प्राथयेत्तदा कथं गृह्णीयात् ? कीदृशो भिक्षुः ? समलेष्टुकाञ्चनः, लेष्टु च काञ्चनं च लेष्टुकाञ्चने, समे लेष्टुकाञ्चने यस्य स समलेष्टुकाञ्चनः, तुल्यकाञ्चनपाषाणः । पुनः कीदृशः ? क्रयविक्रयाद्विरतः, क्रयश्च विक्रयश्च क्रयविक्रयम्, तस्माद्विरतो रहितः ॥ १३ ॥ क्रयविक्रये दूषणमाह-'किणंत' इत्यादि, यतो हि साधुः क्रीणन्-मूल्येन वस्तु गृह्णन् क्रयको भवति, इतरलोकवद् ग्राहको भवति । तथा पुनर्विक्रीणानश्च वणिग्भवति । क्रयविक्रये वर्त्तमानो भिक्षुस्तादृशो न भवति, भिक्षुगुणयुक्तो न भवति । सूत्रे हि भिक्षोर्लक्षणमेतादृशं नास्तीत्यर्थः ॥ १४ ॥

भिक्खियव्वं न केयव्वं, भिक्खुणा भिक्खवित्तिणा ।
कयविक्कओ महादोसो, भिक्खावित्ति सुहावहा ॥ १५ ॥

भिक्षुणा-साधुना भिक्षितव्यं-याचितव्यं, न तु साधुना क्रेतव्यं, मूल्येन हट्टादौ गृहीतव्यम् । कीदृशेन भिक्षुणा ? भिक्षावृत्तिना, भिक्षया वृत्तिरुदरपूरणं यस्य स भिक्षावृत्तिस्तेन । यतो हि भिक्षोः क्रयविक्रययोर्महान् दोषोऽस्ति । साधोर्भिक्षावृत्तिः सुखावहाऽस्ति । भिक्षया वृत्तिर्भिक्षावृत्तिः सा सुखमावहति पूरयतीति सुखावहा-सुखपूरका ॥ १५ ॥

समुयाणं उंछमेसिज्जा, जहासुत्तमणिंदियं ।
लाभालाभंमि संतुट्ठे, पिंडवायं चरे मुणी ॥ १६ ॥

मुनिः-साधुर्यथासूत्रं सूत्रोक्तरीत्याऽनिन्दितं-निन्दारहितं समुदानं-भैक्ष्यं भिक्षासमूहमेषयेद्गवेषयेत् । कथंभूतं भैक्ष्यम् ? उञ्छमिवोञ्छमन्यान्यपृथक्पृथक्कणग्रहणमिवान्यान्यगृहादल्पाल्पमीलनेन मधुकरवृत्त्या भ्रमन्निच्छेदित्यर्थः । पुनः साधुर्लाभालाभे आहारप्राप्तावप्राप्तौ वा सन्तुष्टः सन् पिण्डपातं-भिक्षाटनं चरेदासेवेत । पिण्डाय-भिक्षाग्रहणाय पतनं-पातः पिण्डपातो, भिक्षार्थं भ्रमणं तमासेवेतेत्यर्थः ॥ १६ ॥

अथ भोजनविधिमाह-

अलोले न रसे गिद्धे, जिब्भादंते अमुच्छिए ।
न रसट्ठाए भुंजिज्जा, जवणट्ठाए महामुणी ॥ १७ ॥

महामुनिर्यापनार्थं, यापना संयमनिर्वाहः, यापनायै इति यापनार्थं-संयमनिर्वाहार्थमाहारं भुञ्जीत । रसो धातुविशेषस्तदर्थमिति रसार्थं-धातुवृद्ध्यर्थं सरसाहारं न भुञ्जीत, केवलं संयमनिर्वाहार्थमेव भुञ्जीतेत्यर्थः । कीदृशो महामुनिः ? अलोलः सरसाहारप्राप्तावचपलः, पुनः कथंभूतः ? रसे न गृद्धो, मधुरादौ तीव्राभिलाषवान्नास्ति । पुनः कीदृशो महा-

मुनिः ? जिह्वादान्तः, प्राकृतत्वाद्दान्तजिह्वो वशीकृतरसनः, पुनः कीदृशः ? अमूर्छितः संनिधेरकरणेन, आगामिदिनेषु भक्षणार्थं घृतगुडादिसञ्चयकरणरहितः ॥ १७ ॥

अच्चणं सेवणं चेव, वंदणं पूयणं तहा ।
इड्ढीसक्कारसम्माणं, मणसावि न पत्थए ॥ १८ ॥

पुनः साधुरेतन्मनसापि न प्रार्थयेन्नाभिलषेत् । यदि मनसापि न प्रार्थयेत्तदा वचन-कायाभ्यां दूरत एवापास्तम् । तत् किं किं ? अर्चनं पुष्पादिभिः सत्कारणम्, तथा सेवनं पर्युपासनं, चैव पादपूरणे, पुनर्वन्दनं स्तुतिकरणम्, तथा पूजनं वस्त्रादिभिः प्रतिलाभनं न प्रार्थयेत् । पुनः साधुः ऋद्धिसत्कारसन्मानं मनसापि न प्रार्थयेत् । ऋद्धिश्च सत्कारश्च सन्मानं च ऋद्धिसत्कारसन्मानम्, ऋद्धिः श्राद्धानां सम्पत्, अथवा वस्त्रपात्रादिसम्पत्, सत्कारोऽर्थ-प्रदानादिर्गुणकथनं वा, सन्मानमभ्युत्थानादि, एतत्सर्वं साधुर्नाभिलषेत् ॥ १८ ॥

सुक्कज्झाणं झियाइज्जा, अनियाणे अकिंचणे ।
वोसट्ठकाये विहरिज्जा, जावकालस्स पज्जओ ॥ १९ ॥

साधुः शुक्लध्यानं प्रागुक्तं ध्यायेत् । पुनः साधुरनिदानो - निदानरहितोऽकिञ्चनो-धनादिरहितः, पुनर्व्युत्सृष्टकायः सन्-शरीरममत्वरहितः सन् यावत्कालस्य पर्यायो यावन्मृत्योः समयस्तावदेतादृशः सन् विहरेत्, अप्रतिबद्धविहारत्वेन विचरेदित्यर्थः ॥ १९ ॥

निज्जूहिऊण आहारं, कालधम्मे उवट्ठिए ।
चइऊण माणुसं बोंदिं, पहू दुक्खे विमुच्चई ॥ २० ॥

स साधुरेतादृशे मार्गे सञ्चरन् कालधर्मे उपस्थिते सति-मरणे प्राप्ते सति प्रभुर्वीर्यान्तरा-यक्षयतो विशिष्टसामर्थ्यवान् दुःखाच्छरीरमानसाद्दुःखाद्विशेषेण मुच्यते, मुक्तो भवतीत्यर्थः । किं कृत्वा ? आहारं 'निज्जूहिऊण' इति संलेखनया परित्यज्य, पुनः किं कृत्वा ? मानुषीं बोन्दि-तनुं त्यक्त्वौदारिकशरीरं त्यक्त्वा दुःखरहितो भवतीत्यर्थः ॥ २० ॥

निम्ममे निरहंकारे, वीयरागे अणासवे ।
संपत्ते केवलं नाणं, सासए परिनिव्वुडे ॥ २१ ॥ त्तिबेमि ॥

एतादृशो यतिः शाश्वतोऽविनश्वरो-मरणधर्मरहितः केवलज्ञानं सम्प्राप्तः सन् परिनिवृत्तो भवति, कर्माभावाच्छीतीभूतो भवति, सिद्धिगतिभाग्भवतीत्यर्थः । कीदृशो यतिः ? निर्ममो लोभरहितः, पुनः कीदृशः ? अनाश्रवः प्राणातिपातादिपञ्चाश्रवरहितः, पुनः कीदृशः ? निरहङ्कारोऽहङ्काररहितः, पुनः कीदृशः ? वीतरागो रागद्वेषरहितः, सुधर्मास्वामी जम्बूस्वामिनं प्रति वक्ति, अहमिति ब्रवीमि वीतरागवचनात् ॥ २१ ॥

इत्यनगारमार्गगत्यध्ययनम् सम्पूर्णम् ॥ ३५ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविर-चितायामनगारमार्गगतिनामकं पञ्चत्रिंशमध्ययनम् सम्पूर्णम् ॥ ३५ ॥

॥ ३६ जीवाजीवविभक्त्याख्यमध्ययनम् ॥

पूर्वस्मिन्नध्ययनेऽनगारमार्ग उक्तः, स च जीवाजीवादितत्त्वज्ञानं विना न स्यात्, अतो जीवाजीवविभक्त्याख्यं षट्त्रिंशमध्ययनं व्याख्यायते-

जीवाजीवविभत्तिं, सुणेह मे एगमणा इओ ।
जं जाणिऊण भिक्खू, सम्मं जयइ संजमे ॥ १ ॥

भो शिष्याः ! एकाग्रमनसः सन्तो यूयं तां जीवाजीवविभक्तिं-जीवाजीवादीनां लक्षणं 'मे' मम कथयतः सतः श्रृणुत । जीवाश्च अजीवाश्च जीवाजीवास्तेषां विभक्तिर्लक्षणज्ञानेन पृथक्पृथक्करणं जीवाजीवविभक्तिस्ताम्, उपयोगवान् जीव एकेन्द्रियादिः, उपयोगरहितोऽजीवः काष्ठादिः, इत्यादिजैनमतोक्तलक्षणेन लक्ष्यज्ञानम्, तामिति कां ? यां जीवाजीवविभक्तिं ज्ञात्वा भिक्षुः संयमे-संयममार्गे सम्यग् यतते-यत्नं कुरुते ॥ १ ॥

जीवा चेव अजीवा य, एस लोए वियाहिए ।
अजीवदेसे आगासे, अलोगे से वियाहिए ॥ २ ॥

जीवाश्चेतनालक्षणात्मकाः, च पुनरजीवा अचेतनात्मकाः, चकार एवकारश्च पादपूरणे । एष लोको व्याख्यातस्तीर्थकरैरुक्तः । अजीवदेश आकाशमलोको व्याख्यातः । अजीवस्य धर्मास्तिकायादिकस्य देशोंशोऽजीवदेशो धर्मास्तिकायादिवृत्तिरहितस्याकाशस्यैव देशः सोऽलोको व्याख्यातः । जीवाजीवानामाधेयभूतानां लोकाकाशमाधारभूतं, अतो लोकाकाशलक्षणमुक्तम् ॥ २ ॥

जीवाजीवविभक्तिर्यथा स्यात्तथाह-

दव्वओ खित्तओ चेव, कालओ भावओ तहा ।
परूवणा तेसि भवे, जीवाणमजीवाण य ॥ ३ ॥

द्रव्यतो द्रव्यमाश्रित्येदं द्रव्यमियद्भेदं, क्षेत्रत इदं द्रव्यमेतावति क्षेत्रे स्थितम्, कालत इदं द्रव्यमियत्कालस्थितिमद्वर्तते, भावतोऽस्य द्रव्यस्येयन्तः पर्यायाः । एवं तेषां जीवद्रव्याणामजीवद्रव्याणां च द्रव्य-क्षेत्र-काल-भावेन चतुर्धा प्ररूपणा भवेत् ॥ ३ ॥

अथ तावदजीवद्रव्यप्ररूपणायाः स्वल्पत्वादजीवद्रव्यस्यैव प्ररूपणा कथ्यते-

रूविणो य अरूवी य, अजीवा दुविहा भवे ।
अरूवी दसहा वुत्ता, रूविणो य चउव्विहा ॥ ४ ॥

अजीवा द्विविधा भवेयुः । एकेऽजीवा रूपिणो-रूपवन्तः, च पुनरन्येऽजीवा अरूपिणोऽरूपवन्तः, तत्र रूपं स्पर्शाद्याश्रयभूतं मूर्त्तं, तदस्ति येषु ते रूपिणः, तद्व्य-

तिरिक्ता अरूपिण इत्यर्थः । तत्राऽरूपिणोऽजीवा दशधा उक्ताः, रूपिणोऽजीवाश्चतुर्विधाः प्रोक्ताः ॥ ४ ॥

पूर्वं दशविधत्वमाह-

धम्मत्थिकाए तद्देसे, तप्पएसे य आहिए ।
अहम्मे तस्स देसे य, तप्पएसे य आहिए ॥ ५ ॥

आगासे तस्स देसे य, तप्पएसे य आहिये ।
अद्धासमए चेव, अरूवी दसहा भवे ॥ ६ ॥ युग्मम् ॥

अरूप्यजीव एवं दशधा भवेदिति द्वितीयगाथयान्वयः । प्रथमं धर्मास्तिकायः, धरति जीवपुद्गलौ प्रति गमनोपकारेणेति धर्मः, तस्यास्तयः-प्रदेशसद्भावास्तेषां कायः-समूहो धर्मास्तिकायः, सर्वदेशप्रदेशानुगतसमानपरिणतिमद्द्रव्यमिति भावः १ । पुनस्तद्देशस्तस्य धर्मास्तिकायस्य कतमो विभागो देशस्तृतीयचतुर्थादिभागस्तद्देशो धर्मास्तिकायदेशः २ । पुनस्तत्प्रदेशस्तस्य धर्मास्तिकायविभागस्यातिसूक्ष्मो निरंशोंशप्रदेशो धर्मास्तिकाय-प्रदेशस्तीर्थकरैराख्यातः-कथितः ३ । एवमधर्मो जीवपुद्गलयोः स्थिरकारी धर्मास्तिकायाद्वि-रुद्धोऽधर्मास्तिकायः ४ । पुनस्तस्याऽधर्मास्तिकायस्यापि देशस्तद्देशः, एकः कश्चिद्भागोऽ-धर्मास्तिकायदेशः ५ । एवं पुनस्तस्याऽधर्मास्तिकायस्य प्रदेशोंशस्तत्प्रदेश आख्यातः, अधर्मास्तिकायप्रदेश इत्यर्थः ६ । इत्यनेन षड् भेदा अरूपिणोऽजीवद्रव्यस्य ।

अथ शेषाश्चत्वार उच्यन्ते-'आगास' इति सप्तमो भेद आकाशमाकाशास्तिकायः, जीवपुद्गलयोरवकाशदाय्याकाशम् ७ । तस्याकाशस्य देशः कतमो विभाग आकाशास्ति-कायदेशः ८ । तस्याकाशास्तिकायस्य निरंशो देशस्तत्प्रदेश आकाशास्तिकायप्रदेशः ९ । दशमो भेदश्चाद्धासमयोऽद्धाकालो वर्तमानलक्षणस्तदुपः समयोऽद्धासमयः, अस्यैक एव भेदो निर्विभागत्वाद्देशप्रदेशो कालस्य न सम्भवतः १० । एवं दश भेदा अरूपिणो ज्ञेयाः ॥ ६ ॥

एतानरूपिणः क्षेत्रत आह-

धम्माधम्मे य दो एए, लोगमित्ता वियाहिया ।
लोगालोगे य आगासे, समए समयखित्तिए ॥ ७ ॥

धर्माधर्मौ-धर्मास्तिकायाऽधर्मास्तिकायावेतौ द्वावपि लोकमात्रौ व्याख्यातौ, याव-त्परिमाणो लोकस्तावत्परिमाणो धर्मास्तिकायाऽधर्मास्तिकायौ चतुर्दशरज्जवात्मकलोक-व्याप्तौ, इत्यनेनाऽलोके धर्माधर्मौ न स्तः । आकाशं लोकालोके वर्तते, इत्यनेनाकाशास्ति-कायश्चतुर्दशरज्ज्वात्मकलोकं व्याप्त स्थितः, ततो बहिरलोकमपि व्याप्याकाशास्तिकायः स्थित इत्यर्थः । समयः समयादिकः कालः समयक्षेत्रिको व्याख्यातः । समयोपलक्षितं

क्षेत्रं सार्धद्वयद्वीपसमुद्रात्मकं समयक्षेत्रं, तत्र भवः समयक्षेत्रिकः, सार्धद्वयद्वीपेभ्यो बहिस्तु समय आवलिका दिवसमासादिकालभेदा मनुष्यलोकाऽभावान्न विवक्षिताः ॥ ७ ॥

पुनरेतानेव कालत आह-

धम्माधम्मागासा, तिन्निवि एए अणाइया ।
अपज्जवसिया चेव, सव्वद्धं तु वियाहिया ॥ ८ ॥

धर्माधर्माकाशान्येतानि त्रीण्यपि सर्वाद्धमिति सर्वकालं-सर्वदा स्वस्वरूपाऽपरित्यागेन नित्यान्यनादीनि च पुनरपर्यवसितान्यन्तरहितानि व्याख्यातानि ॥ ८ ॥

कालस्वरूपमाह-

समएवि संतइं पप्प, एवमेव वियाहिया ।
आएसं पप्प साईए, सपज्जवसिएवि य ॥ ९ ॥

समयोऽपि-कालोऽप्येवमेव-यथा धर्माधर्माकाशान्यानाद्यनन्तानि तथा कालोऽप्यनाद्यनन्त इत्यर्थः । किं कृत्वा ? सन्ततिं प्राप्य, अपरापरोत्पत्तिरूपप्रवाहात्मिकामाश्रित्य । कोऽर्थः ? यदा हि कालस्योत्पत्तिर्विलोक्यते, तदा कालस्यादिरपि नास्ति, अन्तोऽपि नास्तीत्यर्थः । पुनरादेशं प्राप्य कार्यारम्भमाश्रित्य कालः सादिक - आदिसहितः, तथा सपर्यवसितोऽवसानसहितो व्याख्यातः । यदा च यत्किञ्चित्कार्यं यस्मिन् काले आरभ्यते, तदा तत्कार्यारम्भवशात्कालस्याप्युपाधिवशादादिः, एवं कार्यारम्भसमाप्तौ कालस्याप्यन्तो व्याख्यात इत्यर्थः ॥ ९ ॥

अथ रूपिणोऽजीवाश्चतुर्विधाश्चतुर्भेदा उच्यन्ते-

खंधा य खंधदेसा य, तप्पएसा तहेव य ।
परमाणुणो य बोधव्वा, रूविणोवि चउव्विहा ॥ १० ॥

रूपिणोऽप्यजीवाश्चतुर्विधाश्चतुष्प्रकाराः, के ते भेदाः ? तानाह—स्कन्धाः १ । यत्र *पुञ्जे परमाणवो विघटनान्मिलनाच्च न्यूना अधिका अपि भवन्ति, एतादृशाः परमाणुपुञ्जाः* स्कन्धदेशाः २ । तथा तत्प्रदेशास्तेषां स्कन्धानां निर्विभागा अंशाः स्कन्धप्रदेशाः ३ । तथैवेति पूर्ववत् । च पुनः परमाणवो बोधव्याः, परमाणव एव परस्परममिलिता इत्यर्थः ४ । एवं चत्वारो रूपिणश्चतुर्विधा बोधव्या इति भावः । अत्र च मुख्यवृत्त्या रूपीद्रव्यस्य द्वौ भेदौ, परमाणवः स्कन्धाश्च, देशप्रदेशयोः स्कन्धेष्वेवान्तर्भावः ॥ १० ॥

अथ स्कन्धानां परमाणूनां लक्षणमाह-

एगत्तेण पुहुत्तेण, खंधा य परमाणुणो ।
लोएगदेसे लोए य, भइअव्वा ते उ खित्तओ ॥
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥ ११ ॥

एते स्कन्धाः[1] च पुनः परमाणव एकत्वेन पुनः पृथक्त्वेन, एकत्वेन समानपरिणतिरूपेण लक्ष्यन्ते, पृथक्त्वेन परमाण्वन्तरैरसङ्घातरूपेण लक्ष्यन्ते इत्यध्याहारः । इति द्रव्यतो लक्षणमुक्तम् । अथैतानेव क्षेत्रत आह-ते स्कन्धाः परमाणवश्च 'लोए' इति लोकस्य चतुर्दशरज्ज्वात्मकस्यैकदेशः, एकद्व्यादिसङ्ख्यातासङ्ख्यातप्रदेशात्मकः प्रतिनियतो भागो लोकैकदेशस्तस्मिन् लोके च भक्तव्या-भजनीयाः क्षेत्रतः-क्षेत्रमाश्रित्य । अत्र च स्कन्धपरमाणूनां ग्रहणेऽपि परमाणूनामेवैकप्रदेशावस्थानत्वात्, स्कन्धाश्च बहुप्रदेशोपचिता अपि केचिदेकप्रदेशे तिष्ठन्ति, अन्ये तु सङ्ख्येयेष्वसङ्ख्येयेषु च प्रदेशेषु यावत्सकललोके तिष्ठन्ति, परिणतेर्विचित्रत्वात् । 'इत्तोत्ति' इतः क्षेत्रप्ररूपणातोऽनन्तरं तेषां स्कन्धानां परमाणूनां च कालविभागं - कालभेदं चतुर्विधं वक्ष्ये, साद्यनादिसपर्यवसिताऽपर्यवसितभेदेन कथयिष्यामि । इदं च सूत्रं षट्पादं गाथेत्युच्यते ॥ ११ ॥

संतइं पप्प तेऽणाई, अपज्जवसियावि य ।
ठिइं पडुच्च साइया, सपज्जवसियावि य ॥ १२ ॥

ते स्कन्धाः परमाणवश्च सन्ततिमपरापरोत्पत्तिं प्रवाहरूपां प्राप्याऽनादय-आदिरहितः, तथा अपर्यवसिता-अन्तरहिताः । स्थितिं प्रतीत्य क्षेत्रावस्थानरूपां स्थितिमङ्गीकृत्य सादिकाः सपर्यवसिताश्च वर्तन्ते ॥ १२ ॥

सादिसपर्यवसितत्वेऽपि कियत्कालमेषां स्थितिरित्याह-

असंखकालमुक्कोसं, इक्कं समयं जहन्नयं ।
अजीवाण य रूवीणं, ठिई एसा वियाहिया ॥ १३ ॥

स्कन्धानां परमाणूनां चोत्कृष्टाऽसङ्ख्यकालं स्थितिः, जघन्यिका एकसमया स्थितिः । एषा अजीवानां रूपिणां पुद्गलानां स्थितिर्व्याख्याता, एतस्मादुक्तकालात्परतोऽवश्यमेव विचटनात् ॥ १३ ॥

अथ कालतः स्थितिमुक्त्वा तदन्तर्गतमन्तरमाह-

अणंतकालमुक्कोसं, इक्कं समयं जहन्नयं ।
अजीवाण य रूवीणं, अंतरेयं वियाहियं ॥ १४ ॥

अजीवानां रूपिणां पुद्गलानां स्कन्धदेशप्रदेशपरमाणूनामन्तरं विवक्षितक्षेत्रावस्थितेः प्रच्युतानां पुनस्तत्क्षेत्रप्राप्तेर्व्यवधानमन्तरमुत्कृष्टमनन्तकाल भवति । जघन्यमेकसमयं भवति । इदमन्तरं तीर्थकरैर्व्याख्यातम् । पुद्गलानां हि विवक्षितक्षेत्रावस्थितितः प्रच्युतानां कदाचित्समयावलिकादिसङ्ख्यातकालतो वा पल्योपमादेर्यावदनन्तकालादपि तत्क्षेत्रावस्थितिः सम्भवतीति भावः ॥ १४ ॥

---

१ इतोऽग्रे मुद्रिते एवं पाठः-स्कन्धा हि संहतानेकपरमाणुरूपाः मु. १ नास्ति ॥

अथ भावतः पुद्गलानाह-

वण्णओ गंधओ चेव, रसओ फासओ तहा ।
संठाणओ य विन्नेओ, परिणामो तेसिं पंचहा ॥ १५ ॥

तेषां पुद्गलानां परिणामो वर्णतो गन्धतो रसतः स्पर्शतस्तथा संस्थानतश्च पञ्चधा-पञ्चप्रकारो ज्ञेयः । यतो हि पूरणगलनधर्माणः पुद्गलाः, तेषामेव परिणतिः सम्भवति । परिणमनं स्वस्वरूपावस्थितानां पुद्गलानां वर्ण-गन्ध-रस-स्पर्श-संस्थानादेरन्यथाभवनं परिणामः, स पुद्गलानां पञ्चप्रकार इत्यर्थः ॥ १५ ॥

एषामेव प्रत्येकमुत्तरभेदानाह-

वण्णओ परिणया जे उ, पंचहा ते पकित्तिया ।
किण्हा नीला य लोहिया, हालिद्दा सुक्किला तहा ॥ १६ ॥

ये पुद्गलाः वर्णतः परिणताः सन्ति, ते पुद्गलाः पञ्चधा प्रकीर्तितास्तीर्थकरैः कथिताः । ते के ? तानाह—कृष्णाः कज्जलवर्णाः, पुनर्नीलाः शुकपिच्छनिभाः गुलिका-सदृशा वा, लोहिता रक्ता हिङ्गुलवर्णाः, तथा हारिद्राः पीता हरितालनिभाः, तथा शुक्लाः शङ्खकुन्दस्फटिकसदृशाः ॥ १६ ॥

गंधओ परिणया जे उ, दुविहा ते वियाहिया ।
सुब्भिगंधपरिणामा, दुब्भिगंधा तहेव य ॥१७ ॥

ये तु पुद्गला गन्धतः परिणताः सन्ति, ते पुद्गला द्विविधा व्याख्याताः, सुरभिगन्धः परिणामो येषां ते सुरभिगन्धपरिणामाः, सुगन्धत्वेन परिणताश्चन्दनादिवदित्यर्थः । तथैव दुरभिगन्धो येषां ते दुरभिगन्धाः, दुर्गन्धत्वेन लशुनादिवत्परिणताः ॥ १७ ॥

रसओ परिणया जे उ, पंचहा ते पकित्तिया ।
तित्तकडुआ कसाया, अंबिला महुरा तहा ॥ १८ ॥

ये तु पुद्गलाः पुना रसतः परिणतास्ते पञ्चधा परिकीर्त्तिताः, तिक्ता सुण्ठीमरिचसदृशाः, कटुकाः निम्बसदृशाः, कषायाः खदिरसदृशाः, आम्ला निम्बुकरससदृशाः, मधुराः शर्करासदृशाः ॥ १८ ॥

फासओ परिणया जे उ, अट्ठहा ते पकित्तिया ।
कक्खडा मउया चेव, गुरूआ लहुया तहा ॥ १९ ॥

स्पर्शतश्च ये परिणताः पुद्गलास्तेऽष्टधा प्रकीर्तिताः, कर्कशा अजालोमसदृशाः, च पुनर्मृदुकाः-सुकुमालाः पट्टकूलसदृशाः, गुरुका-लोहपारदसदृशाः, तथा पुनर्लघुका अर्कतूलसदृशाः ॥ १९ ॥

सीया उण्हा य निद्धा य, तहा लुक्खा य आहिया ।
इइ फासपरिणया, एए पुग्गला समुदाहिया ॥ २० ॥

तथा पुनः केचित्पुद्गलाः शीता हिमसदृशाः, च पुनरुष्णा अग्निसदृशाः, च पुनः स्निग्धा घृतसदृशाः, तथा रूक्षाश्चाख्याताः । इत्यमुना प्रकारेणैते पुद्गलाः स्पर्शपरिणता अष्टप्रकारेण तीर्थकरैरुदाहृताः ॥ २० ॥

संठाणपरिणया जे उ, पंचहा ते पकित्तिया ।
परिमंडला य वट्टा, तंसा चउरंसमायया ॥ २१ ॥

ये तु पुद्गलाः संस्थानपरिणतास्ते पञ्चधा प्रकीर्तिताः, ते के ? तानाह—परिमण्डला कङ्कणाकाराः, पुनर्वर्त्तुला लड्डुकाकृतयः, पुनस्तिस्राः सङ्घाटकाकाराः, पुनश्चतुरस्राश्चतुष्कोणाश्चतुष्किकाकाराः, तथा पुनरायताः प्रलम्बा रज्ज्वाकाराः ॥ २१ ॥

सम्प्रत्येषामेव परस्परं सम्बन्धमाह-

वण्णओ जे भवे किण्हे, भइए जे उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥ २२ ॥

पुद्गलो वर्णतः कृष्णः कज्जलनिभो भवेत्, स कृष्णः पुद्गलो गन्धतो भाज्यः सुगन्धो भवति, दुर्गन्धोऽपि भवति, न तु सुरभिरेव, न तु दुरभिरेव, किन्तु कृष्णवर्णपुद्गलः सुगन्धोऽपि भवति, दुर्गन्धोऽपि भवति । सुरभिर्दुरभित्वेन परिणमति, दुरभिः सुरभित्वेन परिणमति, न तु नियतगन्ध एवेति भावः । एवं रसतः स्पर्शतश्चैव भाज्यः रसानां पञ्चानां मध्ये एकस्मादसादसान्तरपरिणतो भवति, स्पर्शानामष्टानां मध्ये एकस्मात्स्पर्शान्तरपरिणतो भवतीति भावः । तथा पुनः स एव पुद्गलः संस्थानतोऽपि भाज्यः, पञ्चानां संस्थानानां मध्ये एकस्मात्संस्थानान्तरपरिणतो भवतीति भावः । अत्र गन्धौ द्वौ, रसाः पञ्च, स्पर्शा अष्टौ, संस्थानानि पञ्च मीलिता विंशतिः, इत्येक एव कृष्णवर्णो विंशतिविधो भवति ॥२२॥

अथ नीलस्य भङ्गानाह-

वन्नओ जे भवे नीले, भइए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥ २३ ॥

यः पुद्गलो वर्णतो नीलो भवति, स पुद्गलोऽपि गन्धतः सुरभिगन्धदुरभिगन्धतो भाज्यः । च पुनः स पुद्गलो रसतः पञ्चविधतिक्तकटुकादितो भाज्यः, च पुनः स्पर्शतोऽष्टविधः खरमृदुशीतोष्णादितो भाज्यः । संस्थानतश्च पञ्चविधपरिमण्डलादितो भाज्यः, तदा विंशतिविधो भवति ॥ २३ ॥

अथ रक्तस्य भेदानाह-

वण्णओ लोहिए जे उ, भइए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥ २४ ॥

यः पुनः पुद्गलो वर्णतो लोहितो भवति, हिङ्गुलसदृशो भवति, सोऽपि पूर्वोक्तविधिना गन्धतो रसतः स्पर्शतः संस्थानतो भाज्यः, तदा सोऽपि विंशतिविधो भवति ॥ २४ ॥

अथ पीतस्य भेदानाह-

वण्णओ पीयए जे उ, भइए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥ २५ ॥

यः पुनः पुद्गलो वर्णतः पीतः स्वर्णवर्णः, स पुद्गलोऽपि गन्धतो रसतः स्पर्शतः संस्थानतश्च भाज्यः, तदा विंशतिविधो भवति ॥ २५ ॥

अथ शुक्लस्य भेदानाह-

वण्णओ सुक्किले जे उ, भइए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥ २६ ॥

यः पुनः पुद्गलो वर्णतः शुक्लश्चन्द्रसदृशो भवति, सोऽपि पुद्गलो गन्धतो रसतः स्पर्शतः संस्थानतश्च भाज्यः, तदा विंशतिविधो भवति । एवं पञ्चभिर्वर्णैर्विंशत्या गुणितैः शतं (१००) भवति ॥ २६ ॥

इति वर्णभेदानुक्त्वा गन्धपुद्गलभेदानाह-

गंधओ जे भवे सुब्भी, भइए से उ वन्नओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥ २७ ॥

यः पुद्गलो गन्धतः सुरभिश्चन्दनपरिमलादिवत् सुगन्धो भवति, स पुद्गलो वर्णतो रसतः स्पर्शतश्च भाज्यः । तथा संस्थानतश्च भाज्यः । कोऽर्थः ? सुगन्धपुद्गले पञ्चानां वर्णानां मध्येऽन्यतरकेचिद्वर्णा भवन्ति । रसानामपि पञ्चानां मध्ये केचिदसा भवन्ति । एवं स्पर्शानामष्टानां मध्ये केचित्स्पर्शा भवन्ति । संस्थानानां पञ्चानां मध्येऽन्यतरत्परिमण्डलादिसंस्थानमपि भवति । इह रसादयोऽष्टादश, ते च पञ्चभिर्वर्णैर्मीलितास्त्रयोविंशतिर्भवन्ति ॥२७॥

गंधओ जे भवे दुब्भी, भइए से उ वन्नओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥ २८ ॥

यः पुनः पुद्गलो गन्धतो दुरभिर्दुर्गन्धो भवति, स च पुद्गलो वर्णतो रसतः स्पर्शतः संस्थानतश्च भाज्यः, सुगन्धपुद्गलवद्दुर्गन्धपुद्गलोऽपि ज्ञेयः, दुर्गन्धविषया अप्येतावन्त एव, ततश्च गन्धद्वयेन भङ्गानां षट्चत्त्वारिंशत् (४६) ॥ २८ ॥

अथ रसपुद्गलानां भेदानाह-

रसओ तित्तओ जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि य ॥ २९ ॥

यः पुद्गलो रसतस्तीक्ष्णो भवति, स पुद्गलो वर्णतो गन्धतः स्पर्शतः संस्थानतश्च भाज्यः । यत्र पुद्गले एकस्तीक्ष्णो रसो भवति, तत्र वर्णानां मध्ये एकः कश्चिद्वर्णो भवति, सुगन्धदुर्गन्धयोरेकः कश्चिद्गन्धो भवति, स्पर्शानामष्टानां मध्येऽन्यतरः कश्चित्स्पर्शो भवति, संस्थानानां मध्येऽन्यतरदेकं सस्थानं भवति । इह तिक्तेन भङ्गानां विंशतिः ॥ २९ ॥

अथ कटुकरसभेदानाह-

रसओ कडुए जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि य ॥ ३० ॥

यः पुद्गलो रसतः कटुको भवति, स पुद्गलस्तिक्तपुद्गलवद्वर्णतो गन्धतः स्पर्शतः संस्थानतश्च भाज्यः ॥ ३० ॥

रसओ कसाओ जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि य ॥ ३१ ॥

यः पुद्गलो रसतः कषायो भवति, स पुद्गलो वर्णतो गन्धतः स्पर्शतश्च भाज्यः, संस्थानतश्चापि भाज्यः ॥ ३१ ॥

रसओ अंबिले जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि य ॥ ३२ ॥

यः पुद्गलो रसत आम्लो भवति, स पुद्गलो वर्णतो गन्धतः स्पर्शतः संस्थानतश्च भाज्यः ॥ ३२ ॥

रसओ महूरए जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि य ॥ ३३ ॥

यः पुद्गलो रसतो मधुरः शर्करातुल्यो भवति, स पुद्गलो वर्णतो गन्धतः स्पर्शतश्च भाज्यः, तथा संस्थानतोऽपि भाज्यः ॥ ३३ ॥ एवं रसपञ्चकसंयोगे शतं(१००) भङ्गाः इति,

रसभेदानुक्त्वा स्पर्शभेदानाह-

फासओ कक्खडे जे उ, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए संठाणओवि य ॥ ३४ ॥

यः पुद्गलः स्पर्शतः कर्कशो भवति, स च पुद्गलो वर्णतो भाज्यः, गन्धतो रसतश्च भाज्यः, एवं संस्थानतोऽपि भाज्यः । तथाहि—एकः कर्कशः पाषाणादिसदृशस्पर्शपुद्गलः, तत्र पुद्गले वर्णानां पञ्चानां मध्ये केचिद्वर्णाः सन्ति - भवन्ति । गन्धयोरुभयोर्मध्ये एकः कश्चिद्गन्धो भवति । पञ्चानां रसानां मध्ये केचिद्रसा भवन्ति । संस्थानानां पञ्चानां मध्येऽन्यतरदेकं संस्थानं भवतीति भावः ॥ ३४ ॥

फासओ मउए जे उ, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए संठाणओवि य ॥ ३५ ॥

यः पुद्गलः स्पर्शतो मृदुर्भवति, स पुद्गलो वर्णतो गन्धतो रसतः संस्थानतश्च भाज्यः, खरस्पर्शवद् ज्ञेय इत्यर्थः ॥ ३५ ॥

फासओ गुरुए जे उ, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए संठाणओवि य ॥ ३६ ॥

यः पुद्गलः स्पर्शतो गुरुर्भवति, स पुद्गलो वर्णतो गन्धतो रसतश्च संस्थानतश्च भाज्यः ॥ ३६ ॥

फासओ लहुओ जे उ, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए संठाणओवि य ॥ ३७ ॥

यः पुद्गलः स्पर्शतो लघुर्भवति, स पुद्गलो वर्णतो गन्धतो रसतः संस्थानतश्च भाज्यः ॥ ३७ ॥

फासओ सीयए जे उ, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए संठाणओवि य ॥ ३८ ॥

यः पुद्गलः स्पर्शतः शीतलो भवति, स पुद्गलो वर्णतो गन्धतो रसतः संस्थानतश्चापि भाज्यः ॥ ३८ ॥

फासओ उण्हओ जे उ, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए संठाणओवि य ॥ ३९ ॥

यः पुद्गलः स्पर्शत उष्णो भवति, स पुद्गलो वर्णतो गन्धतो रसतः संस्थानतश्चापि भाज्यः ॥ ३९ ॥

फासओ णिद्धओ जे उ, भइए से उ वण्णओ ।
गंधओ रसओ चेव, भइए संठाणओवि य ॥ ४० ॥

यः पुद्गलः स्पर्शतः स्निग्धो भवति, घृतादितुल्यो भवति, स पुद्गलो वर्णतो गन्धतो रसतः संस्थानतश्च भाज्यः ॥ ४० ॥

फासओ लुक्खए जे उ, भइए से उ वण्णओ ।
गंधओ रसओ चेव, भइए संठाणओवि य ॥ ४१ ॥

यः पुद्गलः स्पर्शतो रूक्षो भवति, स पुद्गलो वर्णतो गन्धतो रसतः संस्थानतश्च भाज्यः । एवं स्पर्शाष्टकमीलने जातं षट्त्रिंशं शतं (१३६) ॥ ४१ ॥

अथ संस्थानभेदानाह-

परिमंडलसंठाणे, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए फासओवि य ॥ ४२ ॥

यः परिमण्डलसंस्थानपुद्गलः, स वर्णतो गन्धतो रसतो भाज्यः, तथा स्पर्शतोऽपि भाज्यः । एकस्मिन् परिमण्डलसंस्थाने [1]चूडिकाकृतिमति पुद्गले वर्णानां पञ्चानां मध्ये कश्चिद्वर्णो भवति, गन्धयोरुभयोर्मध्ये कश्चिद्गन्धो भवति, रसानां पञ्चानां मध्ये कश्चिद्रसो भवति, स्पर्शानामष्टानां मध्ये कश्चित्स्पर्शो भवति ॥ ४२ ॥

संठाणओ भवे वट्टे, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए फासओवि य ॥ ४३ ॥

यः पुद्गलः संस्थानतो 'वट्टे' इति वर्तुलो लड्डुकाकृतिर्भवति, स पुद्गलो वर्णतो गन्धतो रसतश्च भाज्यः, तथा स्पर्शतोऽपि भाज्यः ॥ ४३ ॥

संठाणओ भवे तंसे, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए फासओवि य ॥ ४४ ॥

यः पुद्गलः संस्थानतस्तिस्रो भवेत्, सोऽपि पुद्गलो वर्णतो गन्धतो रसतश्च भाज्यः, तथा स्पर्शतोऽपि भाज्यः ॥ ४४ ॥

संठाणओ य चउरंसो, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए फासओवि य ॥ ४५ ॥

यः पुद्गलः संस्थानतश्चतुरस्रो भवेत्, सोऽपि वर्णतो गन्धतो रसतश्च स्पर्शतश्चापि भाज्यः ॥ ४५ ॥

---

१ बंगडी जेवा आकारवाळा ।

जे आययसंठाणे, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए फासओवि य ॥ ४६ ॥

यः पुद्गल आयतसंस्थानः स वर्णतो गन्धतो रसतः स्पर्शतश्चापि भाज्यः । एवं संस्थानपञ्चकभङ्गसंयोगे लब्धं शतम् ॥ ४७ ॥ इति पुद्गलानां वर्णगन्धरसस्पर्शसंस्थानानां भेदा उक्ताः । अथ तेषां क्रमेण प्रत्येकं सङ्ख्यां वदन्ति । तद्यथा-एकस्मिन्नेकस्मिन् पुद्गलाश्रितवर्णे गन्धौ द्वौ, रसाः पञ्च, स्पर्शा अष्टौ, संस्थानानि पञ्च एवं सर्वेऽपि विंशतिर्भेदा भवन्ति । कृष्णनीललोहितपीतशुक्लानां पञ्चानां वर्णानां प्रत्येकं प्रत्येकं विंशति विंशति र्भेदमीलनाच्छतं भेदा वर्णपुद्गलस्य ।

अथ गन्धयोर्द्वयोः षट्चत्वारिंशद्भेदा भवन्ति, तद्यथा-वर्णाः पञ्च, रसाः पञ्च, स्पर्शा अष्टौ, संस्थानानि पञ्च, एवं सर्वे त्रयोविंशतिसङ्ख्याकाः, ते च सुगन्धदुर्गन्धयोस्त्रयोविंशतित्रयोविंशतिप्रमिताः, उभयमीलने षट्चत्वारिंशद्भवन्ति ।

अथ रसपुद्गलानां शतं भेदा भवन्ति, तद्यथा-वर्णाः पञ्च, गन्धौ द्वौ, स्पर्शा अष्टौ, संस्थानानि पञ्च, इति विंशतिर्भेदाः, प्रत्येकं प्रत्येकं तिक्तकटुकषायाम्लमधुरादिपञ्चभिर्भक्ताः सन्तः शतं भेदा भवन्ति ।

अथ स्पर्शभेदाः षट्त्रिंशदधिकं शतं, तद्यथा-वर्णाः पञ्च, गन्धौ द्वौ, रसाः पञ्च, संस्थानानि पञ्च, एवं सप्तदश भेदाः, ते च खरमृदुगुरुलघुरूक्षस्निग्धशीतोष्णपुद्गलैरष्टभिर्गुणिताः षट्त्रिंशदधिकशतं भेदा भवन्ति । प्रज्ञापनायां स्पर्शपुद्गलानां चतुरशीत्यधिकशतं (१८४) भेदा उक्ताः सन्ति, तद्यथा-वर्णाः पञ्च, रसाः पञ्च, गन्धौ द्वौ, स्पर्शाः षडत्र गृह्यन्ते । यतो हि यत्र खरस्पर्शः पुद्गलो गण्यते, तत्र तदा मृदुः पुद्गलो न गण्यते । यत्र स्निग्धो गण्यते, तदा तत्र रूक्षो न गण्यते, परस्परविरोधिनौ ह्येकत्र न तिष्ठतः, तस्मात् स्पर्शाः षट्, संस्थानानि पञ्च, एवं सर्वे मीलितास्त्रयोविंशतिर्भवन्ति । ते त्रयोविंशतिभेदाः प्रत्येकं खरमृदुगुरुलघुस्निग्धरूक्षशीतोष्णाद्यष्टाभिः पुद्गलैर्गुणिताश्चतुरशीत्यधिकशतं (१८४) भेदा भवन्ति । वीतरागोक्तं वचः प्रमाणम्, येन यादृशं ज्ञातम्, तेन तादृशं व्याख्यातम् । तत्त्वं केवली वेद । एवं वर्णगन्धरसस्पर्शसंस्थानानां सकलभङ्गकसङ्कलनातो जातानि द्व्यशीत्यधिकानि चत्वारि शतानि (४८२) सर्वत्र जातावेकवचनं, परिस्थूलन्यायेनैतदुक्तम्, अन्यथा प्रत्येकमप्येषां तारतम्यतोऽनन्तत्वादनन्ता एव भङ्गाः सम्भवन्ति ॥ ४६ ॥

अथोपसंहारेणोत्तरग्रन्थसम्बन्धमाह-

एसाऽजीवविभत्ती, समासेण वियाहिया ।
एत्तो जीवविभत्तिं, वुच्छामि अणुपुव्वस्सो ॥ ४७ ॥

एषाऽजीवविभक्तिः समासेन-सङ्क्षेपेण व्याख्याता । 'इतो', इतीतोऽनन्तरम् 'अणुपुव्वसो' इत्यानुपूर्व्याऽनुक्रमेण जीवविभक्तिं प्रवक्ष्यामि ॥ ४७ ॥

संसारत्था य सिद्धा य, दुविहा जीवा वियाहिया ।
सिद्धा णेगविहा वुत्ता, तं मे कित्तयओ सुण ॥ ४८ ॥

जीवा द्विधा व्याख्याताः, ते के ? संसारस्थाः, संसारो गतिचतुष्टयात्मकः, तत्र तिष्ठन्तीति संसारस्थाः, च पुनः सिद्धाः कर्ममलरहिता भवभ्रमाणान्निवृत्ताः । तत्र च सिद्धा अनेकविधा उक्ताः, 'तमिति' तान् सिद्धभेदान् 'मे' मम कीर्तयतः कथयतस्त्वं श्रृणु ॥ ४८॥

इत्थी पुरिससिद्धा य, तहेव य नपुंसगा ।
सलिंगा अन्नलिंगा य, गिहलिंगे तहेव य ॥ ४९ ॥

'इत्थी' इति स्त्रियः पूर्वपर्यायापेक्षया सिद्धाः स्त्रीसिद्धाः १ । एवं पुरुषपर्यायात्सिद्धाः पुरुषसिद्धाः २ । तथैव-तेनैव प्रकारेण नपुंसकपर्यायात्सिद्धा नपुंसकसिद्धाः, नपुंसकाच्च कृत्रिमा एव सिद्धा भवन्ति, न तु जन्मनपुंसकाः सिद्धयन्ति ३ । स्वलिङ्गसिद्धा यतिवेषेण सिद्धाः ४ । अन्यलिङ्गसिद्धा बौद्धपरिव्राजकादिवेषेण सिद्धाः ५, तथैव गृहिलिङ्गे सिद्धा गृहस्थवेषे सिद्धाः ६ । षड् भेदाः सिद्धानामुक्ता [1]ग्रन्थान्तरे पञ्चदश भेदा अपि । जिनसिद्धस्तीर्थकरः १ । अजिनसिद्धो गणधरः २, तीर्थसिद्धः पुण्डरीकादिः ३, अतीर्थसिद्धो मरुदेवादिः ४, गृहलिङ्गसिद्धो भरतादिः ५, अन्यलिङ्गसिद्धो वल्कलचीरिप्रमुखः ६, स्वलिङ्गसिद्धः साधुः ७, स्त्रीलिङ्गसिद्धश्चन्दनबालादिः ८, नरसिद्धः स्थविरः ९, नपुंसकसिद्धो गाङ्गेयादिः १०, प्रत्येकबुद्धः करकण्ड्वादिः ११, स्वयम्बुद्धः कपिलकेवल्यादिः १२, बुद्धबोधितसिद्धः १३, एकसमये एकसिद्धः १४, एकसमयेऽनेकसिद्धः १५ । एवं पञ्चदश भेदा अपि षट्स्वेवान्तर्भवन्ति ॥ ४९ ॥

अथ सिद्धानेवाऽवगाहनातः क्षेत्रतश्चाह-

उक्कोसोगाहणाए य, जहन्नमज्झिमाइ य ।
उड्ढे अहे य तिरियं च, समुद्दंमि जलंमि य ॥ ५० ॥

अस्यां गाथायामुत्कृष्टावगाहनायां, तथा जघन्यावगाहनायां च पुनर्मध्यमावगाहनायां कति सिद्धाः कुत्र कुत्र स्थाने भवन्ति ? तदाह-उत्कृष्टावगाहनायाम्, अवगाह्यते जीवेनाकाशोऽनयेत्यवगाहना, उत्कृष्टा चासाववगाहना चोत्कृष्टावगाहना, तस्यामुत्कृष्टावगाहनायां सिद्धाः । च पुनर्जघन्यमध्यमयोः, जघन्या च मध्यमा च जघन्यमध्यमे, तयोर्जघन्यमध्यमयोर्जघन्यावगाहनायां तथा मध्यमावगाहनायाम्, उत्कृष्टावगाहनाया जघन्यावगाहनायाश्चान्तर्वर्तिनी मध्यमावगाहना, तस्यां सिद्धाः । 'उड्ढे' इत्यूर्ध्वलोके मेरुचूलादौ चैत्यवन्दनां कर्तुं गतानां केषाञ्चिच्चारणश्रमणानां सिद्धिः स्यात्, तदा ते श्रमणास्तत्र कियन्तः सिद्धा

---

१ नवतत्त्वप्रकरणे ॥

भवन्ति ? एवमधोलोके ग्रामनगरादौ सिद्धाः कियन्तो भवन्ति ? एवं तिर्यग्लोके सार्धु-तृतीयद्वीपेषु, समुद्रे जले नद्यादौ, एतेषु स्थानेष्वेकस्मिन् समये कियन्तः सिद्धा भवन्तीति प्रश्नः ॥ ५० ॥

अथैतेषामेवोत्तरं वदन्ति-

दस य नपुंसएसु, वीसं इत्थियासु य ।
पुरिसेसु य अट्ठसयं, समयेणेगेण सिज्झई ॥ ५१ ॥

चत्तारि य गिहिलिंगे, अन्नलिंगे दसेव य ।
सलिंगेण य अट्ठसयं, समयेणेगेण सिज्झई ॥ ५२ ॥

उक्कोसावगाहणाए उ, सिज्झंते जुगवं दुवे ।
चत्तारि जहन्नाए, जवमज्झमट्ठुत्तरं सयं ॥ ५३ ॥

चउरुड्ढलोए य दुवे समुद्दे, तओ जले वीसमहे तहेव य ।
सयं च अट्ठुत्तर तिरियलोए, समएणेगेण उ सिज्झई धुवं ॥ ५४ ॥

एतासां चतसृणां गाथानामर्थः-च शब्दः समुच्चये, 'दसे' ति, दससङ्ख्याका नपुंसकेष्वेकस्मिन् समये सिद्ध्यन्ते, च पुनर्विंशतिः स्त्रीषु सिद्ध्यन्ति पुरुषेषु च 'अट्ठसयं' इत्यष्टभिरधिकं शतमष्टशतमेकस्मिन् समये सिद्ध्यन्ति ॥ ५१ ॥ गृहिणो गृहस्थस्य लिङ्गं गृहलिङ्गं, तस्मिन् गृहलिङ्गे चत्वारः सिद्ध्यन्ति, एकस्मिन् समये सिद्धिं प्राप्नुवन्ति । अन्यलिङ्गे बौद्धादिवेषे दशसङ्ख्याकाः सिद्ध्यन्ति । स्वलिङ्गेन रजोहरणादिसाधुवेषेणैकेन समयेनाष्टोत्तरशतं सिद्ध्यन्ति ॥ ५२ ॥ उत्कृष्टावगाहनायां पञ्चशतधनुःप्रमाणायां युगपत्समकालमेकेन समयेन द्वौ सिद्ध्यतः, जघन्यावगाहनायां द्विहस्तप्रमाणायां चत्वारः सिद्ध्यन्ति । तथा 'जवमज्झत्ति' यवमध्यमिव यवमध्यं मध्यमावगाहना, तस्यां मध्यमावगाहनायामेकेन समयेनाष्टोत्तरशतं सिद्ध्यन्ति ॥ ५३ ॥ चत्वार ऊर्द्ध्वलोके, द्वौ समुद्रे, जले त्रयः सिद्ध्यन्त्येकेन समयेन, विंशतिरध इत्यधोलोके, तिर्यग्लोके एकैक समयेनाष्टोत्तरशतं सिद्ध्यन्ति । तुशब्दः पुनरर्थे, ध्रुवमिति निश्चयार्थे । इति गाथाचतुष्टयार्थः ॥५४॥

अथ तेषामेव प्रतिघातादिप्रतिपादनायाह-

कहिं पडिहया सिद्धा, कहिं सिद्धा पइट्ठिया ।
कहिं बोंदिं चइत्ताणं, कत्थ गंतूण सिज्झइ ॥ ५५ ॥

'कहिं' इति कस्मिन् प्रतिहताः स्खलिताः सन्ति ? कोऽर्थः ? कुत्र सिद्धाः निरुद्धगतयो वर्तन्ते ? ते सिद्धा कस्मिन् प्रतिष्ठिताः सन्ति ? साद्यपर्यवसितं कालं स्थिताः सन्ति ? पुनः

सिद्धाः क्व बुन्दि-शरीरं त्यक्त्वा कुत्र गत्वा 'सिज्झइ' इति सिद्ध्यन्ति ? प्राकृतत्वाद्वचन-व्यत्ययः । क्व सिद्धजीवा देहं त्यक्त्वा निष्ठितार्था भवन्ति ? ॥ ५५ ॥

एतत्प्रश्नस्योत्तरमाह-

अलोए पडिहया सिद्धा, लोयग्गे य पइट्ठिया ।
इहं बुन्दि चइत्ताणं, तत्थ गंतूण सिज्झइ ॥ ५६ ॥

सिद्धा अलोके केवलाकाशलक्षणे प्रतिहताः स्खलिताः सन्ति । तत्र हि धर्मास्ति-कायाऽभावेन तेषां गतेरसम्भवोऽस्ति । तथा पुनः सिद्धा लोकाग्रे लोकस्योपरितने भागे प्रतिष्ठिताः सदाऽवस्थिताः सन्ति । इह तिर्यग्लोकादौ बुन्दि-शरीरं त्यक्त्वा तत्र लोकाग्रे गत्वा सिद्ध्यन्ति, पूर्वापरकालस्याऽसम्भवाद्यत्रैव समये भवक्षयस्तस्मिन्नेव समये मोक्षस्तत्र गतिश्च भवतीति भावः ॥ ५६ ॥

अथ लोकाग्रे चेषत्प्राग्भारा यत्संस्थाना यत्प्रमाणा यद्वर्णा च वर्तते, तत्सर्वं प्राह-

बारसहिं जोयणेहिं, सव्वट्ठस्सुवरिं भवे, ।
ईसीपब्भारनामा उ, पुढवी छत्तसंठिया ॥ ५७ ॥

पणयालसयसहस्सा, जोयणाणं तु आयया ।
तावइयं चेव वित्थिण्णा, तिगुणो [१]साहियपरिरओ ॥ ५८ ॥

अट्ठजोयणबाहल्ला, एसा मज्झंमि वियाहिया ।
परिहायंती चरिमंते, मच्छियपत्ताओ तणुयरी ॥ ५९ ॥

अज्जुणसुवन्नगमई, सा पुढवी निम्मला सहावेणं ।
उत्ताणयछत्तयसंठिया य, भणिया जिणवरेहिं ॥ ६० ॥

संखंककुंदसंकासा, पंडुरा निम्मला सुभा ।
सीआओ जोयणे तत्तो, लोयंतो उ वियाहिओ ॥ ६१ ॥

॥ पञ्चभिः कुलकम् ॥

एताभिः पञ्चभिर्गाथाभिः सिद्धशिलामीषत्प्राग्भारानाम्नीं वर्णयति—सर्वार्थसिद्धस्य नाम्नो विमानस्योपरि द्वादशभिर्योजनैरीषत्प्राग्भारानाम्नी पृथ्वी भवेत् । कीदृशी सा भूमिः ? छत्रसंस्थिता, छत्रमातपत्रं तस्य संस्थितं संस्थानमाकृतिर्यस्याः सा छत्रसंस्थिता, इह सामान्योक्तावपि छत्रमुत्तानमेव ज्ञेयम् ॥ ५७ ॥

---

१ तस्सेवपरिरओ - अन्यसंस्करणे ।

सेषत्प्राग्भारा पृथ्वी कीदृशी वर्तते ? तत्स्वरूपमाह—सेषत्प्राग्भारा योजनानां पञ्चचत्वारिंशच्छतसहस्राण्यायता-दीर्घा वर्तते, पञ्चचत्वारिंशल्लक्षयोजनदीर्घास्तीत्यर्थः । च पुनस्तावन्तिकं-तावत्प्रमाणेव विस्तीर्णा वर्तते, विस्तारेणापि पञ्चचत्वारिंशल्लक्षयोजनप्रमाणेति भावः । तथा तस्या ईषत्प्राग्भाराया इति शेषः, 'परिरओ' इति परिधिस्त्रिगुणः साधिको ज्ञेयः । तदैककोटिद्विचत्वारिंशल्लक्षत्रिंशत्सह-स्रद्विशतैकोनपञ्चाशद्योजनानि किञ्चिदधिकानि, एतावांस्तस्याः सर्वः परिधिर्भवति ॥ ५८ ॥

पुनः कथंभूता सा ? अष्टयोजनबाहल्या, अष्ट योजनानि बाहल्यं यस्याः साष्टयोजनबाहल्या, सेषत्प्राग्भारा मध्यप्रदेशे इयत्प्रमाणस्थौल्यवती जिनैर्व्याख्याता । चरिमान्तेषु सर्वदिग्वर्तिषु पर्यन्तप्रदेशेषु परिहीयमाना (हानिश्चात्र विशेषाऽनभिधानेऽपि प्रतियोजनमङ्गुलपृथक्त्वं दृष्ट्वा) परिसमन्तात् हायन्तीति क्षीयमाना-पत्तलाभवन्ति, मक्षिकायाः पत्रं-मक्षिकापिच्छं, तस्मान्मक्षिकापत्रादपि तनुतराऽतिसूक्ष्मेत्यर्थः ॥ ५९ ॥

पुनः कीदृशी सा पृथ्वी ? अर्जुन-सुवर्णमयी-श्वेतकाञ्चनस्वरूपा, पुनः सा पृथ्वी स्वभावेन निर्मला, पुनः सा कीदृशी ? उत्तानकमूर्ध्वमुखं यच्छत्रकं तद्वत्संस्थितं संस्थानं यस्याः सोत्तानच्छत्रकसंस्थिता, सा जिन-वरैर्व्याख्याता-भणिता । पूर्वं सामान्येन छत्रसंस्थितेत्युक्त्वेह तूत्तानच्छत्रसंस्थितेत्युक्तम् । तद्विशेषत इति न पुनरुक्तिदोषः । अथवान्यकर्तृकेयं गाथा ॥ ६० ॥

पुनः सा पृथ्वी शङ्खाङ्ककुन्दसङ्काशा, शङ्खाङ्ककुन्दानि प्रतीतानि, तत्सङ्काशा वर्णतस्तत्तुल्या, अत एव पाण्डुरा धवला निर्मला निष्कलङ्का शुभा भव्या सा पृथ्वी सीताभिधा वर्तते । सीतेत्यपरं नाम, तस्याः सीताभिधायाः पृथिव्या उपरीत्यनेन सिद्धशिलाया उपरिष्टादेकं योजनं लोका-न्तस्तु व्याख्यातः ॥ ६१ ॥

इति सिद्धशिलास्वरूपमुक्त्वा तत्र सिद्धाः क्व तिष्ठन्तीत्याह-

जोयणस्स उ जो तत्थ, कोसो उवरिमो भवे ।
तस्स कोसस्स छब्भाए, सिद्धाणोगाहणा भवे ॥ ६२ ॥

योजनस्य तत्रोपरिम-उपरिवर्ती यः क्रोशो भवेत्तस्य क्रोशस्य षष्ठे भागे, इत्यनेन सत्रिभागत्रयस्त्रिंशदधिकधनुःशतत्रितयरूपे (३३३) धनुः परिमाणे सिद्धानां तत्रावगाहनाऽवस्थितिर्भवेदित्यर्थः ॥ ६२ ॥

पुनः सिद्धानां स्वरूपमाह-

तत्थ सिद्धा महाभागा, लोयग्गंमि पइट्ठिया ।
भवप्पवंचउम्मुक्का, सिद्धिं वरगइं गया ॥ ६३ ॥

तत्र-तस्मिन् लोकाग्रे सिद्धाः प्रतिष्ठिताः सन्ति । कीदृशाः सिद्धाः ? महाभागा अचिन्त्यशक्तिमन्तः, पुनः कीदृशाः ? भवप्रपञ्चोन्मुक्ताः, भवा-नारकादयोऽवतारास्तेषां

१ अङ्कः-श्वेतमणिविशेष ।

प्रपञ्चो-विस्तारस्तत उन्मुक्ता भवप्रपञ्चोन्मुक्ता भवभ्रमणरहिता इत्यर्थः । पुनः कीदृशाः ? सिद्धिं वरगतिं गताः, सिद्धिनाम्नीं प्रधानगतिं प्राप्ताः । अत्र हि सिद्धानां भवप्रपञ्चोन्मुक्ता इति विशेषणेनाऽचलस्वभाव उक्तोऽस्ति ॥ ६३ ॥

अथ सिद्धानां कियत्यवगाहना भवतीत्याह-

उस्सेहो जस्स जो होइ, भवंमि चरमंमि य ।
तिभागहीणा तत्तो य, सिद्धाणोगाहणा भवे ॥ ६४ ॥

यस्य मनुष्यस्य चरमे भवेऽन्त्ये भवे मोक्षगमनार्हे जन्मनि यादृश उत्सेधो भवति, देहप्रमाणं भवति, ततो देहप्रमाणात्सिद्धानां-मोक्षप्राप्तानां तृतीयभागहीनाऽवगाहना भवेत् ॥ ६४ ॥

अथ सिद्धानां कालत आह-

एगत्तेण य साईया, अपज्जवसियावि य ।
पुहुत्तेण अणाईया, अपज्जवसियावि य ॥ ६५ ॥

ते सिद्धा एकत्वेनैकस्य कस्यचिन्नामग्रहणापेक्षया सादिकाः, अमुको मुनिस्तदा सिद्ध इत्यादि सादिकाः सिद्धा भवन्ति । च पुनस्ते सिद्धा अपर्यवसिता-अन्तरहिताः, मोक्षगमनादनन्तरमत्रागमनाऽभावादन्तरहिताः, ते सिद्धाः पृथक्त्वेन बहुत्वेन सामस्त्यापेक्षयाऽनादयोऽनन्ताश्च ॥ ६५ ॥

पुनस्तेषामेव स्वरूपमाह-

अरूविणो जीवघणा, नाणदंसणसन्निया ।
अउलं सुहं संपत्ता, उवमा जस्स नत्थि उ ॥ ६६ ॥

ते सिद्धा अरूपिणो वर्तन्ते, रूपरहितत्वेन रसगन्धस्पर्शानामप्यभावः, लेश्यारहिता अपि । पुनः कीदृशाः सिद्धाः ? जीवघनाः, जीवाश्च ते घनाश्च जीवघनाः, जीवाः सच्चिदुपयोगयुक्ताः घना अन्तररहितत्वेन जीवप्रदेशमयाः, पुनः कीदृशाः ? ज्ञानदर्शनसंज्ञिताः, केवलज्ञानकेवलदर्शने एव संज्ञा जाता येषां ते ज्ञानदर्शनसंज्ञिताः, ज्ञानदर्शनोपयोगवन्त इत्यर्थः । यतः-कर्मक्लेशविमोक्षाच्च मोक्षे सुखमनुत्तरम् ॥ ६६ ॥

अथ सिद्धानां क्षेत्रस्वरूपमाह-

लोएगदेसे ते सव्वे, नाणदंसणसन्निया ।
संसारपारनिच्छिन्ना, सिद्धिं वरगइं गया ॥ ६७ ॥

ते सिद्धाः सर्वलोकैकदेशे तिष्ठन्ति इत्यनेन-"मुक्ताः सर्वत्र तिष्ठन्ति, व्योमवत्यापवर्जिताः ।" इति सर्वगतत्वमतमपास्तम् । तथात्वे सति सर्वत्र वेदनादिप्रसङ्गात् । पुनः

कीदृशाः ? ज्ञानदर्शनसंज्ञिता इत्यनेन केषाञ्चिद् ज्ञानसंज्ञा, केषाञ्चिद्दर्शनसंज्ञा जैनमते तु सर्वेषां सिद्धानामुभे ज्ञानदर्शने संज्ञे जाते स्तः, ज्ञानदर्शनमयाः सिद्धा इत्यर्थः । पुनः कीदृशाः ? संसारपारनिस्तीर्णाः, पुनरागमनाभावात्संसारमतिक्रान्ता इत्यनेन केषाञ्चिन्मते भक्तोद्धारार्थं, दानवानां विनाशार्थं भूयोभूयो भूमाववतीर्य भक्तकार्यं विधाय मुक्तिं व्रजति प्रभुरिति मतमपि निराकृतम् । पुनः कीदृशाः ? सिद्धि-वरगतिं गता इत्यनेन क्षीण-कर्माणोऽपि लोकाग्रगमनस्वभावेनोत्पत्तिसमये सक्रियत्वमप्यस्तीति गाथाभिप्रायः ॥६७॥

अथ सिद्धानभिधाय संसारिणो जीवानाह-

संसारत्था य जे जीवा, दुविहा ते वियाहिया ।
तसा य थावरा चेव, थावरा तिविहा तहिं ॥ ६८ ॥

ये जीवाः संसारस्थास्ते जीवा द्विविधास्तीर्थकरैर्व्याख्याताः । ते के ? त्रसाः स्थावराश्च, एते द्विविधाः । अथ द्वैविध्ये सत्यप्यल्पकथनत्वात्पूर्वं स्थावराणां निर्देशं करोति । तत्र स्थावरेषु त्रिविधाः स्थावराः सन्ति ॥ ६८ ॥

पुढवी आउजीवा य, तहेव य वणस्सई ।
एच्चेए थावरा तिविहा, तेसिं भेए सुणेह मे ॥ ६९ ॥

स्थावरास्त्रिविधाः, जीवशब्दस्य प्रत्येकं सम्बन्धात् पृथ्व्येव जीवाः पृथ्वीजीवाः, आपो जलं, ते एव जीवा अम्बुजीवाश्च, पृथिवी चापश्च पृथिव्यापस्तद्रूपा जीवाः पृथिव्याप्जीवाः, तथैव च वनस्पतिर्वनस्पतिजीवाः, जीवशरीरयोरन्योन्यानुगतत्वेन कथञ्चिद्भेदात्पृथिव्याप्वनस्पतिषु जीवव्यपदेशः । इत्येते पृथिव्यादयस्त्रिविधाः स्थावराः सन्ति । तेषां त्रयाणां स्थावराणां भेदान् 'मे' मम कथयतस्त्वं शृणु ॥ ६९ ॥

पृथिवीभेदानाह-

दुविहा पुढवीजीवा, सुहमा बायरा तहा ।
पज्जत्तमपज्जत्ता, एवमेए दुहा पुणो ॥ ७० ॥

पृथिवीजीवास्तु द्विविधा उक्ताः, सूक्ष्माश्चर्मचक्षुरगोचराः केवलज्ञानगम्याः, तथा पुनः पृथ्वीजीवा बादराः, ते च पर्याप्ता अपर्याप्ताश्च, आहारशरीरेन्द्रियोच्छ्वासनिःश्वासरूपाभिः पर्याप्तिभिश्चतसृभिः शक्तिभिर्युक्ताः पर्याप्ताः, तथा तेभ्यो विपरीता अपर्याप्ताः । सूक्ष्माः पृथ्वीजीवाः पर्याप्ताः अपर्याप्ताः, बादराः पृथ्वीजीवाः पर्याप्ता अपर्याप्ताः, एवं द्विविधाः ॥ ७०॥

तत्र पुनरेषामुत्तरभेदानाह-

बायरा जे उ पज्जत्ता, दुविहा ते वियाहिया ।
सण्हा खरा य बोधव्वा, सण्हा सत्तविहा तहिं ॥ ७१ ॥

ये बादराः पृथ्वीजीवाः पर्याप्ता उक्तास्ते द्विविधा व्याख्याताः । एके बादराः पृथ्वीजीवाः पर्याप्ताः श्लक्ष्णाश्चूर्णरूपाः, च पुनरेके बादराः पृथ्वीजीवा पर्याप्ताः खराः कठिनाश्च बोधव्याः । तत्र श्लक्ष्णखरयोः पृथ्वीजीवयोर्मध्ये श्लक्ष्णाः पृथ्वीजीवाः सप्तविधा ज्ञातव्याः ॥ ७१ ॥

सप्तविधत्वमेवाह-

किण्हा नीला य रुहिरा य, हालिद्दा सुक्किला तहा ।
पंडुपणगमट्टिया, खरा छत्तीसईविहा ॥ ७२ ॥

कृष्णाः श्यामवर्णाः, नीला नीलवर्णाः, रुधिरा रक्तवर्णाः, हारिद्राः पीतवर्णाः, शुक्ला धवलवर्णाः, तथा 'पंडुत्ति' पाण्डुवर्णा ईषच्छुभ्रा इत्यर्थः । इत्थं वर्णभेदेन षड्विधत्वमुक्तम् । इह च पाण्डुग्रहणं कृष्णादिवर्णानामपि स्वस्थानभेदान्तरसम्भवसूचकम् । सप्तमो भेदस्तु पनकमृत्तिकारूपः पनको ह्यत्यन्तसूक्ष्मत्वेनाकाशे वर्तमानो लोके पृथ्वीत्वेनारूढस्तस्माद्भेदत्वेन गृहीतः । इत्यनेन श्लक्ष्णा पृथ्वी सप्तविधोक्ता । अथ खरा पृथ्वी षट्त्रिंशद्विधा तीर्थङ्करैर्व्याख्याताः ॥ ७२ ॥

तान् भेदानाह-

पुढवी य सक्करा वालुया य, उवले सिला य लोणोसे ।
अय तउय तंबसीसग, रुप्प सुवण्णे य वयरे य ॥ ७३ ॥

हरियाले हिंगुलुए, मणोसिला सीसगंजणपवाले ।
अब्भपडलब्भवालुय, बायरकाए मणिविहाणा ॥ ७४ ॥

गोमिज्जाए य रुयगे, अंके फलिहे य लोहियक्खे य ।
मरगयमसारगल्ले, भुयमोयग इंदनीले य ॥ ७५ ॥

चंदणगेरूयहंसगब्भ-पुलए सोगंधिए य बोधव्वे ।
चंदप्पहवेरुलिए, जलकंते सूरकन्ते य ॥ ७६ ॥

पृथ्वी शुद्धा लिम्पनयोग्या १, शर्करा [1]मरुण्डादिरूपा कर्करमयी २, वालुका च स्थलीभूमौ प्रसिद्धा ३, उपलो [2]गण्डशैलपाषाणखण्डादिरूपा ४, शिला बृहत्पाषाणमयी ५, 'लोणोसे' इति लवणोषे, लवणं च उषा च लवणोषे, लवणं समुद्रादिभ्य उत्पन्नम्, तदपि पृथ्वीरूपमेव ६, ऊषा उषरमयी ६, अयो लोहं ८, त्रपुकं [3]कस्तीरं ९, ताम्रं प्रसिद्धं

१ 'मरडीया' इति गुर्जरभाषायां ।
२ पर्वतमांथी छूटा पडेला मोटा पथ्थर ।
३ कलाइ इति गुर्जरभाषायाम् ।

१०, सीसकं ११, रूप्यं १२, सुवर्णं १३, अयश्च त्रपुकं च ताम्रं च सीसकं च रूप्यं च सुवर्णं चायस्त्रपुकताम्रसीसकरूप्यसुवर्णानि, एतेऽपि पृथ्वीभेदा इत्यर्थः । च पुनर्वज्रं हीरकं १४ इति चतुर्दश भेदाः ॥ ७३ ॥ हरितालः १५, हिङ्गुलः १६, मनःशिला १७, प्रसिद्धा । सीसको धातुविशेषो जसद इति लोके १८, अञ्जनं सुरमकं १९, प्रवालं विद्रुमं २०, अभ्रपटलं [1]भोडल इति प्रसिद्धः २१, अभ्रवालुका अभ्रपटलमिश्रा वालुकाऽभ्रवालुका २२, बादरकाये-बादरपृथ्वीकायेऽमी भेदा उक्ताः । अथ मण्यभिधानापि पृथ्व्यस्ति, तस्मान्मण्यभिधानानि मणीनां नामान्युच्यन्ते, मणिभेदा अपि पृथ्वीभेदा एवेत्यर्थः ॥ ७४ ॥ कानि कानि मणिनामानि ? गोमयको गोमेधमणिः २३, च पुना स्त्रवको स्त्रवकनामा मणिः २४, अङ्करत्नं २५, स्फटिकरत्नं २६, लोहिताख्यो मणिः २७, मरकतमणिः २८, मसारगल्लश्च २९, भुजगमोचको मणिः ३०, च पुनरिन्द्रनीलरत्नं ३१, चन्दनः ३२, गैरिकनामा मणिः ३३, हंसगर्भः ३४, पुलकः ३५, पुनः सौगन्धिको मणिर्बोधव्यः ३६, चन्द्रप्रभः ३७, वैडूर्यो मणिः ३८, जलकान्तो मणिः ३९, सूर्यकान्तो मणिः ४०, अत्रैतासु गाथासु खरपृथिव्याः- षट्त्रिंशद्भेदा उक्ताः, गणनायां तु चत्वारिंशद्भेदाः सञ्जातास्तत्कथं ? तत्रोत्तरम्-अत्र हि रत्नानां केचिद्भेदाः केषुचिद्रत्नभेदेष्वन्तर्भवन्ति, तस्मान्नात्र कश्चिद्वीतरागवचनेषु दोषावकाशः ॥ ७५-७६ ॥

एए खरपुढवीए, भेया छत्तीसमाहिया ।
एगविहमणाणत्ता, सुहुमा तत्थ वियाहिया ॥ ७७ ॥

एते खरपृथिव्या भेदाः षट्त्रिंशत्समाख्यातास्तीर्थकरैरुक्ताः, पृथ्वीभेदात्पृथ्वीस्था जीवा अपि भिन्ना भिन्नाः, तत्र सूक्ष्मबादरपृथ्वीजीवेषु सूक्ष्मपृथ्वीजीवा एकविधा अनानात्वास्तीर्थकरैर्व्याख्याताः । न विद्यते नानात्वं येषां तेऽनानात्वा अबहुभेदा उक्ता इत्यर्थः । पूर्वं सूक्ष्मबादरौ मुख्यभेदौ द्वौ पृथ्वीकायजीवानामुक्तौ । एते हि सूक्ष्माणां बादराणामवान्तरभेदा उक्ताः, मुख्यवृत्त्या त्वेक एव सूक्ष्मो बादरो वैक एव भेदोऽस्ति, नानात्वं नास्तीत्यर्थः ॥७७॥

अथ तान् पृथ्वीजीवान् क्षेत्रत आह-

सुहुमा सव्वलोयंमि, लोयदेसे य बायरा ।
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥ ७८ ॥

सूक्ष्मा ये पृथ्वीकायजीवास्ते सर्वस्मिंश्चतुर्दशरज्ज्वात्मके लोके सन्त्यभिव्याप्य स्थिताः सन्ति । बादराः पृथ्वीकायजीवा लोकदेशे तिष्ठन्ति, लोकस्य देशो-विभागो लोकदेशस्तस्मिंस्तिष्ठन्ति, बादरा हि क्वचित्कस्मिंश्चित्प्रदेशे कदाचित्सम्भवन्ति, कदाचित्कस्मिंश्चित्स्थाने न सम्भवन्ति । 'इत्तो' इति इतः क्षेत्रप्ररूपणानन्तरं तेषां पृथ्वीकायजीवानां चतुर्विधं कालविभागं-कालतो भेदं वक्ष्ये ॥ ७८ ॥

---

१ अबरख ।

संतइं पप्पऽणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसिया वि य ॥ ७९ ॥

सन्ततिं प्राप्य-प्रवाहमाश्रित्यैते सूक्ष्मा बादराश्च पृथ्वीकायजीवा अनादय आदिरहिताः, च पुनरपर्यवसिता अप्यन्तररहिता अपि, स्थितिं प्रतीत्य, भवस्थितिकायस्थितिरूपां स्थितिमाश्रित्य, संसारवर्त्ती जीवः संसारे पृथ्वीकायान्तर्वर्त्ती सन् पृथ्वीकाये कियत्कालं तिष्ठतीति स्थितिविचारमाश्रित्य जीवाः सादिकाः सपर्यवसिताश्चापि वर्तन्ते ॥ ७९ ॥

बावीससहस्साइं, वासाणुक्कोसिया भवे ।
आउठिई पुढवीणं, अंतोमुहुत्तं जहन्निया ॥ ८० ॥

असंखकालमुक्कोसं, अंतोमुहुत्तं जहन्निया ।
कायठिई पुढवीणं, तं कायं तु अमुंचओ ॥ ८१ ॥

पृथ्वीनां - पृथ्वीकायजीवानां वर्षाणां द्वाविंशतिसहस्राण्युत्कृष्टायुः स्थितिर्भवेत्, जघन्यिका चान्तर्मुहूर्तं स्थितिर्भवेत् ॥ ८० ॥

भवस्थितिमुक्त्वा कायस्थितिं वदति-

'असंखेति' पृथ्वीनामिति पृथ्वीकायजीवानां पृथ्वीकायममुञ्चतां पृथ्वीकाये स्थितिः संसारे चेद्भवति तर्ह्युत्कृष्टाऽसङ्ख्यकालं स्थितिर्भवेत्, जघन्यिका चान्तर्मुहूर्तं स्थितिर्भवेत्, कोऽर्थः ? यदि पृथ्वीकायस्थो जीवः पृथ्वीकायतश्च्युत्वा पुनः पुनर्निरन्तरं पृथ्वीकाये एवोत्पद्यते, तदोत्कृष्टमसङ्ख्यं कालं यावत्तिष्ठति, जघन्यं त्वन्तर्मुहूर्तं तिष्ठतीति भावः । इत्थं द्विविधाया अपि स्थितेः सादिपर्यवसितत्वमुक्तम् ॥ ८१ ॥

अथ कालस्यान्तर्गतमेव कालान्तरमाह-

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
विजढम्मि सए काए, पुढवीजीवाणमंतरं ॥ ८२ ॥

पृथ्वीजीवानां स्वकीये काये 'विजढंमि' इति त्यक्ते सत्युत्कृष्टमनन्तं कालमन्तरं भवति, जघन्यकमन्तरमन्तर्मुहूर्तं भवति । कोऽर्थः ? यदा हि पृथ्वीकायस्थो जीवः पृथ्वीकायाच्च्युत्वाऽपरस्मिन् काये उत्पद्येत, ततश्च्युत्वा पुनः पृथ्वीकाये एवोत्पद्येत तदा कियदन्तरं भवति ? उत्कृष्टमनन्तकालं, जघन्यमन्तर्मुहूर्तम् । यदा पृथ्वीजीवस्य पृथ्वीकायाच्च्युतिर्भूत्वा वनस्पतिकाये उत्पत्तिः स्यात्तदाऽनन्तकालस्यान्तरं जायते, वनस्पतिकायस्थजीवस्यानन्तकालस्थितित्वात्, जघन्यमन्तरमन्तर्मुहूर्तं भवति ॥ ८२ ॥

एतान्येव भावत आह-

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ ८३ ॥

एतेषां पृथ्वीजीवानां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतः संस्थाननामतश्चापि सहस्रशो विधानानि-भेदा भवन्ति । सहस्रश इत्युपलक्षणम्, वर्णादितारतम्यस्य बहु-भेदत्वेनासङ्ख्यातभेदत्वाद्वर्णादीनां भावरूपत्वात् ॥ ८३ ॥

अथाप्कायभेदानाह-

दुविहा आउजीवा उ, सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता, एवमेए दुहा पुणो ॥ ८४ ॥

बायरा जे उ पज्जत्ता, पंचहा ते पकित्तिया ।
सुद्धोदए य उस्से य, हरितणू महिया हिमे ॥ ८५ ॥

एगविहमणाणत्ता, सुहुमा तत्थ वियाहिया ।
सुहुमा सव्वलोयंमि, लोयदेसे य बायरा ॥ ८६ ॥

तिसृणां गाथानामर्थः-अब्जीवास्तु द्विविधाः, सूक्ष्मास्तथा बादरा अपि, पर्याप्ता अपर्याप्ताश्च, एवमेते द्विविधाः पुनर्वर्तन्ते इति शेष ॥ ८४ ॥

अथ पुनर्बादरा ये पर्याप्ता अब्जीवास्ते पञ्चधाः प्रकीर्तिताः, शुद्धोदकं मेघसमुदा-देर्जलम्, अवश्यायः शरदादिषु ऋतुषु प्राभातिकसूक्ष्मवर्षारूपः, हरितनुः स पृथ्वीभवस्तृ-णाग्रबिन्दुः, महिका घूमरी, गर्भमासेषु सूक्ष्मधूमरूपजलवृष्टिरूपा, 'हिमे' इति हिमजलं खन्धारदेशादौ प्रसिद्धम् ॥ ८५ ॥ तत्र सूक्ष्मा अप्कायजीवा एकविधा अनानात्वास्तीर्थकरै-र्व्याख्याताः । तत्र सूक्ष्मा अप्कायजीवाः सर्वस्मिंश्चतुर्दशरज्वात्मके लोके वर्तन्ते बादरा अप्कायजीवा लोकस्यैकदेशे वर्तन्ते ॥ ८६ ॥

संतइं पप्पणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ ८७ ॥

सन्ततिं-प्रवाहमार्गमाश्रित्याप्कायजीवा अनादिकाः, पुनरपर्यवसिता अपि, स्थितिं-भवस्थितिं कायस्थितिं चाश्रित्य सादिकास्तथा सपर्यवसिता अवसानरहिता अपि वर्तन्ते ॥८७॥

सत्तेव सहस्साइं, वासाणुक्कोसिया भवे ।
आउठिई आऊणं, अंतोमुहुत्तं जहन्नियं ॥ ८८ ॥

अपामप्कायजीवानां सप्तैव सहस्राणि वर्षाणामुत्कृष्टायुषः स्थितिर्भवेत्, जघन्यतोऽन्तर्मुहूर्तं भवेत् ॥ ८८ ॥

असंखकालमुक्कोसं, अंतोमुहुत्तं जहण्णिया ।
कायठिई आऊणं, तं कायं तु अमुंचओ ॥ ८९ ॥

अपामप्कायजीवानां स्वं स्वकायमर्थादप्कायममुञ्चतामुत्कृष्टा कायस्थितिरसङ्ख्यकालं भवति । जघन्यिका कायस्थितिरन्तर्मुहूर्तं भवति ॥ ८९ ॥

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढम्मि सए काए, आउजीवाणमंतरं ॥ ९० ॥

अप्कायजीवानां स्वकीये काये त्यक्ते सत्यपरस्मिन् काये उत्पद्य पुनः स्वकीये काये उत्पत्तिः स्यात्तदोत्कृष्टमन्तरमनन्तकालं भवति । जघन्यकमन्तरमन्तर्मुहूर्तं भवति । वनस्पतिकाये जीवोऽनन्तकालं तिष्ठति, तदाऽनन्तकालमन्तरं भवतीति भावः ॥ ९० ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ ९१ ॥

एतेषामप्कायजीवानां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि संस्थाननामतश्चापि सहस्त्रशो बहवो भेदा भवन्ति ॥ ९३ ॥

अथ वनस्पतिजीवानाह-

दुविहा वणस्सई जीवा, सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता, एवमेए दुहा पुणो ॥ ९२ ॥

वनस्पतिजीवा द्विविधाः, सूक्ष्मास्तथा बादराः, ते सूक्ष्मा बादराश्चापि पर्याप्ता अपर्याप्ताश्च द्विविधा आख्याताः ॥ ९२ ॥

बायरा जे उ पज्जत्ता, दुविहा ते वियाहिया ।
साहारणसरीरा य, पत्तेगा य तहेव य ॥ ९३ ॥

ये बादरा वनस्पतिजीवाः पर्याप्तास्तेऽपि द्विविधा व्याख्याताः, साधारणशरीराश्च पुनः प्रत्येका वनस्पतिजीवाः ॥ ९३ ॥

पत्तेयसरीरा उ णेगहा ते पकित्तिया ।
रुक्खा गुच्छा य गुम्मा य, लया वल्ली तणा तहा ॥ ९४ ॥

तत्र साधारणशरीरवनस्पतिप्रत्येकशरीरवनस्पत्योर्मध्ये प्रत्येकवनस्पतिजीवास्त्वनेकधाः प्रकीर्त्तिताः, ते के ? उच्यन्ते—वृक्षाः सहकारादयः १, गुच्छा वृन्ताककण्टकारिकाद्याः २, गुल्मा नवमालतीप्रमुखाः ३, लताश्चम्पकाद्याः ४, वल्ल्यः कुष्माण्डाद्याः ५, तथा तृणाः कुशाद्याः ६ ॥ ९४ ॥

वलया पव्वया कुहणा, जलरुहा [१]ओसही तहा ।
हरियकाया बोधव्वा, पत्तेया इइ आहिआ ॥ ९५ ॥

वलया नालिकेरकदल्याद्याः, इह तेषां शाखान्तराऽभावेन लतारूपत्वमुक्तम्, ७, पर्वजा ईक्ष्वाद्याः ८, कुहना भूमिस्फोटाद्याः ९, जलरुहाः कमलाद्याः १०, तथौषधयः शालिप्रमुखा ११, च पुनर्हरितकायाश्च तन्दुलीयकाद्याः १२, बोधव्या । इत्यमुना प्रकारेण प्रत्येकाः प्रत्येकवनस्पतिजीवा आख्याताः ॥ ९५ ॥

अथ चतसृभिर्गाथाभिः साधारणवनस्पतीनां नामान्याह-

साहारणसरीरा उ, णेगहा ते पकित्तिया ।
आलुए मूलए चेव, सिंगबेरे तहेव य ॥ ९६ ॥

हरिलीसिरिली सिस्सिरिलि, जावईके य कंदली ।
पलंदूलसण कंदे य, कंदली य कुहुव्वए ॥ ९७ ॥

लोहिणी हूयच्छी हूय, तुहग्गय तहेव य ।
कण्हे य वज्जकंदे य, कंदे सूरणए तहा ॥ ९८ ॥

अस्सकन्नी य बोधव्वा, सीहकन्नी तहेव य ।
मुसंढी य हलिद्दे य, णेगहा एवमाइओ ॥ ९९ ॥

ये तु साधारणशरीराः साधारणवनस्पतिजीवा अनन्तकायवनस्पतिजीवास्तेऽप्यनेकधा अनेकप्रकाराः प्रकीर्तिताः, तेषां च मध्ये केषाञ्चित्प्रसिद्धानां नामान्याह-आलुकः, आलूपिण्डालुरक्तालुककन्दः १, तथा मूलकं प्रसिद्धं २, श्रृङ्गबेरकमार्द्रकं ३, तथैव च ॥९६॥ हरिलीनामा कन्दः ४, सिरिलीनामा कन्दः ५, सिस्सिरिलीनामापि कन्दः ६, एते कन्दविशेषाः । यावतिकोऽपि कन्दविशेषः ७, कन्दली कन्दः ८, पलाण्डुकन्दः ९, यो देशविशेषे मांसरूपः कन्दो भवति । लसूनकन्दस्तु प्रसिद्धः १०, कुहुव्रतकन्दलीकन्दोऽपि कन्दविशेषः ११, ॥ ९७ ॥ लोहिनीकन्दः १२, हुताक्षीकन्दः१३, हूतकन्दः १४, तुहकन्दः १५, कृष्णकन्दः

१ ओसहीतिणा-अन्यसंस्करणे, तत्र व्याख्याः-औषध्याः-फलपाकान्तास्तदूपाणि तृणानि औषधितृणानि-शाल्यादीनि बृहद्वृत्त्यां प० ६ ९२ A ।

१६, वज्रकन्दः १७, सूरणकन्दस्तथा १८ ॥ ९९ ॥ अश्वकर्णी कन्दो बोधव्यः १९, तथैव सिंहकर्णीकन्दः २०, मुसण्ढीकन्दः २१, हरिद्राकन्दः २२, चैवमादिका अनेकधाः कन्दजातयो ज्ञेयाः ॥ ९९ ॥ साधारणलक्षणमिदं-

"[1]गूढसिरागं पत्तं सच्छीरं, जं च होइ निच्छीरं ।
जंपि य पणट्ठसंधिं, अणंतजीवं वियाणाहि ॥ १ ॥"

एगविहमनाणत्ता, सुहुमा तत्थ वियाहिया ।
सुहुमा सव्वलोगंमि, लोगदेसे य बायरा ॥ १०० ॥

सूक्ष्मा वनस्पतिकायजीवा एकविधा अनानात्वा व्याख्याताः, तत्र सूक्ष्मा वनस्पतिजीवा निगोदनामानः सर्वस्मिंश्चतुर्दशरज्ज्वात्मके लोके व्याप्ताः सन्तिः । बादरा वनस्पतिजीवा लोकदेशेऽभिव्याप्य स्थिताः सन्ति । कुत्रचित्प्रदेशे भवन्ति, कुत्रचित्प्रदेशे न भवन्तीत्यर्थः ॥ १०० ॥

संतइं पप्पऽणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ १०१ ॥

सन्ततिं प्राप्यैते वनस्पतिजीवा अनादयः पुनरपर्यवसिताः सन्ति । कायस्थितिं च प्रतीत्याश्रित्य सादिकाः सपर्यवसिताश्च सन्तीत्यर्थः ॥ १०१ ॥

दस चेव सहस्साइं, वासाणुक्कोसिया भवे ।
वणस्सईण आउं तु, अंतोमुहुत्तं जहण्णिया ॥ १०२ ॥

वनस्पतीनां प्रत्येकवनस्पतिजीवानां वर्षाणां दश सहस्राण्युत्कृष्टायुःस्थितिर्भवेत् । जघन्यिका स्थितिश्चान्तर्मुहूर्तं भवेत् । साधारणानां तु जघन्यत उत्कृष्टतश्चान्तर्मुहूर्तमेव स्थितिरस्ति, तस्मादत्र प्रत्येकवनस्पतिजीवानामेव स्थितिर्ज्ञेया ॥ १०२ ॥

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
कायठिई पणगाणं, तं कायं तु अमुंचओ ॥ १०३ ॥

पनकानां पनकोपलक्षितफूलणिवनस्पतिजीवानां तं स्वकीयं कायममुञ्चतां कायस्थितिरुत्कृष्टतोऽनन्तं कालं, जघन्यतश्चान्तर्मुहूर्तं कायस्थितिर्ज्ञेया । कोऽर्थः ? यदा हि पनकजीवः पनकाच्च्युत्वा पुनरनन्तरत्वेन पनकत्वे एवोत्पद्यते, तदैवमुत्कृष्टतोऽनन्तकालं तिष्ठति । जघन्यतोऽन्तर्मुहूर्तमेव तिष्ठतीति भावः । पनकानां चेह सामान्येन वनस्पतिजीवान्निगोदत्वेनोत्कृष्टतोऽनन्तकालमुच्यते, विशेषापेक्षया हि प्रत्येकवनस्पतीनां तथा निगोदानां बादराणां सूक्ष्माणां वाऽसङ्ख्येयकालैवाऽवस्थितिः । उक्तं च भगवत्याम्-

---

१ गूढशिराकं पत्रं, सक्षीरं यच्च भवति निक्षीरम् ।
यदपि प्रणष्टसन्धिकमनन्तं जीवं विजानाहि ॥ १ ॥

"[1]पत्तेयसरीरबायरवणस्सइकाइयाणं भंते केवइयं कालं काइठिई पण्णत्ता ? गोयमा ! जहन्नेण अन्तोमुहुत्तं, उक्कोसेणं सत्तरिं सागरोवमकोडाकोडीओ । निगोदेणं भंते निओदेत्ति कालतो किइच्चिरं होति ? जहन्नेणं तं चेव, उक्कोसेणं अनन्तं कालंति" ॥ १०३॥

अथ कालस्यान्तरमाह-

असंखकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
विजढंमि सए काए, पणगजीवाणमंतरं ॥ १०४ ॥

पनकजीवानां स्वकीये काये त्यक्ते सत्यपरस्मिन् पृथिव्यादिषु कायेषूत्पद्य पुनः पनकत्वेनोत्पद्यमानानामुत्कृष्टमसङ्ख्यकालमन्तरं भवति, जघन्यमन्तरमन्तर्मुहूर्तं भवति । इति कालान्तरं प्रतिपादितम् ॥ १०४ ॥

अथ प्रकृतमुपसंहृत्याग्रेतनं सम्बन्धं सूचयति-

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ १०५ ॥

एतेषां सूक्ष्मबादरवनस्पतिजीवानां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्त्रशो विधानानि भवन्ति । सहस्त्रशः शब्देनासङ्ख्येया अनन्ताश्च भेदा भवन्तीत्युच्यते ॥१०५॥

इच्चेए थावरा तिविहा, समासेण वियाहिया ।
इत्तो य तसे तिविहे, वुच्छामि अणुपुव्वसो ॥ १०६ ॥

इत्यमुना प्रकारेणैते त्रिविधाः स्थावराः पृथ्वीजलवनस्पतिजीवाः, तिष्ठन्तीत्येवंशीलाः स्थावराः समासेन व्याख्याताः, विस्तरतोऽमी बहुभेदाः सन्ति । इतोऽनन्तरं त्रिविधांस्त्रसानानुपूर्वशोऽनुक्रमेण वक्ष्यामि ॥ १०६ ॥

तेउ वाऊ य बोधव्वा, ओराला य तसा तहा ।
इच्चेए तसा तिविहा, तेसिं भेए सुणेह मे ॥ १०७ ॥

तेजोयोगात्तेजांस्यग्नयस्तद्वर्तिनो जीवा अपि तथोक्ताः, एवं वायवश्च, तथा ओराला इत्युदारा एकेन्द्रियापेक्षया स्थूला द्वीन्द्रियादयश्च त्रसाः, इत्येते त्रसास्त्रिविधाः सन्ति । तेषां तेजोवायुद्वीन्द्रियादीनां च भेदान् मे कथयतो यूयं शृणुतेति । अत्र यद्यपि तेजोवाय्वोश्च स्थावरनामकर्मोदयेऽपि त्रसनमस्ति, ततस्तेजोवाय्वोर्गतिमत्त्वादुदाराणां च लब्धितोऽपि त्रसत्वमस्ति, यतो हि त्रस्यन्ति-देशाद्देशान्तरं सङ्क्रामन्तीति त्रसा इति व्युत्पत्तिः ॥ १०७ ॥

---

१ प्रत्येकशरीरबादरवनस्पतिकायिकानां भदन्त ! कियन्तं कालं कायस्थितिः प्रज्ञप्ता ? गौतम ! जघन्येन अन्तर्मुहूर्तम्, उत्कृष्टेन सप्ततिः सागरोपमकोटीकोट्यः । निगोदानां भदन्त ! निगोद इति कालतः कियच्चिरं भवति ? जघन्येन तच्चैव, उत्कर्षेण अनन्तं कालमिति ॥

दुविहा तेउजीवा य, सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता, एवमेए दुहा पुणो ॥ १०८ ॥

तेजोजीवाः सूक्ष्मास्तथा बादराश्च, ते पुनः पर्याप्ताऽपर्याप्तभेदेन द्विविधाः सन्ति । सूक्ष्मा अग्निजीवाः पर्याप्ता अपर्याप्ताश्च वर्तन्ते ॥ १०८ ॥

बायरा जे उ पज्जत्ता, णेगहा ते वियाहिया ।
इंगाले मुम्मुरे अगणी, अच्चि जाला तहेव य ॥ १०९ ॥

ये बादराः पर्याप्ता अग्निजीवास्तेऽनेकधा व्याख्याताः । अङ्गारः प्रज्ज्वलितेन्धन खण्डरूपः, मुर्मुरो भस्ममिश्राग्निकणरूपोऽग्निः अग्निश्चोक्तभेदादतिरिक्तः, अर्चिः प्रदीपादेः शिखा, ज्वाला छिन्नमूला या ज्वालोपरिष्टात् स्फुरन्ती दृश्यते, तथैवेति पादपूरणे ॥ १०९ ॥

उक्का विज्जू य बोधव्वा, णेगहा एवमाइआ ।
एगविहं अणाणत्ता, सुहुमा ते वियाहिया ॥ ११० ॥

उल्काग्निस्तारावदाकाशात्पतन् यो दृश्यते, विद्युत्तडिदग्निः, एवमादिका अनेकधा अग्निजीवा बोधव्याः । तेऽग्नयः सूक्ष्मा एकविधा एव, अनानात्वा व्याख्याताः ॥ ११० ॥

सुहुमा सव्वलोगंमि, लोगदेसे य बायरा ।
एत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥ १११ ॥

सूक्ष्माग्निजीवाः सर्वस्मिंश्चतुर्दशरज्ज्वात्मके लोके सन्ति, बादरा अग्निकायजीवा लोकदेशे, चतुर्दशरज्ज्वात्मकलोकस्यैकदेशे सार्धद्वितीयद्वीपे सन्ति, इति क्षेत्रविभाग उक्तः । इतोऽनन्तरं तेषामग्निकायजीवानां चतुर्विधं कालविभागं वक्ष्ये ॥ १११ ॥

संतइं पप्पणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ ११२ ॥

अग्निकायजीवाः सन्ततिं प्राप्याऽनादिका-आदिरहितास्तथाऽपर्यवसिताः, स्थितिं प्रतीत्यायुराश्रित्य सादिकाः-सपर्यवसिता अपि अन्तेनापि सहिता वर्तन्ते ॥ ११२ ॥

तिन्नेव अहोरत्ता, उक्कोसेण वियाहिया ।
आउठिई तेऊणं, अंतोमुहुत्तं जहन्निया ॥ ११३ ॥

तेजसां-तेजोजीवानामुत्कृष्टेन त्रीण्यहोरात्राण्यायुःस्थितिर्व्याख्याता, जघन्यिका चायुः- स्थितिरन्तर्मुहूर्तं ज्ञेयेत्यर्थः ॥ ११३ ॥

भवस्थितिमुक्त्वा कायस्थितिमाह-

असंखकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
कायठिई तेऊणं, तं कायं तु अमुंचओ ॥ ११४ ॥

तेजसां तेजस्कायजीवानां स्वं कायममुञ्चतामुत्कृष्टमसङ्ख्यं कालं स्थितिर्भवति । तेजस्कायस्थो जीवो मृत्वाऽनन्तरं तेजस्काये एवोत्पद्यते तदाऽसङ्ख्यं कालं तेजस्काये तिष्ठतीत्यर्थः । जघन्यमन्तर्मुहूर्तं तिष्ठति ॥ ११४ ॥

अथ कालस्यान्तरं वदति-

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढम्मि सए काए, तेउजीवाणमंतरं ॥ ११५ ॥

तेजोजीवानां स्वकीये तेजस्काये त्यक्ते सत्युत्कृष्टमन्तरमनन्तकालम्, तेजस्काय-जीवास्तेजस्कायाच्च्युत्वाऽपरस्मिन् काये उत्पद्य पुनस्तेजस्काये उत्कृष्टमनन्तकालस्यान्तरेणोत्पद्यन्ते, जघन्यमन्तरं चेद्भवति, तदान्तर्मुहूर्तं भवति । नवसमयादारभ्य किञ्चिदूनं घटिकाद्वयमन्तर्मुहूर्तमुच्यते ॥ ११५ ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ ११६ ॥

एतेषामग्निकायजीवानां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्रशो विधानानि भेदा भवन्ति ॥ ११६ ॥

दुविहा वाउजीवा उ, सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता, एवमेए दुहा पुणो ॥ ११७ ॥

वायुजीवा द्विविधाः सूक्ष्मा बादराः, ते पुनः पर्याप्तापर्याप्तभेदेन द्विधा सन्ति ॥ ११७ ॥

बायरा जे उ पज्जत्ता, पंचहा ते पकित्तिया ।
उक्कलिया मंडलिया, घणगुंजा सुद्धवाया य ॥ ११८ ॥

ते बादरा वायुकायजीवाः पर्याप्तापर्याप्तास्ते पुनः पञ्चधा प्रकीर्त्तिताः, पञ्च कथनमात्रतः, वायवो ह्यनेकविधाः सन्ति । उत्कलिकावायुर्यः स्थित्वा स्थित्वा वाति १, मण्डलिकावायुर्तूलिकावायुः २, घनो घनरूपो वायुर्घनवायू रत्नप्रभाद्यधोवर्ती महावायुः ३, गुञ्जन् वातीति गुञ्जावायुः ४, शुद्धा वायवः स्तोकं स्तोकं ये वान्ति ५ ॥ ११८ ॥

संवट्टगवाया य, णेगहा एवमाईओ ।
एगविहमणाणत्ता, सुहुमा ते वियाहिया ॥ ११९ ॥

संवर्तकवायवस्ते, यैर्वायुभिस्तृणादय एकस्मात्स्थानात्स्थानान्तरं नीयन्ते, एवमादयोऽनेकधा व्याख्याताः, परं वायुजातिसामान्येनैकविधा अनानात्वास्तीर्थकरैस्ते सूक्ष्मवायुकायजीवा व्याख्याताः ॥ ११९ ॥

सुहुमा सव्वलोयम्मि, लोगदेसे य बायरा ।
एत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥ १२० ॥

सूक्ष्मा वायुकायजीवाः सर्वस्मिंश्चतुर्दशरज्ज्वात्मकलोके स्थिताः सन्ति । बादरा वायुकायजीवा लोकैकदेशे स्थिताः सन्तीति क्षेत्रविभाग उक्तः । इतोऽनन्तरं तेषां वायुकायजीवानां चतुर्विधं कालविभागं वक्ष्ये ॥ १२० ॥

संतइं पप्पणाइया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ १२१ ॥

सन्ततिं प्रवाहमार्गमाश्रित्य वायुकायजीवा अनादयस्तथाऽपर्यवसिता अपि । पुनः स्थितिं प्रतीत्य ते सादिकाः सपर्यवसिताश्च वर्तन्ते ॥ १२१ ॥

तिन्नेव सहस्साइं, वासाणुक्कोसिया भवे ।
आउठिई वाऊणं, अंतोमुहुत्तं जहन्निया ॥ १२२ ॥

वायूनां-वायुकायजीवानां त्रीणि वर्षसहस्राण्युत्कृष्टायुः स्थितिर्भवति । जघन्यिका स्थितिरन्तर्मुहूर्तं भवति ॥ १२२ ॥

अथ कायस्थितिमाह-

असंखकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
कायठिई वाउणं, तं कायं तु अमुंचओ ॥ १२३ ॥

वायूनां-वायुकायजीवानां स्वं कायं वायुकायममुञ्चतामसङ्ख्येयकालमुत्कृष्टा स्थितिर्व्याख्याता, जघन्यिका स्थितिरन्तर्मुहूर्तं भवति । वायुकायाच्च्युत्वा पुनर्वायुकाये एवोत्पद्यते, तदोत्कृष्टासङ्ख्येयकालं, जघन्यतश्चाप्यन्तर्मुहूर्तं स्थितिर्व्याख्यातेत्यर्थः ॥ १२३ ॥

अथ कालस्यान्तरमाह-

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढम्मि सए काए, वाउजीवाणमंतरं ॥ १२४ ॥

वायुजीवानां स्वकीये काये त्यक्ते सत्युत्कृष्टमनन्तकालं, जघन्यमन्तर्मुहूर्तमन्तरं भवति । एतावता वायुकायस्थो जीवो वायुकायाच्च्युत्वाऽपरस्मिन् काये उत्पद्य पुनर्वायु-काये

उत्पद्यते, तदा कियत्कालस्यान्तरं भवति ? तदोत्कृष्टतोऽनन्तकालस्यान्तरं भवति, जघन्यतश्चान्तर्मुहूर्तमन्तरं भवति ॥ १२४ ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइ सहस्ससो ॥ १२५ ॥

एतेषामुत्कलिकादिवायूनां वायुकायजीवानां वर्णतो गन्धतो रसतः स्पर्शतः संस्थाना-[1]देशतश्चापि सहस्त्रशो विधानानि - बहवो भेदा भवन्तीत्यर्थः ॥ १२५ ॥

एवं तेजोवायुत्रसानुक्त्वोदारत्रसानाह-

ओराला य तसा जे उ, चउव्विहा ते पकित्तिया ।
बेइंदिय तेइंदिय, चउरो पंचेन्दिया चेव ॥ १२६ ॥

ये उदारास्त्रसाद्वीन्द्रियादयस्ते चतुर्विधाः प्रकीर्तिताः, द्वीन्द्रियाः १, त्रीन्द्रियाः २, चतुरिन्द्रियाः ३, पञ्चेन्द्रियाः ४, चैव पादपूरणे । एते त्रसा उदारा-बृहच्छरीराः ॥ १२६ ॥

बेइंदिया य जे जीवा, दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता, एवमेए सुणेह मे ॥ १२७ ॥

द्वीन्द्रियाः कायरसनेन्द्रिययुक्ता जीवास्ते द्विविधाः प्रकीर्तिताः । ते पर्याप्ता अपर्याप्ताश्च, एवममुना प्रकारेणैते द्वीन्द्रियाः सन्तीति वाक्यं मे कथयतो यूयं श्रृणुत ॥ १२७ ॥

किमिणो सोमंगला चेव, अलसा मायवाहया ।
वासीमुहा य सिप्पीया, संखा संखणगा तहा ॥ १२८ ॥

पल्लोयाणुपल्लया चेव, तहेव य वराडगा ।
जलूगा जालगा चेव, चंदणा य तहेव य ॥ १२९ ॥

कृमयोऽपवित्रजीवाः, च पुनः सोमङ्गला द्वीन्द्रियजीवविशेषाः, अलसा वर्षाकाले मृत्तिकोद्भवाः, मातृवाहकाश्चूडेलगिजाई इति लोकप्रसिद्धिमन्तो द्वीन्द्रियजीवाः । वासीमुखा वासीसदृशवदना जीवाः, तथा शुक्तयो मुक्ताफलयोनयः, शङ्खा वृद्धजलजाः, तथा शङ्खनका लघवो वर्षासु मृत्तिकोद्भवाः ॥ १२८ ॥

पल्लकाश्च पुनरणुपल्लकास्तथैव वराटकाः कपर्दकाः, जलूका रुधिरपाः, जालका अपि द्वीन्द्रियजीवविशेषाः, तथैव चन्दना अक्षाः, येषामवयवाः स्थापनायां स्थाप्यन्ते । द्वीन्द्रीयाणां मध्ये केचित्प्रसिद्धाः केचिदप्रसिद्धाः सन्ति ॥ १२९ ॥

---

१ अपेक्षाए ।

इइ बेइंदिया एए, णेगहा एवमाइओ ।
लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ॥ १३० ॥

इत्यमुना प्रकारेणैते द्वीन्द्रिया एवमादयोऽनेकधा अनेकनामनो वर्तन्ते । सर्वे द्वीन्द्रिया जीवा लोकैकदेशे - चतुर्दशरज्ज्वात्मकलोकस्यैकदेशे जलाश्रयादौ तिष्ठन्ति, सर्वत्र न व्याख्याताः सन्ति ॥ १३० ॥

संतइं पप्पणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ १३१ ॥

ते द्वीन्द्रियाः सन्ततिं प्राप्य - प्रवाहमाश्रित्यानादयस्तथाऽपर्यवसिता अपि सन्ति । स्थितिं भवस्थितिं कायस्थितिं च प्रतीत्य सादिकाः सपर्यवसिता अपि सन्ति ॥ १३१ ॥

पूर्वं भवस्थितिं वदति-

वासाइं बारसे चेव, उक्कोसेण वियाहिया ।
बेइंदियआउठिई, अंतोमुहुत्तं जहन्निया ॥ १३२ ॥

द्वीन्द्रियाणां द्वादशवर्षाण्यायुःस्थितिरुत्कृष्टा व्याख्यातास्ति, जघन्यतोऽन्तर्मुहूर्तं, नवसमयादारभ्य किञ्चिदूनं घटिकाद्वयमायुषः स्थितिर्व्याख्याता ॥ १३२ ॥

अथ कायस्थितिमाह-

संखिज्जकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
बेइंदियकायठिई, तं कायं तुं अमुंचओ ॥ १३३ ॥

द्वीन्द्रियजीवानां तं स्वकीयकायं द्वीन्द्रियकायममुञ्चतां कायस्थितिरुत्कृष्टा सङ्ख्येयकालं स्थितिः, जघन्यतोऽन्तर्मुहूर्तं स्थितिरस्तीत्यर्थः ॥ १३३ ॥

अथ कालस्यान्तरमाह-

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
बेइंदियजीवाणं, अंतरेयं वियाहियं ॥ १३४ ॥

द्वीन्द्रियजीवानां स्वकीययोनित्यागे सत्यपरस्मिन् काये उत्पद्य पुनर्द्वीन्द्रिययोनावेवोत्पद्यते, तदोत्कृष्टमन्तरमनन्तकालं, जघन्यतोऽन्तर्मुहूर्तं कालस्यान्तरं भवति । यदा हि द्वीन्द्रियो जीवः स्वयोनेश्च्युत्वा वनस्पतावुत्पद्यते, तदानन्तं कालं तिष्ठति । ततोऽनन्तकालस्यान्तरं भवति । पश्चात्पुनर्द्वीन्द्रियत्वे उत्पद्यते इत्यर्थः ॥ १३४ ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ १३५ ॥

एतेषां द्वीन्द्रियाणां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्च सहस्त्रशो बहूनि विधानानि भेदा भवन्तीति शेषः ॥ १३५ ॥

अथ त्रीन्द्रियानाह-

तेइंदिया उ जे जीवा, दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता, तेसिं भेए सुणेह मे ॥ १३६ ॥

ये त्रीन्द्रियजीवाः शरीररसनाघ्राणेन्द्रियत्रययुक्तास्ते पर्याप्तापर्याप्तभेदेन द्विविधाः प्रकीर्त्तिताः । तेषां त्रीन्द्रियजीवानां भेदान् 'मे' मम कथयतो यूयं शृणुत ॥ १३६ ॥

कुंथुपिवीलिउद्दंसा, उक्कलुद्देहिया तहा ।
तणहारकट्ठहारा, मालूगा पत्तहारगा ॥ १३७ ॥

[1]कप्पासट्ठिमि जाया, तिंदुगा तओसमिंजगा ।
सदावरी य गुम्मी य, बोधव्वा इंदगायगा ॥ १३८ ॥

इंदगोवगमाईया, णेगविहा एवमाईओ ।
लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ॥ १३९ ॥

'कुंथुपिवीलिउद्दंसा' कुन्थुर्लघुशरीरस्त्रीन्द्रियजीवः, पिपीलिः कीटिका, उद्दंसास्त्रीन्द्रियजातिविशेषाः, उत्कलिको जन्तुविशेषः, तथोपदेहिकातृणहारकाष्ठहारा एतेऽपि त्रीन्द्रियजीवविशेषाः, मालूकाः पत्रहारकाः, एतेऽपि त्रीन्द्रियजीवविशेषाः ॥ १३७ ॥ कर्पासास्थिजातास्तिन्दुकाः, पुनस्तन्तुसमिंजिका अपि त्रीन्द्रियजीवविशेषाः, सदावरी, च पुनर्गुल्मीति यूकाः, तथेन्द्रकायका इत्यपि कुत्रचिल्लोकप्रसिद्धाः ॥ १३८ ॥ इन्द्रगोपकादिकाः, इन्द्रगोपको ममोल इति प्रसिद्धः । एवमादिकास्त्रीन्द्रिया अनेकधा जीवास्ते सर्वे लोकैकदेशे व्याख्याताः ॥ १३९ ॥

संतइं पप्पणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ १४० ॥

एते त्रीन्द्रियजीवाः सन्ततिं प्राप्यानादयोऽपर्यवसिताः, स्थितिं भवस्थितिं कायस्थितिं च प्रतीत्य सादिकाः सपर्यवसिता अपि ॥ १४० ॥

एगूणपन्नहोरत्ता, उक्कोसेण वियाहिया ।
तेइंदियआउठिई, अंतोमुहुत्तं जहन्निया ॥ १४१ ॥

---

१ कप्पासट्ठिमिजा य - अन्यसंस्करणे ॥

त्रीन्द्रियजीवानामेकोनपञ्चाशद्दिनान्युत्कृष्टायुःस्थितिव्याख्याता, जघन्यकान्तर्मुहूर्तमायुःस्थितिरस्तीति भावः ॥ १४१ ॥

अथ कायस्थितिमाह-

संखिज्जकालमुक्कोसं, अन्तोमुहुत्तं जहन्नयं ।
तेइंदियकायठिई, तं कायं तु अमुंचओ ॥ १४२ ॥

त्रीन्द्रियाणां स्वं कायं त्रीन्द्रियकायममुञ्चतां मृत्वा तत्रैवोत्पद्यमानानामुत्कृष्टा सङ्ख्येयकालं स्थितिः, जघन्यतस्त्वन्तर्मुहूर्तमेव स्थितिरस्ति ॥ १४२ ॥

अथ कालस्यान्तरमाह-

अणंतकालमुक्कोसं, अन्तोमुहुत्तं जहन्नयं ।
तेइंदियजीवाणं, अन्तरं तु वियाहियं ॥ १४३ ॥

त्रीन्द्रियजीवानां स्वकायाच्च्युत्वाऽन्यत्र योनावुत्पद्य पुनस्त्रीन्द्रिययोनावुत्पद्यते, तदोत्कृष्टमनन्तकालमन्तरं भवति । वनस्पतिकायेऽनन्तकालस्य सम्भवात् । जघन्यमन्तरमन्तर्मुहूर्तं व्याख्यातम् ॥ १४३ ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ १४४ ॥

एतेषां त्रीन्द्रियजीवानां वर्णतो गन्धतो रसतः स्पर्शतश्च संस्थानादेशतश्चापि सहस्रशो विधानानि भवन्ति ॥ १४४ ॥

अथ चतुरिन्द्रियानाह-

चउरिंदिया य जे जीवा, दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता, तेसिं भेए सुणेह मे ॥ १४५ ॥

चतुरिन्द्रिया ये जीवाः स्पर्शनरसनघ्राणचक्षुःसहितास्ते च पर्याप्तापर्याप्तभेदेन द्विविधाः प्रकीर्तिताः, तेषां भेदान् 'मे' मम कथयतो यूयं श्रृणुत ॥ १४५ ॥

अंधिया पोत्तिया चेव, मच्छिया मसगा तहा ।
भमरे कीडपयंगे य, ढिंकुणे कुंकुणे तहा ॥ १४६ ॥

कुक्कुडे सिंगरीडी य, नंदावत्ते य विच्छिए ।
डोले य भिंगरीडी य, विरली अच्छिवेहए ॥ १४७ ॥

अच्छिले माहए [1]अच्छि, रोडए चित्तपत्तए ।
ओहिंजलिया जलकारी य, [2]नीयया तंबगाइया ॥ १४८ ॥

तिसृभिर्गाथाभिश्चतुरिन्द्रियजीवानां नामानि—अन्धिका, च पुनः पौत्तिका, मक्षिका तथा मशका, भ्रमरस्तथा कीटः पतङ्गश्च, तथा ढिङ्कुणस्तथा कुङ्कुणः, एते चतुरिन्द्रिया जन्तवः ॥ १४६ ॥ पुनः कुर्कुटः, श्रृङ्गरीटी, नन्द्यावर्त्तः, वृश्चिकः, डोलः, भृङ्गरीटकः, वीरली अक्षिवेधकः ॥ १४७ ॥ अक्षिलो मागधः, अक्षो रोडकश्चित्रपत्रा, उपधिजलकः, जलकारी, नीचकस्ताम्रकः ॥ १४८ ॥ एतानि देशीयनामानि तत्तद्देशप्रसिद्धानि ।

इइ चउरिंदिया एए, णेगहा एवमाईओ ।
लोगस्स एगदेसंमि, ते सव्वे परिकित्तिया ॥ १४९ ॥

इत्यमुना प्रकारेणैते चतुरिन्द्रिया एवमादिका अनेकधा सन्ति । ते सर्वे चतुरिन्द्रिया लोकस्य-चतुर्दशरज्ज्वात्मकलोकस्यैकदेशे परिकीर्तिताः ॥ १४९ ॥

संतइं पप्पणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ १५० ॥

सन्ततिं प्राप्य ते जीवा अनादयस्तथाऽपर्यवसिताश्चापि, स्थितिं-भवस्थितिं कायस्थितिं च प्रतीत्य सादयः सपर्यवसिता अपि सन्ति ॥ १५० ॥

छच्चेव य मासाऊ, उक्कोसेण वियाहिया ।
चउरिंदियआउठिई, अन्तोमुहुत्तं जहन्निया ॥ १५१ ॥

चतुरीन्द्रियाणामुत्कृष्टा षण्मासायुःस्थितिर्व्याख्याता, जघन्यिका चान्तर्मुहूर्तं स्थिति-र्व्याख्याता ॥ १५१ ॥

भवस्थितिमुक्त्वा कायस्थितिमाह-

संखेज्जकालमुक्कोसं, अन्तोमुहुत्तं जहन्निया ।
चउरिंदियकायठिई, तं कायं तु अमुंचओ ॥ १५२ ॥

चतुरिन्द्रियाणां स्वं कायममुञ्चतां पुनः पुनस्तत्रैवोत्पद्यमानानां सङ्ख्येयकालमु-त्कृष्टा स्थितिरस्ति, जघन्यिका चान्तर्मुहूर्तं यावद्व्याख्याता ॥ १५२ ॥

अथ कालान्तरमाह-

अणंतकालमुक्कोसं, अन्तोमुहुत्तं जहन्नियं ।
विजढंमि सए काए, अन्तरेयं वियाहियं ॥ १५३ ॥

---

१ अच्छिरोडए विचित्ते चित्तपत्तए-अन्यसंस्करणे ।
२ नीया-अन्यसंस्करणे ॥

चतुरिन्द्रियाणां स्वकाये त्यक्ते सति पुनरन्यस्मिन् काये उत्पद्य पुनश्चतुरिन्द्रियकाये उत्पद्यते, तदोत्कृष्टमन्तरमनन्तकालं, जघन्यतोऽन्तर्मुहूर्तमन्तरं ज्ञेयम् ॥ १५३ ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ १५४ ॥

एतेषां चतुरिन्द्रियजीवानां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्त्रशो विधानानि बहवो भेदा भवन्ति ॥ १५४ ॥

अथ पञ्चेन्द्रियभेदानाह-

पंचेंदिया य जे जीवा, चउव्विहा ते वियाहिया ।
नेरइया तिरिक्खा य, मणुआ देवा य आहिया ॥ १५५ ॥

पञ्चेन्द्रियाश्च ये जीवास्ते चतुर्विधा व्याख्याताः, ते पञ्चेन्द्रिया जीवा नैरयिकास्तिर्यञ्चो मनुजाश्च पुनर्देवा आख्यातास्तीर्थकरैर्व्याख्याताः ॥ १५५ ॥

[१]नेरइया सत्तविहा, पुढवीसु सत्तसु भवे ।
पज्जत्तमपज्जत्ता, तेसिं भेए सुणेह मे ॥ १५६ ॥

सप्तसु रत्नप्रभादिषु नरकपृथ्वीषु सप्तविधास्ते नैरयिका भवेयुः, ते पुननैरयिकाः पर्याप्ता अपर्याप्ताश्च सन्ति । सप्त नैरयिकाः पर्याप्ताः, सप्त नैरयिका अपर्याप्ताः । एवं चतुर्दशप्रकारांस्तेषां भेदान् 'मे' मम कथयतः सतो यूयं श्रृणुत ॥ १५६ ॥

पूर्वं सप्तनरकपृथ्वीनां स्वरूपमाह-

रयणाभा १ सक्कराभा २, वालुयाभा ३ य आहिया ।
पंकाभा ४ धूमाभा ५, तमा ६ तमतमा ७ तहा ॥ १५७ ॥

रत्नानां वैडूर्यादीनामाभा इवाभा यस्याः सा रत्नाभा, रत्नकाण्डस्य भवनपतिभवनस्याभा इवाभा यस्याः सा रत्नाभा १ । शर्करा श्लक्ष्णपाषाणरूपा, तदाकारा आभा यस्याः सा शर्कराभा २ । वालुका श्लक्ष्णरजः सदृगाभा यस्याः सा वालुकाभा ३ । पङ्कस्याभेवाभा यस्याः सा पङ्काभा ४ । धूमस्याभेवाभा यस्याः सा धूमाभा, यद्यपि तत्र धूमस्याभावोऽस्ति, तथापि तत्र तदाकारपुद्गलानां परिणामोऽस्तीति धूमाभा ५ । तमःप्रभा तमोरूपान्धकारमयी तमाभा ६ । तमस्तमा, प्रकृष्टं तमस्तमस्तमः, तन्मयी अत्यन्तान्धकारमयीत्यर्थः ७ । सप्तविधनरकपृथ्वीत्वेन तदन्तर्वर्तिनोऽपि नरकजीवाः सप्तधा व्याख्याताः, ते पुनः पर्याप्तापर्याप्तभेदाच्चतुर्दशधा ज्ञेयाः ॥ १५७ ॥

---

१ नेरइया सत्तविहा, पुढवीसु सत्तसु भवे । रयणाभसक्कराभा, वालुयाभा य आहिया ॥ १५६ ॥ पंकाभा धूमाभा, तमा तमतमा तहा । इइ नेरइया एए, सत्तहा परिकित्तिया ॥ १५७ ॥ इमे द्वे गाथे अन्यसंस्करणे एवं स्तः ॥

इति सप्तनरकपृथ्वीनां स्वरूपमुक्त्वाऽथ नामान्याह-

धम्मा वंसगा सेला, तहा अंजणरिट्ठगा ।
मघा माघवई चेव, णारया य पुणो भवे ॥ १५८ ॥

धम्मा प्रथमा पृथ्वी १, द्वितीया वंशका २, तृतीया शैला ३, तथा चतुर्थ्यञ्जना ४, अरिष्टा पञ्चमी ५, मघा षष्ठी ६, माघवती सप्तमी ७ । अत्र वासिनो नारकाः सप्तधा भवेयुः ॥ १५८ ॥

रयणाइ गुत्तओ चेव, तहा धम्माइ णामओ ।
इइ नेरईया एए, सत्तहा परिकित्तिया ॥ १५९ ॥

रत्नप्रभादयो गोत्रतो ज्ञेयाः, तथा धर्मादयो नामतो ज्ञेयाः, इत्यमुना प्रकारेणैते नैरयिकाः सप्तधा परिकीर्तिताः ॥ १५९ ॥

अत्र क्षेत्रविभागमाह-

लोगस्स एगदेसंमि, ते सव्वे उ वियाहिया ।
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥ १६० ॥

ते सर्वे नारका लोकस्यैकदेशे व्याख्याताः, अन्यत्र सर्वत्र न सन्तीत्यर्थः । 'इत्तो' इतोऽनन्तरं तेषां नारकाणां चतुर्विधं कालविभागं वक्ष्ये ॥ १६० ॥

संतइं पप्पणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ १६१ ॥

सन्ततिं प्राप्य प्रवाहमाश्रित्य ते नारका अनादयोऽपर्यवसिताश्चापि । स्थितिं काय-स्थितिमाश्रित्य सादयः सपर्यवसिताश्चापि वर्तन्ते ॥ १६१ ॥

सागरोवममेगं तु, उक्कोसेण वियाहिया ।
पढमाए जहन्नेणं, दसवाससहस्सिया ॥ १६२ ॥

प्रथमायां नरकपृथिव्यां रत्नप्रभायामुत्कृष्टेन त्रयोदशे प्रस्तटे एकं सागरोपमायुःस्थिति-र्व्याख्याता, जघन्येन दशवर्षसहस्त्रिकायुःस्थितिर्व्याख्याता ॥ १६२ ॥

तिन्नेव सागराउ, उक्कोसेण वियाहिया ।
दोच्चाए जहन्नेणं, एगं तु सागरोवमं ॥ १६३ ॥

द्वितीयायां नरकपृथिव्यां शर्कराभायामन्तिमे प्रस्तटे नारकाणामुत्कृष्टत्वेन त्रीणि साग-रोपमाण्यायुःस्थितिर्व्याख्याता । जघन्येन त्वेकं सागरोपममायुःस्थितिर्व्याख्याता ॥१६३॥

सत्तेव सागराऊ, उक्कोसेण वियाहिया ।
तइयाए जहन्नेणं, तिन्नेव सागरोवमा ॥ १६४ ॥

तृतीयायां नरकपृथिव्यां वालुकाप्रभायामन्तिमे प्रस्तटे उत्कृष्टतः सप्तसागरोपमाण्यायुः- स्थितिर्व्याख्याता, जघन्यतस्त्रीणि सागरोपमाणि स्थितिर्व्याख्याता ॥ १६४ ॥

दससागरोवमाओ, उक्कोसेण वियाहिया ।
चउत्थीए जहन्नेणं, सत्तेव सागरोवमा ॥ १६५ ॥

चतुर्थ्यां नरकपृथिव्यां पङ्कप्रभायामन्त्ये प्रस्तटे उत्कृष्टेन दशसागरोपमाणि स्थितिर्व्याख्याता । जघन्येन सप्तसागरोपमाण्यायुःस्थितिः कथिता ॥ १६५ ॥

सत्तरस सागराओ, उक्कोसेण वियाहिया ।
पंचमाए जहन्नेणं, दस उ सागरोवमा ॥ १६६ ॥

पञ्चमायां नरकपृथिव्यां धूमप्रभायामन्त्ये प्रस्तटे सप्तदशसागरोपमाण्यायुःस्थितिर्व्याख्याता । जघन्येन तु दशसागरोपमाण्यायुःस्थितिर्व्याख्याता ॥ १६६ ॥

बावीससागराओ, उक्कोसेण वियाहिया ।
छट्ठीए जहन्नेणं, सत्तरससागरोवमा ॥ १६७ ॥

षष्ठ्यां नरकपृथिव्यां तमःप्रभायामन्त्ये प्रस्तटे उत्कृष्टेन द्वाविंशतिसागरोपमाण्यायुः-स्थितिर्व्याख्याता । जघन्येन सप्तदशसागरोपमाण्यायुःस्थितिर्व्याख्याता ॥ १६७ ॥

तित्तीससागराओ, उक्कोसेण वियाहिया ।
सत्तमाए जहन्नेणं, बावीसं सागरोवमा ॥ १६८ ॥

सप्तम्यां नरकपृथिव्यां तमस्तमःप्रभायामन्त्ये प्रस्तटे उत्कृष्टेन त्रयस्त्रिंशत्सागरोपमाण्यायुःस्थितिर्व्याख्याता । जघन्येन द्वाविंशतिसागरोपमाण्यायुःस्थितिर्व्याख्याता ॥१६८॥

जा चेव आउठिई, नेरईयाणं वियाहिया ।
सा तेसिं कायठिई, जहन्नुक्कोसिया भवे ॥ १६९ ॥

नारकाणां या जघन्योत्कृष्ट आयुःस्थितिर्व्याख्याता, सैव तेषां नारकाणां कायस्थितिर्जघन्योत्कृष्टतश्च व्याख्याता । यतो हि नारको जीवो मृत्वा पुनर्नरकभूमौ नोत्पद्यते, अन्यत्र गर्भजपर्याप्तसङ्ख्येयवर्षायुष्केषूत्पद्यते, पश्चान्नरके उत्पद्यते नोत्पद्यते च ॥ १६९ ॥

अथ कालान्तरमाह-

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
विजढंमि सए काए, नेरइयाणं तु अंतरं ॥ १७० ॥

नारकाणां तु स्वे काये त्यक्ते सत्युत्कृष्टं कालस्यान्तरमनन्तकालं भवति, जघन्यतोऽन्तर्मुहूर्तं कालान्तरं भवति। यदान्यतरनरकात्कश्चिन्नारकश्च्युत्वा गर्भजपर्याप्तमत्स्यादिषूत्पद्यते, तत्र चात्यन्तदुष्टाध्यवसायत्वादन्तर्मुहूर्तमायुः प्रपाल्य मृत्वान्यतमनरके उत्पद्यते ॥१७०॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ १७१ ॥

एतेषां नारकाणां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्रशो विधानानि बहवो भेदा भवन्ति ॥ १७१ ॥

अथ पञ्चेन्द्रियतिरश्चां भेदानाह-

पंचेंदिया तिरिक्खा य, दुविहा ते वियाहिया ।
समुच्छिमा तिरिक्खा य, गब्भवक्कंतिया तहा ॥ १७२ ॥

पञ्चेन्द्रियास्तिर्यञ्चो द्विविधा व्याख्याताः, ते के ? संमूर्छिमास्तिर्यञ्चस्तथा गर्भव्युत्क्रान्तिकास्तिर्यञ्चश्च । तत्र सम्मूर्छाऽतिशयमूढभावस्तेन निर्वृत्ता निष्पन्नाः सम्मूर्छिमाः, सम्मूर्छिमाश्च ते तिर्यञ्चो सम्मूर्छिमतिर्यञ्चो मनःपर्याप्तिरहिताः सदा सम्मूर्छिता इव तिष्ठन्ति । गर्भव्युत्क्रान्तिका-गर्भजा मनःपर्याप्तिसहिताः ॥ १७२ ॥

दुविहा ते भवे तिविहा, जलयरा थलयरा तहा ।
खहयरा य बोधव्वा, तेसिं भेए सुणेह मे ॥ १७३ ॥

ते द्विविधास्सम्मूर्छिमा गर्भजाश्च तिर्यञ्चः पुनस्त्रिविधा बोधव्याः । तत् त्रैविध्यं यथा जलचराः स्थलचरास्तथा खचराः सन्ति । एते त्रयोऽपि द्विविधाः गर्भजाः सम्मूर्छिमाश्च ज्ञेयाः । तेषां भेदान् मे कथयतो यूयं श्रृणुत ॥ १७३ ॥

अथ जलचरभेदानाह-

मच्छा य कच्छभा य वि, गाहा य मगरा तहा ।
सिसुमारा य बोधव्वा, पंचहा जलयराहिया ॥ १७४ ॥

एते जलचराः पञ्चधा आख्याताः । एते के ? मत्स्या मीनाः, कच्छपाः कूर्माश्चापि, ग्राहास्तन्तुकजीवाः, मकरा-महामत्स्याः, शिशुमारा अपि मत्स्यविशेषाः । एतेषु पञ्चसु भेदेषु बहूनां भेदानामन्तर्भावः । यतो हि यावन्तः स्थलजीवास्तावन्त एव जलजीवा इत्युक्तेः ॥१७४॥

लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ।
एत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥ १७५ ॥

ते सर्वे जलचरा जीवा लोकैकदेशे व्याख्याताः, जलस्थानेष्वेव न तु सर्वत्र, इतोऽनन्तरं तेषां जलचरजीवानां तु कालविभागं चतुर्विधं वक्ष्ये ॥ १७५ ॥

संतइं पप्पणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ १७६ ॥

ते जलचरजीवाः सन्ततिं प्राप्य-प्रवाहमार्गमाश्रित्याऽनादयोऽपर्यवसिताश्च वर्तन्ते । स्थितिं प्रतीत्य-भवस्थितिं कायस्थितिं चाश्रित्य सादयः सपर्यवसिताश्च सन्तीति भावः ॥१७६॥

इक्का य पुव्वकोडी, उक्कोसेण वियाहिया ।
आउठिई जलयराणं, अंतोमुहुत्तं जहन्निया ॥ १७७ ॥

जलचराणां मत्स्यादीनां जीवानामुत्कृष्टेनायुःस्थितिरेका पूर्वकोटी व्याख्याता । पूर्वस्य तु परिमाणमेतत्—सप्ततिकोटिलक्षवर्षाणि, षट्पञ्चाशत्सहस्रकोटिवर्षाणि, एतैर्वर्षैः पूर्वं भवति । जघन्यिकायुःस्थितिश्चैतेषामन्तर्मुहूर्तमेव व्याख्याता ॥ १७७ ॥

अथ जलचराणां कायस्थितिमाह-

पुव्वकोडीपुहुत्तं तु, उक्कोसेण वियाहिया ।
कायठिई जलयराणं, अंतोमुहुत्तं जहन्निया ॥ १७८ ॥

जलचराणां कायस्थितिरुत्कृष्टतः पूर्वकोटिपृथक्त्वं व्याख्याता । यदा जलचरजीवो मृत्वा पुनः पुनर्जलचरयोनावेवोत्पद्यते, तदा पूर्वकोटिपृथक्त्वं यावदुत्पद्यते । पृथक्त्वं द्वाभ्यामारभ्य नवाङ्कं यावत्पृथक्त्वमिति सिद्धान्ताङ्कसंज्ञाऽस्ति । द्वाभ्यां पूर्वकोटिभ्यामारभ्य यावन्नवकोटिं यावज्जलचरो जीवो मृत्वा मृत्वा जलचरयोनावुत्पद्यते इत्यर्थः । जघन्यतस्त्वन्तर्मुहूर्तमेव कायस्थितिर्व्याख्याता ॥ १७८ ॥

अथ कालान्तरमाह-

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढम्मि सए काए, जलयराणं तु अंतरं ॥ १७९ ॥

जलचराणां स्वकीये काये त्यक्ते सत्यन्यत्रोत्पद्य पुनः स्वकाये उत्पद्यते, तदा कियत्कालान्तरं भवति ? तदुच्यते—उत्कृष्टतोऽनन्तं कालान्तरं भवति, यतो हि चेज्जलचरो निगोदत्वेनोत्पद्यते, तदा निगोदस्यानन्तकालस्य स्थितिरस्ति, जघन्यतस्त्वन्तर्मुहूर्तमेव कालान्तरं ज्ञेयम् ॥ १७९ ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ १८० ॥

तेषां जलचराणां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि विधानानि सहस्त्रशो भवन्ति ॥ १८० ॥

अथ स्थलचरभेदानाह-

चउप्पया य परिसप्पा, दुविहा थलयरा भवे ।
चउप्पया चउव्विहा, ते मे कित्तयओ सुण ॥ १८१ ॥

स्थलचरा द्विविधाः, चतुःपदा परिसर्पाश्च भवेयुः, चत्वारः पदा येषां ते चतुःपदाः, परि-समन्तात्सर्पन्तीति परिसर्पाः, तत्र चतुःपदाश्चतुर्विधाः सन्ति । ताश्चतुर्विधान् मे-मम कथयतस्त्वं शृणु ॥ १८१ ॥

एगखुरा दुखुराओ, गंडीपयसणप्पया ।
हयमाई गोणमाई, गयमाई सीहमाइणो ॥ १८२ ॥

एकखुराः, द्विखुराः गण्डीपदाः, सनखपदाः, एकः खुरश्चरणाधोवर्ति हड्डविशेषो येषां ते एकखुरास्ते चाश्वादयः । एवं द्वौ खुरौ येषां ते द्विखुरा गोणादयो-बलीवर्दादयः, गण्डी कमलमध्यस्थकर्णिका, तद्वत्पदा येषां ते गण्डीपदा गजादयः, सहनखैर्वर्तन्ते इति सनखाः, सनखाः पदा येषां ते सनखपदाः सिंहादयः । 'सणप्पया' इति प्राकृतत्वात् ॥ १८२ ॥

अथ परिसर्पानाह-

भूओरगपरिसप्पा, परिसप्पा दुविहा भवे ।
गोहाई अहिमाई य, इक्किक्काणेगहा भवे ॥ १८३ ॥

परिसर्पा जीवा द्विविधा भवेयुः ते के ? भुजाभ्यां परिसर्पन्तीति भुजपरिसर्पाः, उरसा परिसर्पन्तीत्युरःपरिसर्पाः, तत्र गोधानकुलमूषकादयो भुजपरिसर्पाः, अहय उरःपरिसर्पाः । एते एकेऽप्यनेकधा भवेयुः ॥ १८३ ॥

अथैतेषां क्षेत्रविभागमाह-

लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ।
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥ १८४ ॥

ते सर्वे स्थलचरा लोकैकदेशे व्याख्याताः । इतोऽनन्तरं कालविभागं स्थलचराणां चतुर्विधं वक्ष्ये ॥ १८४ ॥

संतइं पप्पणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ १८५ ॥

सन्ततिं प्राप्य ते स्थलचरा अनादयोऽपर्यवसिताश्चापि, स्थितिं-भवस्थितिं प्रतीत्याश्रित्य सादयः सपर्यवसिताश्चापि वर्तन्ते ॥ १८५ ॥

पलिओवमाइं तिन्नेओ, उक्कोसेण वियाहिया ।
आउठिई थलयराणं, अंतोमुहुत्तं जहन्नियं ॥ १८६ ॥

स्थलचराणामुत्कृष्टेन त्रीणि पल्योपमान्यायुःस्थितिर्व्याख्याता । जघन्यतः स्थलचराणामन्तर्मुहूर्तमायुःस्थितिः ॥ १८६ ॥

अथ स्थलचरा मृत्वा स्थलचरेष्वेवोत्पद्यन्ते तदा कियत्कालेनोत्पद्यन्ते ? तां कायस्थितिमाह-

पलिओवमाइं तिन्नेओ, उक्कोसेणं तु साहिया ।
पुव्वकोडीपुहुत्तेणं, अंतोमुहुत्तं जहन्निया ॥ १८७ ॥

स्थलचराणां स्वकीये काये एव समुत्पद्यमानानां त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वेन साधिकान्युत्कृष्टेन कायस्थितिर्व्याख्याता । जघन्यिका कायस्थितिस्तेषामन्तर्मुहूर्तमेवोक्ता । यतो हि त्रिपल्योपमायुषः स्थलचराः पूर्वकोट्यायुषां सप्ताष्टभवग्रहणानि कुर्वन्ति, पञ्चेन्द्रियतिरश्चामधिकनिरन्तरभवस्याऽसम्भवोऽस्ति ॥ १८७ ॥

अथ कालान्तरमाह-

कायठिई थलयराणं, अंतरं तेसिमं भवे ।
कालं अणंतमुक्कोसं, अंतोमुहुत्तं जहन्नियं ॥ १८८ ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणभेयओ वावि, विहाणाइं सहस्ससो ॥ १८९ ॥युग्मम्

स्थलचराणां स्वकीये काये त्यक्ते सति वनस्पत्यादिमध्ये उत्पद्यते चेत्स्थलचरेषु पुनरायाति, तदोत्कृष्टमनन्तकालस्यान्तरं भवति । जघन्यतश्चान्तर्मुहूर्तकालस्यान्तरं भवति ॥ १८८ ॥ एतेषां स्थलचराणां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानभेदतश्चापि सहस्त्रशो विधानानि भेदाः ॥ १८९ ॥

अथ खेचरभेदानाह-

चम्मे उ लोमपक्खी य, तइया समुग्गपक्खी य ।
वियपक्खी य बोधव्वा, पक्खिणो य चऊव्विहा ॥ १९० ॥

पक्षिणश्चतुर्विधा बोधव्याः, चर्मपक्षिणश्चर्मचटिकाद्याः, रोमपक्षिणो राजहंसाद्याः, समुद्गपक्षिणः समुद्गकाकारपक्षयुक्ता मानुषोत्तरपर्वताद्बहिर्वर्तिनः, विततपक्षिणो ये सर्वदा विस्तारितपक्षा एव तिष्ठन्ति ॥ १९० ॥

लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ।
इत्तो कालविभागं तु, तेसिं वुच्छं चऊव्विहं ॥ १९१ ॥

ते सर्वे खचरा लोकैकदेशे व्याख्याताः । सर्वत्र चतुर्दशरज्ज्वात्मकलोके न सन्ति । इतोऽनन्तरं तेषां खचराणां चतुर्विधं कालविभागं वक्ष्ये ॥ १९१ ॥

संतइं पप्पणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ १९२ ॥

सन्ततिं प्राप्य ते खचरा अनादयोऽपर्यवसिता अपि वर्तन्ते । स्थितिं प्रतीत्य ते सादयः सपर्यवसिता अपि सन्ति ॥ १९२ ॥

पलिओवमस्स भागो, असंखिज्जयमो भवे ।
आऊठिई खहयराणं, अंतोमुहुत्तं जहन्निया ॥ १९३ ॥

खचराणामायुःस्थितिः पल्योपमस्याऽसङ्ख्येयतमो भागो भवति, जघन्यिकायुः-स्थितिरन्तर्मुहूर्तं भवति ॥ १९३ ॥

अथ खचराणां कायस्थितिकालान्तरं द्वाभ्यां गाथाभ्यां वदति-

असंखभागो पलियस्स, ऊक्कोसेण साहिओ ।
पुव्वकोडी पुहत्तेणं, अंतोमुहुत्तं जहन्निया ॥ १९४ ॥

कायठिई खहयराणं, अंतरं तेसिमं भवे ।
अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ॥ १९५ ॥

खचराणां कायस्थितिः पल्योपमस्याऽसङ्ख्येयतमो भागः पूर्वकोटिपृथक्त्वेन साधिकश्च भवति । जघन्यिका कायस्थितिरन्तर्मुहूर्तं भवति । तेषां खचराणां कालान्तरं चोत्कृष्टतोऽनन्तकालं यावद्भवति, जघन्यतश्चान्तर्मुहूर्तं भवति ॥ १९५ ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ १९६ ॥

एतेषां खचराणां वर्णतो गन्धतो रसतः स्पर्शतश्च संस्थानादेशतश्चापि सहस्रशो विधानानि भवन्ति ॥ १९६ ॥

मणुया दुविहभेया ऊ, ते मे कित्तयओ सुण ।
समुच्छिमा य मणुया, गब्भवक्कंतिया तहा ॥ १९७ ॥

मनुजा द्विविधभेदाः सन्ति, तान् भेदान् 'मे' मम कीर्तयतस्त्वं शृणु । मनुजा-मनुष्याः सम्मूर्छिमास्तथा गर्भव्युत्क्रान्तिकाः, गर्भजा मनःसहिताः, सम्मूर्छिमा मनोरहिता-श्चतुर्दशस्थानेषूत्पन्नाः ॥ १९७ ॥

गब्भवक्कंतिया जे उ, तिविहा ते वियाहिया ।
अकम्मकम्मभूमा य, अंतरद्दीवगा तहा ॥ १९८ ॥

ये तु गर्भव्युत्क्रान्तिकास्ते मनुष्यास्त्रिविधा व्याख्याताः । ते के ? अकर्मकर्मभूमिगा अन्तरद्वीपकाश्च, अकर्मभूमौ भवा अकर्मभौमा-अकर्मभूम्युत्पन्नाः, कर्मभूमौ भवाः कर्मभौमाः-कर्मभूम्युत्पन्नाः, तथान्तरद्वीपगाः ॥ १९८ ॥

पन्नरस तीसइविहा, भेया अट्ठावीसई ।
संखा उ कमसो तेसिं, इइ एसा वियाहिया ॥ १९९ ॥

इत्यमुना प्रकारेणैतेषां पूर्वोक्तानां कर्मभूम्यकर्मभूम्यन्तरद्वीपानां सङ्ख्या क्रमशोऽ-नुक्रमेण व्याख्याता । सा का सङ्ख्येत्युच्यते—विधशब्दस्योभयत्र सम्बन्धो ज्ञेयः । पञ्चदश-विधाः कर्मभूमिजाः, भरतैरावतमहाविदेहानां प्रत्येकं पञ्चपञ्चसङ्ख्याकत्वात् पञ्चदशसङ्-ख्यात्वं भवति ।

त्रिंशद्विधा अकर्मभौमाः, अत्र हैमवतहरिवर्षरम्यक्हैरण्यवतदेवकुरूत्तरकुरुरूपाणां षण्णामप्यकर्मभूमीनां प्रत्येकं पञ्चसङ्ख्यागुणितानां त्रिंशत्सङ्ख्यात्वं सम्भवति । इह च क्रमश इत्युक्तेऽपि गणनावसरे क्रमभङ्गो विहितः, पूर्वमकर्मभूमिसङ्ख्या विहाय कर्म-भूमिसङ्ख्या प्रतिपादिता, तत्तु कर्मभूमिजानां मनुष्याणां मुक्तिसाधकत्वेन प्राधान्यख्या-पनात्पूर्वकथनं न दोषायेति ।

तथान्तरद्वीपानामष्टाविंशतिभेदाः, ते चान्तरद्वीपाः क्षुल्लहिमवति पर्वते पूर्वस्यां दिश्य-परस्यां दिशि च जम्बूद्वीपवेदिकान्तात्परतः प्रत्येकं द्वे द्वे दंष्ट्रे विदिगभिमुखे विनिर्गते स्तः । तद्यथा—पूर्वस्यामेकैशान्यभिमुखी दंष्ट्रा, द्वितीयाग्नेय्यभिमुखी, पश्चिमायामेका नैऋत्याभिमुखी, द्वितीया वायव्याभिमुखी, एवं चतसृषु विदिक्ष्वभिमुखीषु दंष्ट्रासु प्रत्येकं त्रीणि त्रीणि योजनशतानि लवणसमुद्रमतिक्रम्य विदिक्ष्वेकैकभावेन चत्वारोऽन्तरद्वीपाः प्रत्येकं योजनशतत्रयविस्ताराः सन्ति । ततस्तत्परतस्तास्वेव चतसृषु दंष्ट्रासु प्रत्येकमेकैक-शतयोजनवृद्ध्या वर्धिताः षट् षट् अन्तरद्वीपाः सन्ति । ते च द्वीपाश्चतुर्भिर्गुणिताश्चतुर्विंशति-सङ्ख्याका भवन्ति । ततश्चाद्यान्तरद्वीपचतुष्कसहिता अष्टाविंशतिरन्तरद्वीपाः सन्ति । एवं शिखरिणि पर्वतेऽष्टाविंशतिर्ज्ञेयाः । सर्वसाम्याच्चैषां भेदेनाऽविवक्षितत्वात्सूत्रेऽष्टाविंशति-सङ्ख्याकथनं विरोधाय न भवति ।

तेष्वन्तरद्वीपेषु युगलधर्मिका वसन्ति, तच्छरीरमानादि कथ्यते—अष्टधनुःशतोच्छ्रायाः,

पल्यासङ्ख्यभागायुषः, चतुःषष्टिपृष्टकरण्डाः, चतुर्थभक्ताहाराभिलाषवन्तः । एकोनाशीतिदिनकृतापत्यपालनाः, तेषां द्वीपानां नामायामविस्तारपरिध्यादिविचारस्तु क्षेत्रसमासबृहट्टीकातोऽवसेयः ॥ १९९ ॥

संमुच्छिमाण एसेव, भेओ होइ आहियो ।
लोगस्स एगदेसंमि, ते सव्वे वि वियाहिया ॥ २०० ॥

सम्मूर्छिमानां ह्येष एव भेदः, यत्कर्मभूम्यादिसमुत्पन्नानां गर्भजानां वातपित्तादिषु ते चतुर्दशभेदैः सम्भवन्ति अङ्गुलासङ्ख्येयभागमात्रावगाहनास्ते सर्वे मनुष्याः सम्मूर्छिमा गर्भजाश्च लोकैकदेशे व्याख्याताः ॥ २०० ॥

संतइं पप्पऽणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ २०१ ॥

सन्ततिं प्राप्य ते सम्मूर्छिमा गर्भजाश्च मनुष्या अनादयोऽपर्यवसिताश्चापि वर्तन्ते । स्थितिमाश्रित्य सादयः सपर्यवसिताश्चापि सन्ति ॥ २०१ ॥

पलिओवमाइ तिन्नेओ, उक्कोसेण वियाहिया ।
आउठिई मणुआणं, अंतोमुहुत्तं जहन्नियं ॥ २०२ ॥

मनुजानां गर्भजानां त्रीणि पल्योपमान्युत्कृष्टेनायुःस्थितिर्व्याख्याता, जघन्यिका चान्तर्मुहूर्तं स्थितिर्ज्ञेया ॥ २०२ ॥

अथ कायस्थितिमन्तरकालं चाह द्वाभ्यां गाथाभ्यां-

पलिओवमाइं तिन्नेओ, उक्कोसेण तु[1] साहिया ।
पुव्वकोडी पुहुत्तेणं, अंतोमुहुत्तं जहन्नियं ॥ २०३ ॥

कायठिई मणुआणं, अंतरं तेसिमं भवे ।
अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ॥ २०४ ॥

मनुजानां गर्भजानां त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वेन साधिकान्युत्कृष्टेन कायस्थितिर्व्याख्याता जघन्यिका चान्तर्मुहूर्तं स्थितिर्व्याख्याता, तेषां गर्भजानां मनुजानां कालस्यान्तरमुत्कृष्टमनन्तकालं, जघन्यकमन्तर्मुहूर्तं कालान्तरं ज्ञेयम् ॥ २०३-२०४ ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ २०५ ॥

---

१ वियाहिया-अन्यसंस्करणे ॥

सम्मूर्छिमगर्भजमनुष्याणां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्त्रशो विधानानि बहवो भेदा भवन्ति ॥ २०५ ॥

अथ देवानाह-

देवा चउव्विहा वुत्ता, ते मे कित्तयओ सुण ।
भोमिज्जवाणमंतर - जोइसवेमाणिया तहा ॥ २०६ ॥

देवाश्चतुर्विधा उक्ताः, तान् भेदान् कीर्तयतो 'मे' मम त्वं श्रृणु । भौमेयका व्यन्तरा ज्योतिष्कास्तथा वैमानिकाः, । भूमौ भवा भौमेयका भवनवासिनो देवाः, रत्नप्रभायाः पृथ्व्या अशीतिसहस्त्रोत्तरयोजनलक्षपिण्डाया उपर्येकं योजनसहस्त्रमवगाह्याधश्चैकं योजनसहस्त्रं मुक्त्वा मध्येऽष्टसप्ततिसहस्त्रोत्तरयोजनलक्षे भवनवासिनां चमरेन्द्रादिदेवानां भवनानि सन्ति । १ । 'वाणमंतरत्ति' आर्षत्वाद्विविधान्यन्तराणि निवासस्थानानि गिरिकन्दरविवरादीनि येषां ते व्यन्तराः २ । ज्योतयन्तीति ज्योतीषि विमानानि, तन्निवासिनो देवा ज्योतिष्काः ३ । विशेषेण मानयन्त्युपभुञ्जन्ति सुकृतिनो यानीति विमानानि, तेषु भवा वैमानिकाः ४ । तथेति समुच्चये ॥ २०६ ॥

तेषामेवोत्तरभेदानाह-

दसहा उ भवणवासी, अट्ठहा वणचारिणो ।
पंचविहा जोइसिया, दुविहा वेमाणिया तहा ॥ २०७ ॥

दशधैव भवनवासिनः, तुशब्द एवार्थे, अष्टधा वनचारिणः, वनेषु क्रीडारसेन चरितुं शीलं येषां ते वनचारिणो व्यन्तराः । पञ्चधा ज्योतिष्कास्तथा वैमानिका द्विविधाः ॥२०७॥

तानेव नामत आह-

असुरा १ नाग २ सुवन्ना ३, विज्जू ४ अग्गी य ५ आहिया ।
दीवो ६ दहि ७ दिसा ८ वाया ९, थणिया १० भवणवासिणो ॥ २०८ ॥

एते भुवनवासिनः कुमारशब्दान्ता उच्यन्ते । यतो ह्येते कुमारवद्वेषभाषाशस्त्रयानवाहनक्रीडनानि कुर्वन्ति । अत एते सर्वे दशापि कुमारान्ताः, तद्यथा—असुरकुमारनागकुमारसुवर्णकुमारविद्युत्कुमाराग्निकुमारद्वीपकुमारोदधिकुमारदिक्कुमारवायुकुमारस्तनितकुमाराः, एते नामत आख्याताः ॥ २०८ ॥

अथ व्यन्तरभेदानां नामान्याह-

पिसाय १ भूया २ जक्खा य ३, रक्खसा ४ किन्नरा य ५ किंपुरिसा ६ ।
महोरगा ७ गंधव्वा ८, अट्ठविहा वाणमंतरा ॥ २०९ ॥

व्यन्तरा अष्टविधाः—पिशाचाः १, भूताः २, यक्षाः ३, राक्षसाः ४, किन्नराः च ५, किंपुरुषाः ६, महोरगाः ७, गन्धर्वाः, एवमष्टप्रकारा व्यन्तरा ज्ञेयाः ॥ २०९ ॥

अथ ज्योतिष्काणां भेदान्नामत आह-

चंदसूरा य नक्खत्ता, गहा तारगणा तहा ।
[1]ठिया विचारिणो चेव, पंचहा जोइसालया ॥ २१० ॥

ज्योतिरालयाः, ज्योतिरालयो-गृहं येषां ते ज्योतिरालया ज्योतिष्का देवाः पञ्चधा सन्तीति शेषः, ते ज्योतिष्का देवाः 'ठिया' इति स्थिरा मनुष्यक्षेत्राद्बहिर्ज्योतिष्कास्ते च स्थिरा अचलस्वभावाः, मनुष्यक्षेत्रान्तर्वर्तिनो हि मेरुपर्वतस्य नित्यं प्रादक्षिण्यचारिणस्ते पञ्चधा ज्योतिष्का ज्ञेयाः । ते चाऽमी—चन्द्राः १, सूर्याश्च २, नक्षत्राणि ३, ग्रहा ४, स्तारगणाः ५, प्रकीर्णकतारकसमूहास्तथा ज्ञेयाः ॥ २१० ॥

अथ वैमानिकानां भेदानाह-

वेमाणिया उ जे देवा, दुविहा ते वियाहिया ।
कप्पोवगा य बोधव्वा, कप्पाईया तहेव य ॥ २११ ॥

तु पुनर्वैमानिका ये देवास्ते द्विविधा व्याख्याताः । कल्पा देवलोकास्तानुपगच्छन्ती-त्युत्पत्तिविषयतया प्राप्नुवन्तीति कल्पोपगा द्वादशदेवलोकस्थाः कल्पोपगाः, च पुनस्तथैव कल्पातीताः, कल्पानतीता इति कल्पातीताः, नवग्रैवेयकपञ्चानुत्तरविमानस्थाः । एवं वैमानिका द्विप्रकारा ज्ञातव्याः ॥ २११ ॥

अथ कल्पोपगतानां नामान्याह-

कप्पोवगा बारसहा, सोहम्मीसाणगा तहा ।
सणंकुमारमाहिंदा, बंभलोगा य लांतगा ॥ २१२ ॥

महासुक्का सहस्सारा, आणया पाणया तहा ।
आरणा अच्चुया चेव, इइ कप्पोवगा सुरा ॥ २१३ ॥ युग्मम् ॥

कल्पोपगा द्वादशधा, सुधर्मानामेन्द्रस्य सभाऽस्मिन्नस्तीति सौधर्मः प्रथमकल्पः, एवमीशानो द्वितीयकल्पः, सौधर्मे श्चेशानश्च सौधर्मेशानौ, तौ गच्छन्ति प्राप्नुवन्तीति सौधर्मे-शानगाः, तथा पुनः सनत्कुमारदेवलोके भवाः सानत्कुमाराः महेन्द्रे भवा माहेन्द्राः सनत्कु-माराश्च माहेन्द्राश्च सनत्कुमारमाहेन्द्राः, पुनर्ब्राह्मलोका ब्रह्मलोके भवाः, च पुनर्लान्तनामानं कल्पं गच्छन्तीति प्राप्नुवन्तीति लान्तगाः ॥ २१२ ॥

---

१ दिसा-अन्यसंस्करणे ॥

महाशुक्रे भवा महाशुक्राः, सहस्त्रारे भवाः साहस्त्राराः, आनते भवा आनताः, तथा प्राणते भवाः प्राणताः, अरणे भवा आरणाश्च, अच्युते भवा अच्युताश्चारणाच्युताः, इत्यमुना प्रकारेण द्वादशविधाः कल्पोपगताः सुरा ज्ञेयाः ॥ २१३ ॥

कप्पाईया य जे देवा, दुविहा ते वियाहिया ।
गेविज्जाऽणुत्तरा चेव, गेविज्जा नवविहा तहिं ॥ २१४ ॥

च पुनस्ते कल्पातीता देवास्ते द्विविधा व्याख्याताः, ग्रैवेयका अनुत्तराश्च, तत्र ग्रैवेयका नवविधाः । तत्र ग्रीवा लोकपुरुषस्य त्रयोदशरज्ज्वात्मकस्थानीयप्रदेशः, तत्र ग्रीवायामतीवशोभाकरणहेतव आभरणभूता ग्रैवेया देवावासाः, तत्र भवा देवा ग्रैवेयकास्ते नवप्रकारा ज्ञेयाः ॥ २१४ ॥

तेषां ग्रैवेयकाणां नामानि-

हिट्ठिमाहिट्ठिमा चेव, हिट्ठिमामज्झिमा तहा ।
हिट्ठिमोवरिमा चेव, मज्झिमाहिट्ठिमा तहा ॥ २१५ ॥

मज्झिमामज्झिमा चेव, मज्झिमोवरिमा तहा ।
उवरिमाहिट्ठिमा चेव, उवरिमामज्झिमा तहा ॥ २१६ ॥ युग्मम् ॥

उपरितनषट्कापेक्षया प्रथमेष्वधस्तना अधस्तनाः, चैव पादपूरणे, प्रथमग्रैवयकदेवा : १ । अधस्तनाश्च मध्यमाश्चाधस्तनमध्यमा द्वितीयग्रैवेयकदेवाः २ । तथाधस्तनोपरितनास्तृतीयग्रैवेयकदेवाः ३ । तथा मध्यमाधस्तना मध्यमस्थ त्रिकापेक्षयाऽधस्तना मध्यमाधस्तनाश्चतुर्थग्रैवेयकदेवाः ४ ॥ २१५ ॥ च पुनर्मध्यममध्यमा मध्यमस्थत्रिकापेक्षया मध्यमा मध्यममध्यमाः पञ्चमग्रैवेयकदेवाः ५ । तथा मध्यमोपरितना मध्यमत्रिकापेक्षयोपरितना मध्यमोपरितनाः षष्ठग्रैवेयकदेवाः ६ । पुनरुपरितनाधस्तनाः, उपरिस्थत्रिकापेक्षयाऽधस्तना उपरितनाधस्तनाः सप्तमग्रैवेयकदेवाः ७ । तथोपरितनमध्यमा, उपरितनत्रिकापेक्षया मध्यमा मध्यस्था उपरितनमध्यमा अष्टमग्रैवेयकदेवाः ८ ॥ २१६ ॥

अथ नवमग्रैवेयकदेवानां नामोच्यते-

उवरिमाउवरिमा चेव, इइ गेविज्जगा सुरा ।

च पुनरुपरिमोपरिमा उपरिस्थत्रिकापेक्षयोपरिमा उपरिमोपरिमा नवमग्रैवेयकदेवा इत्यमुना प्रकारेण नवग्रैवेयकाः सुरा व्याख्याताः ।

अथानुत्तरविमानान्याह-

विजया वैजयंता य, जयंता अपराजिता ॥ २१७ ॥

सव्वट्ठसिद्धगा चेव, पंचहाणुत्तरा सुरा ।
इइ वेमाणिया एए, णेगहा एवमाईओ ॥ २१८ ॥

विजया विजयविमानवासिनः, विजयन्ते समस्तविघ्नहेतूनिति विजया इति व्युत्पत्तिः । तथा वैजयन्ताः, एवं जयन्तास्तथाऽपराजिताः, अपरैरन्यैरभ्युदयविघ्नहेतुभिः शत्रुभिरजिता अपराजिताः । पुनः सर्वार्थसिद्धकाः, सर्वेऽर्थाः सिद्धा इव सिद्धा येषां ते सर्वार्थसिद्धाः, सर्वार्थसिद्धा एव सर्वार्थसिद्धकाः इत्यमुना प्रकारेणैते पञ्चधा अनुत्तरदेवाः । एवमादिका व्याख्याता द्वादशदेवलोकभवा नवग्रैवेयकभवाः पञ्चानुत्तरभवाः सुरा एवमादयो ज्ञेयाः । चतुरशीतिलक्षाणि सप्तनवतिसहस्राणि तथा त्रयोविंशतिरेतत्प्रमाणम्, सर्वविमानापेक्षयाऽनेकविधा आख्याताः ॥ २१७-२१८ ॥

लोगस्स एगदेसंमि, ते सव्वे परिकित्तिया ।
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥ २१९ ॥

ते सर्वे देवा लोकस्यैकदेशे परिकीर्तिताः, इतोऽनन्तरं कालविभागं तु तेषां देवानां चतुर्विधं वक्ष्ये ॥ २१९ ॥

संतइं पप्पऽणाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥ २२० ॥

सन्ततिं प्राप्य ते देवा अनादयोऽपर्यवसिता अपि, स्थितिं कायस्थितिं प्रतीत्य सादयः सपर्यवसिताश्चापि वर्तन्ते ॥ २२० ॥

साहियं सागरं इक्कं, उक्कोसेण ठिई भवे ।
भोमिज्जाणं जहन्नेणं, दसवाससहस्सिया ॥ २२१ ॥

'भोमिज्जाणं' इति भवनपतीनां देवानामुत्कृष्टेनायुःस्थितिः साधिकं सागरोपमं वर्तते । जघन्येन दशवर्षसहस्रिका स्थितिर्व्याख्याता ॥ २२१ ॥

पलिओवममेगं तुं, उक्कोसेण ठिई भवे ।
वंतराणं जहन्नेणं, दसवाससहस्सिया ॥ २२२ ॥

व्यन्तराणामुत्कृष्टेनैकं पल्योपममायुःस्थितिर्भवेत्, तु पुनर्व्यन्तराणां जघन्येन दशवर्षसहस्रिका भवेत् ॥ २२२ ॥

पलिओवमं तु एगं, वासलक्खेण साहियं ।
पलिओवमट्ठभागो, जोइसेसु जहन्निया ॥ २२३ ॥

ज्योतिष्काणां चन्द्रार्काणां देवानामेकं पल्योपमं वर्षलक्षेण साधिकमुत्कृष्टायुः स्थितिर्व्याख्याता, पुनर्जघन्यिकायुःस्थितिः पल्योपमस्याष्टमो भागो भवति ॥ २२३ ॥

दो चेव सागराइं, उक्कोसेण [१]ठिई भवे ।
सोहम्मंमि जहन्नेणं, एगं च पलिओवमं ॥ २२४ ॥

सौधर्मदेवलोके द्वे सागरोपमे उत्कृष्टायुःस्थितिः, जघन्येनैकं पल्योपममायुः-स्थितिर्ज्ञेया ॥ २२४ ॥

सागरा साहिया दुन्नि, उक्कोसेण [१]ठिई भवे ।
ईसाणंमि जहन्नेणं, साहियं पलिओवमं ॥ २२५ ॥

ईशाने-ईशानदेवलोके उत्कृष्टेन द्वे सागरोपमे साधिके आयुःस्थितिर्भवेत् । जघन्यतस्तु तत्रायुःस्थितिः साधिकं पल्योपममस्ति ॥ २२५ ॥

सागराणि य सत्तेव, उक्कोसेण ठिई भवे ।
सणंकुमारे जहन्नेणं, दुन्निओ सागरोवमा ॥ २२६ ॥

सनत्कुमारे उत्कृष्टेन सप्तैव सागरोपमाण्यायुःस्थितिर्भवेत् । जघन्येन द्वे सागरोपमे आयुःस्थितिः ॥ २२६ ॥

साहिया सागरा सत्त, उक्कोसेण ठिई भवे ।
माहिंदंमि जहन्नेणं, साहिया दुन्नि सागरा ॥ २२७ ॥

माहेन्द्रे देवलोके साधिकानि सप्तसागरोपमाण्युत्कृष्टेनायुःस्थितिर्भवेत् । जघन्येन साधिके द्वे सागरोपमे आयुःस्थितिः ॥ २२७ ॥

दसेव य सागराओ, उक्कोसेण ठिई भवे ।
बंभलोगे जहन्नेणं, सत्तओ सागरोवमा ॥ २२८ ॥

ब्रह्मदेवलोके दशसागरोपमाण्युत्कृष्टेनायुःस्थितिर्भवेत् । जघन्येन सप्तसागरोपमाणि स्थितिर्भवेत् ॥ २२८ ॥

चउद्दस सागराइं, उक्कोसेण ठिई भवे ।
लंतगंमि जहन्नेणं, दस उ सागरोवमा ॥ २२९ ॥

लान्तकदेवलोके उत्कृष्टेन चतुर्दशसागरोपमाण्यायुःस्थितिर्भवेत् । जघन्यतो दशसागरोपमाण्यायुःस्थितिर्भवेत् ॥ २२९ ॥

---

१ वियाहिया-अन्यसंस्करणे ॥

सत्तरस सागराइं, उक्कोसेण ठिई भवे ।
महासुक्के जहन्नेणं, चउद्दस सागरोवमा ॥ २३० ॥

महाशुक्रे देवलोके उत्कृष्टेन सप्तदश सागरोपमाण्यायुःस्थितिः, जघन्येन चतुर्दश-सागरोपमाण्यायुःस्थितिर्भवेत् ॥ २३० ॥

अट्ठारस सागराइं, उक्कोसेण ठिई भवे ।
सहस्सारे जहन्नेणं, सत्तरस सागरोवमा ॥ २३१ ॥

सहस्रारे देवलोकेऽष्टादशसागरोपमाण्युत्कृष्टायुःस्थितिर्भवेत् । जघन्यतः सप्तदश सागरोपमाण्यायुःस्थितिर्भवेत् ॥ २३१ ॥

सागरा अउणवीसं तु, उक्कोसेण ठिई भवे ।
आणयंमि जहन्नेणं, अट्ठारस सागरोवमा ॥ २३२ ॥

आनते देवलोके एकोनविंशतिसागरोपमाण्युत्कृष्टेनायुःस्थितिर्भवेत् । तथा जघन्ये-नाष्टादशसागरोपमाण्यायुःस्थितिर्भवेत् ॥ २३२ ॥

वीसं तु सागराइं, उक्कोसेण ठिई भवे ।
पाणयंमि जहन्नेणं, सागरा अउणवीसई ॥ २३३ ॥

प्राणतदेवलोके उत्कृष्टेन विंशतिसागरोपमाण्यायुःस्थितिर्भवेत् । तथा जघन्येनैकोन-विंशतिः सागरोपमाण्यायुःस्थितिर्भवेत् ॥ २३३ ॥

सागरा इक्कवीसं तु, उक्कोसेण ठिई भवे ।
आरणंमि जहन्नेणं, वीसई सागरोवमा ॥ २३४ ॥

आरणे देवलोके एकविंशतिसागरोपमाण्युत्कृष्टायुःस्थितिः, जघन्येन तु विंशति-सागरोपमाण्यायुःस्थितिर्भवेत् ॥ २३४ ॥

बावीससागराइं, उक्कोसेण ठिई भवे ।
अच्चुयंमि जहन्नेणं सागरा इक्कवीसई ॥ २३५ ॥

अच्युते देवलोके द्वाविंशतिसागरोपमाण्युत्कृष्टायुःस्थितिर्भवेत् । जघन्यतस्त्वेक-विंशतिसागरोपमाण्युःस्थितिर्भवेत् ॥ २३५ ॥

अथ नवग्रैवेयकाणामायुःस्थितिरुच्यते-

तेवीससागराइं, उक्कोसेण ठिई भवे ।
पढमंमि जहन्नेणं, बावीसं सागरोवमा ॥ २३६ ॥

त्रयोविंशतिसागरोपमाणि प्रथमग्रैवेयके उत्कृष्टायुःस्थितिर्भवेत् । जघन्येन द्वाविंशति-सागरोपमणि ॥ २३६ ॥

चउवीस सागराइं, उक्कोसेण ठिई भवे ।
बिइयंमि जहन्नेणं, तेवीसं सागरोवमा ॥ २३७ ॥

द्वितीयग्रैवेयके चतुर्विंशतिसागरोपमाण्युत्कृष्टायुःस्थितिर्भवेत् । जघन्येन त्रयोविंशति-सागरोपमाणि ॥ २३७ ॥

पणवीसं सागराइं, उक्कोसेण ठिई भवे ।
तइयंमि जहन्नेणं, चउवीसं सागरोवमा ॥ २३८ ॥

तृतीये ग्रैवेयके पञ्चविंशतिसागरोपमाण्युत्कृष्टायुःस्थितिर्भवेत् । जघन्येन तु चतु-र्विंशतिसागरोपमाणि ॥ २३८ ॥

छव्वीस सागराइं, उक्कोसेण ठिई भवे ।
चउत्थंमि जहन्नेणं, सागरा पणवीसइ ॥ २३९ ॥

चतुर्थे ग्रैवेयके षड्विंशतिसागरोपमाण्युत्कृष्टायुःस्थितिः, जघन्येन पञ्चविंशति-सागरोपमाणि ॥ २३९ ॥

सागरा सत्तवीसं तु, उक्कोसेण ठिई भवे ।
पंचमंमि जहन्नेणं, सागरा उ छवीसई ॥ २४० ॥

पञ्चमे ग्रैवेयके सप्तविंशतिसागरोपमाण्युत्कृष्टायुःस्थितिः, जघन्येन षड्विंशतिसागरो-पमाणि ॥ २४० ॥

सागरा अट्ठवीसं तु, उक्कोसेण ठिई भवे ।
छट्ठंमि य जहन्नेणं, सागरा सत्तवीसई ॥ २४१ ॥

षष्ठे ग्रैवेयके उत्कृष्टेनाष्टाविंशतिसागरोपमाण्यायुःस्थितिः, जघन्येन सप्तविंशति-सागरोपमाणि ॥ २४१ ॥

सागरा अउणतीसं तु, उक्कोसेण ठिई भवे ।
सत्तमंमि जहन्नेणं, सागरा अट्ठवीसई ॥ २४२ ॥

सप्तमे ग्रैवेयके उत्कृष्टैकोनत्रिंशत्सागरोपमाण्यायुःस्थितिर्भवेत्, जघन्यतोऽष्टाविंशति-सागरोपमाणि ॥ २४२ ॥

तीसं तु सागराइं, उक्कोसेण ठिई भवे ।
अट्ठमंमि जहन्नेणं, सागरा अउणतीसई ॥ २४३ ॥

अष्टमे ग्रैवेयके त्रिंशत्सागरोपमाण्युत्कृष्टायुःस्थितिर्भवेत्, जघन्यतस्त्वेकोनत्रिंशत्सागरोपमाणि ॥ २४३ ॥

सागरा इक्कतीसं तु, उक्कोसेण ठिई भवे ।
नवमंमि जहन्नेणं, तीसई सागरोवमा ॥ २४४ ॥

नवमे ग्रैवेयके एकत्रिंशत्सागरोपमाण्युत्कृष्टायुःस्थितिर्भवेत्, जघन्यतस्तु त्रिंशत्सागरोपमाणि ॥ २४४ ॥

अथ पञ्चानुत्तराणामायुःस्थितिमाह-

तित्तीस सागराइं, उक्कोसेण ठिई भवे ।
चउसुवि विजयाईसु, जहन्नेणेक्कतीसई ॥ २४५ ॥

चतुर्ष्वपि विजयवैजयन्तजयन्तापराजितेषु विमानेषूत्कृष्टेन त्रयस्त्रिंशत्सागरोपमाण्यायुःस्थितिर्भवेत् । जघन्येनैकत्रिंशत्सागरोपमाणि ॥ २४५ ॥

अजहन्नमणुक्कोसं, तित्तीसं सागरोवमा ।
महाविमाणे सव्वट्ठे, ठिई एसा वियाहिया ॥ २४६ ॥

सर्वार्थे इति सर्वार्थसिद्धे महाविमानेऽजघन्यं तथाऽनुत्कृष्टं यथास्यात्तथा त्रयस्त्रिंशत्सागरोपमाण्यायुःस्थितिर्भवेत् । न विद्यते जघन्या यत्र तदजघन्यम्, न विद्यते उत्कृष्टा यत्र तदनुत्कृष्टम्, अर्थाज्जघन्यापि नास्ति, उत्कृष्टापि नास्ति । एकैव त्रयस्त्रिंशत्सागरोपमरूपैषायुःस्थितिर्व्याख्याता ॥ २४६ ॥

अथ देवानां कायस्थितिमाह-

जा चेव आउठिई, देवाणं तु वियाहिया ।
सा तेसिं कायठिई, जहन्नुक्कोसिया भवे ॥ २४७ ॥

या चैव देवानां चतुर्विधानामप्यायुःस्थितिर्जघन्योत्कृष्टा व्याख्याता, सैव कायस्थितिर्भवेत् । यतो हि देवा मृत्वा देवा न भवन्ति ॥ २४७ ॥

अथ कालान्तरमाह-

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए, देवाणं हुज्ज अंतरं ॥ २४८ ॥

देवानां स्वकीये काये त्यक्ते सति वनस्पतिकाये व्रजति, तदोत्कृष्टमन्तरमनन्तकालं भवेत् । जघन्यतोऽन्तरमन्तर्मुहूर्तं भवेत् ॥ २४८ ॥

[1]अणंतकालमुक्कोसं, वासपुहत्तं जहन्नयं ।
आणयाईण देवाणां, गेविज्जाणं तु अंतरं ॥ २४९ ॥

आनतादीनां नवमदेवलोकादीनां तु पुनर्ग्रैवेयकाणां नवानाम्, उपलक्षणत्वात्तत्र वासिनां देवानां स्वस्थानाच्च्युत्वाऽन्यत्र संसारे निगोदे समुत्पन्नानाम्, पश्चात्पुनः स्वस्थाने आगच्छतामुत्कृष्टं चेत्कालान्तरं भवेत्, तदानन्तकालान्तरं भवेत् । जघन्यं चेदन्तरं भवेत्तदा वर्षपृथक्त्वं नववर्षाणि यावद्भवतीत्यर्थः ॥ २४९ ॥

संखेज्जसागरुक्कोसं, वासपुहुत्तं जहन्नयं ।
अणुत्तराण य देवाणं, अंतरं तु वियाहियं ॥ २५० ॥

अनुत्तराणां देवानां च्यवनं भूत्वा पुनश्चैत्तत्रैवोत्पत्तिः स्यात्तदा कियदन्तरं भवेत्तदाह- उत्कृष्टं तु सङ्ख्येयसागरोपमाण्यन्तरं व्याख्यातम्, जघन्यं तु वर्षपृथक्त्वं, नववर्षाणि यावत् ॥ २५० ॥

एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥ २५१ ॥

एतेषां देवानां चतुर्निकायानां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्रशो विधानानि भवन्ति, अनेके भेदा भवन्ति ॥ २५१ ॥

अथ निगमयितुमाह-

संसारत्था य सिद्धा य, इइ जीवा वियाहिया ।
रूविणो चेवऽरूवी य, अजीवा दुविहा वि य ॥ २५२ ॥

संसारस्थाश्च जीवाः सिद्धाश्च जीवा इत्यमुना प्रकारेण व्याख्याताः । च पुना रूपिणोऽरूपिणोऽजीवाश्च व्याख्याता द्विविधा अपि कथिताः ॥ २५२ ॥

अथोपदेशमाह-

इइ जीवमजीवे य, सुच्चा सद्दहिऊण य ।
सव्वनयाणमणुमए, रमिज्जा संजमे मुणी ॥ २५३ ॥

मुनिः साधुरेवममुना प्रकारेण जीवाजीवान् गुरोर्मुखात् श्रुत्वा, पुनः श्रद्धाय संयमे सप्तदशविधे रमेद्रतिं कुर्यात् । कीदृशे संयमे ? सर्वनयानामनुमते, सर्वे च ते नयाश्च सर्वनया

१ इमे द्वे गाथे अन्यस्मिन् संस्करणे न स्तः ॥

नैगमादयः सप्तनयाः, तेषां सर्वनयानां ज्ञानक्रियान्तर्गतानामनुमतेऽभिप्रेते, ज्ञानसहित-सम्यक्चारित्ररूपे ॥ २५३ ॥

तओ बहूणि वासाणि, सामण्णमणुपालिया ।
इमेण कम्मजोएण, अप्पाणं संलिहे मुणी ॥ २५४ ॥

ततश्चारित्रे रमणानन्तरं बहूनि वर्षाणि श्रामण्यमनुपाल्य मुनिरनेन क्रमयोगेनात्मानं संलिखेत्, द्रव्यतो भावतश्च कृशीकुर्यात् ॥ २५४ ॥

सम्प्रति संलेखनापूर्वकं क्रमयोगमाह-

बारसेव उ वासाइं, संलेहुक्कोसिया भवे ।
संवच्छरं मज्झिमिया, छम्मासा य जहन्निया ॥ २५५ ॥

पढमे वासचउक्कंमि, विगईनिज्जूहणं करे ।
बीए वासचउक्कंमि, विचित्तं तु तवं चरे ॥ २५६ ॥

एगंतरमायामं, कट्टु संवच्छरे दुवे ।
तओ संवच्छरद्धं तु, नाइविगिट्ठं तवं चरे ॥ २५७ ॥

तओ संवच्छरद्धं तु, विगिट्ठं तु तवं चरे ।
परिमियं चेव आयामं, तंमि संवच्छरे करे ॥ २५८ ॥

कोडीसहियमायामं, कट्टु संवच्छरे मुणी ।
मासद्धमासिएणं तु, आहारेणं तवं चरे ॥ २५९ ॥

द्वादशैव वर्षाण्युत्कृष्टा संलेखना भवेत्, संलेखनं द्रव्यतो भावतश्च कृशत्व करणम् । संलेखना द्रव्यतः शरीरस्य कृशीकरणम्, भावतश्च कषायाणां कृशीकरणम् । संवत्सरमेक-वर्षं मध्यमिका संलेखना भवेत्, जघन्यिका संलेखना षण्मासी भवेत् ॥ २५५ ॥

संलेखनायास्त्रैविध्येऽनुक्रममाह-प्रथमे आद्ये वर्षचतुष्के विकृतिनिर्यूहनम्, विकृतीनां पञ्चानां त्यागमाचाम्लनिविकृत्यादितपः कुर्यादित्यर्थः । द्वितीये वर्षचतुष्के विचित्रमेव चतुर्थषष्ठाष्टमादिरूपं तपश्चरेत् ॥ २५६ ॥

ततो द्वौ संवत्सरौ यावदेकेन चतुर्थलक्षणेन तपसान्तरं व्यवधानं यस्मिंस्तदेकान्तर-मायाममाचाम्लं कृत्वा तपश्चरेत् । ततस्तदनन्तरं संवत्सरार्धं यावन्मासषट्कं यावदतिविकृष्ट-मष्टमद्वादशादितपोऽनाचरेन्न सेवेत ॥ २५७ ॥

ततस्तु संवत्सरार्धं मासषट्कं तु विकृष्टं षष्ठाष्टमादितप आचरेत् । परं तत्रायं विशेषः—

परिमितमेव स्तोकमेवाचाम्लं तपस्तस्मिन् संवत्सरे कुर्यात्। कोऽर्थः ? पूर्वस्मिन् संवत्सरार्धेऽस्मिन् संवत्सरार्धे च, एवमेकादशे संवत्सरे चतुर्थषष्ठाष्टमद्वादशादीनां पारणे आचाम्लं विदध्यादित्यर्थः। ततः कोटीसहितं तपः स्यात् ॥ २५८ ॥

इत्थमेकादशसु वर्षेषु व्यतीतेषु द्वादशवर्षे यत्कुर्यात्तदाह–कोटीभ्यां प्रत्याख्यानस्याद्यन्ताभ्यां सहितं तपो द्वादशे संवत्सरे मुनिः कुर्यात्। कोऽर्थः ? विवक्षितदिने प्रभातसमये आचाम्लप्रत्याखानं कृत्वा पुनर्द्वितीयदिने तपोऽन्तरं विधाय तस्यान्ते पुनराचाम्लामिति [१]कोटीसहितमुच्यते। इत्यनेन द्वादशवर्षाणि तपः कुर्यात्। तु पुनः पञ्चान्मासिकेन, तु पुनरर्धमासिकेनाहारेण, अर्थान्मासक्षपणप्रत्याख्यानेन, तथार्धमासक्षपणेनाहारेणेत्याहारानादरणेन तपः प्रस्तावाद्भक्तपरिज्ञयाऽनशनरूपं तपश्चरेत्। एतद्विस्तरस्तु निशीथचूर्णितोऽवसेयः ॥ २५९ ॥

अङ्गीकृतानशनस्याऽशुभभावनापरिहारः कर्त्तव्यः, अतोऽशुभभावनाज्ञापनार्थमाह-

कंदप्पमाभिओगं, किव्विसियं मोहमासुरत्तं च।
एयाओ दुग्गईओ, मरणंमि विराहिया हुंति ॥ २६० ॥

एताः पञ्च भावना विराधिकाः सम्यग्दर्शनचारित्रादीनां भङ्गकराः सत्यो मरणान्ते-मरणसमये दुर्गतयो दुर्गतिकारणत्वाद् दुर्गतयो भवन्ति। कारणे कार्योपचारः। एताः का भावनाः ? कन्दर्प इति कन्दर्पभावना, पदैकदेशे पदसमुदायोपचारात्, एवमाभियोग्यभावना, किल्बिषिभावना, मोहभावना, असुरत्वभावना, दुर्गतिश्चात्र, अर्थाद् देवदुर्गतिः स्यात्। तद्वशाद्व्यवहारेण चारित्रे सत्यपि तादृग्देवनिकायोत्पत्तौ चारित्रभावेन नानागतिभाक्त्वं स्यात्। यदुक्तं-

"यः संशयमपि कुर्या-देतासु भावनासु मनुजस्तु।
स च गच्छेत् सुरयोनौ, यत्र हि चारित्रहीनत्वं ॥ १ ॥"

मरणसमये यादृशी मतिस्तादृशी गतिः स्यादिति दर्शितम्। मरणसमये यद्येता भावना न स्युस्तदा सुगतिः स्यादित्यर्थः ॥ २६० ॥

मिच्छादंसणरत्ता, सनियाणा हु हिंसगा।
इइ जे मरंति जीवा, तेसिं पुण दुल्लहा बोही ॥ २६१ ॥

इत्यमुना प्रकारेण ये जीवा म्रियन्ते, तेषां जीवानां पुनर्जन्मान्तरे बोधिर्जैनधर्मरुचिर्दुर्लभा-दुष्प्रापा भवेत्। इतीति किं ? ये जीवा मिथ्यादर्शनरक्ताः, अतत्वे तत्त्वाभिनिवेश-

१ कोटावग्रभावे प्रत्याख्यानाद्यन्तकोणरूपे सहिते मिलिते यस्मिंस्तत्कोटीसहितम्। कोऽर्थः ? विवक्षितदिने प्रातराचाम्लं प्रत्याख्याय, तच्चाहोरात्रं प्रतिपाल्य पुनर्द्वितीयेऽह्नि आचाम्लमेव प्रत्याचष्टे, ततो द्वितीयस्यारम्भकोटिः, आद्यस्य तु पर्यन्तकोटिः, उभे अपि मिलिते भवतः, इति तत्कोटीसहितमुच्यते इत्यन्ये।

रूपं मिथ्यादर्शनम्, तत्र रक्ता मिथ्यादर्शनरक्ताः, तादृशाः सन्तो म्रियन्ते, पुनर्ये जीवाः सनिदानाः, निदानेन विषयाद्याशया सह वर्तन्ते इति सनिदानास्तादृशाः सन्तो म्रियन्ते, तथा 'हु' इति निश्चयेन ये जीवा हिंसका जीवहिंसाकारिणः सन्तो म्रियन्ते, तादृशानां भवान्तरे जिनधर्मप्राप्तिर्दुर्लभा स्यादित्यर्थः ॥ २६१ ॥

सम्मद्दंसणरत्ता, अनियाणा सुक्कलेसमोगाढा ।
इइ जे मरंति जीवा, सुलहा तेसिं भवे बोही ॥ २६२ ॥

इत्यमुना प्रकारेण ये जीवा म्रियन्ते, तेषां जीवानां बोधिर्जैनधर्मप्राप्तिर्भवान्तरे सुलभा भवेत् । इतीति किं ? ये जीवाः सम्यग्दर्शनरक्ताः, देवतत्त्वगुरुतत्त्वधर्मतत्त्वरक्ताः, एतादृशाः सन्तो म्रियन्ते, तथा पुनर्ये जीवा अनिदाना निदानरहिताः सन्तो म्रियन्ते, पुनर्ये जीवाः शुक्ललेश्यामवगाढाः शुक्ललेश्यां प्रविष्टाः शुद्धपरिणामाः सन्तो म्रियन्ते, तेषां बोधिर्भवान्तरे सुलभा भवेदित्यर्थः ॥ २६२ ॥

मिच्छादंसणरत्ता, सनियाणा किण्हलेसमोगाढा ।
इइ जे मरंति जीवा, तेसिं पुण दुल्लहा बोही ॥ २६३ ॥

इत्यमुना प्रकारेण ये म्रियन्ते, तेषां पुनर्जन्मान्तरे बोधिर्दुर्लभा भवेत् । इतीति किं ? कृष्णलेश्यामवगाढाः कृष्णलेश्यां प्रविष्टाः सन्तो मिथ्यादर्शनरक्ताः, पुनः सनिदानाः, एतादृशाः सन्तो म्रियन्ते, तेषां जिनधर्मप्राप्तिर्दुर्लभा भवेत् । अत्र 'मिच्छादंसणरत्ता' इति गाथां पूर्वमुक्त्वा पुनरपि मिथ्यादर्शनरक्तेति गाथोक्तास्ति, तत्र च पुनरुक्तिदूषणं न ज्ञेयम् । अत्र गाथायां कृष्णलेश्यावतां म्रियमाणानां भवसन्ततावपि बोधिप्राप्तेरभाव इति सूचितम् । पूर्वगाथायां तु कृष्णलेश्यारहितानां मृतानां तु मरणानन्तरमपरे जन्मनि बोधिदुर्लभत्वं दर्शितम्, इति न पुनरुक्तिदूषणम् ॥ २६३ ॥

जिणवयणे अणुरत्ता, जिणवयणं जे करंति भावेण ।
अमला असंकिलिट्ठा, ते हुंति परित्तसंसारी ॥ २६४ ॥

ते जीवाः परीतसंसारिणो भवन्ति, प्राकृतत्वाद्बहुवचनस्थाने एकवचनम् । परीतः -खण्डितः संसारः परीतसंसारः, परीतसंसारो विद्यते येषां ते परीतसंसारिण इति छिन्नसंसारिणः स्युरित्यर्थः । ते इति के ? ये जीवा जिनवचनेऽर्हद्वाक्येऽनुरक्ताः सन्तो भावेन जिनवचनं कुर्वन्ति, इत्यनेन मनोवाक्कायैर्जिनधर्ममाराधयन्ति । पुनः कीदृशास्ते ? अमला मिथ्यामलरहिताः, पुनः कीदृशाः ? असङ्क्लिष्टा मोहमत्सरादिक्लेशरहिताः, एतादृशा जीवाः संसारपारं कृत्वा मोक्षं व्रजन्तीत्यर्थः ॥ २६४ ॥

बालमरणाणि बहुसो, अकाममरणाणि चेव बहुयाणि ।
मरिहंति ते वराया, जिणवयणं जे न याणंति ॥ २६५ ॥

ये मनुष्या जिनवचनं न जानन्ति । ज्ञानक्रियाभ्यां मोक्ष इत्यर्हद्वाक्यं न श्रद्दधन्ति ते मनुष्या बहुशो वारंवारं वराका दयाभाजनं सन्तो 'बालमरणाणि' इति प्राकृतत्वात्तृतीयाबहुवचनस्थाने द्वितीयाबहुवचनम्, बालमरणैस्त्द्बन्धनविषभक्षणादिमरणैस्तथाऽकाममरणैश्चेच्छां विना क्षुधातृषाशीतातपादिमरणैर्मरिष्यन्ति । तस्माद्भावेन जिनवचनं श्रद्धेयम्, भावस्त्वालोचनया स्यात् । आलोचना त्वालोचनार्हाणां देया, आलोचनायोग्यास्त्वेतैर्हेतुभिः स्युस्तान् हेतुनाह ॥ २६५ ॥

बहुआगमविन्नाणा, समाहिउप्पायगा य गुणगाही ।
एएण कारणेणं, अरिहा आलोयणं सोउं ॥ २६६ ॥

एतैः कारणैर्जना आलोचनां श्रोतुमर्हा भवन्ति । तानि कानि कारणानि ? बह्वागमविज्ञानत्वसमाध्युत्पादनत्वगुणग्राहित्वादीन्यालोचनाश्रवणार्हत्वकारणानि ज्ञेयानि । गुणगुणिनोरभेदविवक्षयेमान्येव कारणान्यालोचनाश्रवणार्हाणां विशेषणत्वेन प्रतिपादयति । ते नरा आलोचनां श्रोतुमर्हा भवन्ति । ते इति के ? ये बह्वागमविज्ञानाः, बहुः सूत्रार्थाभ्यां विस्तारो विपुल आगमो बह्वागमस्तस्य विशिष्टं ज्ञानं येषां ते बह्वागमविज्ञाना भवन्ति । च पुनर्ये मुनयः समाध्युत्पादकाः, समाधिं देशकालयोग्यैर्मधुरवचनैरन्यस्य स्वास्थ्यमुत्पादयन्तीति समाध्युत्पादका भवन्ति, च पुनर्ये गुणग्राहिणो भवेयुः, परदूषणोद्धाटका न स्युस्ते आलोचनाश्रवणार्हा भवेयुरिति भावः ॥ २६६ ॥

अथ कन्दर्पादिभावनानां यत्परिहार्यत्वमुक्तम्, अतस्ताभ्यामेव स्वरूपमाह-

कंदप्पकुक्कुयाइं, तह सीलसहावहासविगहाहिं ।
विम्हावितो य परं, कंदप्पं भावणं कुणई ॥ २६७ ॥

नरः कन्दर्पकौकुच्ये कुर्वन्, तथा शीलस्वभावहास्यविकथादिभिः परमन्यं विस्मापयन् कन्दर्पभावना करोति । कन्दर्पश्च कौकुच्यं च कन्दर्पकौकुच्ये, ते कन्दर्पकौकुच्ये । तत्र कन्दर्पोऽट्टहास्यादिपूर्वं वक्रत्वेन जल्पनम्, कौकुच्यं कायदुश्चेष्टितं वाग्दुश्चेष्टितं च, एते उभे कुर्वन् जीवः कन्दर्पभावनां जनयति । तथा शीलस्वभावस्य हास्यं शीलस्वभावहास्यम्, शीलस्वभावहास्यं च विकथाश्च शीलस्वभावहास्यविकथाः, ताभिरन्यं साश्चर्यं कुर्वन् कन्दर्पभावनां जनयति ॥ २६७ ॥

मंताजोगं काउं, भूईकम्मं च जे पउंजंति ।
सायरसइड्ढिहेउं, अभिओगं भावणं कुणइ ॥ २६८ ॥

यः पुरुषः सातरसर्द्धिहेतवे मन्त्रायोगं कृत्वा, मन्त्रं च आयोगश्च मन्त्रायोगम् मन्त्रं -ओंकारादिस्वाहान्तम्, आयोग-औषधीमीलनम्, अथवा मन्त्राणामायोगः- साधनं मन्त्रा-

योगस्तं कृत्वा, तता भूत्या-भश्मना मृत्तिकया सूत्रेण वा यत्कर्म तद्भूतिकर्म, मनुष्याणां तिरश्चां गृहाणां वा रक्षाद्यर्थं कौतुकादिकरणं भूतिकर्म, एतानि सुखार्थं सरसाहारार्थं वस्त्रादिप्राप्त्यर्थं यः साधुः कुर्यात्, स आभियोगिकीं भावनां करोति । आभियोगिकीभावनां चोत्पाद्य स आभियोगिदेवत्वेन मृत्वोत्पद्यते इत्यर्थः । आभियोगदेवा हि देवानामाज्ञाकारिणः किङ्करप्राया दासप्रायाश्च ॥ २६८ ॥

नाणस्स केवलीणं, धम्मायरियस्स संघसाहूणं ।
माई अवण्णवाई, किव्विसियं भावणं कुणई ॥ २६९ ॥

स पुरुषः किल्बिषीं भावनां कुरुते, किल्बिषदेवयोनित्वदायिकां भावनामुत्पादयति । स कः ? यः पुरुषो ज्ञानस्य श्रुतज्ञानस्य तथा श्रुतज्ञानवतोऽवर्णवादी भवति । तथा केवलिनः केवलज्ञानिनः केवलदर्शनस्य वाऽवर्णवादी भवति । तथा यः पुरुषो धर्माचार्यस्य धर्मदायकस्याऽवर्णवादी भवति, अयं जातिहीनः, अयं मूर्खः, अयं कषायीत्याद्याशातनाकृद्भवति । तथा सङ्घसाधूनां सङ्घश्च साधवश्च सङ्घसाधवस्तेषां सङ्घसाधूनामवर्णवादी भवति । तथा पुनर्यो मायी, आत्मनः सतोऽवगुणानाच्छादयति, परेषामसतोऽवगुणान् वक्ति, सतो गुणान्न वक्ति, एतादृशो जीवो मृत्वा किल्बिषिदेवत्वेनोत्पद्यते इत्यर्थः ॥ २६९ ॥

अणुबद्धरोसपसरो, तह य निमित्तंमि होइ पडिसेवी ।
एएहिं कारणेहिं, आसुरियं भावणं कुणइ ॥ २७० ॥

एताभ्यां कारणाभ्यां पुरुष आसुरीं भावनां करोति, असुरनिकायोत्पादिकां भावनां जनयति । एतौ कौ कारणौ ? इत्याह—यः पुरुषोऽनुबद्धरोषप्रसरः, अनुबद्धश्चिरकालस्थायी रोषप्रसरः-क्रोधप्रसरो यस्य सोऽनुबद्धरोषप्रसरः, तथा यः पुरुषो निमित्तेऽतीतानागतवर्त्तमानरूपे त्रिविधे निमित्ते विषये, अथवा निमित्ते भूमान्तरिक्षादिके प्रतिसेवी भवति, कारणं विनापि शुभाशुभनिमित्तप्रयोक्ता भवति, स मृत्वाऽसुरत्वेनोत्पद्यते इति भावः ॥ २७० ॥

सत्थग्गहणं विसभक्खणं च, जलणं जले पवेसो य ।
अणायारभंडसेवा, जम्मणमरणाणि बंधंति ॥ २७१ ॥

यः शस्त्रग्रहणम्, शस्त्राणां खड्गक्षुरिकादीनामात्मवधार्थमुदरादौ ग्रहणं शस्त्रग्रहणम्, तथा विषभक्षणं तालुपुटादिकालकूटानामदनम्, तथा ज्वलनमग्निप्रवेशकरणम्, तथा जले प्रवेशकरणं कूपवाप्यादौ बूडनम्, पर्वतादिभ्यः पतनं च शब्दाद् गृह्यते । पुनरनाचार भाण्डसेवा, एतानि कारणानि कुर्वन्तो जना जन्ममरणकारणानि बध्नन्ति, संसारभ्रमणमुत्पादयन्तीत्यर्थः । अत्राचारः शास्त्रोक्तव्यवहारः, न आचारोऽनाचारस्तेन भाण्डस्योपकरणस्य सेवा हास्यमोहादिभिः परिभोगोऽनाचारभाण्डसेवा । इयमपि क्लेशोत्पादनादनन्तरभवोत्पादिकेत्यर्थः । एतेन चोन्मार्गप्रतिपत्त्या सन्मार्गविप्रतिपत्तिराक्षिप्ता, तथा चार्थतो मोहीभावनोक्ता यतस्तल्लक्षणं चेदम्-

"[1]उम्मग्गदेसओ मग्ग-नासओ मग्गा विपडिवत्ति य ।
मोहेण य मोहित्ता, संमोहं भावणं कुणइत्ति ॥ १ ॥" एतासां च फलं यदाहुः-
"[2]एयाउ भावणाउ, भाविता देवदुग्गइं जंति ।
तत्तो य चुया संता, पडंति भवसागरमणंतं ॥ २ ॥ इति ॥ २७१ ॥

इइ पाउकरे बुद्धे, नायए परिनिव्वुए ।
छत्तीसं उत्तरज्झाए, भवसिद्धीय संमए ॥ २७२ ॥ त्तिबेमि ॥

ज्ञातको बुद्धस्तीर्थंकरो ज्ञातात्-सिद्धार्थकुलाज्जात उत्पन्नो ज्ञातजः श्रीमहावीरः परिनिर्वृतो-निर्वाणं गत इत्यन्वयः । किं कृत्वा ? इत्यमुना प्रकारेण षड्त्रिंशत्सङ्ख्यानुत्तराध्यायान् प्रादुष्कृत्य । उत्तराः प्रधाना अध्याया अध्ययनानि, उत्तराश्च तेऽध्यायाश्चोत्तराध्यायाः, तानर्थतः प्रकटीकृत्येत्यर्थः । कीदृशानुत्तराध्यायान् ? भवसिद्धिकसम्मतान्, भवसिद्धिका-भव्यास्तेषां सम्मता मान्याः पठनीयास्तान् ॥ २७२ ॥

इति जीवाजीवविभक्तिनामकमध्ययनं षट्त्रिंशं सम्पूर्णम् ॥ ३६ ॥

अथ निर्युक्तिकार एतेषामध्ययनानां नामान्याह पञ्चगाथाभिः-विणय परीसह चउरंग, असंखयाऽकाममरण खुड्डागं । एलिज्ज काविलिज्जं, नमिपवज्जा य दुमपत्तं ॥ १ ॥ बहुसुयपुज्ज हरिएस, चित्तसंभूययं च इसुयारं । सभिक्खु बंभचेरं च, पावसमणिज्ज संजईयं ॥ २ ॥ मियापुत्त महनियंठिय, समुद्दपालियज्ज तहय रहनेमि । केसीगोयम समिइयं, जइन्नइज्जं च तह समाचारी ॥ ३ ॥ खलुंक मुक्खमग्गं, सम्मत्तपरक्कमं च तवमग्गं । चरणविहि पमायठाणं, तह कम्मपयडि लेसाणं ॥ ४ ॥ अणगारमग्ग जीवाजीवविभत्ति छत्तीस अज्जयणे । जो पढइ सुणइ गुणई, सो पावइ णिज्जरा विउला ॥ ५ ॥
इति श्रीउत्तराध्ययननामसम्बद्धं गाथापञ्चकम् ।

अथ निर्युक्तिकार एवास्य ग्रन्थस्य माहात्म्यमाह-

[3]जे किर भवसिद्धिया, परित्तसंसारिया य जे भव्वा ।
ते किर पढंति एए, छत्तीसं उत्तरज्झाए ॥ १ ॥

किलेति सम्भावनायां ये केचिन्मनुष्या भवसिद्धिका-भव्याः, च पुनः परीत्तसंसारिकास्ते भव्या एतानि षट्त्रिंशदुत्तराध्ययनान्यधीयन्ते, अर्थाद्येऽभव्या बहुलसंसारिणस्ते एतान्युत्तराध्ययनानि नाधीयन्ते - न पठन्ति ॥ १ ॥

---

१ उन्मार्गदेशनान्मार्गनाशनात्, सन्मार्गविप्रतिपत्त्या च ।
मोहेन च मोहित्वा सम्मोहां भावनां करोति इति ॥ १ ॥
२ एताभिर्भावनाभिर्भावित्वा देवदुर्गतिं यान्ति ।
ततश्च्युत्वा सन्तः पतन्ति भवसागरमनन्तम् ॥ २ ॥
३ निर्युक्तौ क्रमशः गाथे-५५७-५५८ स्तः ।

[1]तम्हा जिणपण्णत्ते, अणंतागमपज्जवेहि संजुत्ते ।
अज्झाए जहजोगं, गुरुप्पसाया अहिज्जिज्जा ॥ २ ॥

तस्मात्कारणाज्जिनप्रज्ञप्तानध्यायान् प्रक्रमादुत्तराध्यायान् यथायोगं गुरुप्रसादादधीयेत । यथायोगमिति, योग, उपधानाद्युचितव्यापारस्तमनतिक्रम्येति यथायोगम् । गुरूणां प्रसादश्चित्तप्रसन्नता गुरुप्रसादस्तस्माद्धेतोः पठेत् । कथंभूतानुत्तराध्यायान् ? अनन्तागमपर्यवैः संयुक्तान्, अनन्ताश्च ते आगमाश्चानन्तागमाः शब्दपरिच्छित्तिप्रकाराः । तथा पर्यावाश्चार्थपर्यवरूपाः, अनन्तागमाश्च पर्यवाश्चानन्तागमपर्यवाः, तैरनन्तागमपर्यवैः, शब्दार्थनयैः पर्यायार्थनयैश्च संयुक्तान् ॥ २ ॥

जोगविहीइ वहित्ता, एए जो लहइ सुत्तअत्थं वा ।
भासेइ य भवियजणो, सो पावइ निज्जरा विउला ॥ ३ ॥

स भव्यो विपुलां निर्जरां प्राप्नोति । स कः ? यो योगविधिं वहित्वा-योगोपधानतपोऽनुष्ठानविधिं कृत्वैतानुत्तराध्यायान् सूत्रार्थतो लभेत । पश्चाद्गुरुमुखात्सूत्रार्थं लब्ध्वा परं भाषेत, स क्षीणकर्मा भवतीत्यर्थः ॥ ३ ॥

जस्साढत्ता एए कहवि, समप्पंति विग्घरहियस्स ।
सो लक्खिज्जइ भव्वो, पुव्वरिसि एव भासंति ॥ ४ ॥

स मनुष्यो भव्यो मुक्तिगामीति लक्ष्यते, पूर्वर्षयः-पूर्वाचार्या एवं भाषन्ते । स इति कः ? यस्य पुरुषस्य विघ्नरहितस्य-निर्विघ्नस्य सतः कथमपि यत्नेनाप्येते उत्तराध्यायाः 'आढत्ता' पठनायाऽऽरब्धाः सन्तः समाप्यन्ते-सम्पूर्णीभवन्ति स भव्यो भाग्यवान् ज्ञेय इत्यर्थः । भाग्यवतः पुरुषस्यैव निर्विघ्नमेतेऽध्यायाः सम्पूर्णीभवन्ति ।

यतः-

श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि । इत्युक्तेः ॥ ४ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां जीवाजीवविभक्तिनामकं षट्त्रिंशमध्ययनम् सम्पूर्णम् ॥ ३६ ॥

---

१ नियुक्तौ क्रमशः गाथे - ५५७ - ५५८ स्तः ।

॥ अथ टीकाकारस्य प्रशस्तिः ॥

गच्छे स्वच्छतरे बृहत्खरतरे जागृद्यशोभासुरे, श्रीमान् सूरिरभूज्जिनादिकुशलः प्रौढ-प्रतापान्वितः । यन्नाम स्मृतमात्रमेव हृदये विघ्नौघविद्रावणे, संधत्ते महिमानमत्र विततं दत्ते मनोवाञ्छितं ॥ १ ॥ तच्छिष्यो विनयप्रभः समभवत् श्रीपाठकः पुण्यवान्, सिद्धान्तो-दधितत्त्वरत्ननिकराविष्कारदेवाचलः । यद्वाक्सिन्धुरपाकरोन्मतिमतां मिथ्यामलं मानसं, श्रोत्रद्वारगता महातिसरला हृद्याऽनवद्या सदा ॥ २ ॥ तदनु सदनं कारुण्यस्य प्रभावनिधि-र्महान्, विजयतिलकः ख्यातो भूमौ बभूव महामतिः । सकलविशदोपाध्यायानां शिरोमणि-सन्निभः, विविधविबुधश्रेणिस्तुत्यः सदागममर्मवित् ॥ ३ ॥ तुष्टा वाचकपुङ्गवाय तपसा ध्यानेन शीलेन वा, यस्मै पार्श्वजिनांह्रिसेवनपरा पद्मा ददौ वाग्वरं । शिष्यान् भूरितरांश्चकार स ततः श्रीक्षेत्रशाखा ततः, शाखीव व्यरुचत्तया च मरुतां श्रीक्षेमकीर्तिर्गुरुः ॥ ४ ॥ सुशिष्यं क्षेमस्य प्रकटशमशिक्षा प्रददतं, ह्युपाध्यायं ध्यानं हृदि जिनवराणां विदधतम् । महामेघानावागमजलधिलब्धोत्तमतटं, तपोरत्नं रत्नं मुनिषु भजत भ्रान्तिरहितम् ॥ ५ ॥ तच्छिष्योऽभूद्भेदको दुर्नयानामाचारज्ञोऽन्वर्थनामा पृथिव्याम् सत्साधूनां पाठको द्वाद-शाङ्ग्यास्तेजोराजः पाठकः पापहन्ता ॥ ६ ॥ तत्सद्विनेय इह वाचकमुख्य आसीद्विद्याविनोद-भवनं भुवनादिकीर्त्तिः । श्रीहर्षकुञ्जरगणिश्च तदीयशिष्यो, वैराग्यमेव स च वाचकमुद्दधार ॥ ७ ॥ लब्धिमण्डनगणिश्च ततोऽभूद्वाचको विबुधवृन्दसुवन्द्यः । हेमकान्तिविनयाङ्कितगात्रो, दुर्निवारहृतमारविकारः ॥ ८ ॥ तच्छिष्यः परवादिवृन्दवदनप्रोद्भूतयुक्त्युच्छलत्कल्लोलोत्कर-चञ्चलस्य महतो दुर्वादवारानिधेः । निष्पाने विलसन्मतिर्वरयतिर्यः कुम्भजन्माकृति-र्लक्ष्मी-कीर्त्तिरिति स्फुरद्गुणततिः श्रीमानभूत्पाठकः ॥ ९ ॥ श्रीमल्लक्ष्मीकीर्त्तिसत्पाठकस्य, द्वौ गुर्वाज्ञाकारिणौ सद्विनेयौ । तत्राप्येको वाचकः सोमहर्षः साध्वाचारासेवने लब्धहर्षः ॥१०॥ साधुः श्रीयुक् वल्लभः सज्जनानां, लक्ष्मीपूर्वो वल्लभश्च द्वितीयः । तेनाकारि प्रस्फुटा दीपिकेयं, सिद्धान्तस्य ह्युत्तराध्यायनाम्नः ॥ ११ ॥ न्यूनाधिक्यं बुद्धिमान्द्याद्यदुक्तं, तद्ज्ञैस्तद्वाग्दूषणं शोधनीयम् । भ्रान्तिधर्मो ह्यस्ति छद्मस्थपुंसो, जात्याश्वो वा प्रस्खलत्येव गच्छन् ॥ १२ ॥ धुर्यप्रणीतास्वतिविस्तरासु, टीकासु नो मत्सरिता ममाऽस्ति । तेजस्तु ताभ्यः समवाप्य भास्वत्, कृतात्मबोधाय सुदीपिकेयम् ॥ १३ ॥

॥ इति श्रीउत्तराध्ययनसूत्रं समाप्तं ॥

श्री उत्तराध्ययनसूत्रमूलगाथानां-अकारादिवर्णानुक्रमः ।

[पहेली संख्या अध्ययननी अने बीजी गाथानी समजवी]

(अ)

अइतिक्खकंटयाइण्णे	१९-५३
अकलेवरसेणिमूस्सिआ	१०-३५
अकसायमहक्खायं	२८-३३
अक्कोसवहं विइत्तु धीरे	१५-३
अक्कोसिज्ज परो भिक्खुं	२-२४
अगारि सामाइयंगाइं	५-२३
अग्गिहोत्तमुहा वेआ	२५-१६
अग्गी अ इइ के वुत्ते	२३-५२
अचेलगस्स लूहस्स	२-३४
अचेलगो अ जो धम्मो	२३-१३
अचेलगो अ जो धम्मो	२३-२९
अच्चणं सेवणं चेव	३५-१८
अच्चेइ कालो तूरंति राईओ	१३-३१
अच्चेमु ते महाभाग	१२-३४
अच्चंतकालस्स समूलयस्स	३२-१
अच्चंतनिआणखमा	१८-५३
अच्छिल्ले माहए	३६-१४८
अच्छेरगमब्भुदये	९-५१
अजहन्नमणुक्कोसं	३६-२४६
अजाणगा जण्णवाई	२५-१८
अज्जुणसुवण्णगमई	३६-६०
अज्जेव धम्मं पडिवज्जयामो	१४-२८
अज्जेवाहं न लब्भामि	२-३१
अज्झत्थं सव्वओ सव्वं	६-७
अज्झावयाणं पडिकूलभासी	१२-१६
अज्झावयाणं वयणं सुणेत्ता	१२-१९
अट्टरुद्दाणि वज्जित्ता	३०-३५
अट्टरुद्दाणि वज्जित्ता	३४-३१
अट्ठ कम्माइं वोच्छामि	३३-१
अट्ठ जोयण बाहल्ला	३६-४९
अट्ठप्पवयणमायाओ	२४-१
अट्ठविहगोअरग्गं तु	३०-२५
अट्ठारस सागराइं	३६-२३१
अणगारगुणेहिं च	३१-१८
अणच्चावि अं अवलियं	२६-२५
अणभिग्गाहिअकुदिट्ठी	२८-२६
अणसणमूणोअरिआ	३०-८
अणाइकालप्पभवस्स एसो	३२-१११
अणासवा थूलवया कुसीला	१-१३
अणावायमसंलोए	२४-१६
अणावायमसंलोए	२४-१७
अणाहोमि महाराय	२०-९
अणिस्सिओ इहं लोए	१९-९३
अणुक्कसाई अप्पिच्छे	२-३९
अणुण्णए नावणए महेसी	२१-२०
अणुबद्धोरसपसरो	३६-२७०
अणुसासणमोवायं	१-२८
अणुसासिओ न कुप्पिज्जा	१-९
अणूणाइरित्तपडिलेहा	२६-२८
अणेग छंदा इह माणवेहिं	२१-१६
अणेगवासानउआ	७-१३
अणेगाण सहस्साणं	२३-३५
अणंतकालमुक्कोसं	३६-१४
अणंतकालमुक्कोसं	३६-८२
अणंतकालमुक्कोसं	३६-९०
अणंतकालमुक्कोसं	३६-१०३
अणंतकालमुक्कोसं	३६-११५

अणंतकालमुक्कोसं	३६-१२४
अणंतकालमुक्कोसं	३६-१३४
अणंतकालमुक्कोसं	३६-१४३
अणंतकालमुक्कोसं	३६-१५३
अणंतकालमुक्कोसं	३६-१७०
अणंतकालमुक्कोसं	३६-१७९
अणंतकालमुक्कोसं	३६-२४९
अण्णवंसि महोहंसि	५-१
अण्णवंसि महोहंसि	२३-७०
अत्थि एगो महादीवो	२३-६६
अत्थि एगं धुवं ठाणं	२३-८२
अत्थं च धम्मं च	१२-३३
अत्थंतम्मि अ सूरम्मि	१७-१६
अथिरासणे कुक्कुइए	१७-१३
अदंसणं चेव अपत्थणं च	३२-१५
अधुवे असासयंमि	८-१
अद्धाणं जो महंतं तु	१९-१९
अद्धाणं जो महंतं तु	१९-२१
अन्निओ रायसहस्सेहिं	१८-४३
अन्नेण विसेसेणं	३०-२३
अन्नं पाणं च ण्हाणं च	२०-२९
अप्पणावि अणाहो सि	२०-१२
अप्पपाणप्पबीयंमि	१-३५
अप्पसत्थेहिं दारेहिं	१९-९४
अप्प कत्ता विकत्ता य	२०-३७
अप्पा चेव दमेयव्वो	१-१५
अप्पाणमेव जुज्झाहि	९-३५
अप्पा नई वेअरणी	२०-३६
अप्पिआ देवकामाणं	३-१५
अप्पं चाहिक्खिवई	११-११
अफोवमंडवंसि	१८-५
अबले जह भारवाहए	१०-३३
अब्भाहयंमि लोगंमि	१४-२१
अब्भुट्ठाणं अंजलिकरणं	३०-३२
अब्भुट्ठाणं गुरुपूआ	२६-७
अब्भुट्ठाणं नवमं	२६-४
अब्भुट्ठिअं रायरिसिं	९-६
अभओ पत्थिवा तुब्भं	१८-११
अभिक्खणं कोही हवइ	११-७
अभिवायणमब्भुट्ठाणं	२-३८
अभू जिणा अत्थि जिणा	२-४५
अम्मताय मए भोगा	१९-१२
अयकक्करभोई अ	७-७
अयसीपुप्फसंकासा	३४-६
अयं साहसिओ भीमो	२३-५५
अरइरइसहे पहीणसंथवे	२१-२१
अरइं पिट्ठओ किच्चा	२-१५
अरई गंडं विसूईया	१०-२७
अरूविणो जीवघणा	३६-६६
अलोए पडिहया सिद्धा	३६-५६
अलोलुअं मुहाजीवी	२५-२८
अलोले न रसे गिद्धे	३५-१७
अवउज्झिअ मित्तबंधवं	१०-३०
अवुज्झिऊण माहणरूवं	९-५५
अवसेसं भंडगं गिज्झा	२६-३६
अवसो लोहरहे जुत्तो	१९-५७
अवसोहिआ कंटगापहं	१०-३२
अवहेडिअपिट्ठसउत्तमंगे	१२-२९
अवि पावपरिक्खेवी	११-८
असइं तु मणुस्सेहिं	९-३०
असमाणो चरे भिक्खू	२-१९
असासए सरीरम्मि	१९-१४
असासयं दट्ठूमिमं विहारं	१४-७
असिप्पजीवि अगिहे अमित्ते	१५-१६

असीहिं अयसीवण्णाहिं	१९-५६
असुरा नाग सुवण्णा	३६-२०८
असंखकालमुक्कोसं	३६-१३
असंखकालमुक्कोसं	३६-८१
असंखकालमुक्कोसं	३६-८९
असंखकालमुक्कोसं	३६-१०४
असंखकालमुक्कोसं	३६-११४
असंखकालमुक्कोसं	३६-१२३
असंखभागो पलिअस्स	३६-१९४
असंखयं जीविय मा पमायए	४-१
अस्संखेज्जाणोसप्पिणीण	३४-३३
अस्सकण्णी अ बोधव्वा	३६-९९
अस्सा हत्थी मणुस्सा	२०-१४
अस्से इइ के वुत्ते	२३-५७
अह अट्ठहिं ठाणेहिं	११-४
अह अन्नया कयाइ	२१-८
अह आसगओ राया	१८-६
अह ऊसिएण छत्तेण	२२-११
अह कालम्मि संपत्ते	५-३२
अह केसरंमि उज्जाणे	१८-४
अह चउदसहिं ठाणेहिं	११-६
अह जे संवुडे भिक्खू	५-२५
अह तत्थ अइच्छंतं	१९-५
अह तायओ तत्थ मुणीण	१४-८
अह तेणेव कालेणं	२३-५
अह तेणेव कालेणं	२५-४
अह ते तत्थ सीसाणं	२३-१४
अह पच्छा उइज्जंति	२-४१
अह पंचहिं ठाणेहिं	११-३
अह पण्णरसहिं ठाणेहिं	११-१०
अह पालिअस्स घरणी	२१-४
अह भवे पइण्णा उ	२३-३३
अहमासि महापाणे	१८-२८
अह मोणेण सो भयवं	१८-९
अह राया तत्थ संभंतो	१८-७
अहवा तइयाए पोरिसीए	३०-२१
अहवा सपरिक्कम्मा	३०-१३
अह सा भमरसन्निभे	२२-३०
अह सारही तओ भणइ	२२-१७
अह सारही विचिंतेह	२७-१५
अह सा रायवरकण्णा	२२-७
अह सा रायवरकण्णा	२२-४०
अह से तत्थ अणगारे	२५-५
अह सो तत्थ निज्जंतो	२२-१४
अह सो वि रायपुत्तो	२२-३६
अह सो सुगंधगंधिए	२२-२४
अहाह जणओ तीसे	२२-८
अहिज्ज वेए परिविस्स विप्पे	१४-९
अहिवेगंतदिट्ठीए	१९-३९
अहिंस सच्चं च अतेणगं च	२१-१२
अहीणपंचिंदिअत्तं पि	१०-१८
अहे वयइ कोहेणं	९-५४
अहो ते अज्जवं साहु	९-५७
अहो ते निज्जिओ कोहो	९-५६
अहो वण्णो अहो रूवं	२०-६
अहं च भोगरायस्स	२२-४४
अहं पि जाणामि जहेह साहू	१३-२७

(आ)

आउक्कायमइगओ	१०-६
आउत्तया जस्स य नत्थि काई	२०-४०
आगए कायवुस्सग्गे	२६-४७
अगारिसामाइअंगाइ	५-२३
आगासे गंगसोओव्व	१९-३७
आगासे तस्स देस्से अ	३६-६

आणाणिद्देसयरे	१-२
आणाणिद्देसयरे	१-३
आदाणं नरयं दिस्स	६-८
आमोसे लोमहारे अ	९-२८
आयरिअउवज्झाएहिं	१७-४
आयरिअउवज्झायाणं	१७-५
आयरिअपरिच्चाई	१७-१७
आयरिअमाइअंमि	३०-३३
आयरिअं कुविअं णच्चा	१-४१
आयवस्स निवाएणं	२-३५
आयामगं चेव जवोदणं च	१५-१३
आयरिएहिं वाहित्तो	१-२०
आयंके उवसग्गे	२६-३५
आरभडा सम्मद्दा	२६-२६
आलओ थीजणाइण्णो	१६-११
आलवंते लवंते वा	१-२१
आलोअणारिहाइअं	३०-३१
आलंबणेण कालेण	२४-४
आवज्जई एवमणेगरूवे	३२-१०३
आवन्ना दीहमद्धाणं	६-१३
आवरणिज्जाण दुण्हं पि	३३-२०
आसणगओ न पुच्छिज्जा	१-२२
आसणे उवचिट्ठिज्जा	१-३०
आसणं सयणं जाणं	७-८
आसमपए विहारे	३०-१७
आसाढबहुलपक्खे	२६-१५
आसाढे मासे दुपया	२६-१३
आसं विसज्जइत्ता णं	१८-८
आसिमो भायरा दो वि	१३-५
आसीविसो उग्गतवो महेसी	१२-२७
आसे अ इति के वुत्ते	२३-५७
आहच्च चंडालियं कट्टु	१-११
आहच्च सवणं लद्धुं	३-९
आहारमिच्छे मिअमेसणिज्जं	३२-४

(इ)

इअरो वि गुणसमिद्धो	२०-६०
इइ इत्तरिअम्मि आउए	१०-३
इइ एस धम्मे अक्खाए	८-२०
इइ एएसु ठाणेसु	३१-२१
इइ चतुरिंदिआ एए	३६-१४९
इइ जीवमजीवे अ	३६-२५३
इइ पाउकरे वुद्धे	१८-२४
इइ पाउकरे वुद्धे	३६-२७२
इइ बेइंदिआ एए	३६-१३०
इक्कवीसाए सबलेसु	३१-१५
इइ एस धम्मे अक्खाए	८-२०
इक्का य पूव्वकोडी	३६-१७७
इक्खागरायवसभो	१८-३९
इच्चेते थावरा तिविहा	३६-१०६
इड्ढीगारविए एगे	२७-९
इड्ढी जुइ जसो वण्णो	७-२७
इड्ढी वित्तं च मित्ते अ	१९-८८
इति एस धम्मे अक्खाए	८-२०
इत्तरिअ मरणकाला य	३०-९
इत्थी पुरिससिद्धा य	३६-४९
इत्थी वा पुरिसो वा	३०-२२
इत्थीविसयगिद्धे य	७-६
इंदगोवगमाईया	३६-१३९
इंदिअग्गामनिग्गाहि	२५-२
इंदिअत्थे विवज्जित्ता	२४-८
इंदिआणि उ भिक्खुस्स	३५-५
इमं च मे अत्थि इमं च नत्थि	१४-१५
इमं च मे अत्थि पभूअमन्नं	१२-३५
इमं सरीरं अणिच्चं	१९-१३

इमा हु अन्नावि अणाहया २०-३८
इमे अ बद्धा फंदंति १४-४५
इरिआभासेसणादाणे २४-२
इरिएसणभासाए १२-२
इह कामणियट्टस्स ७-२६
इह कामानियट्टस्स ७-२५
इह जीविए राय १३-२१
इह जीविअं अनियमेत्ता ८-१४
इहमेगे उ मण्णंति ६-९
इहं सि उत्तमो भंते ९-५८

(ई)

ईसाअमरिसअतवो ३४-२३

(उ)

उक्का विज्जु अ बोधव्वा ३६-११०
उक्कोसोगाहणाए अ ३६-५०
उक्कोसोगाहणाए उ ३६-५३
उग्गओ खीणसंसारो २३-७८
उग्गओ विमलो भाणू २३-७६
उग्गमुप्पायणं पढमे २४-१२
उग्गं तवं चरित्ता णं २२-५०
उच्चारं पासवणं २४-१५
उच्चावयाहिं सिज्जाहिं २-२२
उच्चोदए महु कक्के अ १३-१३
उज्जाणं संपत्तो २२-२३
उट्ठं थिरं अतुरिअं २६-२४
उण्हाभितत्तो मेहावी २-९
उण्हाभितत्तो संपत्तो १९-६१
उत्तराइं विमोहाइं ५-२६
उदहिसरिसनामाणं ३३-१९
उदहिसरिसनामाणं ३३-२१
उदहिसरिसनामाणं ३३-२३
उद्देसिअं कीअगडं २०-४७
उप्फालगदुट्ठवाई य ३४-२६
उभओ सिस्ससंघाणं २३-१०
आला य तसा जे उ ३६-१२६
उरब्भे सुक्के अ दो छूढा २५-४२
उवक्खडं भोअण माहणाणं १२-११
उवट्ठिआ मे आयरिआ २०-२२
उवनिज्जइ जीविअमप्पमायं १३-२६
उवरिमाउवरिमा चेव ३६-२१७
उवलेओ होइ भोगेसु २५-४१
उवासगाणं पडिमासु ३१-११
उवेहमाणो उ परिव्वएज्जा २१-१५
ऊसिणप्परियावेणं २-८
उस्सेहो जस्स जो होइ ३६-६४

(ऊ)

ऊमोयरियं ३०-१४
ऊससिअरोमकूवो २०-५९

(ए)

एअमट्ठं निसामित्ता ९-८
एअमट्ठं निसामित्ता ९-११
एअमट्ठं निसामित्ता ९-१३
एअमट्ठं निसामित्ता ९-१७
एअमट्ठं निसामित्ता ९-१९
एअमट्ठं निसामित्ता ९-२३
एअमट्ठं निसामित्ता ९-२५
एअमट्ठं निसामित्ता ९-२७
एअमट्ठं निसामित्ता ९-२९
एअमट्ठं निसामित्ता ९-३१
एअमट्ठं निसामित्ता ९-३३
एअमट्ठं निसामित्ता ९-३७
एअमट्ठं निसामित्ता ९-३९

एअमट्ठं निसामित्ता	९-४१
एअमट्ठं निसामित्ता	९-४३
एअमट्ठं निसामित्ता	९-४५
एअमट्ठं निसामित्ता	९-४७
एअमट्ठं निसामित्ता	९-५०
एअमट्ठं निसामित्ता	९-५२
एअमट्ठं सपेहाए	६-४
एअमादाय मेहावी	२-१७
एआइं अट्ठ ठाणाइं	२४-१०
एयाइं तीसे वयणाइं सुच्चा	१२-२४
एआओ अट्ठ समिईओ	२४-३
एआओ पंच समिईओ	२४-१९
एआओ पंच समिईओ	२४-२७
एआओ पवयणमायाओ	२४-२८
एआओ मूलप्पयडीओ	३३-१६
एआरिसीए इड्ढीए	२२-१३
एआरिसे पंचकुसीलसंवुडे	१७-२०
एए अ संगे समइक्कमित्ता	३२-१८
एए खरपुढवीए	३६-७७
एए चेव उ भावे	२८-१९
एए नरिंदवसहा	१८-४७
एए परीसहा सव्वे	२-४६
एए पाउकरे बुद्धे	२५-३४
एएसिं तु विवच्चासे	३०-४
एएसिं वण्णओ चेव	३६-८३
एएसिं वण्णओ चेव	३६-९१
एएसिं वण्णओ चेव	३६-१०५
एएसिं वण्णओ चेव	३६-११६
एएसिं वण्णओ चेव	३६-१२५
एएसिं वण्णओ चेव	३६-१३५
एएसिं वण्णओ चेव	३६-१४४
एएसिं वण्णओ चेव	३६-१५४
एएसिं वण्णओ चेव	३६-१७१
एएसिं वण्णओ चेव	३६-१८०
एएसिं वन्नओ चेव	३६-१८९-१९६
एएसिं वन्नओ चेव	३६-२०५
एएसिं वन्नओ चेव	३६-२५१
एअं अकाममरणं	५-१७
एअं तवं तु दुविहं	३०-३७
एअं पंचविहं नाणं	२८-५
एअं पुण्णपयं सोच्चा	१८-३४
एअं सिणाणं कुसलेहिं	१२-४७
एग एव चरे लाढे	२-१८
एगओ विरइं कुज्जा	३१-२
एगओ संवसित्ताणं	१४-२६
एगकज्जप्पवन्नाणं	२३-२४
एगकज्जप्पवन्नाणं	२३-३०
एगखुरा दुखुरा चेव	३६-१८२
एगछत्तं पसाहित्ता	१८-४२
एगत्तेण पुहुत्तेणं	३६-११
एगत्तेणं साईआ	३६-६५
एगत्तं च पुहत्तं च	२८-१३
एगप्पा अजिए सत्तू	२३-३८
एगभूओ अरण्णे वा	१९-७८
एगया अचेलओ होइ	२-१३
एगया खत्तिओ होई	३-४
एगया देवलोएसु	३-३
एगविहमनाणत्ता	३६-८६
एगविहमनाणत्ता	३६-१००
एगवीसाइ सबलेसु	३१-१५
एगा य पुव्वकोडी उ	३६-१७५
एगूणपण्णहोरत्ता	३६-१४१
एगे जीए जीआ पंच	२३-३६
एगेण अणेगाइं	२८-२२

एगो पडइ पासेणं	२७-५	एवं च चिंतइत्ता णं	२०-३३
एगो मूलंपि हारित्ता	७-१५	एवं जिअं सपेहाए	७-११
एगं डसइ पुच्छंमि	२७-४	एवं तवं तु	३०-३७
एगंतमणावाए	३०-२८	एवं तु संजयस्सावि	३०-६
एगंतरत्तो रुइरंसि गंधे	३२-५२	एवं तु संसए छिन्ने	२३-८६
एगंतरत्तो रुइरंसि फासे	३२-७८	एवं तु संसए छिन्ने	२५-३६
एगंतरत्तो रुइरंसि भावे	३२-९१	एवं ते कमसो बुद्धा	१४-५१
एगंतरत्तो रुइरे रसंमि	३२-६५	एवं ते रामकेसवा	२२-२७
एगंतरत्तो रुइरंसि रूवे	३२-२६	एवं थुणित्ताण स रायसीहो	२०-५८
एगंतरत्तो रुइरंसि सद्दे	३२-३९	एवं धम्मं अकाऊणं	१९-२०
एगंतरमायामं	३६-२५७	एवं धम्मं पि काऊणं	१९-२२
एताइं तीसे वयणाइं सुच्चा	१२-२४	एवं धम्मं विउकम्म	५-१५
एते खरपुढवीए	३६-७७	एवं नाणेण चरणेणं	१९-९५
एमेव गंधम्मि गओ पओसं	३२-५९	एवं भवसंसारे	१०-१५
एमेव फासम्मि गओ पओसं	३२-८५	एवं माणुस्सगा कामा	७-१२
एमेव भावम्मि गओ पओसं	३२-९८	एवं लग्गंति दुम्मेहा	२५-४३
एमेव रस्सम्मि गओ पओसं	३२-७२	एवं लोए पलित्तमि	१९-२४
एमेव रुवम्मि गओ पओसं	३२-३३	एवं विणयजुत्तस्स	१-२३
एमेव सद्दम्मि गओ पओसं	३२-४६	एवं वुत्तो नरिंदो सो	२०-१३
एमेवहाछंदकुसीलरूवे	२०-५०	एवं समुट्ठिओ भिक्खू	१९-८३
एरिसे संपयग्गंमि	२०-१५	एवं ससंकप्पविकप्पणासु	३२-१०७
एवमदीणवं भिक्खुं	७-२२	एवं सिक्खासमावण्णे	५-२४
एवमादाय मेहावी	२-१७	एवं सो अम्मापिअरो	१९-८७
एवमावट्टजोणीसु	३-५	एवं से उदाहु अणुत्तरनाणी	६-१८
एवमेव वयं मूढा	१४-४३	एवं सो विजयघोसो	२५-४४
एविंदियत्था य मणस्स अत्था	३२-१००	एस अग्गी अ वाऊ अ	९-१२
एवुग्गदंतेवि महातवोधणे	२०-५३	एसणासमिओ लज्जु	६-१७
एवं अभित्थुणंतो	९-५९	एस धम्मे धुवे निच्चे	१६-१७
एवं करिंति संबुद्धा	९-६२	एसा अजीवपविभत्ति	३६-४७
एवं करिंति संबुद्धा	१९-९७	एसा खलु लेसाणं	३४-४०
एवं करिंति संबुद्धा	२२-५१	एसा तिरिअनराणं	३४-४७
एवं गुणसमाउत्ता	२५-३५	एसा नेरइयाणं	३४-४४

एसा सामायारी २६-५३
एसो बाहिरगतवो ३०-२९
एसो हु सो उग्गतवो महप्पा १२-२२
एहि ता भुंजिमो भोए २२-३८

(ओ)

ओमोअरणं पंचहा ३०-१४
ओहिनाणसुए बुद्धे २३-३
ओहोवहोवग्गहिअं २४-१३

(अं)

अंगपच्चंगसंठाणं १६-४
अंगुलं सत्तरत्तेणं २६-१४
अंतमुहुत्तम्मि गए ३४-६०
अंतोमुहुत्तमद्धं ३४-४५
अंतोहिअयसंभूआ २३-४५
अंधयारे तमे घोरे २३-७५
अंधिआपोत्तिआ चेव ३६-१४६

(क)

कणकुंडगं चइत्ताणं १-५
कप्पातीता उ जे देवा ३६-२१४
कप्पासट्ठिमि जाया ३६-१३८
कप्पोवगा बारसहा ३६-२१२
कप्पं न इच्चछेज्ज सहावलिच्छू ३२-१०४
कम्मसंगेहिं संमूढा ३-६
कम्माणं तु पहाणाए ३-७
कम्मा नियाणप्पगडा १३-८
कम्मुणा बंभणो होइ २५-३३
कयरे आगच्छइ दित्तरूवे १२-६
कयरे तुमं इअ अदंसणिज्जे १२-७
करकण्डू कलिंगेसु १८-४६
कलहडमरवज्जए ११-१३
कसाया अग्गिणो वुत्ता २३-५३
कसिणं पि जो इमं लोगं ८-१६
कस्स अट्ठा इमे पाणा २२-१६
कहं चरे भिक्खु वयं १२-४०
कहं धीरे अहेऊहिं १८-५२
कहं धीरे अहेऊहिं १८-५४
कहिं पडिहया सिद्धा ३६-५५
कामाणुगिद्धिप्पभवं ३२-१९
कामं तु देवीहिं विभूसिआहिं ३२-१६
कायठिई खहयराणं ३६-१९५
कायठिई थलयराणं ३६-१८८
कायठिई मणुयाणं ३६-२०४
कायसा वयसा मत्ते ५-१०
कायस्स फासं गहणं जयंति ३२-७४
कालीपव्वंगसंकासे २-३
कालेण कालं विहरिज्ज रट्ठे २१-१४
कालेण णिक्खमे भिक्खु १-३१
कावोआ जा इमा वित्ती १९-३४
किणंतो कइओ होइ ३५-१४
किण्हा नीला काऊ ३४-५६
किण्हा नीला य काऊ य ३४-३
किण्हा नीला य रुहिरा ३६-७२
किमिणो सामंगला चेव ३६-१२८
किं तवं पडिवज्जामि २६-५१
किं नामे किं गोत्ते १८-२१
किं नु भो अज्ज मिहिलाए ९-७
किं माहणा जोईसमारभंता १२-३८
किरिआसु भूअगामेसु ३१-१२
किरिअं अकिरिअं विणयं १८-२३
किरिअं रोअए धीरो १८-३३
किलिण्णगाए मेहावी २-३६
कुइअं रुइअं गीअं १६-५
कुइअं रुइअं गीअं १६-१२

कुक्कुडे सिंगिरीडी अ ३६-१४७
कुंथु पिपीलि उद्दंसा ३६-१३७
कुप्पहा बहवो लोए २३-६०
कुप्पवयणपासंडी २३-६३
कुसग्गमित्ता इमे कामा ७-२४
कुसग्गे जह ओसबिंदुए १०-२
कुसीललिंगं इह धारइत्ता २०-४३
कुसं च जूवं तणकट्ठमग्गिं १२-३९
कुहाडपरसुमाईहिं १९-६७
कूवंतो कोलसुणएहिं १९-५५
के इत्थ खत्ता उवजोइआ वा १२-१८
केण अब्भाहओ लोओ १४-२२
के ते जोई किंव ते जोइठाणं १२-४३
के ते हरए के अ ते संतितित्थे १२-४५
केरिसो वा इमो धम्मो २३-११
केसि गोअमओ णिच्चं २३-८८
केसि मेवं बुवंतं तु २३-३१
केसी कुमारसमणे २३-९
केसी कुमारसमणे २३-१६
केसी कुमारसमणे २३-१८
कोट्ठगं नाम उजाणं २३-८
कोडीसहियमायामं ३६-२५७
कोलाहलगब्भूअं ९-५
को वा से ओसहं देइ १९-८०
कोसंबी नाम नयरी २०-१८
कोहा वा जइ वा हासा २५-२४
कोहे माणे अ मायाए २४-९
कोहो य माणो य वहो य १२-१४
कोहं च माणं च तहेव मायं ३२-१०२
कोहं माणं निगिणिहत्ता २२-४७
कंदंतो कंदुकुंभीसु १९-५०
कंदप्पकुक्कुआइं ३६-२६७
कंदप्पमाभिओगं च ३६-२६०
कंपिल्ले नयरे राया १८-१
कंपिल्ले संभूओ १३-२
कंपिल्लंमि य नयरे १३-३
खज्जूरमुद्दियरसो ३४-१५
खड्डुआ मे चवेडा मे १-३८
खणमित्तसुक्खा बहुकाल १४-१३
खणं पि मे महाराय २०-३०
खत्तियगणउग्गरायपुत्ता १५-९
खलुंका जारिसा जोज्जा २७-८
खलुंके जो उ जोएइ २७-३
खवित्ता पुव्वकम्माइं २५-४५
खवित्ता पुव्वकम्माइं २८-३६
खाइत्ता पाणिअं पाउं १९-८२
खित्तं वत्थुं हिरण्णं च ३-१७
खित्तं वत्थुं हिरण्णं च १९-१७
खिप्पं न सक्केइ विवेगमेउं ४-१०
खीर दहि सप्पिमाई ३०-२६
खुरेहिं तिक्खधाराहिं १९-६३
खेत्ताणि अम्हं विइयाणि १२-१३
खेमेण आगए चंपं २१-५
खंधा य खंधदेसा य ३६-१०

(ग)

गइलक्खणो उ धम्मो २८-९
गणो साहसिओ भीमो २३-५८
गत्तभूसणमिट्ठं च १६-१३
गब्भवक्कंतिआ जे उ ३६-१९८
गमणे आवसिअं कुज्जा २६-५
गलेहिं मगरजालेहिं १९-६५
गवासं मणिकुंडलं ६-५
गवेसणाए गहणे अ २४-११
गामाणुगामं रीअतं २-१४
गामे नगरे तह रायहाणि ३०-१६

गारवेसु कसाएसु १९-९२
गाहासोलसएहिं ३१-१३
गिद्धोवमे उ नच्चा णं १४-४७
गिरिं च रेवयं जंती २२-३३
गिरिं नहेहिं खणह १२-२६
गिहवासं परिच्चज्ज ३५-२
गिहिणो जे पव्वइएण दिट्ठा १५-१०
गुणाणमासओ दव्वं २८-६
गोअमो पडिरूवण्णू २३-१५
गोमेज्जए अ रुयगे ३६-७५
गोयरग्गपविट्ठस्स २-२९
गोयकम्मं दुविहं ३३-१४
गोवालो मंडवालो वा २२-४६
गंधओ जे भवे सुब्भी ३६-२७
गंधओ जे भवे दुब्भी ३६-२८
गंधओ परिणया जे उ ३६-१७
गंधस्स घाणं गहणं ३२-४९
गंधाणुगासाणुगए ३२-५३
गंधाणुरत्तस्स नरस्स ३२-५८
गंधाणुवाएण परिग्गहेण ३२-५४
गंधे अतित्तो अ परिग्गहे अ ३२-५५
गंधे विरत्तो मणुओ ३२-६०
गंधेसु जो गिद्धिमुवेइ ३२-५०

(घ)

घाणस्स गंधं गहणं वयंति ३२-४८
घोरासमं चइताणं ९-४२

(च)

चइऊण देवलोगाओ ९-१
चइत्ता भारहं वासं १८-३६
चइत्ता भारहं वासं १८-३८
चइत्ता भारहं वासं १८-४१
चइत्ता विउलं रज्जं १४-४९
चउत्थीए पोरिसीए २६-३७
चउदस उ सागराई ३६-२२९
चउप्पया य परिसप्पा ३६-१८१
चउरिंदियकायमइगओ १०-१२
चउरुड्ढलोए अ दुवे समुद्दे ३६-५४
चउव्विहे वि आहारे १९-३१
चउवीस सागराइं ३६-२३७
चउरंगं दुल्लहं नच्चा ३-२०
चउरिंदिया उ जे जीवा ३६-१४५
चक्कवट्टी महिड्ढीओ १३-४
चक्खुमचक्खु ओहिस्स ३३-६
चक्खुसा पडिलेहित्ता २४-१४
चक्खुस्स रूवं गहणं ३२-२२
चतुरंगिणीए सेणाए २२-१२
चत्तपुत्तकलत्तस्स ९-१५
चत्तारि अ गिहिलिंगे २६-५२
चत्तारि परमंगाणि ३-१
चम्मे उ लोमपक्खी य ३६-१९०
चरणविहिं पवक्खामि ३१-१
चरित्तमायार गुणन्निए तओ २०-५२
चरित्तमोहणं कम्मं ३३-१०
चरे पयाइं परिसंकमाणो ४-७
चरंतं विरयं लूहं २-६
चवेडमुट्ठिमाईहिं १९-६८
चाउज्जामो य जो धम्मो २३-१२
चाउज्जामो य जो धम्मो २३-२३
चिच्चा दुपयं च चउप्पयं च १३-२४
चिच्चा धणं च भारिअं १०-२९
चिच्चा रट्ठं पव्वइए १८-२०
चित्तमंतमचित्तं वा २५-२५
चित्तो वि कामेहिं विरत्त १३-३५
चिरं पि से मुण्डरुई भवित्ता ३०-४१

चीराजिणं नगिणिणं ५-२१
चीवराई विसारंती २२-३४
चदणगेरुय ३६-७६
चंदासुराय ३६-२१०
चंपाए पालिए २१-१

(छ)

छच्चेव य मासाऊ ३६-१५१
छज्जीवकाए असमारभंता १२-४१
छव्वीस सागराइं ३६-२३९
छिण्णाले छिण्णई सल्लि २७-७
छिण्णावाएसु पंथेसु २-५
छिंदित्तु जालं अबलं १४-३५
छिन्नं सरं भोममंत १५-७
छुहा तण्हा य सीउण्हं १९-३२
छंदणा दव्वजाएणं २६-६
छंदं निरोहेण उवेइ मोक्खं ४-८

(ज)

जइ तं काहिसी भावं २२-४५
जइ तं सि भोगे चइउं १३-३२
जइत्ता बिउले जण्णे ९-३८
जइ सि रूवेण वेसमणो २२-४१
जक्खो तहिं तिंदुअरु० १२-८
जगनिस्सिएहिं भूएहिं ८-१०
झणेण सिद्धिं होक्खामि ५-७
जदि मज्झ कारणा एए २२-१९
जम्मं दुक्खं जरा दुक्खं १९-१६
जया मिअस्स आयंको १९-७९
जया य से सुही होइ १९-८१
जया सव्वं परिच्चज्ज १८-१२
जरामरणकंतारे १९-४७
जरामरणवेगेणं २३-६८
जलधन्ननिस्सिया पाणा ३५-११
जस्सत्थि मच्चुणा सक्खं १४-२७
जह कडुअतुम्बगरसो ३४-१०
जह करगयस्स फासो ३४-१८
जह गोमडस्स गंधो ३४-१६
जह तरुणअंबगरसो ३४-१२
जह तिकडुअस्स य रसो ३४-११
जह परिणयंबगरसो ३४-१३
जह बुरस्स व फासो ३४-१९
जह सुरहिकुसुमगंधो ३४-१७
जहा अग्गिसिहा दित्ता १९-४०
जहा य अंडप्पभवा ३२-६
जहा इण्णसमारूढे ११-१७
जहा इहं अगणी उण्हो १९-४८
जहा इहं इमं सीअं १९-४९
जहा उ पावगं कम्मं ३०-१
जहा एसं समुद्दिस्स ७-१
जहा करेणुपरिकिण्णे ११-१८
जहा कागिणिए हेउं ७-११
जहा किंपागफलाणं १९-१८
जहा कुसग्गे उदगं ७-२३
जहा गेहे पलित्तम्मि १९-२३
जहा चंदं गहाईआ २५-१७
जहा तुलाए तोलेउं १९-४२
जहा दवग्गी पउरिंधणे वणे ३२-११
जहा दुक्खं भरेउं जे १९-४१
जहा परमं जले जायं २५-२७
जहा बिरालावसद्दस्समूले ३२-१३
जहा भुआहिं तरिउं १९-४३
जहा महातलागस्स ३०-५
जहा मिए एगअणेगचारी १९-८४
जहा य अग्गी अरणी असंतो १४-१८
जहा य अंडप्पभवा ३५-६

जहा य किंपागफला०	३२-२०
जहा य तिण्णि वणिआ	७-१४
जहा य भोइ तणुअं भुअंगभो	१४-३४
जहा लाहो तहा लोहो	८-१७
जहा वयं धम्ममयाणमाणा	१४-२०
जहा संखंमि पयं निहित्तं	११-१५
जहा सागडिओ जाणं	५-१४
जहा सा दुमाण पवरा	११-२७
जहा सा नईण पवरा	११-२८
जहा सुणी पूइकण्णी	१-४
जहा से उडुवई चंदे	११-२५
जहा से कंबोआणं	११-१६
जहा खलु से उरब्भे	७-४
जहा से चाउरंते	११-२२
जहा से तिक्खदाढे	११-२०
जहा से तिक्खसिंगे	११-१९
जहा से तिमिरविद्धंसे	११-२४
जहा से नगाण पवरे	११-२९
जहा से वासुदेवे	११-२१
जहा से सयंभूरमणे	११-३०
जहा से सहस्सक्खे	११-२३
जहा से सामाइआणं	११-२६
जहित्ता पुव्वसंजोगं	२५-२९
जहित्तु संगं च महा०	२१-११
जहेह सीहो व मिअं गहाय.	१३-२२
जाई सरित्तु भयवं	९-२
जाई जरामच्चुभयाभिभूआ	१४-४
जाईपराजिओ खलु	१३-१
जाईमयपडित्थद्धा	१२-५
जाईसरणे समुप्पण्णे	१९-८
जा उ अस्साविणी नावा	२३-७१
जा किण्हाइ ठिई खलु	३४-४९
जा चेव उ आउठिई	३६-१६९
जा चेव य आउठिई	३६-२४७
जा जा वच्चइ रयणी	१४-२४
जा जा वच्चइ रयणी	१४-२५
जाणासि संभूअ महाणुभागं	१३-११
जा तेऊए ठिई खलु	३४-५४
जा नीलाए ठिई खलु	३४-५०
जा पम्हाइ ठिई खलु	३४-५५
जायरूवं जहामिट्ठं	२५-२१
जारिसा मम सीसा उ	२७-१६
जारिसा माणुसे लोए	१९-७४
जावज्जीवमविस्सामो	१९-३६
जाव न एइ आएसे	७-३
जावंतविज्जा पुरिसा	६-१
जा सा अणसणा मरणे	३०-१२
जिणवयणे अणुरत्ता	३६-२६४
जिणे पासे त्ति नामेणं	२३-१
जीमुतनिद्धसंकासा	३४-४
जीवा चेव अजीवा य	३६-२
जीवाजीवविभत्ति	३६-१
जीवाजीवा अ बन्धो अ	२८-१४
जीविअतं तु संपत्ते	२२-१५
जीविअं चेव रूवं च	१८-१३
जीहाए रसं गहणं वयंति	३२-६१
जे अ मग्गेण गच्छंति	२३-६१
जे अ वेअविऊ विप्पा	२५-७
जे आययसंठाणे	३६-४६
जे इंदियाणं विसया	३२-२१
जे केइ उ पव्वईए	१७-१
जे केइ पत्थिवा तुब्भं	९-३२
जे केइ पव्वइए	१७-३
जे केइ सरीरे सत्ता	६-१२

जे गिद्धे कामभोएसु ५-५
जेट्ठामुले आसाढ सावणे २६-१६
जेण पुण जहाइ जीविअं १५-६
जे पावकम्मेहिं धणं मणूसा ४-२
जे यावि दोसं समुवेइ तिव्वं ३२-२५
जे यावि दोसं समुवेइ तिव्वं ३२-३८
जे यावि दोसं समुवेइ तिव्वं ३२-५१
जे यावि दोसं समुवेइ तिव्वं ३२-६४
जे यावि दोसं समुवेइ तिव्वं ३२-७७
जे यावि दोसं समुवेइ तिव्वं ३२-९०
जे यावि होइ निव्विज्जे ११-२
जे लक्खणं च सुविणं च ८-१३
जे लक्खणं सुविणं पउंजमाणे २०-४५
जे समत्था समुद्धत्तुं २५-८
जे समत्था समुद्धत्तुं २५-१२
जे समत्था समुद्धत्तुं २५-१५
जे संखया तुच्छपरप्पवाई ४-१३
जेसिं तु विउला सिक्खा ७-२१
जोअणस्स उ जो तस्स ३६-६२
जो अत्थिकायधम्मं २८-२७
जो जस्स उ आहारो ३०-१५
जो जिणदिट्ठभावे २८-१८
जो न सज्जइ आगंतुं २५-२०
जो पव्वइत्ता ण महव्वयाइं २०-३९
जो लक्खणं सुविण पउंजमाणे २०-४५
जो लोए बंभणो वुत्तो २५-१९
जो वज्जए एए सया उ १७-२१
जो सहस्सं सहस्साणं मासे ९-४०
जो सहस्सं सहस्साणं संगामे ९-३४
जो सुत्तमहिज्जंतो २८-२१
जो सो इत्तरिअतवो ३०-१०
जं किंचि आहारपाणजायं १५-११
जं च मे पुच्छसी काले १८-३२
जं नेइ जया रत्तिं २६-१९
जं मे बुद्धाणुसासंति १-२७
जं विवित्तमणाइण्णं १६-१

(ठ)

ठाणा वीरासणाईआ ३०-२७
ठाणे अ इइ के वुत्ते २३-८२
ठाणे निसीअणे चेव २४-२५
ठिई खहयराणं ३६-१०२

(ण)

ण इमं सव्वेसु भिक्खुसु ५-१९
ण कोवए आयरियं १-४०
ण चित्ता तायए भासा ६-११
णच्चा उप्पइअं दुक्खं २-३४
णच्चा णमइ मेहावी १-४५
ण तुमं जाणे अणाहस्स २०-१६
णत्थि नूणं परे लोए २-४४
ण पक्खओ ण पुरओ १-१८
ण मे णिवारणं अत्थि २-७
ण लविज्ज पुट्ठो सावज्जं १-२५
ण वा लभिज्जा निउणं सहायं ३२-५
ण संतसे ण वारिज्जा २-११
णाइउच्चे ब णीए वा १-३४
णाइदूरमणासण्णे १-३३
णाणं च दंसणं चेव २८-२
णामाइं वण्णरसगंध ३४-२
णिरुग्गंमि विरओ २-४२
णेव पल्हत्थिअं कुज्जा १-१९
णो रक्खसीसु गिज्झेज्जा ८-१८
णो सक्किअमिच्छई न पूअं १५-५

(त)

तइयाए पोरिसीए	२६-३२
तओ आउपरिक्खिणे	७-१०
तओ कम्मगुरुजंतु	७-९
तओ कले पभायम्मि	२०-३४
तओ काले अभिप्पेए	५-३१
तओ केसिं बुवंतं तु	२३-२५
तओ जिए सइं होइ	७-१८
तओ तेणज्जिए दव्वे	१८-१६
तओ पहसिओ राया	२०-१०
तओ पुट्ठो आयंकेणं	५-११
तओ पुट्ठो पिवासाए	२-४
तओ बहूणि वासाणि	३६-२५४
तओ से जायंति पओअणाइं	३२-१०५
तओ से दंडं समारभई	५-८
तओ से पुट्ठे परिवूढे	७-२
तओ से मरणंतंमि	५-१६
तओ संवच्छरद्धं तु	३६-२५२
तओ हं एवमाहंसु	२०-३०
तओ हं नाहो जाओ	२०-३५
तण्हाकिलंतो धावंतो	१९-६०
तण्हाभिभूयस्स अदत्तहारिणो	३२-३०
तण्हाभिभूयस्स अदत्तहारिणो	३२-४३
तण्हाभिभूयस्स अदत्तहारिणो	३२-५६
तण्हाभिभूयस्स अदत्तहारिणो	३२-६९
तण्हाभिभूयस्स अदत्तहारिणो	३२-८२
तण्हाभिभूयस्स अदत्तहारिणो	३२-९५
तत्ताइं तंबलोहाइं	१९-६९
तत्तो अ वग्गवग्गो उ	३०-११
तत्तो वि उव्वट्टित्ता	८-१५
तत्थ आलंबणं नाणं	२४-५
तत्थ ठिच्चा जहाठाणं	३-१६
तत्थ पञ्चविहं नाणं	२८-४
तत्थ सिद्धा महाभागा	३६-६३
तत्थ से चिट्ठमाणस्स	२-२१
तत्थ सो पासई साहुं	२०-४
तत्थिमं पढमं ठाणं	५-४
तत्थोववाइअं ठाणं	५-१३
तमंतमेणेव उ से असीले	२०-४६
तम्मेव य नक्खत्ते	२६-२०
तम्हा एएसि कम्माणं	३३-२५
तम्हा एआण लेसाणं	३४-६१
तम्हा विणयमेसिज्जा	१-७
तम्हा सुयमहिट्ठिज्जा	११-३२
तम्हा सु लद्धं	२०-५५
तरुणो सि अज्जो पव्वइओ	२०-८
तवनारायजुत्तेण	९-२२
तवस्सिअं किसं दंतं	२५-२२
तवो जोई जीवो जोइठाणं	१२-४४
तवो अ दुविहो वुत्तो	२८-३४
तवोवहाणमादाय	२-४३
तसाणं थावराणं च	३५-९
तसे पाणे विआणित्ता	२५-२३
तस्सक्खेवपमुक्खं च	२५-१३
तस्स पाए उ वंदित्ता	२०-७
तस्स भज्जा दुवे आसि	२२-२
तस्स भज्जा सिवा नाम	२२-४
तस्स मे अप्पडिकंतस्स	१३-२९
तस्स रूववइं भज्जं	२१-७
तस्स रूवं तु पासित्ता	२०-५
तस्स लोगप्पईवस्स	२३-२
तस्स लोगप्पईवस्स	२३-६
तस्सेस मग्गो गुरुविद्धसेवा	३२-३
तहा पयणुवाईय	३४-३०
तहिआणं तु भावाणं	२८-१५

तहिअं गन्धोदयपुप्फवासं १२-३६
तहेव कासीराया १८-४९
तहेव भत्तपाणेसु ३५-१०
तहेव विजओ राया १८-५०
तहेव हिंसं अलिअं ३५-३
तहेवुग्गं तवं किच्चा १८-५१
ताणि ठाणाणि गच्छंति ५-२८
तालणा तज्जणा चेव १९-३३
तिअं मे अंतरिच्छं च २०-२१
तिण्णुदही पलिअमसंख ३४-४२
तिण्णेव अहोरत्ता ३६-११३
तिण्णेव सहस्साइं ३६-१२२
तिण्णेव सागराऊं ३६-१६३
तिण्णो हु सि अण्णवं महं १०-३४
तिंदुअं नाम उज्जाणं २३-४
तिविहो व नवविहो वा ३४-२०
तिव्वचंडप्पगाढाओ १९-७३
तीसे अ जाईइ उ पाविआए १३-१९
तीसे सो वयणं सोच्चा २२-४८
तीसं तु सागराइं ३६-२४३
तुट्ठे अ विजयघोसे २५-३७
तुट्ठो अ सेणिओ राया २०-५४
तुब्भे जइआ जण्णाणं २५-३८
तुब्भेत्थ भो भारहरा १२-१५
तुब्भे समत्था उद्धत्तुं २५-३९
तुब्भं सुलद्धं खु मणुस्सजंमं २०-५५
तुलिआ णं बालभावं ७-३०
तुलिआ विसेसमादाय ५-३०
तुहं पिआइं मंसाइं १९-७०
तुहं पिआ सुरा सीहू १९-७१
तेइं दियकायमइगओ १०-११
तेइंदिया उ जे जीवा ३६-१३६
तेउक्कायमइगओ १०-७
तेऊ पम्हा सुक्का ३४-५७
तेऊ वाऊ अ बोधव्वा ३६-१०७
ते कामभोगेसु असज्जमाणा १४-६
तेगिच्छं नाभिणंदिज्जा २-३३
ते घोररूवा ठिअ अन्तलिक्खे १२-२५
तेण परं वोच्छामि ३४-५१
तेणावि जं कयं कम्मं १८-१७
तेणे जहा संधिमुहे गहीए ४-३
तेत्तीस सागराइं ३६-२४५
तेत्तीससागराऊ ३६-१६८
तेत्तीससागरोवम ३३-२२
ते पासिआ खण्डिअ कट्ठभूए १२-३०
ते पासे सव्वसो छित्ता २३-४१
ते मे तिगिच्छं कुवंति २०-२३
तेवीसाइ सूअगडे ३१-१६
तेवीस सागराइं ३६-२३६
तेसिं पुत्ते बलसिरी १९-२
तेसिं सुच्चा सपुज्जाणं ५-२९
तो णाणदंसणसमग्गो ८-३
तो वंदिऊण पाए ९-६०
तोसिआ परिसा सव्वा २३-८९
तं इक्कगं तुच्छसरीरगं से १३-२५
तं ठाणं सासयं वासं २३-८४
तं देहइ मिआपुत्ते १९-६
तं पासिऊणभेज्जंतं १२-४
तं पासिऊण संविगो २१-९
तं पुव्वनेहेण कयाणुरागं १३-१५
तं बिंतम्मापिअरो १९-२५
तं बिंतम्मापिअरो १९-७६
तं लयं सव्वसो छित्ता २३-४६
तं सि णाहो अणाहाणं २०-५६

(थ)

थलेसु बीआई वपंति कासगा १२-१२
थावरं जंगमं चेव ६-६
थेरे गणहरे गग्गे २७-१

(द)

दट्ठूण रहनेमिं तं २२-३९
दवग्गिणा जहा रण्णे १४-४२
दवदवस्स चरई १७-८
दव्वओ खेत्तओ चेव २४-६
दव्वओ खेत्तओ चेव ३६-३
दव्वओ चक्खुसा पेहे २४-७
दव्वाणं सव्वभावा २८-२४
दव्वे खित्ते काले ३०-२४
दसउदही पलिअमसंख ३४-४३
दस चेव नपुंसेसु ३६-५१
दस चेव सहस्साइं ३६-१०२
दस चेव सागराइं ३६-२२८
दसण्णरज्जं मुइअं १८-४४
दसवाससहस्साइं ३४-४१
दसवाससहस्साइं ३४-४८
दसवाससहस्साइं ३४-५३
दससागरोवमाऊ ३६-१६५
दसहा भवणवासी ३६-२०७
दाणे लाभे अ भोगे अ ३३-१५
दाराणि य सुआ चेव १८-१४
दासा दसण्णे आसि १३-६
दिगिंछापरिगए देहे २-२
दिवसस्स पोरिसीणं ३०-२०
दिवसस्स चउरो भाए २६-११
दिव्वमाणुसतेरिच्छं २५-२६
दिव्वे अ जे उवसग्गे ३१-५
दीवे अ इह के वुत्ते २३-६७
दीसंति बहवो लोए २३-४०
दीहाउआ इड्ढिमंता ५-२७
दुक्करं खलु भो निच्चं २-२८
दुक्खं हयं जस्स न होइ मोहो ३२-८
दुज्जए कामभोगे अ १६-१४
दुद्धदही विगईओ १७-१५
दुपरिच्चया इमे कामा ८-६
दुमपत्तए पंडुयए जहा १०-१
दुलहे खलु माणुसे भवे १०-४
दुविहा आउजीवा उ ३६-८४
दुविहा पुढवीजीवा उ ३६-७०
दुविहा तेऊजीवा उ ३६-१०८
दुविहा वणप्फइजीवा ३६-९२
दुविहा वाउजीवा उ ३६-११७
दुविहा वि ते भवे तिविहा ३६-१७३
दुविहं खवेऊण य पुण्णपावं २१-२४
दुहओ गई बालस्स ७-१७
देवदाणवगंधव्वा १६-१६
देवदाणवगंधव्वा २३-२०
देवमणुस्सपरिवुडो २२-२२
देवलोगचुओ संतो १९-८
देवसिअं च अईआरं २६-४०
देवा चउव्विहा वुत्ता ३६-२०६
देवा भवित्ताण पुरे भवंमि १४-१
देवाभिओगेण निओइएणं १२-२१
देवा य देवलोगम्मि १३-७
देवे नेरइए अइगओ १०-१४
दो चेव सागराइं ३६-२२४
दंडाणं गारवाणं च ३१-४
दंतसोहणमाइस्स १९-२८
दंसणनाणचरित्ते २८-२५

(ध)

धणधन्नपेसवग्गेसु १९-३०
धणुं परक्कमं किच्चा ९-२१
धणेण किं धम्मधुराहिगारे १४-१७
धणं पभूअं सह इत्थिआहिं १४-१६
धम्मज्जिअं च ववहारं १-४२
धम्मत्थिकाए तद्देसे ३६-५
धम्मलद्धं मिअं काले १६-८
धम्माधम्मागासा ३६-८
धम्माधम्मे अ दोएए ३६-७
धम्मारामे चरे भिक्खू १६-१५
धम्मा वंसगा सेला ३६-१५८
धम्मे हरए बंभे संतितित्थे १२-४६
धम्मो अहम्मो आगासं २८-७
धम्मो अहम्मो आगासं २८-८
धम्मं पि हु सद्दहंतया १०-२०
धीरत्थु ते जसो कामी २२-४३
धीरस्स पस्स धीरत्तं ७-२९

(न)

न इमं सव्वेसु भिक्खुसु ५-१९
न कज्जं मज्झ भिक्खेण २५-४०
न कामभोगा समयं उवेंति ३२-१०१
न कोवए आयरिअं १-४०
नच्चा नमइ मेहावी १-४५
नच्चा उप्पइयं दुक्खं २-३२
न चित्ता तायए भासा ६-११
नट्ठेहिं गीएहि अ वाइएहिं १३-१४
न तस्स दुक्खं विभयंति १३-२३
न तुज्झ भोगे चइऊण बुद्धी १३-३३
न तुमं जाणे अणाहस्स २०-१६
न तं अरी कंठछित्ता करेइ २०-४८
नत्थि चरित्तं सम्मत्तविहूणं २८-२१
नत्थि नूणं परे लोए २-४४
नन्नट्ठं पाणहेउं वा २५-१०
न पक्खओ न पुरओ १-१८
नभेव कोंचा समइक्कमंता १४-३६
नमी नमेइ अप्पाणं ९-६१
नमी नमेइ अप्पाणं १८-४५
न मे निवारणं अत्थि २-७
न य पावपरिक्खेवी ११-१२
नरिंद जाई अहमा नराणं १३-१८
न रूवलावण्णविलासहासं ३२-१४
न लविज्ज पुट्ठो सावज्जं १-२५
न वा लभिज्जा ३२-५
नवि जाणसि वेअमुहं २५-११
नवि मुंडिएण समणो २५-३१
न सयं गिहाइं कुव्विज्जा ३५-८
न सा ममं विआणाइ २७-१२
न संतसे न वारिज्जा २-११
न हु जिणे अज्ज दीसई १०-३१
न हु पाणवहं अणुजाणे ८-८
नाइउच्चे व नीए वा १-३४
नाइदूरमणासन्ने १-३३
नागो जहा पंकजलावसण्णो १३-३०
नागोव्व बंधणं छित्ता १४-४८
नाणस्स सव्वस्स ३२-२
नाणस्सावरणिज्जं ३३-२
नाणादुमलयाइण्णं २०-३
नाणारुइं च छंदं च १८-३०
नाणावरणं पंचविहं ३३-४
नाणेण जाणई भावे २८-३५
नाणेणं दंसणेणं च २२-३६
नाणं च दंसणं चेव २८-२
नाणं च दंसणं चेव २८-३
नादंसणिस्स नाणं २८-३०

नापुट्ठो वागरे किंचि	१-१४
नामकम्मं च गोत्तं च	३३-३
नामकम्मं तु दुविहं	३३-१३
नामाइ वण्णरसगंध	३४-२
नारीसु नोपगिज्झिज्जा	८-१९
नावा अ इति का वुत्ता	२३-७२
नासीले न विसीले अ	११-५
नाहं रमे पक्खिणि पंजरे वा	१४-४१
निग्गंथे पावयणे	२१-२
निग्गंथो धिइमंतो	२६-३४
निच्चकालप्पमत्तेणं	१९-२७
निच्चं भिएण तत्थेण	१९-७२
निज्जूहिऊण आहारं	३५-२०
निद्दा तहेव पयला	३३-५
निद्धंधसपरिणामो	३४-२२
निम्ममे निरहंकारे	३५-२१
निम्ममो निरहंकारो	१९-९०
निरट्ठगंमि विरओ	२-४२
निरट्ठिआ नग्गरुई उ	२०-४९
निव्वाणं ति अबाहं ति	२३-८३
निसंते सिआऽमुहरी	१-८
निस्सग्गुवएसरुई	२८-१६
निस्संकिय निक्कंखिय	२८-३१
नीआवित्ती अचवले	३४-२७
नीलासोगसंकासा	३४-५
नीहरन्ति मयं पुत्ता	१८-१५
नेरइआ सत्तविहा	३६-१५६
नेरइयतिरिक्खाउं	३३-१२
नेव पल्लत्थियं कुज्जा	१-१९
नो इंदिअगिज्झो अमुत्तभावा	१४-१९
नो रक्खसीसु गिज्झिज्जा	८-१८
नो सक्कियमिच्छई न पूयं	१५-५
नंदणे सो उ पासाए	१९-३

(प)

पइण्णवाई दुहिले	११-९
पइरिक्कं उयस्सयं लद्धुं	२-२३
पक्खंदे जलियं जोइं	२२-४२
पच्चयत्थं च लोगस्स	२३-३२
पंचेदिया तिरिक्खा य	३६-१७२
पडिक्कमामि पसिणाणं	१८-३१
पडिक्कमित्तु निस्सल्लो	२६-४२
पडिक्कमित्तु निस्सल्लो	२६-५०
पडिणीयं च बुद्धाणं	१-१७
पडिलेहणं कुणंतो	२६-२९
पडिलेहेइ पमत्ते	१७-९
पडिलेहेइ पमत्ते	१७-१०
पडंति नरए घोरे	१८-२५
पढमा आवस्सिआ नाम	२६-२
पढमे वए महाराय	२०-१९
पढमे वास चउक्कंमि	३६-२५६
पढमं पोरिसि सज्झायं	२६-१२
पढमं पोरिसि सज्झायं	२६-१८
पढमं पोरिसि सज्झायं	२६-४४
पणयालसयसहस्सा	३६-५८
पणवीसभावणाहिं	३१-१७
पणवीस सागराइं	३६-२३८
पणिअं भत्तपाणं च	१६-७
पण्णरस तिसई विहा	३६-१९९
पत्तेअसरीरा उ	३६-९४
पभूअरयणो राया	२०-२
पयणुक्कोहमाणे य	३४-२९
परमत्थसंथवो वा	२८-२८
परिजुण्णेहिं वत्थेहिं	२-१२
परिजूरइ ते सरीरयं	१०-२१
परिजूरइ ते सरीरयं	१०-२२

परिजूरइ ते सरीरयं	१०-२३
परिजूरइ ते सरीरयं	१०-२४
परिजूरइ ते सरीरयं	१०-२५
परिजूरइ ते सरीरयं	१०-२६
परिमंडलसंठाणे	३६-४२
परिवाडीए न चिट्ठेज्जा	१-३२
परिव्वयंते अनिअत्तकामे	१४-१४
परीसहाणं पविभत्ती	२-१
परीसहा दुव्विसहा अणेगे	२१-१७
परेसु घासमेसिज्जा	२-३०
पलालं फासुअं तत्थ	२३-१७
परिओवममेगं तु	३६-२२२
पलिओवमस्स भागो	३६-१९३
पलिओवमाइं तिण्णि उ	३६-१८६-८७
पलिओवमाइं तिण्णि उ	३६-२०२
पलिओवमाइं तिण्णि उ	३६-२०३
परिओवमा उ तिण्णि उ	३६-१८३
पलिओवमं जहन्ना	३४-५२
पलिओवमं तु एगं	३६-२२३
पल्लोगाणुपल्लया चेव	३६-१२९
पसिढिलपलंबलोला	२६-२७
पसुबंधा सव्ववेआ	२५-३०
पहाय रागं च तहेव दोसं	२१-१९
पहावंतं निगिण्हामि	२३-५६
पहीणपुत्तस्स हु नत्थि वासो	१४-२९
पागारं कारइत्ताणं	९-१८
पाणिवहमुसावाए	३०-२
पाणे अ नाइवाएजा	८-९
पायच्छित्तं विणओ	३०-३०
पारिअकाउस्सग्गो	२६-४१
पारिअकाउस्सग्गो	२६-४३
पारिअकाउस्सग्गो	२६-४९
पारिअकाउस्सग्गो	२६-५२
पावसुयप्पसंगेसु	३१-१९
पासवणुच्चारभूमिं च	२६-३९
पासाए कारइत्ताणं	९-२४
पासा य इति के वुत्ता	२३-४२
पासेहिं कूडजालेहिं	१९-६४
पिअपुत्तगा दोण्णि वि	१४-५
पिआ मे सव्वसारं पि	२०-२४
पिंडुग्गहपडिमासु	३१-९
पिंडोलएव दुस्सीले	५-२२
पियधम्मे दढधम्मे	३४-२८
पिसाय भूआ जक्खा य	३६-२०९
पिहुंडे ववहरंतस्स	२१-३
पुच्छ भंते जहिच्छं ते	२३-२२
पुच्छामि ते महाभाग	२३-२१
पुच्छिऊण मए तुब्भं	२०-५७
पुच्छिज्जा पंजलिउडो	२६-९
पुज्जा जस्स पसीअंति	१-४६
पुट्ठो अ दंसमसएहिं	२-१०
पुढविक्कायमइगओ	१०-५
पुढवी आउक्काए	२६-३०
पुढवी आउक्काए	२६-३१
पुढवी आउजीवा य	३६-६९
पुढवी व सक्करा वालुगा	३६-७३
पुढवी साली जवा चेव	९-४९
पुत्तो मे भाय णाइत्ति	१-३९
पुमत्तमागम्म कुमार दो वि	१४-३
पुरिमा उज्जुजडा उ	२३-२६
पुरिमाणं दुव्विसोज्झो उ	२३-२७
पुरोहिअं तं कमसोऽणुणंतं	१४-११
पुरोहिअं तं ससुअं सदारं	१४-३७
पुव्वकोडिपुहुत्तं तु	३६-१७८

पुव्विलंमि चउब्भागे २६-८
पुव्विल्लंमि चउब्भागे २६-२१
पुव्वि च इण्हिं च अणागयं च १२-३२
पेडा य अद्धपेडा ३०-१९
पेसिआ पलिउंचंति २७-१३
पोरिसीए चउत्थीए २६-४५
पोरिसीए चउब्भागे २६-२२
पोरिसीए चउब्भागे २६-३८
पोरिसीए चउब्भागे २६-४६
पोल्लेव मुट्ठी जह से असारे २०-४२
पंकाभा धूमाभा ३६-१५७
पंखाविहूणोव्व १४-३०
पंचमहव्वयजुत्तो १९-८९
पंचमहव्वयधम्मं २३-८७
पंचमी छंदणा २६-३
पंचसमिओ ३०-३
पंचालरायावि य १३-३४
पंचासवप्पवत्तो ३४-२१
पंचिंदियकायमइगओ १०-१३
पंचिंदियतिरिक्खा उ ३६-१७२
पंचिंदिया उ जे जीवा ३६-१५५
पंचिंदियाणि कोहं ९-३६
पंताणि चेव सेविज्जा ८-१२
पंतं सयणासणं १५-४

(फ)

फासओ उण्हए जे उ ३३-३९
फासओ कक्खडे जे उ ३६-३४
फासओ गुरुए जे उ ३६-३६
फासओ निद्धए जे उ ३६-४०
फासओ परिणया जे उ ३६-१९
फासओ मउए जे उ ३६-३५
फासओ लहुए जे उ ३६-३७
फासओ लुक्खए जे उ ३६-४१
फासओ सीयए जे उ ३६-३८
फासस्स कायं गहणं वयंति ३२-७५
फासस्स जो गिद्धिमुवेइ ३२-७६
फासाणुगासाणुगए अ जीवे ३२-७९
फासाणुरत्तस्स नरस्स एवं ३२-८४
फासाणुवाएण परिग्गहेण ३२-८०
फासुअम्मि अणाबाहे ३५-७
फासे अतित्ते अ परिग्गहे अ ३२-८१
फासे विरत्तो मणुओ ३२-८६

(ब)

बला संडासतुंडेहिं १९-५९
बहिआ उड्ढमादाय ६-१४
बहुआगमविन्नाणा ३६-२६६
बहुआणि उ वासाणि १९-९६
बहुमाई पमुहरी १७-११
बहुं खु मुणिणो भद्दं ९-१६
बायरा जे उ पज्जत्ता ३६-७१
बायरा जे उ पज्जत्ता ३६-८५
बायरा जे उ पज्जत्ता ३६-९३
बायरा जे उ पज्जत्ता ३६-१०९
बायरा जे उ पज्जत्ता ३६-११८
बारसहिं जोयणेहिं ३६-५७
बारसे व उ वासाइं ३६-२५५
बारसंगविउ बुद्धे २३-७
बालमरणाणि बहुसो ३६-२६५
बालस्स पस्स बालत्तं ७-२८
बालाणं अकामं तु ५-३
बालभिरामेसु दुहावहेसु १३-१७
बालेहिं मूढेहिं अयाणएहिं १२-३१
बावत्तरिं कलाओ अ २१-६
बावीस सहस्साइं ३६-८०

बावीस सागराइं ३६-२३५
बावीस सागराऊ ३६-१६७
बुद्धस्स निसम्म भासिअं १०-३७
बुद्धे परिनिव्वुडे चरे १०-३६
बेइंदियकायमइगओ १०-१०
बेइंदिया उ जे जीवा ३६-१२७
बंभम्मिनायज्झयणेसु ३१-१४

(भ)

भइणीओ मे महाराय २०-२७
भणंता अकरिंता य ६-१०
भवतण्हा लया वुत्ता २३-४८
भाणू अ इह के वुत्ते २३-७७
भायरो मे महाराय २०-२६
भारिआ मे महाराय २०-२८
भावस्स मणं गहणं ३२-८८
भावाणुगासाणुगए अ जीवे ३२-९२
भावाणुवाए ण परिग्गहेण ३२-९३
भावाणुरत्तस्स नरस्स ३२-९७
भावे अतित्ते अ परिग्गहे अ ३२-९४
भावे विरत्तो मणुओ विसोगो ३२-९९
भावेसु जो गिद्धिमुवेइ तिव्वं ३२-८९
भिक्खालसिए एगे २७-१०
भिक्खिअव्वं न केयव्वं ३५-१५
भोआ य सा तहिं दट्ठुं २२-३५
भुओरगपरिसप्पा उ ३६-१८३
भुंज माणुस्सए भोगे १९-४४
भुत्ता रसा भोइ जहाइ णे १४-३२
भूअत्थेणाहिगया २८-१७
भोगामिसदोसविसण्णे ८-५
भोगे मुच्चा वमित्ता य १४-४४
भोच्चा माणुस्सए भोए ३-१९

(म)

मएसु बंभगुत्तीसु ३१-१०
मग्गे इइ के वुत्ते २३-६२
मच्चुणाब्भाहओ लोओ १४-२३
मच्छा य कच्छभा य ३६-१७४
मज्झिमामज्झिमा चेव ३६-२१६
मणगुत्तो वयगुत्तो १२-३
मणगुत्तो वयगुत्तो २२-४९
मणपरिणामो अ कओ २२-२१
मणपल्हायजणणी १६-२
मणस्स भावं गहणं वयंति ३२-८७
मणिरयणकुट्टिमतले १९-४
मणुआ दुविह भेआ उ ३६-१९७
मणोगयं वक्कगयं १-४३
मणोहरं चित्तघरं ३५-४
मत्तं च गंधहत्थिं २२-१०
मरणं पि सपुण्णाणं ५-१८
मरिहिसि राय जया तया वा १४-४०
महत्थरूवा वयणप्पभूआ १३-१२
महाउदगवेगेण २३-६५
महाजंतेसु उच्छू वा १९-५४
महाजसो एस महाणुभागो १२-२३
महादवग्गिसंकासे १९-५१
महापभावस्स महाजसस्स १९-९८
महामेहप्पसूआओ २३-५१
महासुक्का सहस्सारा ३६-२१३
माई मुद्धेण पडइ २७-६
मा गलियस्सेव्व कसं १-१२
माणुसत्ते असारम्मि १९-१५
माणुसत्तं भवे मूलं ७-१६
माणुसत्तंमि आयाओ ३-११
माणुस्सं विग्गहं लद्धुं ३-८

मा य चंडालियं कासी	१-१०
माया पिआ ण्हुसा भावा	६-३
मायावुइअमेअं तु	१८-२६
मायावि मे महाराय	२०-२५
मासे मासे उ जो बालो	९-४४
माहणकुलसंभूओ	२५-१
मा हु तुमं सोअरिआण	१४-३३
मिअचारिअं चरिस्सामि	१९-८५
मिउमद्दव संपन्ने	२७-१७
मिएछुभित्ता हयगओ	१८-३
मिगचारिअं चरिस्सामि	१९-८५
मिगचारिअं चरिस्सामि	१९-८६
मिच्छादंसणरत्ता	३६-२६१
मिच्छादंसणरत्ता	३६-२६३
मित्तवं नाइवं होइ	३-१८
मिउमद्दवसंपन्ने	२७-१७
मिहिलाए चेइए वच्छे	९-९
मिहिलं सपुरजणवयं	९-४
मुग्गरेहिं मुसंढीहिं	१९-६२
मुसं परिहरे भिक्खू	१-२४
मुहपोतिअं पडिलेहित्ता	२६-२३
मुहुत्तद्धं तु जहन्ना	३४-३४
मुहुत्तद्धं तु जहन्ना	३४-३५
मुहुत्तद्धं तु जहन्ना	३४-३६
मुहुत्तद्धं तु जहन्ना	३४-३७
मुहुत्तद्धं तु जहन्ना	३४-३८
मुहुत्तद्धं तु जहन्ना	३४-३९
मुहुत्तद्धं तु जहन्ना	३४-४६
मुहुं मुहुं मोहगुणे जयंतं	४-११
मोक्खमग्गगइं तच्चं	२८-१
मोक्खाभिं खिस्स	३२-१७
मोणं चरिस्सामि समेच्च धम्मं	१५-१
मोसस्स पच्छा य पुरत्थओ य	३२-३१
मोसस्स पच्छा य पुरत्थओ य	३२-४४
मोसस्स पच्छा य पुरत्थओ य	३२-५७
मोसस्स पच्छा य पुरत्थओ य	३२-७०
मोसस्स पच्छा य पुरत्थओ य	३२-८३
मोसस्स पच्छा य पुरत्थओ य	३२-९६
मोहणिज्जंपि दुविहं	३३-८
मंताजोगं काउं	३६-२६८
मंतं मूलं विविहं	१५-८
मंदा य फासा बहुलोहणिज्जा	४-१२

(र)

रण्णो तहिं कोसलिअस्स	१२-२०
रत्तिं पि चउरो भाए	२६-१७
रमए पंडिए सासं	१-३७
रयणाभा सक्कराभा	३६-१५७
रयणाइ गुत्तओ चेव	३६-१५९
रसओ अम्बिले जे उ	३६-३२
रसओ कडुए जे उ	३६-३०
रसओ कसाए जे उ	३६-३१
रसओ तित्तए जे उ	३६-२९
रसओ परिणया जे उ	३६-१८
रसओ महुरे ज उ	३६-३३
रसस्स जिब्भं गहणं वयंति	३२-६२
रसाणुगासाणुगए अ जीवे	३२-६६
रसाणुरत्तस्स नरस्स एवं	३२-७१
रसाणुवाएण परिग्गहेण	३२-६७
रसापगामं न निसेविअव्वा	३२-१०
रसे अतित्ते अ परिग्गहे अ	३२-६८
रसे विरत्तो मणुओ विसोगो	३२-७३
रसेसु जो गिद्धिमुवेइ तिव्वं	३२-६३
रसंतो कंदुकुम्भीसु	११-५२
रहनेमी अहं भद्दे	२२-३७
राइअं च अईयारं	२६-४८
राईमई विचिंतेइ	२२-२९

राओवरयं चरिज्ज लाढे	१५-२
रागद्दोसे अ दो पावे	३१-३
रागदोसादओ तिव्वा	२३-४३
रागो दोसो मोहो	२८-२०
रागो य दोसोवि य कम्मबीयं	३२-७
रागं च दोसं च तहेव मोहं	२२-९
राया य सह देवीए	१४-५३
रूवस्स चक्खुं गहणं वयंति	३२-२३
रूवाणुगासाणुगए य ज जीवे	३२-२७
रूवाणुरत्तस्स नरस्स एवं	३२-३२
रूवाणुवाएण परिग्गहेण	३२-२८
रूविणो चेवरूवी अ	३६-४
रूविणो चेवरूवी अ	३२-६८
रुवे अतित्ते य	३२-२९
रूवे विरत्तो मणुओ विसोगो	३२-३४
रूवेसु जो गिद्धिमुवेइ तिव्वं	३२-२४

(ल)

लद्धूण वि आरिअत्तणं	१०-१७
लद्धूण वि उत्तमं सुई	१०-१९
लद्धूण वि माणुसत्तणं	१०-१६
लया य इति का वुत्ता	२३-४७
लाभालाभे सुहे दुक्खे	१९-९१
लेसज्झयणं पवक्खामि	३४-१
लेसासु छसु काएसु	३१-८
लेसाहिं सव्वाहिं	३४-५८
लेसाहिं सव्वाहिं	३४-५९
लोएगदेसे ते सव्वे	३६-६७
लोएगदेसे ते सव्वे	३६-१७५
लोएगदेसे ते सव्वे	३६-१८४
लोएगदेसे ते सव्वे	३६-१९१
लोगस्स एगदेसम्मि	३६-१६०
लोगस्स एगदेसम्मि	३६-२१९
लोहणी हूयच्छी हूय	३६-९८

(व)

वएसु इंदियत्थेसु	३१-७
वज्जरिसहसंघयणो	२२-६
वणस्सइकायमइगओ	१०-९
वण्णओ गंधओ चेव	३६-१५
वण्णओ जे भवे किण्हे	३६-२२
वण्णओ जे भवे नीले	३६-२३
वण्णओ परिणया जे उ	३६-१६
वण्णओ पीयए जे उ	३६-२५
वण्णओ लोहिए जे उ	३६-२४
वण्णओ सुक्किले जे उ	३६-२६
वत्तणालक्खणो कालो	२८-१०
वरवारुणीइ व रसो	३४-१४
वरं मे अप्पा दंतो	१-१६
वलय पव्वगा कुहणा	३६-९५
वसे गुरुकुले णिच्चं	११-१४
वहणे वहमाणस्स	२७-२
वाइआ संगहिआ चेव	२७-१४
वाउक्कायमइगओ	१०-८
वाएण हीरमाणंमि	९-१०
वाडेसु वा रत्थासु व	३०-१८
वाणारसीए बहिआ	२५-३
वायणा पुच्छणा चेव	३०-३४
वायं विविहं समिच्च लोए	१५-१५
वालुआकवले चेव	१९-३८
वासाइं बारसेव उ	३६-१३२
वासुदेवो य णं भणइ	२२-२५
वासुदेवो य णं भणइ	२२-३१
विअरिज्जइ खज्जइ	१२-१०
विआणिआ दुक्खविवड्ढणं	१९-९९
विगहाकसायसण्णाणं	३१-६
विगिंच्च कम्मुणो हेउं	३-१३
विगिंच्च कम्मुणो हेउं	६-१५

विच्छिण्णे दूरमोगाढे	२४-१८
विजहित्तु पुव्वसंजोगं	८-२
विततपक्खी अ बोधव्वा	३६-१८७
वित्ते अ चोइए णिच्चं	१-४४
वित्तेण ताणं न लभे पमत्ते	४-५
विदंसएहिं जालेहिं	१९-६६
विभूसं परिवज्जिज्जा	१६-९
विरई अबंभचेरस्स	१९-२९
विरज्जमाणस्स य इंदियत्था	३२-१०६
विवायं च उदीरइ	१७-१२
विवित्तलयणाणि भइज्ज ताई	२१-२२
विवित्तसेज्जासण जंतिआणं	३२-१२
विसएसु अरज्जंतो	१९-१०
विसप्पे सव्वओ धारे	३५-१२
विसालिसेहिं सीलेहिं	३-१४
विसं तु पीयं जह कालकूडं	२०-४४
वीसं तु सागराइं	३६-२३३
वुच्छिद सिणेहमप्पणो	१०-२८
वेअण वेआवच्चे	२६-३३
वेअणिअं पि अ दुविहं	३३-७
वेआ अहीआ न भवंति ताणं	१४-१२
वेआणं च मुहं बूहि	२५-१४
वेआवच्चे निउत्तेण	२६-१०
वेएज्ज निज्जरापेही	२-३७
वेमाणिआ उ जे देवा	३६-२११
वेमायाहिं सिक्खाहिं	७-२०
वंके वंकसमायारे	३४-२५
वंतासी पुरिसो रायं	१४-३८
(स)	
सइं च जइ मुच्चिज्जा	२०-३२
सकम्मसेसेण पुराकएणं	१४-२
सक्खं खु दीसइ तवोविसेसो	१२-३७
सगरोवि सागरंतं	१८-३५
सच्चसोअप्पगडा	१३-९
सच्चा तहेव मोसा य	२४-२०
सच्चा तहेव मोसा य	२४-२३
सणंकुमारो मणुस्सिंदो	१८-३७
सण्णाइपिंडं जेमेइ	१७-१९
सत्तरस सागराइं	३६-२३०
सत्तरस सागराऊ	३६-१६६
सत्तू अ इइ के वुत्ते	२३-३७
सत्तेव सहस्साइं	३६-८८
सत्तेव सागराऊ	३६-१६४
सत्थग्गहणं विसभक्खणं	३६-२७१
सत्थं जहा परमतिक्खं	२०-२०
स देवगंधव्वमणुस्सपूइए	१-४८
सद्दस्स सोअं गहणं वयंति	३२-३६
सद्दाणुगासाणुगए अ जीवे	३२-४०
सद्दाणुरत्तस्स नरस्स एवं	२२-४५
सद्दाणुवाएण परिग्गहेण	३२-४१
सद्दा विविहा भवंति लोए	१५-१४
सद्दे अतित्ते अ परिग्गहे अ	३२-४२
सद्दे रूवे अ गंधे अ	१६-१०
सद्दे विरत्तो मणुओ विसोगो	३२-४७
सद्देसु जो गिद्धिमुवेइ तिव्वं	३२-३७
सद्दंधयारउज्जोओ	२८-१२
सद्धं च नगरं किच्चा	९-२०
स नाणनाणोवगए महेसी	२१-२३
सन्निहिं च न कुविज्जा	६-१६
स पुज्जसत्थे सुविणीयसंसए	१-४७
स पुव्वमेवं न लभेज्ज पच्छा	४-९
समएवि संतइं पप्प	३६-९
समणा मु एगे वयमाणा	८-७
समणो अहं संजओ बंभयारी	१२-९

समणं संजयं दतं	२-२७
समयाए समणो होइ	२५-३२
समया सव्वभूएसु	१९-२६
समरेसु अगारेसु	१-२६
समागया बहू तत्थ	२३-१९
समावण्णा णं संसारे	३-२
समिक्खं पंडिए तम्हा	६-२
समिईहिं मज्झं सुसमाहियस्स	१२-१७
समुद्दगंभीरसमा०	११-३१
समुआणं उंछमेसिज्जा	३५-१६
समुवट्ठिअं तहिं संतं	२५-६
समं च संथवं थीहिं	१६-३
सम्मत्तं चेव मिच्छत्तं	३३-९
सम्मद्दमाणे पाणाणि	१७-६
सम्मद्दंसणरत्ता	३६-२६२
सम्मं धम्मं विआणित्ता	१४-५०
सयणासण ठाणे वा	३०-३६
सयणासणपाणभोअणं	१५-१२
सयं गेहिं परिच्चज्ज	१७-१८
सरागे वीअरागे वा	३४-३२
सरीरमाहु नाव त्ति	२३-७३
सल्लं कामा विसं कामा	९-५३
स वीअरागो कयसव्व	३२-१०८
सव्वजीवाण कम्मं तु	३३-१८
सव्वट्ठसिद्धगा चेव	३६-२१८
सव्वभवेसु असाया	१९-७५
सव्वे ते विइआ मज्झं	१८-२७
सव्वेसिं चेव कम्माणं	३३-१७
सव्वेहिं भूएहिं दयाणुकंपी	२१-१३
सव्वोसहिहिं ण्हविओ	२२-९
सव्वं गंथं कलहं च	८-४
सव्वं जगं जइ तुहं	१४-३९
सव्वं तओ जाणइ पासई य	३२-१०९
सव्वं विलवियं गीयं	१३-१६
सव्वं सुचिण्णं सफलं नराणं	१३-१०
ससरक्खपाओ सुअइ	१७-१४
सागरंतं चइत्ताणं	१८-४०
सागरा अउणतीसं तु	३६-२४२
सागरा अउणवीसं तु	३६-२३२
सागरा अट्ठवीसं तु	३६-२४१
सागरा इक्कतीसं तु	३६-२४४
सागरा इक्कवीसं तु	३६-२३४
सागराणि य सत्तेव	३६-२२६
सागरा सत्तवीसं तु	३६-२४०
सागरा साहिया दुन्नि	३६-२२५
सागरोवममेगं तु	३६-१६२
सा पव्वइआ संती	२२-३२
सामाइअत्थ पढमं	२८-३२
सामायारी पवक्खामि	२६-१
सामिसं कुललं दिस्स	१४-४६
सायगवेसए य आरम्भा	३४-२४
सारीरमाणसा चेव	१९-४६
सारीरमाणसे दुक्खे	२३-८०
सासणे विगयमोहाणं	१४-५२
साहारणसरीरा उ	३६-९६
साहिया सागरा सत्त	३६-२२७
साहियं सागरं एक्कं	३६-२२१
साहु गोअम पन्ना ते	२३-२८
साहु गोअम पन्ना ते	२३-३४
साहु गोअम पन्ना ते	२३-३९
साहु गोअम पन्ना ते	२३-४४
साहु गोअम पन्ना ते	२३-४९
साहु गोअम पन्ना ते	२३-५४
साहु गोअम पन्ना ते	२३-५९

साहु गोअम पन्ना ते	२३-६४
साहु गोअम पन्ना ते	२३-६९
साहु गोअम पन्ना ते	२३-७४
साहु गोअम पन्ना ते	२३-७९
साहु गोअम पन्ना ते	२३-८५
साहुस्स दरिसणे तस्स	१९-७
सिज्जा दढा पाउरणं मे अत्थि	१७-२
सिद्धाइगुणजोएसु	३१-२०
सिद्धाणणंतभागो अ	३३-२४
सिद्धाण नमो किच्चा	२०-१
सीआ उण्हा य निद्धा य	३६-२०
सीतोसिणा दंसमसा य	२१-१८
सीसेण एअं सरणं उवेह	१२-२८
सुइं च लद्धुं सद्धं च	३-१०
सुआणि मे पंच महव्वयाणि	१९-११
सुआ मे नरए ठाणा	५-१२
सुकडित्ति सुपक्किति	१-३६
सुक्कं झाणं झियाएज्जा	३५-१९
सुग्गीवे नयरे रम्मे	१९-१
सुच्चाणं परुसा भासा	२-२५
सुणियाभावं साणस्स	१-६
सुणेह मेगग्गमणा	३५-१
सुणेहि मे महाराय	२०-१७
सुत्तेसु आवी पडिबुद्धजीवी	४-६
सुद्धेसणाओ नच्चा णं	८-११
सुवण्णरुप्पस्स उ पव्वया भवे	९-४८
सुसाणे सुण्णगारे वा	२-२०
सुसाणे सुण्णगारे वा	३५-६
सुसंभिआ कामगुणा इमे ते	१४-३१
सुसंवुडा पंचहिं संवरेहिं	१२-४२
सुहुमा सव्वलोगम्मि	३६-७८
सुहुमा सव्वलोगम्मि	३६-१११
सुहुमा सव्वलोगम्मि	३६-१२०
सुहोइओ तुमं पुत्ता	१९-३५
सुहं वसामो जीवामो	९-१४
से चुए बंभलोआओ	१८-२९
से नूणं मए पुव्वं	२-४०
सोअग्गिणा आयगुणिंधणेण	१४-१०
सोअस्स सद्दं गहणं वयंति	३२-३५
सोऊण तस्स सो धम्मं	१८-१८
सोऊण तस्स सो वयणं	२२-१८
सोऊण रायवरकन्ना	२२-२८
सो कुंडलाण जुअलं	२२-२०
सोच्चाण मेहावि सुभासिअं	२०-५१
सोच्चा णं फरुसा भासा	२-२५
सो तत्थ एवं पडिसिद्धो	२५-९
सो तवो दुविहो वुत्तो	३०-७
सो तस्स सव्वस्स दुहस्स मुक्को	३२-११०
सो दाणिसिं राय महाणुभागो	१३-२०
सो देवलोगसरिसे	९-३
सो बिंतम्मापिअरो	१९-४५
सो बिंतम्मापिअरो	१९-७७
सोरिअपुरंमि नयरे	२२-१
सोरिअपुरंमि नयरे	२२-३
सो रिट्ठनेमिनामो उ	२२-५
सोलसविह भेएणं	३३-११
सोवागकुलसंभूओ	१२-१
सोवि अंतरभासिल्लो	२७-११
सोवीरायवसहो	१८-४८
सोही उज्जुयभूयस्स	३-१२
सो होइ अभिगमरूई	२८-२३
संकप्पो संरंभो	२४-२२
संखेज्जकालमुक्कोसं	३६-१३३
संखेज्जकालमुक्कोसं	३६-१४२

संखेज्जकालमुक्कोसं	३६-१५२
संखंककुंदसंकासा	३४-९
संखंककुंदसंकासा	३६-६१
संखेज्जसागरुक्कोसं	३६-२५०
संगो एस मणुस्साणं	२-१६
संजओ अहमस्सीति	१८-१०
संजओ चइउं रज्जं	१८-१९
संजओ नाम नामेणं	१८-२२
संजोगा विप्पमुक्कस्स	१-१
संजोगा विप्पमुक्कस्स	११-१
संठाणओ अ चउरंसे	३६-४५
संठाणपरिणया जे उ	३६-२१
संठाणओ भवे तंसे	३६-४४
संठाणओ भवे वट्टे	३६-४३
संतइं पप्प तेऽणाई	३६-१२
संतइं पप्प णाईया	३६-७९
संतइं पप्प णाईया	३६-८७
संतइं पप्प णाईया	३६-१०१
संतइं पप्प णाईया	३६-११२
संतइं पप्प णाईया	३६-१२१
संतइं पप्प णाईया	३६-१३१
संतइं पप्प णाईया	३६-१४०
संतइं पप्प णाईया	३६-१५०
संतइं पप्प णाईया	३६-१६१
संतइं पप्प णाईया	३६-१७६
संतइं पप्प णाईया	३६-१८५
संतइं पप्प णाईया	३६-१९२
संतइं पप्प णाईया	३६-२०१
संतइं पप्प णाईया	३६-२२०
संति एगेहिं भिक्खुहिं	५-२०
संतिमे य दुवे ठाणा	५-२
संथारं फलगं पीढं	१७-७
संपज्जलिआ घोरा	२३-५०
संबुद्धो सो तहिं भयवं	२१-१०
संमुच्छिमाण एसेव	३६-२००
संरंभसमारंभे	२४-२१
संरंभसमारंभे	२४-२४
संरंभसमारंभे	२४-२६
संवट्टगवाया अ	३६-११९
संसयं खलु सो कुणई	९-२६
संसारत्था उ जे जीवा	३६-६८
संसारत्था य सिद्धा य	३६-४८
संसारत्था य सिद्धा य	३६-२५२
संसारमावण्ण परस्स अट्ठा	४-४

(ह)

हओ न संजले भिक्खू	२-२६
हत्थागया इमे कामा	५-६
हत्थिणपुरंमि चित्ता	१३-२८
हयाणीए गयाणीए	१८-२
हरियालभेयसंकासा	३४-८
हरियाले हिंगुलए	३६-७४
हासं किड्डं रइं दप्पं	१६-६
हिअं विगयभया बुद्धा	१-२९
हिंगुलधाउसंकासा	३४-७
हिट्ठिमाहिट्ठिमा चेव	३६-२१५
हिरण्णं जायरूवं च	३५-१३
हिरण्णं सुवण्णं मणिमुत्तं	९-४६
हिरिली सिरिली सिस्सिरिली	३६-९७
हिंसे बाले मुसावाई	५-९
हिंसे बाले मुसावाई	७-५
हुआसणे जलंतम्मि	१९-५८
होमि नाहो भवंताणं	२०-११

उद्धरणसूचि

अइरुग्गइएवि सूरिए.....५६	[उत्त० निर्युक्तौ-१३५]
अट्टमट्टंपि सिक्खिज्जा.....९९	[ ]
अट्ठमीपक्खिए मोत्तुं.....२६०	[ ]
अणसणमूणोयरिया.....३३७	[नवतत्त्व प्रकरणे-३६]
अणु चरियं धीर तुमे.....२९०	[ ]
अणुरज्जंति खणेणं.....९०	[ ]
अदिट्ठभद्दा थोवेणवि.....३०५	[ ]
अपुत्रस्य गतिर्नास्ति.....२३१	[ ]
अपुव्वनाणगहणं.....२३ (भाग-२)	[ ]
अप्पवहाए नूणं.....२८०	[ ]
अप्पाहार अवड्ढा दुभाग.....१५१ (भाग-२)	[ ]
अंबे अंबरिसी.....१६१ (भाग-२)	[समवायांग सूत्र-१५]
अब्भिंतरिआ भोआ.....५५	[आ० निर्युक्तौ-१३३]
अलियंपि जणो धण.....६०	[ ]
अवलोकनं दिशानां.....२	[ ]
असिपत्ते धणुकुम्भे.....१६१ (भाग-२)	[समवायांग सूत्र-१५]
आयरिए गच्छंमि.....३०२	[ ]
आलोयणा पडिक्कमणे.....१५६ (भाग-२)	[ ]
आश्रव वचने स्थित.....६	[अनेकार्थे-३/६८७]
आसने शयने स्थाने.....७६	[ ]
आस्व दासौ मृगौ हंसौ.....२१५-२१८	[ ]
इक्कस्स कओ धम्मो.....२४५	[ ]
उम्मग्गदेसओ मग्गनासओ.....२७७ (भाग-२)	[ ]
उवहि सुअ भत्तपाणे.....७५	[ ]
एकोदरा पृथग्ग्रीवा.....८४	[ ]
एगंमि उदग बिंदुंमि.....२६	[सम्बोध सत्तरि-प्रकरणे-९५]
एगिंदियसूहूमियरा.....१६१ (भाग-२)	[नवतत्त्व]
एगिंदियाणं भंते तेयाकम्मयुग्गलाणं.....१९८ (भाग-२)	[ ]
एगे भंते जीवप्पएसे जीवेत्ति.....६९	[ ]
एगो मे सासओ अप्पा.....१४१	[ ]
एयाउ भावणाउ भावित्ता.....२७७ (भाग-२)	[ ]
एषा नौ षष्टिका जाति.....२१६-२१८	[ ]
ओसन्नो पासत्थो.....२६८	[ ]
कज्जलकर्दमगोमयलिप्ते.....२४७	[ ]

कज्जविहूणाण नेहो.....६०	[ ]
कडेमाणे कडे चलमाणे.....६८	[ ]
करकंडू कलिंगेसु.....१२७	[उत्त० निर्युक्तौ-२६४]
करिसुंडाभुयदंडो.....८७	[ ]
कर्मबद्धो भवेज्जीव.....२३५	[ ]
कमेन्धनं समाश्रित्य.....७८ (भाग-२)	[ ]
काउस्सग्गे जह सुट्ठियस्स.....९६ (भाग-२)	[ ]
कालंमि अणाईए.....२८०	[ ]
कालध्वनोरत्यन्तसंयोगे.....८८ (भाग-२)	[पाणिनीय २-२-५]
किं अत्थि कोइ भुवणे.....२८१	[ ]
किं चलिओव्व समुद्दो.....८६	[ ]
किज्जमाणे कडे चलमाणे.....६८	[ ]
किण्हलेसाणं भंते कइविहं.....२०५ (भाग-२)	[ ]
कृतकर्म क्षयो नास्ति.....२२०	[ ]
कोशेन भृत्यैश्च निबद्धमूलं.....६१	[ ]
कौशेयं कृमिजं सुवर्णमुपलाद्.....१८४	[ ]
क्रियाकर्मविशेषेण.....१९०	[ ]
क्षमा दानं दमो ध्यानं.....७८ (भाग-२)	[ ]
खुहासमा वेयणा नत्थि.....२३	[ ]
गजारोहणाद् भवेद्राज्यं.....१२४	[ ]
गणिअ च देवदत्तं.....९३	[उपदेश पद ११ वृत्यां गा. ६२]
गयरागदोस समोहो.....३०८	[ ]
गात्रेभङ्गः स्वरे दैन्यं.....४३	[ ]
गुणैरुत्तमतां याति.....१८४	[ ]
गुरुगुणवर धणुकलिओ.....२१०	[ ]
गुरुमोहकलहनिद्दा.....२२ (भाग-२)	[ ]
गूढ सिरागं पत्तं.....२४३ (भाग-२)	[ ]
गृहाश्रमसमो धर्मो.....१४७	[ ]
चक्कं धणुह खग्गो.....१७९	[बृहत् संग्रहणौ-२४८]
चत्तारि पंचतिरिक्खं.....६९	[भगवत्यां ९/३३ सू. ३९०]
चाण्डालः किमयं द्विजातिरथवा.....४१	[तुला. भर्तुहरि वैराग्य शतक-५४]
चुल्लगपासकधण्णे.....५९	[उपदेश पद-५]
छव्वासएहिं नव्वुत्तरेहिं.....७५	[आवश्यक मू. भा. १४५]
छिज्जउ सीसं अहवा.....८७	[ ]
जगचिंतामणि जगनाह.....१६०	[ ]
जत्थ जलं तत्थ वणं.....२६	[ ]


जत्थ जलं तत्थ वणं...तेऊवाऊसहिया.....९४ (भाग-२)	[ ]
जत्थ राया सयं चोरो.....५५	[उत्त. निर्युक्तौ-१३४]
जत्थ वसेज्जा सड्ढो .....२३ (भाग-२)	[ ]
जन्तवो बहवः सन्ति.....७६	[ ]
जमहं दिवा य राओ य.....५४	[उत्त. निर्युक्तौ-१२७]
जय आसेवण नहयल.....२८४	[ ]
जह तुब्भे तह अम्हे.....१६४	[उत्त. निर्युक्तौ ३०८]
जहा लाहो तहा लोहो.....१२१	[उत्त. ८/३०]
जाव वुच्छं सुहं वुच्छं.....५५	[उत्त. निर्युक्तौ-१३२]
जिट्ठासाढेसु मासेसु.....५४	[उत्त. निर्युक्तौ १३०]
जीवाइ नवपयत्थे.....१९० (भाग-२)	[नवतत्त्व प्रकरणे-५१]
जीवाण कुंथुमाइण.....३०	[सम्बोध प्रकरणे ११९९]
जेण भिक्खं बलिं देमि.....५१	[उत्त. निर्युक्तौ-१२४]
जेण रोहंति बीआणि.....५४	[उत्त. निर्युक्तौ-१२६]
जोइस निमित्त अक्खर.....१२५	[ ]
जो कारवेइ जिणपडिमं.....३०८	[ ]
जो जत्तिअस्स अत्थस्स.....६०	[ ]
जो देइ उवस्सयं.....९	[ ]
तणपणगं पन्नत्तं.....४८ (भाग-२)	[ ]
तथा सम्पातिमाः सत्त्वा.....७६	[ ]
तवसंजमसज्झाओ.....९	[ ]
तस्य त्वग्रहणे यस्मात्.....७७	[ ]
तावस किमिणा मूअव्वएण.....३३	[उपदेश पदे-३०५]
तिरिनर आगामियभवलेसाए.....२१४ (भाग-२)	[ ]
तुमेव ह अंब मालवे.....५६	[उत्त. निर्युक्तौ-१३६]
तुल्यार्थे तुल्यसामर्थ्यं.....६२	[ ]
ददतु ददतु गालीर्गालिमन्तो भवन्तो.....४१	[ ]
दधिवाहन पुत्रेण.....१२९	[ ]
दस अट्ठदोसरहिओ.....३०९	[ ]
दारिद्दं दोहग्गं.....३०८	[ ]
दृष्टिपूर्वं चरेन्मार्गं.....१९८	[ ]
देवगुरुण तिसंझं.....२३ (भाग-२)	[ ]
दो मज्झधाउरत्ताइं.....६३	[ ]
दोषो मेऽस्तीति.....४२	[ ]
धणओ धणत्थियाणं.....३०७	[ ]
धन्नाणं खु नराणं.....६५-९२	[ ]

धनेषु जीवितव्येषु.....१६५	[ ]
धम्मो चेवेत्थ सत्ताणं.....३०९	[ ]
धारइ दुद्धरबंभचेरं.....२०३	[ ]
धारिज्जइ इंतो सागरो वि.....२९२	[ ]
नंदराय नवि जाणई.....३६	[ ]
नव मासह कुच्छि धारिया.....५६	[तुला. उत्त. निर्युक्तौ १६७]
नवमे प्राणसन्देहो.....२५४	[ ]
नवि अत्थि नवि अ दोही.....१६४	[उत्त. निर्युक्तौ ३०९]
न शूद्राय मतिं दद्यात्.....१८९	[ ]
नहि भवति निर्विगोपक.....२०	[ ]
नानाशास्त्रसुभाषितामृतरसैः.....५१	[ ]
नासून मुष्णाति तान् वा.....४१	[ ]
निवसन्त्यमरा हि वस्त्रकोणे.....२४७	[ ]
निहाणं सव्वरोगाणं.....२७८	[ ]
पंचेंदियवहभूयं मंसं.....२२ (भाग-२)	[ ]
पञ्चमे दह्यते गात्रं.....२५४	[ ]
पणीयं पाणभोयणं परिवज्जणं.....१५५ (भाग-२)	[ ]
पत्तेयशरीरबायरवणस्सइकायाणं.....२४४ (भाग-२)	[भागवत्यां]
पत्थिज्जइ जइ वि जए.....२०९	[ ]
परवसंमि सुहेण.....२८२	[ ]
परियदिय लावन्नं.....१६४	[उत्त० निर्युक्तौ ३०७]
पायच्छित्तं विणओ.....३३७	[नवतत्त्व प्रकरणे-३५]
पावइ सुरनरिद्धी.....९	[ ]
पुढवि जल जलण वाउ.....११०	[विशेषा. ३२०७]
पुलिंदा नाहला नेष्टा.....१६७	[अभि. चिन्तामणौ-९३४]
प्रथमे जायते चिन्ता.....२५४	[ ]
प्रवर्धमानः पुरुषः.....६०	[ ]
बहुपुत्रा दुली गोधा.....२३२	[ ]
ब्रह्मचर्येण सत्येन.....२००	[ ]
ब्रह्मणे ब्रह्ममालभेत.....१२३	[ ]
भवन्ति जन्तवो यस्माद्.....७६	[ ]
भवपडिबंधनिमित्तं.....२८४	[ ]
भुत्ता दिव्वा भोगा.....२८ (भाग-२)	[ ]
भोअणसमए सयणे.....२३ (भाग-२)	[ ]
भोगप्राप्तिर्देवतांशे नरांशे.....२४७	[ ]
मअे वग्घस्स भीएणं.....५४	[उत्त. निर्युक्तौ-१२८]
मज्जे महुंमि मंसंमि.....२२ (भाग-२)	[ ]

मठसुन्नदेवलेसु अ.....८७	[ ]
मणुन्न असणपाणं विविहं.....२७८	[ ]
मन एव मनुष्याणां.....१०९	[ ]
महिला जालकुलहरं.....२०४	[ ]
माणुसत्ताइ सामग्गी.....२५ (भाग-२)	[ ]
माया अलियं लोभो.....८८	[ ]
मार्लिति महीयलं जामिणीसु.....९	[सम्बोध प्रकरणे ११९८]
मारेइ य भत्तारं.....२०४	[ ]
मासुववासु करेइ.....२०३	[ ]
मासैरष्टभिरह्नावा.....३०३	[ ]
माहिंदे धणो समाणिओ.....२३ (भाग-२)	[ ]
मिंठेण वि परिचत्तो.....८६	[ ]
मूरर्वत्वं हि सखे ममापि रुचितं.....५१	[ ]
मूलं संसाररस होंति.....१६४ (भाग-२)	[ ]
मेहं पिवीलियाओ.....९	[सम्बोध प्रकरणे-११९६]
य एतान् वर्जयेद्दोषान्.....७७	[ ]
यथा धेनुसहस्त्रेषु.....२२४	[ ]
यदि पुत्राद् भवेत् स्वर्गो.....२३२	[ ]
यस्य बुद्धिर्न लिप्येत.....१२३	[ ]
या विचित्रविटकोटिनिघृष्टा.....६४	[ ]
युद्धसूरा वासुदेवा.....१७९	[ ]
यः संशयमपि कुर्यात्.....२७३ (भाग-२)	[ ]
रति माल्यालङ्कारैः.....२३८	[ ]
राइसरिसवमित्ताइं.....५७	[उत्त० निर्युक्तौ-१४०]
रिसी हि देवा य समं विवित्ता.....१८१	[ ]
लाभालाभे सुखे दुःखे.....८	[ ]
लाभालाभे सुखे दुःखें...शत्रौ मित्रे.....२३९	[ ]
लोभी पश्येद्धनप्राप्तिं.....१३६	[ ]
लोहाय नावं जलधौ.....२७८	[ ]
वरं वत्थं वरं पुप्फं.....२७८	[ ]
वालो सरस्स भंगं.....१०	[सम्बोध प्रकरणे-११९७]
विणयाओ नाणं, नाणाउ दंसणं.....१	[दशवैकालिके]
वियड खणावी तई छगल.....५६	[ ]
वीक्ष्यार्चितं पौरजनैः.....१३२	[ ]
वूढो गणहरसद्दो.....७३	[ ]
वेसाण मंदिरेषु.....८७	[ ]
शत्रोरपि गुणा ग्राह्या.....११	[ ]

शरीरमाद्यं खलु.....१९९	[ ]
शिरसः स्फुरणे राज्यं.....१२४	[ ]
शिल्पमध्ययनं नाम.....२३२	[ ]
शीतवाता-ऽऽतपैर्दंशैः.....७६	[ ]
शूरे त्यागिनि विदूषि च.....७५	[ ]
श्वेतं सुजातं सुविभक्तशृङ्गम्.....१३०	[ ]
संकंत दिव्वपेमा.....५७	[बृहत्संग्रहणौ...२३०]
सत्यं तपश्च सन्तोषः.....७८ (भाग-२)	[ ]
सपर संतावओ धम्मवणदावओ.....३०२	[ ]
सपरोवधाय जणणी.....२२ (भाग-२)	[ ]
समणे जह कूलवालए.....३	[ ]
सममश्रोत्रियदानं.....१९०	[ ]
समसंख्यावयवः सन्.....३०५	[ ]
समुच्छिम कम्मा.....११०	[विशेषा. ३२०८]
सम्यक्त्व ज्ञानशीलानि.....७६	[ ]
सरणागयाण विस्संभियाण.....८	[ ]
सर्वतः सुन्दराभिक्षा.....१४७	[ ]
सव्वन्नू सोमदंसण.....३०८	[ ]
सव्वे जीवावि इच्छिउं.....१०८-२७१	[दशवैकालिके ६/१२]
सव्वे पडुपन्ननेरइया.....७०	[ ]
सह क्लेवर खेदमचिन्तयन्.....११	[ ]
समाइयं समईयं.....६५ (भाग-२)	[आवश्यक निर्युक्तौ-८६४]
सालीभारेण तोयेण.....८६	[ ]
सिंहत्ताए निक्खमन्ति.....२४५	[ ]
सीयंति सव्वसत्ताइं.....२८१	[ ]
सुचिरमपि उषित्वा.....३०३	[ ]
सुच्चा जाणइ कल्लाणं.....२५२	[दशवैकालिके ४/११]
सुच्चा नेआउयं.....७७	[ ]
सुदुर्वहं परिज्ञाय.....१४७	[ ]
सुलभा सन्ति सर्वेषां.....१३६	[ ]
सो धम्मो जत्थ दया.....२३ (भाग-२)	[ ]
सोयंताणं पि नो ताणं.....२८२	[ ]
सोल चउक्का चउसट्ठि.....१५० (भाग-२)	[ ]
स्नानं मनोमलत्यागो.....१९७	[ ]
हंतूण परप्पाणे.....२६-२९५	[ ]
हियइच्छिया उ दारा.....२८३	[ ]

समाप्त



ભરત પ્રિન્ટરી (કાંતિલાલ ડી. શાહ) અમદાવાદ-૧. ફોન : ૨૧૩૭૯૬૪